The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR MICROFILMING BY: SMT. P.R. KANGLE IN MEMORY OF HER LATE FATHER R.P. KANGLE
Date 09/10/2009

295

201
1918

॥अथगूढार्थप्रकाशिका।पूर्वखंडः प्रारंभः॥पूर्वोत्तरखंड संख्या ५५००

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सू० प्र०

१

श्रीगणेशाय नमः॥ ॥ यत्स्मरत्वाभीष्टकार्यस्य निर्विघ्नां सिद्धिमेष्यति॥ नरस्तं बुद्धिदं वंदे वक्रतुंडं शिवोद्भवं॥१॥ पितरौ गोजिबल्लालौ
जयतां बाशिवालकौ॥ याभ्यां पंचस्कंता जाता ज्योतिः संसारहेतवः॥२॥ सार्वभौ जहागीरविश्वासास्यद भाषणं॥ यस्य तं भ्रातरं कृष्णबुधं वंदे ज
गद्गुरुं॥३॥ नाना ग्रंथान समालोच्य सूर्यसिद्धांतभाषणं॥ करोमि रंगनाथोदं तद्गूढार्थप्रकाशकं॥४॥ अथ ग्रहादिचरितजिज्ञासून्मुनीस्तत्प्रभ
कारकान प्रति स्वविदितं यथार्थतत्त्वं सूर्यांशपुरुषमयास्करसंवादं वक्तुकामः कश्चिदृषिः प्रथममारंभणीयतत्कर्मनिर्विघ्नसमाप्त्यर्थं कृतं ब्रह्मप्रणा
मं मंगलं शिष्यशिक्षार्थं निबध्नाति॥ ॥ अचिंत्याव्यक्तरूपाय निर्गुणाय गुणात्मने॥ समस्तजगदाधारमूर्तये ब्रह्मणे नमः इति॥ ॥ ब्रह्मणे बृहत्वा
दपरिछिन्नत्वाज्जगद्व्यापकायेश्वराय॥ तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतिप्रतिपाद्यायेत्यर्थः॥ नमः कायवाक्चेष्टोपलक्षितेन
मानसेंद्रियबुद्धिविशेषणमनस्त्वमुत्कृष्टस्त्वत्तो हमपकृष्ट इत्यादिरूपेण नतोस्मीत्यर्थः॥ ननु व्यापकत्वेनाकाशस्यैव सिद्धिरत आह॥ समस्तजग
दाधारमूर्तये इति॥ समस्तस्य स्थावरजंगमात्मकस्य जगत उत्पत्तिस्थितिविनाशावत आधाराश्रयभूताः ब्रह्मविष्णुशिवरूपाः मूर्तयः स्वरूपाणि य
स्य तस्मै ब्रह्मविष्णुशिवात्मकायेत्यर्थः॥ आकाशस्यतदात्मकत्वाभावान्न सिद्धिरिति भावः॥ नन्वेतादृशस्य स्वरूपध्यानं कर्तुं समुचितमित आह
॥ अचिंत्याव्यक्तरूपायेति अचिंत्यश्चासावव्यक्तरूपस्तस्मै अचिंत्यो ध्यानाविषयः अत्र हेतुरव्यक्तरूपः न व्यक्तं प्रकटं रूपं यस्य॥ तथा च स्वरूपध्या
नासंभवान्नमस्कार एव समुचित इति भावः॥ नव्यक्तरूपः कथमित्यत आह॥ निर्गुणायेति निर्गता गुणाः सत्वरजस्तमोरूपा यस्मात्तस्मै गुण
तीतायेत्यर्थः॥ तथा च गुणात्मकस्य व्यक्तरूपत्वेनायं तदभावादव्यक्तरूप इति भावः॥ नन्वेवमस्यारूपित्वमेव फलितं नाव्यक्तरूपित्वमित्यत आ
ह॥ गुणात्मने इति गुणाः नित्यज्ञानसुखादय आत्मगुणाः आत्मा स्वरूपं यस्य तस्मै नित्यज्ञानसुखात्मकाय॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुते
रित्यर्थः॥ तथा चास्यारूपित्वमसिद्धमिति भावः॥ साक्षान्निर्गुणाय परंपरया गुणात्मने॥ कथमन्यथा जगत्कर्तृत्वं संभवति॥ प्रकृतिं स्वामव
ष्टभ्य विसृजामि पुनः पुनः॥ भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशादिति भगवदुक्तेरित्यन्ये॥१॥ अथ स्वोक्तस्य स्वकल्पितत्वशंकानि १
रणाय तत्संवादोपक्रमं विवक्षुः प्रथमं मयासुरेण तपस्तप्तमिति॥ श्लोकाभ्यामाह॥ अल्पावशिष्टे तु कृते मयनामा महासुरः॥ रहस्यं परमं
पुण्यं जिज्ञासुर्ज्ञानमुत्तमं॥२॥ वेदांगमग्र्यमखिलं ज्योतिषां गतिकारणं॥ आराधयन्विवस्वंतं तपस्तेपे सुदुश्चरमिति॥३॥ मय इति नाम
यस्यासौ मयाख्यः महादैत्यः कश्चित्तपः अभिमतदेवताप्रीतिकरजपहोमध्यानाः स्वशरीरादिक्लेशरूपं नियमतपः कृतवान्॥ दैत्यानां तप
श्चरणं पुराणेषु प्रतिपदं सुप्रसिद्धं॥ ननु तत्र तेषां तपश्चरणस्य देवताविशेषमभिमतमुद्दिश्य प्रसिद्धरनेनकं देवमुद्दिश्य तपस्तप्तमित्य
त आह॥ आराधयन्निति॥ विवस्वंतं सवितृमंडलाधिष्ठातारं नारायणं सेवयन्॥ ननु दैत्यारिमेनं स्वशत्रुं ज्ञात्वाप्ययं कथं स्वाभिमतसिध्य

[redacted]

र्थमाराधनं हि शत्रुतः स्वहितासिद्धिरन्यथा शत्रुत्वव्याघात इत्यत स्तपोविशेषणमाह॥ सुदुश्चरमिति सुतरां दुःखेन त्यंतक्लेशैश्चरितं कर्तुमशक्
यमित्यर्थः॥ तथा च भक्तजनैकवत्सलतया तादृशतपश्चरणसुप्रसन्नो दैत्यानामप्यभिमतं पूरयतीति पुराणेषु शतशः प्रसिद्धमतस्तत्र
ती त्वाराधयन्निति भावः॥ ननु पुराणेषु दैत्यानां तपश्चरणोक्तिप्रसंगे क्वचिदप्यस्यानुक्तेस्तत्तपश्चरणं कथं प्रमाणं ज्ञेयमित्यत आह॥ अल्पावशि
ष्टे कृते कृते कृताख्ये युगचरणे तु करोत्संध्यासंध्यांशसहिते इत्यर्थः॥ तेन संध्यासंध्यांशसमेतकेवलकृतकपाभिमतकृतचरणे॥ न ग्रंथांतरो
क्तकेवलकृते इति पर्यवसन्नं॥ अल्पकालेन संध्यांशांतरगते समाप्त्यासन्नाभिमतं कृते युगे मयासुरेण तपस्तप्तमित्यर्थः॥ तथा च सांप्रत
मेवम यासुरेण तपस्तप्तमिति सर्वजनावगत प्रत्यक्षप्रमाणसिद्धं॥ नागमांतरप्रामाण्यमपेक्ष्यते इति भावः॥ ननु मयासुरेण किमर्थं तेन तपस्तप्त
नहि प्रयोजनमनुद्दिश्य मंदोपि प्रवर्तते इत्यतो मयासुरविशेषणमाह॥ जिज्ञासुरिति ज्ञायते अनेनेति ज्ञानं शास्त्रं ज्ञातुमिच्छुः॥ तथा
च शास्त्रज्ञाननिमित्तं तेन तपस्तप्तमिति भावः॥ किं तच्छास्त्रमित्यतो ज्ञानविशेषणमाह॥ ज्योतिषामिति॥ प्रवहवायुस्थानां ग्रहनक्षत्राणां ग
तिकारणं येगत्यर्थास्ते ज्ञानार्था इति गतेः संस्थानचलनादिज्ञानस्य कारणं प्रतिपादकं ज्योतिःशास्त्रं जिज्ञासुरिति फलितं॥ ननु ज्योतिः
शास्त्रज्ञानार्थं मयमायासो न युक्तस्तस्य सर्वविज्ञेयत्वेनादुरूहत्वादित्यत आह॥ अखिलमिति समग्रं ज्योतिःशास्त्रमित्यर्थः॥ तथा च ना
षीणां मानुषत्वेनैश्योमज्ञानमल्पं यथार्थवानभवतीति दैत्यबुद्धिनामत्वान्निःशेषस्य ज्योतिःशास्त्रस्य तु कहस्य विदितत्वं भगवंतं अप्रता
रकं सर्वज्ञं महागुरुं सेवयामासेति भावः॥ ननु तस्यासुरस्य ज्योतिःशास्त्रे प्रवृत्तिर्न युक्ता॥ फलाभावादित्यत आह॥ वेदांगमिति वेदस्यांगं
तथा चांगिनो यत्फलं तदेवांगस्येति मोक्षरूपफलसद्भावादत्र प्रवृत्तिर्युक्तेति भावः॥ अत एव पुण्यं पुण्यजनकं॥ पुराणन्यायेत्यादिचतुर्दश
विद्यांतर्गतत्वात्॥ नन्विदं वेदांगं कुत इत्यत आह॥ परममिति॥ कालोयं भगवान्विष्णुरनंतः परमेश्वरः तद्धेतापूज्यते सम्यक्पूज्यः कोन्यतमो
मत इत्युक्तेः कालप्रतिपादकत्वेनोत्कृष्टमतो वेदांगं एतेन पुराणादीनां निरास इति भावः॥ ननु व्याकरणादीनां षण्णां वेदांगत्वादस्मिन्नेव प्र
वृत्तिः कथमित्यत आह॥ अग्र्यमिति षण्णां वेदांगानां मध्ये श्रेष्ठं कुत इत्यत आह उत्तममिति ति मुख्यांगं नेत्रमित्यर्थः॥ तथा च नेत्ररहितस्याकिं
चित्करत्वादिदं ज्योतिःशास्त्रं वेदांगेषु श्रेष्ठमिति भावः॥ ननु तथाप्येतस्य ज्ञानार्थमेतावानायासो न युक्त इत्यत आह॥ रहस्यमिति॥ विद्या
ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि॥ असूयकायानृजवे यतायनमाब्रूया वीर्यवती तथा स्यां॥ मिति श्रुत्युक्ते गोप्यमित्यर्थः
तथा चास्य शास्त्रदेयत्वेन निश्चितत्वादनेन तत्प्राप्त्यर्थमेतावानथायासः कृत इति भावः॥३॥ ततस्तत्तोषे कोऽभयायेदं दत्तवानित्याह॥ तोषि

203
1918

तस्तपसातेनप्रीतस्तस्मैवरार्थिने॥ग्रहाणांचरितंप्रादान्मयायसवितास्वयमिति॥४॥स्वयंस्वतःप्रीतःसःस्वरूपःयःह्यशोभनोयंप्रत्यक्षःप्रीतःसंतुष्टो
२ पिसन्सवितासवितृमंडलमध्यवर्तीतेनस्वकदुश्चरेणतपसाआराधनेनतोषितःअत्यंतंसंतुष्टःतस्मैअसुरायमयनाम्नेवरार्थिनेवरंस्वाभिमतंज्यो
तिःशास्त्रंअर्थयतिज्ञातुमिच्छतितस्मैज्योतिःशास्त्रजिज्ञासवेग्रहाणांप्रवहवायुस्थग्रहताराणांचरितंज्ञानंप्रादात्प्रकर्षेणसाकल्येनयथार्थतत्वे
नआदात्दत्तवान्॥४॥नन्वयंसूर्यःस्वकार्यार्थंशरणागतमपिस्वशत्रुंप्रतिकथमिदमुक्तवानित्यतोमयंप्रतिसाक्षात्सूर्येणोक्तस्यवचनस्यानुवादार्थ
मुपक्रांतःप्रथमंतत्संगतिप्र दर्शकमेतदाह॥श्रीसूर्यउवाचेति॥ ॥सम्यगेदीप्यमानोर्कोमयासुरंप्रत्यवददित्यर्थः॥अन्यथाचतुर्थपंचम
श्लोकयोःसंगत्यनुपपत्तेः॥किमुवाचेत्यतस्तद्वचनमनुवदति॥विदितस्तेमयाभावस्तोषितस्तपसाह्यहं॥दद्यांकालाश्रयंज्ञानंग्रहाणांचरि
तंमहदिति॥स॥५॥हेमयासुरतेभावःमनोरथोज्योतिःशास्त्रजिज्ञासारूपःमयासूर्येणविदितःत्वदकथितोपिस्वतोज्ञातःततःकिंनस्येत
वताममतसिद्धिरतआह॥अहमिति॥तेइत्यस्यावृत्तिस्तेतुभ्यंज्ञानंशास्त्रंकालाश्रयंकालप्रधानंग्रहाणांप्रवहवायुस्थानांमहत्अपरिमेयंचरि
तंमाहात्म्यंग्रहस्थितिचलनादिप्रतिपादकंज्योतिःशास्त्रमितिफलितार्थःअहंसूर्यमंडलस्थःदद्यांदास्यामि॥ननुमांदैत्यंप्रतिइदंवाक्यंप्रतार
कंभविष्यतीत्यतःस्वविशेषेणमप्रतारणापूर्वकतत्कथनेहेतुभूतमाह॥तोषितइति॥हियतःतपसात्वत्कृताराधनेनअत्यंतंसंतुष्टोतोदद्या
मित्यर्थः॥तथाचत्वत्कर्मवश्येनमयाभक्तजनवत्सलतयाजातिवैरमुपेक्ष्यानुकंपितःअतःत्वंमत्प्रतार्योनुकंपितइतिभावः॥५॥ननुसूर्य
स्यतयाजात्यैवमानतयातत्तंनिधौश्रवणकालपर्यंतंमयस्थातुंकथंशक्तःकथंवानवरतभ्रमस्यतस्यमयसंवादार्थंभ्रमणविच्छेदःसंभव
स्यतोदानासंभवात्कथंदद्यामित्युक्तमित्यतस्तद्वचनांतरमनुप्रवदति॥नमेतेजःसहःकश्चिदाख्यातुंनास्तिमेक्षणः॥मदंशःपुरुषोयंतेनिः
शेषंकथयिष्यतीति॥६॥हेमयतेतुभ्यंअयंमदग्रस्थःपुरुषःनिःशेषंसंपूर्णंज्योतिःशास्त्रंवदिष्यति॥नन्वयंतथ्यंनवदिष्यतीत्यतआह॥म २
दंशइति॥ममसूर्यस्यांशःसंबंधीमदुत्पन्नइत्यर्थः॥तथाचमदनुकंपितंत्वांप्रत्ययंतथ्यमेववदिष्यतीतिभावः॥एतेनाहंस्वांशद्वारादास्यामीत्य
र्थोदद्यामितिपूर्वपद्योक्तस्यप्रकटीकृतःननुत्वमेववक्तव्यमित्यतआह॥नेतिकश्चिदपिजीवःमेसूर्यमंड लस्थस्यतेजःसहःतेजोधारकः
नतथाचबहुकालंमत्समीपेस्थातुमशक्तःत्वंकथंमतःश्रोष्यसीतिभावः॥ननुस्वतपःसामर्थ्येनाहंत्वत्समीपेबहुकालंस्थातुंशक्तःस्ततःश्रो
ष्यामीत्यतआह॥आख्यातुमिति॥मेसूर्यमंडलस्थस्यप्रवहवायुनानवरतंभ्रममाणस्यस्वशक्त्याकदाप्यस्थिरस्यकथयितुंक्षणःकालः
नास्तिभ्रमणावसानासंभवेनैकत्रस्थित्यसंभवात्तथाचास्थिरस्यतवबहुकालंमत्संगासंभवान्मत्तःश्रवणमसंभावितं॥नहित्वमपिमत्स्था
नमधिष्ठातुंशक्तोयेनमत्तःश्रवणंतवसंभवति॥ईश्वरनियोगाभावादितिभावः॥६॥अथसूर्यवचनानुवादमुपसंहरन्सूर्यांशपुरुषमयासुर

205/1918

संवादोपक्रममाह॥इत्युक्त्वांतर्दधेदेवःसमादिश्यांशमात्मनः॥सपुमान्मयमाहेदंप्रणतंप्रांजलिस्थितं॥७॥देवंसूर्यमंडलस्थइतिपूर्वो
क्तःउक्त्वाकथयित्वाआत्मनःस्वस्यअंशंअग्रस्थमंशपुरुषंसमादिश्यएवंमयंप्रतिसकलंग्रहमाहात्म्यंकथयेत्याज्ञाप्य॥विनाज्ञांसमयंप्रतिक
थयंकथयेत्समुच्चयार्थश्चकारोनुसंधेयःअंतर्दधेअंतर्ध्यानंसूर्यांशपुरुषंमयनेत्रागोचरतांप्राप्तवान्प्रकृतमाहसइतिसूर्याज्ञप्तःसूर्यांश
पुरुषःमयासुरंप्रतिइदंवक्ष्यमाणंअवदत्॥ननुतेनापृष्टोवदेदित्युक्तेर्मयापृष्टोयंकथंमयंप्रत्यवददित्यतोमयविशेषणद्वयमाह॥प्रणतंप्रांज
लिस्थितमिति॥प्रकर्षेणभक्तिश्रद्धातिशयेननतंनम्रंस्वनमस्कारकारकंप्रकृष्टोमानसचेष्टोयंमयंप्रत्यवददितिभावः॥७॥अथप्रतिज्ञा
तत्संवादेमयंप्रतिज्ञानंवक्तुकामःसूर्यांशपुरुषःसावधानतयामदुक्तंशृणुत्वमित्याह॥शृणुष्वैकमनाःपूर्वंयदुक्तंज्ञानमुत्तमं॥युगेयुगेमहर्षी
णांस्वयमेवविवस्वतेति॥ ॥हेमयएकस्मिन्नेवमनोयस्यासौअन्यविषयेभ्योनमःसमाहृत्यमदुक्तेमनोददानस्त्वंतत्ज्योतिःशास्त्रंशृणुष्वस्तो
त्रद्वारामनःसंयोगेनप्रत्यक्षंकुर्वित्यर्थः॥ननुत्वंस्वकल्पितंवदिष्यसीत्यतस्तद्बद्धसंबंधमाह॥पूर्वमित्यादियत्उत्तमंनेत्ररूपंज्ञानंशास्त्रंज्यो
तिःशास्त्रमित्यर्थःबहुकालांतरेणपूर्वकालेकदेत्यतआह॥युगेयुगेइतिप्रतिमहायुगेमहोमुनीनांतान्प्रतीतितात्पर्यार्थः॥सूर्येणस्वयंअहं
रकेणसाक्षादित्यर्थःएवकारोयत्वांप्रत्यहंद्वारंसाक्षात्कथनासंभवात्तथातान्प्रत्यहमन्योवाद्वारमित्यस्यवारणार्थकः॥तेषांस्वतपःसमाजव
शीकृतेश्वराणांतस्यसादाधिगताप्रतिहतेच्छानांसूर्यमंडलाधिष्ठानसंभवात्उक्तंउपदिष्टंतथाचसूर्योक्तांत्वांप्रतिकथ्यतेनस्वकल्पितमि
तिभावः॥८॥ननुप्रतियुगंसूर्योक्तस्यैक्याभावात्यत्किंयुगीयशास्त्रमुपदिश्यतेन्यथैकदोक्त्यायुगेयुगेइत्यस्यानुपपत्तेरित्यतआह॥
शास्त्रमाद्यंतदेवेदंयत्पूर्वंप्राहभास्करः॥युगानांपरिवर्तेनकालभेदोत्रकेवलमिति॥इदंमयातुभ्यंवक्ष्यमाणंज्योतिःशास्त्रंतत्सूर्योक्तंएवं
कारात्सूर्योक्ताभिन्नत्वेनत्वांप्रत्यनुवादोनकश्चित्स्वकल्पनातरेणेत्यर्थः॥आद्यंप्राक्कालेसूर्येणोक्तंनन्वासन्नयुगीयसूर्योक्तस्यापिपूर्व
कालोक्त्याद्यत्वसंभवइत्यतस्तदपेक्षितमाद्यपदविवरणरूपमाह॥यदितिशास्त्रंसूर्यःपूर्वंप्रथमंयस्मात्पूर्वमनुक्तमित्यर्थः॥प्राहप्रक
र्षेणविस्तरेणमुनीन्प्रत्युक्तवा+स+न॥तथाचप्रथमातिरेकेकारणाभावात्प्रथमस्यविस्तृतत्वादानंतरोक्तंपूर्वोक्तेगतार्थतयासंक्षिप्यमुपे
क्ष्यप्रथमयुगीयशास्त्रमुपदिश्यतेइतिभावः॥ननुतर्ह्यनंतरयुगीयशास्त्राणांसूक्तानांवैयर्थ्यप्रसंगइत्यतआहयुगानामिति॥महा
युगानांपरिवर्तेनपुनःपुनरावृत्त्याअत्रसूर्योक्तशास्त्रेषुभेदोनशास्त्रोक्तरीतिभेदइत्यर्थः॥तथाचकालवशेनग्रहचारेकिंचिद्वैलक्षण्यंभ
+केवलंस्वभिन्नाभावस्तन्मात्रयोमित्यर्थः॥कालभेदःकालकृतमंतरंपूर्वशास्त्रकालादनंतरंशास्त्रकालोभिन्नइत्येषुशास्त्रेषु+वतीतियुगां

सू० टी०
२

तरे तत्तदंतरं ग्रहचारेषु प्रसाध्यं तत्कालस्थितलोकव्यवहारार्थं शास्त्रांतरमिव रूपान्तरं कृतवानिति नानेतरशास्त्राणां वैयर्थ्यमेव च मया वर्त
मानयुगीयसूर्योक्तशास्त्रसिद्धग्रहचारं मंगीकृत्याद्यसूर्योक्तशास्त्रसिद्धं ग्रहचारं च प्रयोजनाभावादुपेक्ष्य तदुक्तमेवत्वां प्रत्युपदिश्यत इ
तिभावः॥ एवं युगमध्ये यथांतरकाले ग्रहचारे यत्तरदृर्शनेन तत्काले तदंतरं प्रसाध्य ग्रंथास्तत्कालवर्तमानाभियुक्ताः कुर्वंति॥ तदिदमंत
रं पूर्वग्रंथे बीजमित्यामनंति पूर्वग्रंथानां तु सत्वात्सूर्यबिंबसंवादो पीदानीं नदृश्यत इति तदप्रसिद्धिरागमप्रामाण्याच्च नाशंक्या॥ ९॥ अथ
काले भेदद्वयेनेनोपस्थितं कालं प्रथमं निरूपयिषुस्तावत्कालं विभजते॥ ॥ लोकानामंतकृत्कालः कालोन्यः कलनात्मकः स द्विधा स्थूल
सूक्ष्मत्वान्मूर्तश्चामूर्त उच्यत इति॥ ॥ कालो द्विधा एकः कालो खंडदंडायमानः शास्त्रांतरप्रमाणसिद्धः लोकानां जीवानामुपलक्षणाच्चे
तनानामपि अंतकृत् विनाशकः यद्यपि कालस्तेषां उत्पत्तिस्थितिकारकस्तथापि विनाशस्यानंतत्वात्कालत्वप्रतिपादनाय चांतकृदित्यु
क्तं॥ अंतकृदित्यनेनैवोत्पत्तिस्थितिकृदित्युक्तमन्यथा नाशासंभवात् अत एव कालः सृजति भूतानि कालः संहरति प्रजा इत्याद्युक्तं ग्रंथांतरे
अन्यो द्वितीयः कालः खंडकालः कलनात्मकः ज्ञानविषयस्वरूपः ज्ञातुं शक्य इत्यर्थः॥ सः द्वितीयः कलनात्मकः कल्ये पि द्विधा भेदद्वयात्मे
कः तदाह स्थूलसूक्ष्मत्वादितिमहत्त्वाणुत्वाभ्यां मूर्तः इयत्तावच्छिन्नपरिमाणः अमूर्तस्तद्भिन्नः कालतत्वविद्भिः कथ्यते चकारो हेतुक्रमे
ण मूर्तामूर्तक्रमार्थकः तेन महान्मूर्तः कालः अणुरमूर्तः काल इत्यर्थः॥ १०॥ यथोक्तं भेदद्वयं स्वरूपेण प्रदर्शयन् प्रथमभेदप्रतिपादयिषु
स्तदवांतरभेदे पुद्वयमाह॥ प्राणादिः कथितो मूर्तस्त्रुट्याद्यो मूर्तसंज्ञकः षड्भिः प्राणैर्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृतेति॥ ११॥ प्राण स्वस्थ
सुखासीनस्य श्वासोच्छ्वासांतर्वर्ती कालो दश गुर्वक्षरोच्चार्यमाणः आदिर्यस्यैतादृशः प्राणानंतर्गतः कालः मूर्त उक्तः त्रुटिराद्यो यस्यैता
दृशः प्राणांतर्गतः काले [illegible] त्रुटिरित्यर्थः एकप्राणांतर्गतत्रुटित्सरादिकः अमूर्तसंज्ञः अथामूर्तादिभूतस्य व्यवहारायोग्यत्वेना प्रधानतया नेतरो
द्दिष्टस्यभेदप्रतिपादनमुपेक्ष्य मूर्तकालस्य व्यवहारयोग्यत्वे प्रधानतया प्रथमोद्दिष्टस्य भेदानभिवक्तुः प्रथमं पलं घट्यावाह षड्भिरिति॥ षट्प्रमा
णैरसुभिः पानीयपलं भवति॥ पलानां षष्ट्या घटिका काकालतत्वज्ञैः॥ ११॥ ॥ अथ दिनमासावाह॥ नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितं
तत्त्रिंशताभवेन्मासः सावनोर्कोदयैस्तथेति॥ १२॥ घटीनां षष्ट्या अहोरात्रं नाक्षत्रमुक्तं तु कारोदहोरात्रस्य नाक्षत्रत्वोक्त्यान्यघट्या अपि नाक्ष
त त्रमुक्तं॥ एतत्षष्टिघटीभिर्भचक्रपरिवर्तनात्॥ नाक्षत्रदिनानां त्रिंशत्संख्यया मासो नाक्षत्रः मानानामनेकत्वेन सावनमासस्वरूपमाह॥ साव
न इतितथा त्रिंशदहोरात्रैः सूर्योदयसंबंधैः तदवधिकैः सूर्योदयादिसूर्योदयांतकालरूपैः काहोरात्रमानमापितै रित्यर्थः॥ सावनो मासः
१२॥ अथ चांद्रसौरमासनिरूपणपूर्वकं वर्षं वदन्दिव्यदिनमाह॥ ऐंदवस्तिथिभिस्तद्वत्संक्रांत्या सौर उच्यते॥ मासैर्द्वादशभिर्वर्षं दिव्यंतद २

Z 09
1918

हउच्यते इति॥ १३॥ तद्वत्त्रिंशतातिथिभिश्चांद्रो मासस्तत्र दर्शांतावधिकः पूर्णिमांतावधिकश्च शास्त्रे मुख्यतया प्रतिपादितः अत्र शास्त्रे तु दर्शांता
वधिक एव मुख्यः इष्टतिथ्यवधिकस्तु मासो गौणः संक्रांत्या संक्रांत्यवधिकेन कालेन सौरो मानज्ञैः कथ्यते॥ संक्रांतिस्तु सूर्यमंडलकेंद्रस्य राश्यादिप्र
देशसंचरणकालः॥ द्वादशभिर्मासैर्वर्षा यन्माने न मासास्तन्मानेन वर्षं ज्ञेयं॥ तद्वर्षं सौरमासस्यासन्नत्वात्सौरस्याह अहोरात्रं दिव्यादिवि भवेसौरव
र्षे देवानामहोरात्रमानेमानतत्त्वज्ञैः कथ्यत इत्यर्थः॥ १३॥ ननु देवानां यथाहोरात्रमुक्तं तथा दैत्यानामहोरात्रं कथं नोक्तमित्यत स्तदुक्त रवदन्देवासुर
वर्णयोमाह॥ सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्॥ तत्षष्टि युणा दिव्यं वर्षमासुरमेव चेति॥ १४॥ देवदैत्यानां वक्तव्यत्वाद्द्वयवचनं अन्योन्य
परस्परं विपर्ययात् व्यत्यासात् अहोरात्रं अयमर्थः देवानां यद्दिनं तदसुराणां रात्रिः देवानां या रात्रिस्तद्दैत्यानां दिनं। दैत्यानां यद्दिनं तद्देवानां रात्रिः
दैत्यानां या रात्रिस्तद्देवानां दिनमिति॥ तथा च देवदैत्ययोर्दिनरात्र्यो व्यत्यासाद्दैनमानेनेति॥ तयोरहोरात्रस्यैक्याद्देवाहोरात्रमानकथ
नेनैव दैत्याहोरात्रमानेमुक्तमिति भावः॥ युगकथनार्थं दिव्यवर्षपरिभाषया सुरगममपि विशेषयोतनार्थप्रकारांतरेणाह॥ तत्त्विरिति॥ दिव्या
होरात्रिषष्टिः देवदैत्यरूपा वर्षर्तुभिः षड्भिः गुणितादिव्यं आसुरं दैत्यसंबंधि च समुच्चयेते न द्वयोरित्यर्थः वर्षं॥ एवकारस्तयोर्दिनरात्र्योर्भेदेन व
र्षभेदः स्यादिति मंदशंकावारणार्थः॥ १४॥ अथ कल्पमानं विवक्षुः प्रथमं युगमानमन्यदपि श्लोकाभ्यामाह॥ तद्द्वादशसहस्राणि चातुर्युग
मुदाहृतं॥ सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः॥ १५॥ संध्यासंध्यांशसहितं विज्ञेयं तच्चतुर्युगं॥ कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थयेति॥
१६॥ तेषां दिव्यवर्षाणां द्वादशसहस्राणि चातुर्युगं चतुर्णां युगानां कृतत्रेताद्वापरकल्याख्यानां समाहारो योगस्तदात्मकं महायुगमित्यर्थः एतत्
यो तनार्थं चातुर्युगमित्युक्तिरन्यथा युगमित्युक्त्या तद्वयर्था पत्तेः मानाभिज्ञैरुक्तं॥ अथ सौरमानेन तत्संख्याविशेषं चाह॥ सूर्याब्दसंख्ययेति
तत्तदेवासुरवर्षमानेनोक्तं चतुर्युगं द्वादशसहस्रवर्षात्मकं महायुगं संध्यांशसहितं युगचरणस्याद्यंतयोः क्रमेण प्रत्येकं संध्यासंध्यांशाख्यौ यु
क्तं स देवसंध्यासंध्यांशावंतर्गतौ न पृथगत्रेत्येतादृशः सौरवर्षप्रमाणेन॥ द्वित्रिसागरैः अंकानां वामतो गतिरित्यनेन द्वात्रिंशदधिकैश्चतुःश
तमितैः अयुतेन दशसहस्रेण गुणितैः खचतुष्कद्वात्रिंशच्चतुर्भिः परिमितं ज्ञेयमित्यर्थः॥ अथ चतुर्युगांतर्गतयुगोपघ्नीणां विशेषतो मानाश्रवणा
त्समं स्यादश्रुतत्वादिति न्यायेन प्रत्येकं महायुगचतुर्थांशो मानमिति चातुर्युगमित्यनेन फलितं निषेधति॥ कृतादीनामिति। कृतत्रेताद्वापरक
लियुगानां धर्मपादव्यवस्थया धर्मचरणनां स्थित्या॥ इयं वक्ष्यमाणव्यवस्था स्थितिर्ज्ञेया॥ न तु समकलप्रमाणास्थितिः॥ अयमर्थः कृतयुगे च
तुश्चरणो धर्म इति तस्य मानमधिकं॥ ततस्त्रेतायां धर्मस्य त्रिपादत्वात्तदनुरोधेन त्रेतामानं न्यूनं। एवं द्वापारकल्योर्धर्मस्य क्रमेण द्व्येकचर
णत्वात्त्रेताद्वापरमानाभ्यां क्रमेणोक्तानुरोधान्न्यूनमानं न सममानमिति॥ १६॥ अथ सर्वधर्मचरणयोगेन दशांशमितेन महायुगं भवति॥ तर्हि

स्वस्वधर्मचरणैः किमित्यनुपातेन पूर्वोक्तफलितेन कृतादियुगानां मानज्ञानं सविशेषमाह ॥ युगस्य दशमो भागश्चतुस्त्रिद्व्येकसंगुणः ॥ क्रमात्कृतयुगादीनां षष्ठांशः संध्ययोः स्वकः इति ॥ १७ ॥ प्रागुक्तदिव्यवर्षद्वादशसहस्रमितस्य युगस्य दशमो भागः दशांश इत्यर्थः ॥ चतुर्भिः क्रमेण चतुस्त्रि-
द्व्येकैर्गुणितः गुणक्रमात् । कृतयुगादीनां कृतत्रेताद्वापारकलियुगानां मानस्यादिति शेषः ॥ ननु मनुग्रंथे कृतादिमानं दिव्यवर्षप्रमाणेन ४०००
३०००।२०००।१००० अत्र तु तन्मानं तद्वर्षप्रमाणेन ४८००।३६००।२४००।१२०० विरोध इत्यत आह षष्ठ इति स्वकः स्वसंबंधी षष्ठो विभागः
संध्ययोः आद्यंतसंध्ययोरेकत्र काल इति शेषः ॥ तथा च मनुक्तमानानि ८००।६००।४००।२००। एषां षडंशाः ८००।६००।४००।२०० एते द्व
स्वयुगानामाद्यंतयोः संध्योर्योगाः इत्येषामर्धं संधिकालः प्रत्येकमाद्यंतयोः संधिकालः ४००।३००।२००।१०० अनेन प्रत्येकं मनुक्तमानं स्पष्टी
कृतग्रंथांतरोक्तं केवलं मानं भवति । न स्वसंधिभ्यां रहितं यथा कृतादिसंधिः ४०० कृतमानं ४००० कृतांतसंधिः ४०० त्रेतादिसंधिः ३०० त्रेतामानं
३००० त्रेतांतसंधिः ३०० द्वापारादिसंधिः २०० द्वापारमानं २००० द्वापारांतसंधिः २०० कल्यादिसंधिः १०० कलिमानं १००० कल्यंतसंधिः १००
एवं च स्वसंधिभ्यां सहितं मयोक्तं ॥ स्वसंबंधात्संध्ययोस्तदंतर्गतत्वाच्चेति न विरोध इति भावः ॥ १७ अथ कल्पमानार्थं अनुमानं तत्संधिमानं चा
ह ॥ युगानां सप्ततिः सैका मन्वंतरमिहोच्यते ॥ कृताब्दसंख्या तस्यांते संधिः प्रोक्तो जलप्लव इति ॥ युगानां सैका सप्ततिः एकसप्ततिः महायुग
मित्यर्थः । इह मूर्तकाले मन्वंतरं तत्समाप्तिकालयोरंतरकालमानमित्यर्थः मूर्तकालमानभेदाभिज्ञैः कथ्यते ॥ तस्य मनोः अंते च विरामे जा
ते सति कृताब्दसंख्या मनुक्तकृतयुगवर्षमितिः संधिः कालविधिः प्रकर्षेण न द्वितीयमन्वारंभपर्यंतं भूतभाविमन्वोरंतिमादिसंधिरूपैक
कालेन कथितः ॥ तत्स्वरूपमाह जलप्लव इति ॥ जलपूर्णा सकला पृथ्वी तस्मिंल्लोकसंहारकाले भवति ॥ १८ ॥ अथ कल्पमानं विशेषमाह ॥ स
संधयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश ॥ कृतः प्रमाणः कल्पादौ संधिः पंचदशः स्मृत इति ॥ १९ ॥ त एव सप्ततियुगरूपाः मनवः स्वायंभुवाद्याः ससं
धयः स्वस्वसंधिसंहिताः ॥ चतुर्दशसंख्याकाः कल्पकाले ज्ञातव्याः ससंधियुक्तचतुर्दशमनुभिः कल्पः स्यादित्यर्थः ॥ ननु ग्रंथांतरे कल्पमा
नं युगसहस्रं ॥ त्वया तु युगमानमेकसप्ततिगुणं मनुमानं ३०६७२०००० कृताब्दयुक्तं १७२८००० ससंधिमनुमानं ३०८४४८००० इदं चतु ४
र्दशगुणं कल्पप्रमाणं कृतो न युगसहस्रमित्यत आह ॥ कृतप्रमाण इति ॥ कल्पादौ प्रथममन्वारंभे कृतयुगवर्षमितः मनोश्चतुर्दशत्वेप्या
द्यः पंचदशकः संधिः कालज्ञैरुक्तः ॥ तथा च कृतवर्षानंतरं प्रथममन्वारंभ इति तद्वर्षयोजनेन न विरोध इति भावः ॥ १९ ॥ अथ ब्रह्मणो दिनरात्र्योः
प्रमाणमाह ॥ इत्थं युगसहस्रेण भूतसंहारकारकः ॥ कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती इति ॥ २० ॥ इत्थं पूर्वोक्तप्रकारसिद्धेन युगसहस्रे
ण भूतसंहारकारकः आत्मलयात्मकः कल्पकालः ब्राह्मं ब्रह्मणः संबंधि अहो दिनं कालज्ञैरुक्तं ॥ तस्य ब्रह्मणः तावती दिनपरिमिता शर्वरी

209
1918

रात्रिः कल्पद्वयं तदहोरात्रमिति फलितार्थः ॥ २० ॥ अथ ब्रह्मणः आयुः प्रमाणमतीतवयः प्रमाणं चाह ॥ परमायुः शतं तस्य तयाहोरात्रसंख्यया ॥ आयु
षोर्धमितं तस्य शेषकल्पोयमादिम इति ॥ २१ ॥ परं अपरं त्वं शृणु ॥ पूर्वोक्तं त्वया श्रुतं अपरं वक्ष्यमाणं शृणु त्वं ॥ यद्वा परमेति दैत्यवरार्थकं संबोधनं तं तस्य ब्रह्म
णः तया पूर्वोक्तया अहोरात्रमित्यादिकल्पद्वयरूपया शतं शतवर्षपरिमितं आयुः शरीरधारणकालं जानीहि एतदुक्तं भवति ॥ अहोरात्रमानात्स्वर्षप
रिभाषया मासमासमानं तत्स्यात्पूर्वोक्तपरिभाषया ब्रह्मणो वर्षमानमेतच्छतसंख्यया ब्रह्मायुरिति ॥ न तु श्रुतार्थे न कल्पशतद्वयमायुः ॥ कीटादीना
मपि दिनसंख्यया युषोनुक्तेः स्फुटतरां ब्रह्मणः शतदिनात्मकायुषोः संभवात् ॥ निजेनैव तु मानेन आयुर्वर्षशतं स्मृतमिति विष्णुपुराणोक्तेश्च शतेन
परमायुरिति निरस्तं ब्रह्मणो नियुतायुर्दायासंभवात् तस्य ब्रह्मणः आयुषः शतवर्षरूपस्य अर्धं पंचाशद्वर्षपरिमितं इतं गतं अयं च वर्तमानः आ
दिमः प्रथमः शेषकल्पः शेषायुर्दायस्य ब्रह्मदिवसः उत्तरार्धस्य प्रथमदिवसो वर्तमान इति फलितार्थः ॥ २१ ॥ अथ वर्तमानेस्मिन्दिवसेप्येतद्ग
तमित्याह ॥ कल्पादस्माच्च मनवः षट् व्यतीताः ससंधयः ॥ वैवस्वतस्य च मनो युगानां त्रिघनो गत इति ॥ २२ ॥ अस्माद्वर्तमानात्कल्पाद्ब्रह्मदिवसात्
षट्संख्याकाः मनवः एकसप्ततियुगरूपाः ससंधयः सप्तभिः संधिभिः कृतयुगप्रमाणैः सहिताः व्यतीताः गताः चकारः आयुषोर्धमितमिति
प्रागुक्तेन समुच्चयार्थकः वर्तमानस्य सप्तमस्य मनोर्वैवस्वताख्यस्य युगानां त्रिघनः स्थानत्रयस्थितत्रितुल्यानां घातः सप्तविंशतिसंख्या
त्मकः सप्तविंशति युगानि गतानीत्यर्थः च समुच्चये ॥ २२ ॥ अथ वर्तमानयुगस्यापि गतमेतदिति वदन्नाभिमतकाले गतो वर्षगणः कार्य इ
त्याह ॥ अष्टाविंशाद्युगात्स्माद्यातमेतत्कृतं युगं ॥ अतः कालं प्रसंख्याय संख्यामेकत्र पिंडयेदिति ॥ २३ ॥ अष्टाविंशतिमाद्वर्तमानान्महायुगादे
तत्कल्प्यकालेन पूर्वकाले सांप्रतं स्थितं कृतयुगं तेग अतः कृतयुगानंतरं अभिमतकाले कालं वर्षात्मकं प्रसंख्याय गणयित्वा संख्याः पंचस्था
नस्थितां भिन्नां एकत्र एकस्थाने पिंडयेत् ॥ संकलनविषयां कुर्यात् ॥ सर्वेषां गतानां योगं कुर्यादित्यर्थः ॥ २३ ॥ अथ कल्पादितो ग्रहादिभचक्रनि
योजनकालं ग्रहगतिप्रारंभरूपमाह ॥ ग्रहर्क्षदेवदैत्यादि सृजतोस्य चराचरं ॥ कृताद्रिवेदा दिव्याब्दाः शतघ्ना वेधसो गता इति ॥ २४ ॥ अस्य व
र्तमानस्य ब्रह्मणः ग्रहनक्षत्रदेवदैत्यमानवराक्षसपर्वतवृक्षादिकं चराचरं जंगमस्थावरात्मकं जगत् सृजतः सृजतीति सृजत् तस्य ज
गन्निर्मायकस्य शतसंख्यागुणिताः चतुःसप्तत्यधिकचतुःशतसंख्या दिव्याब्दाः गताः एभिर्दिव्यवर्षैः ग्रहसृष्ट्यादि प्रवहवायुनियोजनांतं क
र्म ब्रह्मणा कृतमिति फलितार्थः ॥ २४ ॥ अथ ग्रहपूर्वगत्युत्पत्तौ कारणमाह ॥ पश्चाद्व्रजंतोतिजवान्नक्षत्रैः सततं ग्रहाः ॥ जीयमानस्तु लंबंते तु
ल्यमेव स्वमार्गगा इति ॥ २५ ॥ पश्चात् अनंतरं पुनरावृत्त्या पश्चात् पश्चिमदिगभिमुखं नक्षत्रैः तारकाभिः सह ग्रहाः सूर्यादयः अतिजवात् प्रवह
वायुसत्वरगतिवशात् सततं निरंतरं व्रजंतः गच्छंतः स्वमार्गगाः स्वकक्षावृत्तस्थाः जीयमाना नक्षत्रैः पराजिताः नक्षत्राणामग्रे गमनात् अत एव

लज्जयेव गुरुभूता इति तात्पर्यार्थः॥ तुल्यं समं एवकारादधिकन्यूनं व्यवच्छेदः। लंबंतः स्वस्थानात् पूर्वस्मिन् लंबायमाना भवंति॥ यथा लज्जितः
पश्चाद्भवति नाग्रे तु क्रारादधोधः कक्षाक्रमानुरोधेन शन्यादिग्रहाणां चंद्रांतानां गुरुत्वापचयः॥ शनिरिति गुरुस्तस्मात् किंचिन्न्यूनो गुरुस्तस्मादपि
भौम इत्यादि यथोत्तरं॥ यस्य कक्षा महती तस्य गुरुत्वाधिक्यं यस्य लघ्वी तस्य तदनुरोधेन गुरुत्वाल्पत्वमिति॥ एतदुक्तं भवति॥ ब्रह्मणा प्रवहवायो
नक्षत्राधिष्ठितो मूर्तो गोलः स्थापितः स्तदंतर्गताः स्वस्वकाशगोलस्थाः शन्यादयो नक्षत्राधिष्ठितमूर्तगोलस्थक्रांतिवृत्तस्थरेवती योगता
रासन्नरूपमेषादिप्रदेशासमस्तत्रस्थाः स्थापिताः क्रांतिवृत्तं तु मेषतुलास्थाने विषुववृत्तलग्नसंपातात्रिभांतरितक्रांतिवृत्तप्रदेशौ स्वासन्न
विषुववृत्तप्रदेशाभ्यां चतुर्विंशत्यंशांतरेण दक्षिणोत्तरौ मकरकर्कादिरूपौ तदेव द्वादशराश्यात्मकं वृत्तं ग्रहचारस्थलभूतं विषुववृत्तं तु ध्रुवम
ध्यस्थं निरक्षदेशोपरिगं॥ तत्र प्रवहवायुना स्वाघातेन मूर्तो नक्षत्रगोलो नाक्षत्रषष्टिघटीभिः परिवर्त्यते॥ तदंतर्गतवायुभिस्तदाघातेन वा
ग्रहाः भ्रमंत्यपि नक्षत्रगोलस्थितक्रांतिवृत्तीयमेषादिप्रदेशेन समं न गच्छंति॥ वायूनां स्वल्पत्वात्तदाघातस्याप्यल्पत्वात् शीघ्रगामिनां गुरु
त्वात् अतस्तत्स्थानाद्ग्रहाणां लंबनं दृश्यते। अत एव नक्षत्रोदयकाले तेषां स्थितौ यद्दिने नोदयः किंतु ग्रहो लंबितप्रदेशेन वायुना तदनंतरमू
र्ध्वमागच्छतीत्यनंतरमुदयः॥ लंबनं तु शन्यादीनां कक्षानुरोधेन गुरुत्वाद्बाहूनां तद्धूतानां वा कक्षानुरोधेन बहुल्पात्वात्तुल्यं यद्यपि वायो
र्ध्रुवानुरोधेन सत्वाद्ग्रहाणां लंबनं विषुववृत्ते भवितुमुचितं न क्रांतिवृत्ते। तथा च वक्ष्यमाणक्रांत्यनुपपत्तिः क्रांतिवृत्तस्थद्वादशराशिभोगेन वक्ष्य
माणानां भगणानामनुपपत्तिश्च तथापि वायुना विलंबितो ग्रहो विषुवमार्गगोऽपि तद्विषुवप्रदेशासन्नक्रांतिवृत्तप्रदेशेन ग्रहाकाशगोल एव स्वसम
सूत्रेणाकृष्यते इति नानुपपत्तिरत एव स्वमार्गगा इति क्रांतिवृत्तानुस्यूतस्वाकाशगोलस्थकक्षामार्गगता इत्यर्थकमुक्तमिति संक्षेपः॥२५॥
अथात एव ग्रहाणां लोके प्राग्गतित्वं सिद्धमित्याह॥ प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः। परिणाहवशाद्भिन्ना तद्वशाद्भानि भुंजते॥ इति॥
२६॥ अत अवलंबनादेव तेषां ग्रहाणां प्राग्गतिकरणानभिज्ञैः प्रत्यक्षावगततया तच्छक्तिजनिता कल्पितेत्यर्थः॥ सा कियतीत्यत आह॥ भ
गणैरिति वक्ष्यमाणभगणैः प्रत्यहं प्रतिदिनं गतिः प्राग्गमनरूपा भगणानां प्रत्युत्पन्नत्वाद्युगणसंबंधिवक्ष्यमाणदिनैः सूर्यसावनैर्ग्रहभग
णाः लभ्यं तेन तदैकेन दिनेन के इत्यनुपातात् ज्ञेया॥ ननु ग्रहभगणानां तुल्यत्वाभावात् प्रतिदिनं ग्रहगतिर्भिन्नेति पूर्वं लंबनरूपा ग्रहगति
रयुक्तोक्ता ग्रहलंबनस्याभिन्नत्वादित्यत आह परिणाहवशादिति परिणाहः कक्षापरिधिः तद्वशात् तदनुरोधात् इयं ग्रहगतिर्भिन्ना
अतुल्या अयमभिप्रायः ग्रहाणां लंबनं तत्प्रदेशेन परं तु स्वस्वकक्षायां तत्प्रदेशे तुल्या याः कलास्ता गतिकलास्ताः स्वल्पमहतिकक्षावृत्ते
ल्याः लघुकक्षावृत्ते बह्व्यः॥ सर्वकक्षापरिधीनां चक्रकलांकितत्वात्॥ भगणास्तु गतिवशादेव॥ यस्य कक्षावृत्तं महत्तस्याल्पाः यस्य च

लघुकक्षावृत्तं बहवस्तत्तुल्यत्वागतिरपि न यथेति न विरोधः। नन्वेकरूपगतिं विवाहभिन्नरूपगतिः कथमंगीकृतेत्यत आह॥ तद्वशादिति भिन्न
गतिवशात् भानि राशयो नक्षत्राणि भुंजते ग्रहा भुंजंतीत्यर्थः॥ तथा च ग्रहराश्यादिभोगज्ञानार्थमियमेव गतिरुपयुक्ता नैकरूपेति भावः॥२६
अथ भभोगे विशेषं वदन् वक्ष्यमाणभगणस्वरूपमाह॥ शीघ्रगस्तान्यथाल्पेन कालेन महतापरगः॥ तेषां तु परिवर्तेन पौष्णांते भगणः स्मृत
इति॥२७॥ अथ शब्दः पूर्वोक्तविशेषसूचकः शीघ्रगतिर्ग्रहः तानि भानि अल्पेन कालेन भुनक्ति। अल्पगतिर्ग्रहो बहुना कालेन भानि भुन
क्ति। अल्पगतिर्ग्रहो तुल्यराश्यादिभोगो मंदशीघ्रगतिग्रहयोस्तुल्यकालेन न भवतीति विशेषार्थः॥ तेषां राशीनां परिवर्तेन भ्रमणेन तु
काराद्ग्रहादिगतिभोगजनितेन भगणाः प्राज्ञैरुक्ताः क्रांतिवृत्ते द्वादशराशीनां सत्वात्तद्भोगेन चक्रभोगसमाप्तेर्यत्स्थानमारभ्य चलितो ग्रहः
पुनस्तत्स्थानमायाति स चक्रभोगः परिवर्तसंज्ञोऽपि द्वादशराशिभोगो भगण इत्यर्थः॥ ननु क्रांतिवृत्ते सर्वप्रदेशेभ्यः परिवर्तसंभवः कुत्र
कः परिवर्तावधिभूतः प्रदेश इत्यत आह॥ पौष्णांते इति॥ सृष्ट्यादौ ब्रह्मणा क्रांतिवृत्ते रेवतीयोगतारासन्नप्रदेशे सर्वग्रहाणां निवेशितत्वा
त्तदवधितो ग्रहचलनाच्च पौष्णस्य रेवतीयोगताराया अंते निकटप्रदेशे तथा च रेवतीयोगतारासन्नाग्रिमस्थानमेवाद्यंतावधिभूतमिति
भावः॥२७॥ ननु परिवर्तस्य भगणसंज्ञात्वयुक्ता त्वादिराशीनामपि भगणत्वादित्यतः परिभाषाकथनच्छलेन भगणस्वरूपमाह॥ विक
लानां कला षष्ट्या तत्षष्ट्या भाग उच्यते॥ तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते॥२८॥ यथा मूर्तकाले प्राणकाल आदिभूतस्तथा क्षेत्र
परिभाषायां विकला सूक्ष्मादिभूता तासां षष्ट्यैका कला कलानां षष्ट्या भागोंशः क्षेत्रपरिभाषाभिज्ञैः कथ्यते॥ भागत्रिंशता राशिस्या
त्ते राशयः सकला द्वादशैव एवकारस्त्रिचतुरादीनां निरासार्थं तथा च साकल्येगणपदप्रयोगाद्गस्य भोगेऽपि भगणव्यवहारश्च पू
र्वोक्तं युक्तमिति भावः॥२८॥ अथ भगणान् विवक्षुः प्रथमं सूर्यबुधशुक्राणां भौमगुरुशनिशीघ्रोच्चानां च भगणानाह॥ युगे सूर्यज्ञशुक्रा
णां खचतुष्करदार्णवाः॥ कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनां॥२९॥ महायुगे सूर्यबुधशुक्राणां खानां चतुष्कं॥ एकस्थानादि
सहस्रस्थानां तच्चतुःस्थानस्थितानि शून्यानि॥ ततो युतादि प्रयुतस्थानपर्यंतं दंतसमुद्राः तथा च युगसौरवर्षाणि खाभ्रखाभ्रद्वि
रामवेदमितानि भगणाः द्वादशराशिभोगात्मकपरिवर्तानां संख्याः भवंतीति शेषः॥ भौमशनिबृहस्पतीनां यानि शीघ्राणि शीघ्रोच्चा
नि तेषां एतन्मिताः भगणाः चकारः समुच्चयार्थकोनुसंधेयः॥ अत्र कक्षाक्रमेण वारक्रमेण वा गुरोः खलु मध्यगता भवतीति न तथो
क्ताः स्वतंत्रे छस्थानि योगानर्हत्वाद्॥ नन्वाकाशे एषां बिंबाभावाद्वना संभवेन गत्यभावात्कथं भगणा उक्ता इत्यत आह॥ पूर्वयायिनां
मिति पूर्वगामिनां तथा च तेषामदृश्यरूपाणां पूर्वगतिसद्भावाद्गणोक्तौ न क्षतिः। एषां स्वरूपादिनिर्णयस्तत्स्पष्टाधिकारे प्रतिपाद

2:11
1918

ष्यिते ॥२९॥ अथ चंद्रभौमयोर्भगणानाह । चंद्रे रसाग्नित्रित्रीषुसप्तभूधरमार्गणाः ॥ दस्त्रत्र्यष्टरसांकाक्षिलोचनानि कुजस्य तु ॥३०॥ पूर्वश्लोके
कभगणा इत्यस्मिन् श्लोके षष्ठ्यन्वेति ॥ भूधराः सप्त न तु पर्वतस्य धराभिधानत्वादेकसंप्रतिः ॥ मार्गणाः शराः तथा च चंद्रस्य भगणाः षडग्नित्रित्रिपंच
सप्तसप्तपंचमिताः ॥ भौमस्य तु कारादाकारात्स्फुटबिंबात्मकस्येति पुनरुक्तिभ्रमवारणार्थं ॥ द्वित्र्यष्टषडंकद्विमिताः ॥३०॥ अथ बुधशीघ्रोच्चगु
र्वोर्भगणानाह ॥ बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यंकनगेंदवः ॥ बृहस्पतेः खदस्राक्षिवेदषड्वह्नयस्तथा ॥ बुधशीघ्रोच्चस्यादृश्यरूपस्य पूर्वगते
र्भगणाः ॥ षष्टिसप्ततित्र्यंकात्यष्टिमिताः ॥ बृहस्पतेस्तथा बिंबात्मकस्येति पुनरुक्तिभ्रमवारणाय ॥ नखद्विवेदषड्राममिताः ॥३१॥ अथ
शुक्रशीघ्रोच्चशन्योर्भगणानाह ॥ सितशीघ्रस्य षट्सप्तत्रियमाश्विखभूधराः ॥ शनेर्भुजंगषट्पंचरसवेदनिशाकराः ॥३२॥ शुक्रशीघ्रो
च्चस्यादृश्यरूपस्य पूर्वगतेर्भगणाः षट्सप्तत्रिद्विद्विखसप्त ॥ एतेन भूधरा इत्यस्यैकसप्ततरेकादशो वार्थो निरस्तः ॥ शनेर्बिंबात्मकस्याष्टषट्पं
चरसेंदुमिताः ॥३२॥ अथ चंद्रस्योच्चपातयोर्भगणानाह ॥ चंद्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवा युगे ॥ वामं पातस्य वस्वग्नियमाश्विशिखदस्र
काः ॥३३॥ चंद्रमंदोच्चस्य पूर्वदृश्यरूपस्य भगणाः महायुगे रामनखाष्टाष्टवेदमिताः ॥ पातस्य चंद्रशब्दस्य संनिहितत्वाच्चंद्रपातस्यादृश्य
रूपस्य वामं पश्चिमगत्या द्वादशराशिभोगात्मकपरिवर्तरूपभगणाः महायुगेऽष्टरामाकृतिरामद्विमिताः ॥ अत्र युगे ग्रहाणां वक्ष्यमाणग्रहो
च्चपातभगणसंबंधित्वस्य कालवारणार्थं ॥ ग्रहोच्चपातभगणास्तु योगेनोक्ता इत्यस्मिन् युगसंबंधप्रसंगेनोक्ताः ॥ मंदोच्चपातस्वरूपादि
निर्णयस्तु स्पष्टाधिकारे व्यक्तो भविष्यति ॥३३॥ अथ युगे नाक्षत्रदिवसांस्तत्स्वरूपावगमाय ग्रहसावनदिनस्वरूपं स्वसंख्याज्ञानहेतुके
नाह ॥ भानामष्टाक्षिवसुद्रिद्विद्व्यष्टशररेंदवः ॥ भोदया भगणैः स्वैः स्वैरूनाः स्वस्वोदया युगे ॥३४॥ भानां नक्षत्राणां स्वतो गत्यभावेऽपि प्र
वहवायुना परिभ्रमणात्तत्संख्या भगणाः खरिनतुल्याः ॥ अत एवात्र वाममिति पूर्वोक्तस्य युक्तोऽन्वयः ॥ अष्टद्व्यष्टनगाग्निजातिगजद्विनं
मिताः ॥ ननु ग्रहाणामपि प्रवहवायुना परिभ्रमणेनोदयसद्भावात्तेषां दिवसाः कथं ज्ञेया इत्यत आह ॥ भोदया इति उदयो यस्मिन्नहनि स्वा
तावधिरूपे इति व्युत्पत्त्योदयशब्देन दिनं ॥ तथा च भोदयाः नाक्षत्रदिवसाः एते उक्ताः स्वैः स्वैः स्वकीयैर्भगणैः प्रागुक्तैर्वर्जिताः संतः स्वस्वो
दयाः निजनिजसावनदिवसाः युगे भवंति ॥ युगे इत्यनेनाभीष्टे काले नाक्षत्रदिवसाः ग्रहगतभोगादिस्थाने हीनं कार्यमन्यथा विजानीयतादृ
तरानपपत्तिरिति सूचितं ॥ अत्रोपपत्तिः ॥ यदि ग्रहाणां प्राग्गमनावलंबनं न स्यात्तर्हि ग्रहोदयनक्षत्रोदययोरेकहेतुत्वान्नाक्षत्रसावनदिनसं
ख्ययोरभेदः स्यात् ॥ ग्रहाणां लंबनेनाक्षत्रलंबनेभ्यः सावनदिवसानामंतरितत्वाद्वलंबनजभगणांतरेण युगे नाक्षत्रदिवसेभ्यो ग्रहसावन
दिवसाः न्यूना भवंति ॥ प्रवहेण भगणतुल्यदिपश्चिमग्रहपरिवर्तानामकरणादित्युपपन्नं भोदया इत्यादि ॥ अनेनैव भगणसावनयोगो नाक्षत्रदि

213
1918.

वसा इत्यप्यर्थसिद्धं ॥३४॥ अथ वक्ष्यमाणचांद्रमासाधिमासयोः संख्याज्ञानहेतुकं स्वरूपमाह ॥ भवंति शशिनो मासाः सूर्येंदुभगणांतरं ॥ रवि
मासोनितास्ते तु शेषाः स्युरधिमासकाः ॥३५॥ सूर्यचंद्रभगणयोरंतरं चंद्रस्य मासाः भवंति ॥ ते चांद्रमासाः रविमासोनिताः ॥ अत्र प्रथमं तुक्रा
रान्वयात् द्वादशगुणितरविभगणरूपवक्ष्यमाणार्कमासैरूनाः संतः शेषा अवशिष्टा ये चांद्रमासास्ते अधिमासा एव भवंति नान्ये ॥ अनेन चांद्र
त्वमधिमासानां स्पष्टीकृतं ॥ अत्रोपपत्तिः ॥ त्रिंशत्तिथ्यात्मकस्य रवींदुयुतिकालरूपदर्शावधेश्चांद्रमासस्य द्वादशराशिमितेसूर्येणांतरेणैव
सिद्धिः ॥ कथमन्यथा दर्शांते ज्ञानस्य मंदशीघ्रयोः सूर्येंद्वोर्योगस्य पुनर्दर्शांते संभवः ॥ द्वादशराश्यंतरं त्वेकं भगणांतरमतो भगणांतरेण चांद्रमा
सः सिद्धः ॥ सौरमासापेक्षया यदंतरेण चांद्रमासानामधिकत्वं ते चाधिमासा इति स्वरूपमेव वक्ष्यमाणोपयोगात्परिभाषितं ॥३५॥ अथ वक्ष्य
माणावमसूर्यसावनयोः स्वरूपमाह ॥ सावनाहानि चांद्रेभ्यो द्युभ्यः प्रोह्य तिथिक्षयाः ॥ उदयादुदयं भानोर्भूमिसावनवासराः ॥३६॥ चांद्रेभ्यो
द्युभ्यः वक्ष्यमाणचांद्रदिनेभ्यः सकाशादित्यर्थः ॥ सावनाहानि सावनदिनानि प्रोह्य त्यक्त्वा अवशेषं तिथिक्षयाः ॥ तिथिषु चांद्रदिनेषु सावन
दिनानामवशेषतुल्योऽक्षयो न्यूनत्वं ॥ यद्वा तिथिशब्देन सावनो दिवसस्तस्य चांद्रदिवसात्क्षय इति स्वरूपमेव वक्ष्यमाणोपयोगात्परिभाषितं
ननु भोदया भगणैरित्यादिना पूर्वं सर्वेषां सावनदिवसा उक्ता इत्यत्र कस्य ग्राह्या इत्यतः सूर्यसावनस्वरूपकथनछलेनोत्तरमाह ॥ उदयादिति ॥ सू
र्यस्योदयकालमारभ्याव्यवहिततदुदयकालपर्यंतं यः कालः नारायण स एको दिवस इति ये दिवसास्ते भूमिसावनवासराः भूदिवसाः उदयस्य
भूसंबंधेनावगमात् ॥ सावने दिवसाश्चेत्यर्थः ॥ तथा च निरूपपदसावनभूमिशब्दाभ्यां सूर्यस्य वासरा एव नान्येषां सोपपदत्वादिति भावः
३६ ॥ तेषां यंतरस्य तत्प्रमाणं चांद्रदिनप्रमाणं चाह ॥ वसुद्व्यष्टाद्रिरूपांकसप्ताद्रितिथयो युगे ॥ चांद्राः खाष्टखखव्योमखाग्निखर्तुनिशा
कराः ॥३७॥ अष्टाग्निगजसप्तभूगोनगसप्तपंचभूमिताः युगे सूर्यसावनदिवसाः ॥ चांद्रादिवसाः युगतिथय इत्यर्थः अशीतिशून्यचतुष्कत्रिख
नपाः एते त्रिंशद्भक्ताश्चांद्रमासाः उक्तप्रायाः ॥ अनेनैव चांद्रदिवसानामुपपत्तिः सूर्यचंद्रयोर्भगणयोरंतररूपचांद्रमासास्त्रिंशत्गुणिता इति
स्पष्टीकृताः ॥३७॥ अथ राश्विन इति ॥ अधिमासकाः प्रागुक्तस्वरूपाः चकाराद्युगे षट्देवरामगोशरेंदुमिताः तिथिक्षयाः दिनक्षया अवमानी
त्यर्थः पंच एवं द्विशराहत्यष्टखनतानि ॥३८॥ ननु सूर्यमासानुक्तेरधिमाससंख्या कथं ज्ञातेत्यतो रविमाससंख्यास्वरूपेण कुहाश्चाह ॥
खचतुष्कसमुद्राष्टकुपंचरविमासकाः ॥ भवंति भोदया भानुभगणैरूनिताः कुहाः ॥३९॥ सूर्यमासाः द्वादशगुणितरविभगणरूपाः शून्यखा
भ्रखवेदष्टतिशर मिताः ॥ ननु सावनदिनसंख्या प्रागुक्ता कथमवगतेत्यत आह ॥ भवंतीति भोदयाः नाक्षत्रदिवसाः प्रागुक्ताः सूर्यभगणैः प्रा
गुक्तैर्वर्जिताः संतः कुहाः भूवासराः भवंति भोदया इत्यादि प्रागुक्तेः ॥३९॥ ननु सूर्यादिमंदोच्चभौमादिपातानां युगे भगणानुक्तेः कल्पभगण

कथनमावश्यकमतः स्वपंक्त्या प्रागुक्ता एते भगणादयः कल्प एव कथं नोक्ता इत्यत आह ॥ अधिमासोनरात्र्यार्क्षचांद्रसावनवासराः ॥ एते स
हस्रगुणिताः कल्पे स्युर्भगणादयः ॥ ४० ॥ एते प्रागुक्ताः भगणादयः (अ एव कथं नोक्ताः) भगणाभावादियेषां ते भगणादयः अधिमासोनरात्र्यार्क्षचां
द्रसावनवासराः । अधिमासाः पंचु डैत्यादि ॥ तिक्ष्याइत्याद्यूनरात्रयो वमानि नक्षत्र चांद्रसावनानां प्रत्येकं वासरसंबंधः ॥ नाक्षत्रभानामित्यादि ॥
चांद्रदिवसाः श्चांद्राः खाष्टेत्यादि । सावनदिवसा वस्कद्व्यष्टाइत्यादि यत्र सौरमासा अपि खचतुष्केत्यादि ॥ ग्राह्याः सहस्रगुणिताः कल्पे भगणाद
य उक्ता भवंति युगसहस्रस्य कल्पत्वात् तथा च लाघवार्थं युगे उक्ता इति भावः ॥ ४० ॥ अथ श्लोकाभ्यां विचंद्रसूर्यादिग्रहाणां मंदोच्चभगणानाह
न्यात भगणान्प्रति जानीते ॥ प्राग्गतेः सूर्यमंदस्य कल्पे सप्ताष्टवन्हयः ॥ कौजस्य वेदखयमा बौधस्याष्टर्तुवह्नयः ॥ ४१ ॥ खखरंध्राणि जैवस्य शौ
क्रस्यार्थगुणेषवः ॥ गोग्नयः शनिमंदस्य पातानामथ वामतः ॥ ४२ ॥ प्राग्गतेः कल्पे इत्यनयोः शनिमंदांतं प्रत्येकं संबंधः पूर्वगतेः सूर्यमंदोच्च
स्य कल्पे सप्ताष्टशमसिताः शनिपातस्य भगणा इति वक्ष्यमाणस्य भगणा इति पदमत्र प्रत्येकमन्वेति ॥ कौजस्य कुजसंबंधिनः सूर्यमंदस्ये
त्यस्यैकदेशो मंदस्येति मंदोच्चस्येत्यर्थे क्रमेणान्वेति ॥ तथा च भौममंदोच्चस्य चतुरधिकशतद्वयं । बौधस्य बुधमंदोच्चस्याष्टषड्भिताः जैवस्य
गुरुसंबंधिनः अग्रे शनिमंदस्येति वक्ष्यमाणस्यैकदेशो मंदस्येति मंदोच्चस्येत्यर्थे क्रमेणान्वेत्येकवृत्तस्थत्वात् यद्वा आद्यंतयोर्मंदस्येत्युक्तेरेवम
ध्यस्थानामन्वयः स्वयमुपपन्न इति ॥ तथा च गुरुमंदोच्चस्य नवशतं । शौक्रस्य शुक्रमंदोच्चस्य पंचत्रिंशदधिकपंचशतं शनिमंदोच्चस्य कोनच
त्वारिंशत ॥ अथानंतरं पातानां भौमादिपातानां वामतः पश्चिमगत्या भगणा उच्यंत इति शेषः ॥ ४२ ॥ तान् श्लोकाभ्यामाह ॥ मनुदस्रास्तु कौजस्य
बौधस्याष्टाष्टसागराः ॥ कृताद्रिचंद्रा जैवस्य त्रिखांकाश्च भृगोस्तथा ॥ ४३ ॥ शनिपातस्य भगणाः कल्पे यमरसर्तवः ॥ भगणाः पूर्वमेवात्र प्रोक्ता
श्चंद्रोच्चपातयोः ॥ ४४ ॥ कुजसंबंधिनः ॥ तु कारात्पातस्य भौमपातस्य कल्पे भगणाश्चतुर्दशाधिकं शतद्वयं ॥ बौधस्य बुधसंबंधिनः
शनिपातस्येत्यस्यैकदेशः पातस्येत्यत्रान्वेति ॥ बुधपातस्य द्वादशोना पंचशती ॥ जैवस्य गुरुपातस्य चतुःसप्तत्यधिकशतं ॥ भृगोः शुक्रस्य
तथा तत्संबंधिनः चकारात् सातस्य शुक्रपातस्येत्यर्थः ॥ ध्यधिका नवशती ॥ शनिपातस्य द्विरसनषड्भाः भगणाः कल्पे भवंति ॥ नन्वस्मिन्प्रसं
गे चंद्रस्योच्चपातयोर्भगणाः कथं नोक्ता इति मंदाशंकां प्राकरणाय पूर्वोक्तं स्मारयति ॥ भगणा इति चंद्रोच्चपातयोः चंद्रस्य मंदोच्चपातयोर्भगणाः
अत्रास्मिन्नधिकारे पूर्वं ग्रहगणभगणकथने ॥ एवकारो विस्मरणनिरासार्थकः ॥ प्रोक्ताः चंद्रोच्चस्येत्यादि श्लोकेनोक्ताः ॥ ४४ ॥ अथाभीष्टका
ले ग्रहगतभोगानं विवक्षुस्तदुपजीव्याहर्गणसाधनार्थं प्रवृत्तग्रहचारकालाद्गताब्दज्ञानोपजीव्यं कृतयुगातीयगताब्दज्ञानं श्लोकत्रये
णाह ॥ षण्मनूनां तु संपिंड्य कालं तत्संधिभिः सह ॥ कल्पादिसंधिना सार्धं वैवस्वतमनोस्तथा ॥ ४५ ॥ युगानां त्रिघनं यातं तथा

215
1918

कृतयुगं त्विदं ॥ यो द्यसवष्टः स्वतः कालं पूर्वोक्तं दिव्यसंख्यया भीष्टकाले मधुशुक्लादिभिः चैत्रशुक्लाद्यवधिभूतैः गतैर्मासैर्युताः अत्र गतमासां
तर्गतोधिमासश्चेत्प्राप्यः तस्योत्तरमासाद्भयत्वेनानंदतर्गतत्वात्तन्मासस्य षष्टिदिनात्मकत्वाच्चेति सिद्धाः प्रथक्स्थाः युगाधिमासगुणिताः
युगसूर्यमासभक्ताः प्राप्ताधिमासकैर्निरग्रैः सिद्धयुक्ताः अत्र यदास्पष्टोधिमासः पतितः आनयनेनलब्धस्तदानयनप्राप्ताधिमासकैः सैः कैः
युक्ताः यदा तु स्पष्टोधिमासोनपतितआनयनेप्राप्तस्तदानयनप्राप्ताधिमासैर्निरेकैर्युक्ताः अन्यथाभीष्टकाले साधिताहर्गस्य त्रिंशद्दिनांत
[illegible] श्विखभधराः ॥ शनेर्भुजगषट्पंचरसवेदनिशाकराः ॥ ४१ ॥ [illegible]
एतेद्विस्थाः स्थानद्वये स्थाप्याः एकत्र युगावमैर्गुणिताः युगचांद्रदिनैर्भक्ताश्च प्राप्तावमैर्निरग्रैः परत्र हीनाः संतः लंकार्द्धरात्रकालि
कः सावनोहर्गणस्यात् ॥ ततः साधिताहर्गणात्सकाशात् ॥ सृष्ट्यादेः सूर्यमारभ्य दिनमासाब्दपाः वासरेश्वरमासेश्वरवर्षेश्वराः भवंति ॥ तत्र वा
रेश्वरज्ञानमाह ॥ सप्तभिरिति ॥ अयमहर्गणः सप्तभिः क्षयितः भक्तः शेषितः कार्यः स शेषावशिष्टः सूर्याद्यः सूर्यवारादिकः वासरेश्वरः वारस्वा
मी गतो भवति ॥ तदग्रिमो वर्तमानो वारेश इत्यर्थः सिद्धं ॥ अत्रोपपत्तिः ॥ सौरवर्षाणां मासकरणे स्पष्टाद्यधिमासांतकालसंबंधिसावयवसौ
रमासाः अव्यवहितपूर्वपतिताधिमासांतकालादिस्वाभीष्टचैत्राद्यंतकालसंबंधिसावयवचांद्रमासा योगश्चेत्कृतौ द्वादशगुणितसौरवर्षाणि
आनानि ॥ कुत इति चेच्छृणु ॥ द्वादशगुणितसौरवर्षाणि सौरवर्षादौ सौरमासा इति तु निर्विवादं ॥ तेस्वानीताधिमासैः सावयवैर्युताश्चांद्राः सा
वयवाः ॥ सौरवर्षादौ एतेवयवहीनाश्चैत्रादौ निरवयवाश्चांद्रमासाः अवयवस्य चैत्रादिसौरवर्षाद्यंतरकालरूपाधिशेषत्वात् ॥ ते निरग्राधि
मासोनाश्चैत्रादावधिमासोनचांद्राद्वादशगुणितसौरवर्षाब्दरूपा उक्तयोगस्वरूपाः सिद्धाः कथमन्यथा निरग्राधिमासयोजनेनैषां चैत्रादौ चां
द्रमाससमानसंभवः ॥ एतेस्वाभीष्टमासादिकालस्थित्यर्थं ॥ चैत्रशुक्लादिगतमासैर्युक्ताः एतेन द्वादशगुणितसौरवर्षमितसौरमासानां चैत्रादिग
तचांद्रमासाः कथं योजिता एकजातित्वाभावादिति दूषणं गौकारेनिरस्तः उक्तरीत्या तत्र चांद्रमासानामपि सत्वादेकजातीयत्वेन योगसंभवात्
नहि पूर्वं योगोस्माभिः करणाकृतो येन विजातीययोगो दूषणं ॥ तस्य द्वादशगुणितसौरवर्षरूपत्वेन स्वतः सिद्धत्वात् ॥ अथैषां निरग्राधिमास
योज्या इति स्वरूपादिपूर्वपतिताधिमासांतकालावधियेसौरमासाः सावयवास्तेभ्यो युगसौरमासैर्युगाधिमासास्तदेभिः सौरमासैः केइत्यनु
पातेन निरग्राधिमासाश्चांद्राभवंति सौरेभ्यः साधितत्वात् ॥ अथाभीष्टकालेधिमासावयवज्ञानार्थं युगचांद्रमासैर्युगाधिमासास्तदा पूर्वपति
ताधिमासांतकालाभीष्टमासाद्यंतरस्थितचांद्रमासैः सावयवैरेभिः केइत्यनुपातेनाधिमासाभावात्तदवयवः सौरआयाति ॥ चांद्रात्साधितत्वा
त् ॥ परं त्ववयवावयव्योरेकजातित्वात्सिद्धिरतस्तत्संपादनार्थं अधिमासावयवस्योक्तसौरस्य युगसौरमासैर्युगचांद्रमासास्तदोक्तसौराधिमा

सावयवेनकिमित्यनुपातेनयुगचांद्रमासागुणोयुगसौरमासाहरइतितुल्ययोर्गुणहरयोर्युगचांद्रमासयोर्नाशाद्दिष्टचांद्रमासानांयुगाधिमासा
गुणोयुगसौरमासाहरइति।फलमधिमासावयवश्चांद्रः।अथतादृशेष्टसौरचांद्रमासयोःपृथग्ज्ञानादधिमासतदवयवयोर्ज्ञानमशक्यमप्यको
हरस्विद्गुणकौविभिन्नावित्यादिरीत्याघातादृशसौरचांद्रमासयोर्यएवायंज्ञातोयुगाधिमासगुणितोयुगसौरमासभक्तःफलमधिमासाःशेषात्तद
वयवोहर्गणानयनेनुपयुक्तः॥तत्रकेवलाधिमासानामेवन्यूनत्वेनतेषामेवयोजनावश्यकत्वात्॥अयंस्पष्टोदितइष्टमासादिपर्यंतंचांद्रमास
गणःसिद्धःबहवस्तद्द्वारत्रागुणितसौरवर्षरूपसौरमासानांसौरवर्षादितोभीष्टकालपर्यंतंसौरमासानामज्ञानात्।चैत्रादिगतचांद्रमासाएव
योजिताःपरमिष्टसौरमासेष्वधिमासमधिकं।तच्चाधिमासानयनेधिशेषत्यागेनकेवलाधिमासयोजनेनिरंतरंभवति।अधिमासानय
नेचचांद्रमिष्टसौरमासत्वेनैवाधिशेषाधिकेष्टसौरमासानामंगीकारादित्याकूतस्त्वित्थं॥केवलेष्टसौरमासानीताधिमासानांनिरयाणामधि
शेषाधिकसौरेष्टमासेषुयोजनेनैवनिरंतरत्वसिद्धेः॥अन्यथाधिशेषगुणितयुगाधिमासेभ्योयुगार्कमासभक्ताप्तफलेनाधिशेषमधिक
मायातीतिपरमासन्नाधिशेषस्याधिकत्वंभवतीत्यनुपातानयनेनैकाधिकाधिकमासलब्ध्यायोजितेनचांद्रमासगणएकाधिकस्यादिति॥
अथाभीष्टमासादिसिद्धचांद्रमासाश्चांद्रदिनकरणार्थंत्रिंशद्गुणिताःअभीष्टदिनेतत्सिध्यर्थंशुक्लादिगततिथयोत्रयोजिताअभीष्टतिथ्या
दौचांद्राहर्गणः॥युगचांद्रैर्युगावमानितदानेनकिमित्यनुपातागतावमैःसावयवैर्हीनश्चांद्राहर्गणस्तिथ्यंतेसावनोहर्गणः॥यमकोटिदेशे
सूर्योदयकालेग्रहचारस्यप्रवृत्तेस्तदादितोनिरवयवाहर्गणसिध्यर्थंतिथ्यंतत्तत्कालयोरंतरमवमावयवरूपंयोज्यमतःपूर्वमेवावमावय
वोनुपयुक्तोत्रनगृहीतःअतश्चांद्राहर्गणःस्वानीतावमैर्निरग्रैर्हीनोहर्गणःसावनोनिरवयवोयमकोटिदेशीयसूर्योदयकालेतत्रतद्दे
शस्याप्रसिद्धत्वात्प्रसिद्धलंकादेशस्याईशात्रस्यतद्रूपस्योक्तिःकृता॥सृष्ट्यादावर्कवासरसद्भावात्तदाद्यादिनमासवर्षेश्वराःग्रहाणां
संख्यानात्सप्ततष्टोहर्गणःशेषंगतवारः॥५१॥अथप्रतिज्ञातयोर्वर्षमासेश्वरयोरानयनमाह॥मासाब्ददिनसंख्याप्तंद्वित्रिघ्नंरूपसंयु ८
तं॥सप्तोद्धृतावशेषौतुविज्ञेयौमासवर्षपौ॥५२॥अहर्गणाद्धितुष्टादेकत्रमासदिनानांसंख्ययात्रिंशताभक्ताद्यदाप्तफलं॥अपरत्रवर्षदिना
नांसंख्यायाःषष्ट्याधिकशतत्रयेणभक्ताद्यदाप्तंफलंशेषयोरनुपयोगात्त्यागः॥क्रमेणफलद्वयंद्वाभ्यांत्रिगुणितउभयत्रएकसंख्यायुक्तंसप्त
भागयाहारेणभक्तात्फलत्यागेनावशिष्टौक्रमेणमासस्वामिवर्षस्वामिनौज्ञातव्यौ।तुकाराद्व्युत्क्रमेणवासरेश्वरगणनातःक्रमेणानयोर्गण
नापरमत्रक्रमं।र्तमानेत्यर्थकः॥अत्रोपपत्तिःसृष्ट्यादित्रिंशदहोरात्राणामेकःसौरस्तत्रसूर्योधिपतिःमासादिदिनेर्कस्यादिपतित्वात्।एवं
द्वितीयमासादौभौमस्यदिनाधिपतित्वाद्भौमोद्वितीयमासेश्वरइतिप्रतिमासंमासेश्वरयोरंतरंद्वयंत्रिंशद्दिनानांसप्ततष्टतयाद्व्यवशे

217
1918

षात्॥एवंषष्ट्यधिकशतत्रयाहोरात्राणामेकंसौरसावनवर्षंतस्याधिपोर्कःवर्षादिदिनेर्कस्यादिपतित्वात्।एवंद्वितीयसावनवर्षादौबुध
स्यदिनाधिपतित्वात्।बुधोद्वितीयवर्षेश्वरइतिप्रतिवर्षंवर्षेश्वरयोरंतरंत्रयं॥षष्ट्यधिकशतत्रयदिनानांसप्ततष्टेत्र्यवशेषात्॥तथाच
वर्तमानकालेतद्गणनयाकियंतोमासगताःकियंतिचवर्षाणिगतानीतिज्ञानार्थमहर्गणस्त्रिंशद्भक्तःफलंगतमासाः॥षष्ट्यधिकशतत्र
यभक्तःफलंगतवर्षाणिएकमासेद्वौवारौतदागतमासैःकइतिगतमासवाराःवर्तमानार्थंसैकाः।एवमेकवर्षेत्रयोवारास्तदागतवर्षैःकइति
गतवर्षवाराःवर्तमानार्थंसैकाःवाराणांसप्तसंख्यात्वात्सप्ततष्टौशेषौसूर्यादिकौमासवर्षेश्वरौ॥५२॥अथग्रहानयनमाह॥यथास्वभगणा
भ्यस्तोदिनराशिःकुवासरैः।विभाजितोमध्यगत्याभगणादिर्ग्रहोभवेदिति॥५३॥दिनराशिरहर्गणःयथास्वभगणाभ्यस्तःयत्कालिका
निजोक्तभगणैर्गुणितःयुगभगणैःकल्पभगणैर्वेत्यर्थःतथाकुवासरैःतात्कालिकसावनदिनैःयुगसावनैःकल्पसावनैर्वेतियथायो
ग्यमित्यर्थः॥भक्तःफलं॥यस्यग्रहस्यभगणागुणनार्थंगृहीताः॥सग्रहोभगणादिःभगणराशिभागकलाविकलात्मकभोगात्मकः॥मध्यग
त्यामध्यमगतिमानेनग्रहस्यदिनविलक्षणस्फुटगतिप्रमाणेन॥अग्रेतत्प्रमाणेनग्रहभोगज्ञानस्योक्तेःमध्यमोग्रहःस्यादित्यर्थः॥अत्रोपप
त्तिः॥युगादिसावनैर्युगादिभगणास्तदैकेनदिनेनकइतिप्राप्तामध्यमगतिःततएकेनदिनेनेयंगतिस्तदेष्टाहर्गणेनकेतिरूपयोस्तुल्यत्वे
नविकाराजनकत्वाच्चनाशादुपपन्नमानयनं॥यद्यपियुगादिसावनैर्युगभगणास्तदेष्टाहर्गणेनकिमित्येकानुपातेनानयनमुपपन्नंलाघवात्त
थापिमध्यगत्येत्यस्यप्रदर्शनार्थमनुपातद्वयंगुरुभूतमपिप्रदर्शितं॥५३॥अथामुंप्रकारमुच्चपातयोरानयनायातिदिशति॥एवंस्वशीघ्रमं
दोच्चायेप्रोक्ताःपूर्वयायिनः॥विलोमगतयःपातास्तद्वच्चक्राद्विशोधिताः॥५४॥येपूर्वयायिनःपूर्वदिग्गतयःस्वशीघ्रमंदोच्चाःस्वानांग्रहाणांशीघ्रो
च्चमंदोच्चाःग्रहवद्गत्वेनशीघ्रोच्चमंदोच्चयोवद्ग्रहाद्रूवचनंप्रोक्ताःपूर्वभगणेत्वयाकथिताःतेपिएवंग्रहानयनरीत्यासाध्याः॥ननुपूर्वयायिनएवं
साध्यास्तर्हिपश्चिमगतयःपाताःकथंसाध्याइत्यतआह॥विलोमगतयइति॥पश्चिमगतयःपाताअपितद्वद्ग्रहानयनरीत्याअत्रचंद्रोच्चपातौग्र
हानयनवद्युगकल्पभगणसावनाभ्यांसिद्धौभवतोन्येषांमुच्चपातौतुकल्पसावनदिनहरेणेतिध्येयं॥ननुतर्हिपूर्वपश्चिमगत्योःकोविशेषआ
नयनेइत्यतआह॥चक्रादिति॥आगताराश्यादिपाताःद्वादशराशिभ्यःशोध्याःपाताःभवंतिएवंआनयनेविशेषइतिभावः॥अत्रोपपत्तिः॥पूर्व
यायिनोमेषवृषमिथुनादिक्रमेणागच्छंति पश्चिमगतयस्तुमेषमीनकुंभेत्याद्युत्क्रमेणागच्छंति॥तत्रोत्क्रमगणनेनायालोकेनभ्यासाद्भाशिक्र
मेणतज्ज्ञानार्थंद्वादशराशिभ्यःशोधिताःपूर्वगतिपंक्तिस्थाःभवंति॥५४॥अथसंवत्सरानयनमाह॥द्वादशघ्नागुरोर्याताभगणावर्तमानकैः
॥राशिभिःसहिताःशुद्धाःषष्ट्यास्युर्विजयादयः॥५५॥अहर्गणानीतस्यभगणादिकस्यबृहस्पतेःयाताःगताःभगणाःउपरिस्थाःद्वादशगु

स०टी०

१

णिताः वर्तमानकैः यस्मिन्नधिष्ठितः स वर्तमानस्तत्सहितैः एकयुक्तैरित्यर्थः राशिभिः गणितागताभीष्टराशिभिः यद्वा गोतिष्ठतितत्स्वमेषादिसं
ख्ययेतिफलितार्थः युताः षष्ट्याः भक्ताः आगाबशेषिताः फलं भागादिकं चानुपयोगात्त्याज्यं विजयादयः संवत्सरा वर्तमानसहिताः भवंति॥ अत्रोपप
त्तिः॥ मध्यगत्याभोगेन गुरोर्गैरिव वत्सरा इत्तिलु पुबसिद्धसिद्धांतोक्ते गुरुमध्यमराशिभोगकालः एकः संवत्सरस्याघानीतभगणादि गुरोः संपूर्ण
राशिज्ञानार्थं भगणा द्वादशगुणा वर्तमानाराशिसंख्यायुताः षष्टितष्टाः शेषं विजयादिकाः संवत्सरो वर्तमानो भवति॥ संवत्सराणां षष्टिसंख्या
त्वात्॥ स एषादेशे विजयसंवत्सरसंज्ञा बाध्येति॥ ५५॥ अथोक्तमुपसंहरन् लाघवेन ग्रहानयनमाह॥ विस्तरेणैतदुदितं संक्षेपाद्व्यावहारिकं॥
मध्यमानयनं कार्यं ग्रहाणामिष्टतो युगात्॥ ५६॥ एतत्यच्छमनंतोतु सर्पिंडैः त्यादि विस्तरेण गणितक्रियाबाहुल्येन उदितमुक्तं॥ व्यावहारिकं
लोकव्यवहारोपयुक्तमिदं ग्रहानयनं संक्षेपात् अल्पगणितप्रयासात्॥ ज्ञेयं तदाह॥ मध्यमानयनमिति॥ ग्रहाणां मध्यमानयनं मध्यमानेन ग
णितइष्टतः वर्तमानाश्चेताख्यात् युगात् महायुगस्य चरणात्॥ त्रेतायुगादितो गता अब्दैरल्पभूतैरेवोक्तरीत्याहर्गणमानीयोक्तरीत्या मध्यग्रहाः का
र्या इत्यर्थः॥ ५६॥ ननु सृष्ट्यादितो ग्रहचारप्रवृत्तेस्तदादित आनीतस्य ग्रहस्य वास्तवत्वेन तत्तुल्यो यं ग्रहः कथमवगत इत्यत आह॥ अस्मिन्कृतयुग
स्यांते सर्वे मध्यगता ग्रहाः॥ विना तु पातमंदोच्चान्मेषादौ तुल्यतामिता इति॥ ५७॥ अस्मिन्निदानीतने कृतयुगस्यावसानसमये सर्वे सप्त ग्रहाः सूर्य
दयः मध्यगताः मेषादौ मेषादिप्रदेशे तुल्यतां समतां गणितागतराश्यादिभोगे न इताः प्राप्ताः पातमंदोच्चान्विना पातमंदोच्चास्तु न तुल्याः न वा मेषा
दौ॥ तथा च ग्रहाणां शीघ्रोच्चानां च भगणपूर्तित्वात्॥ त्रेतादिसमयावगतगतकालादागतराश्यादयः सृष्ट्यादिगतकालावगतराश्यादिभिः
स्तुल्याः भगणानां च प्रयोजनाभाव इति भावः॥ ५७॥ अथोच्चपातयोर्विशेषमाह॥ मकरादौ शशांकोच्चं तत्पातस्तु तुलादिगः॥ निरंशत्वं गताश्चान्ये
नोक्तास्ते मंदचारिणः॥ ५८॥ चंद्रस्य मंदोच्चं तदानीं मकरादावस्ति॥ तस्यात्र्चंद्रपातः तुलादिस्थोस्ति तु कारादन्तस्तयोस्त्रेतादित आनयनं न व ॥ १
षड्राशियोजनविशेषेण सुगममित्यर्थः॥ नन्वेवमन्येषामपि षड्राश्यादिस्थत्वेन कथनेन तेषामथानयनं सुगमं भविष्यतीत्यत आह॥ निरंश
त्वमिति॥ अन्ये अवशिष्टाः मंदोच्चपाताः ये मंदचारिणः अल्पगतयः उक्ताः पूर्वं भगणोक्त्या कथिताः ते च कादेरस्मिन्कृतयुगांते निरंशत्वं अंशा
भावतां न प्राप्ताः॥ तथा च तेषां राश्यादिकथने गौरवं मंदगतित्वात् एकदानीताः सहस्रवर्षपर्यंतमुपयुक्ता भवंतीति निरंतरं तत्साधनावश्यकता
भावात्तेषामानयनं॥ चेतादिगताब्देभ्य उपेक्षितमिति भावः॥ यदि च तत आगमं तैतदास्वस्वक्षेपयुताः कार्याः क्षेपकास्तु रविमंदोच्चं राश्यादिकं
७।१८।१२ भौमस्य ४।११।४।२४ बुधस्य ५।४।४।४८ गुरोः ०।१०।०।० शुक्रस्य २२।१३।२।१० शनेः ४।२०।१३।१२ भौमपातस्य ०।११।२०।०२ बुध
स्य ०।१९।१६।४८ गुरोः ८।८।५६।२४ शुक्रस्य ४।१७।२५।४८ शनिपातस्य ४।२०।१३।१२ एवमिष्टकालादपि ग्रहाः साध्याः स्वस्वक्षेपयोजन

वं॥ ५८॥ अथ ग्रहाणां देशांतरफलानयनार्थं भूपरिधिं सोपपत्तिं व्यासकथनपूर्वकमाह॥ योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु॥ त
द्वर्गतो दशगुणात्पदं भूपरिधिर्भवेत्॥ ५९॥ अष्टौ शतानि द्विगुणानि षोडशशतं योजनानि भूकर्णः भुवो भूगोलस्य कर्णः वृत्तपरिधिमध्यभा
गसूत्रं॥ परिध्यर्धमितचापस्य ज्यारूपं द्विगुणइत्येनेन शतान्यष्टौकेंद्रात्परिधिपर्यंतमृजुसूत्रस्य मानमिति सूचितं॥ कक्षाव्यासार्धस्य
कर्णव्यवहारवदस्यापि भूकर्णव्यवहारः तु कारात्पुराणविरुद्धोपि प्रत्यक्षसहकृतागमप्रमाणसिद्धः अस्मात्परिधिज्ञानमाह॥ तद्वर्गत इति भूव्या
सवर्गात्॥ तुल्ययोर्घातरूपात् दशगुणात् मूलं कस्यायं समद्विघात इति तन्मूलं॥ तत्र कारस्थ ग्रंथांतरे प्रसिद्धः भूपरिधिः स्यात्॥ अत्रोपपत्तिः
गजाग्निवेदराम ३४३८ मितत्रिज्यायाः कक्षाव्यासार्धत्वात् द्विगुणत्रिज्यारूपव्यासे चक्रकलातुल्यः परिधिः २१६०० तदेष्टव्यासे क इति
गुण १६०० हरो ६८७६ हरेणापवर्तितौ हरस्थाने रूपं गुणस्थाने सार्द्धाष्टावयवयुतास्त्रयः तथा च व्यासोनेन गुणितः परिधिर्भवति॥ तत्र भ
गवता गुणस्यैकस्थानकरणार्थं वर्गः कृतः १५२।१२ अत्र स्वल्पांतरत्वात् दशगृहीताः वर्गेण वर्गं गुणयेदित्युक्तत्वात् व्यासवर्गो दशगुणितस्त
न्मूलं व्यासो मूलरूपगुणगुणितः सिद्धो भवति यद्यपि वर्गस्थाने दशग्रहणेन स्थूलमिदमानयनं तथापि परमकारुणिकेन भगवता लोका
नुग्रहार्थं गणितलाघवायांगीकृतं॥ वस्तुतो भगवता वेदमंगलविश्वरूपमितव्यासस्य १९३८४ परिधिर्गुणितः प्रत्यक्षेण खखखरसराममि
तः ३६००० अत्र पूर्वोक्तरीत्या पवर्तनेगुणः ३।१९४४ पादोनदशावयवयुतं त्रयं अस्य वर्गो दशप्रायः १।१९।५१ इत्युपपन्नमुक्तं॥ ५९॥
अथ स्फुटपरिध्यानयनं देशांतरफलनयनं तत्संस्कारं च श्लोकाभ्यामाह॥ लंबज्याघ्नस्त्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः॥ तेन देशांतराभ्य
स्ता ग्रहभुक्तिर्विभाजिता॥ ६०॥ कलादि तत्फलं प्राच्यां ग्रहेभ्यः परिशोधयेत्॥ रेखाप्रतीचीसंस्थाने प्रक्षिपेत्स्युः स्वदेशजाः इति॥ ६१॥
द्वादशफलभयोर्वर्गयोगमूलमक्षकर्णः अनेन द्वादशगुणिता त्रिज्या भक्ता या फलं लंबज्या॥ अनया गुणितो भूपरिधिस्त्रिज्यया गजाग्निवेदरा
ममितया भक्तः फलं स्वकः स्वदेशसंबंधी स्फुटो भूपरिधिः स्यात्॥ ग्रहस्य गतिः देशांतराभ्यस्ता स्वरेखादेशस्वदेशयोरंतरयोजनामितदेशांतरप
रवाख्या निर्तेर्गुणिता तेन स्फुटेन भूपरिधिना भक्ता फलं कलादिकं प्राच्यां स्वरेखादेशात्स्वस्य देशस्य पूर्वदिग्भागस्थितत्वे ग्रहेभ्यः कलादिस्थाने प
रिशोधयेत्॥ वर्जयेत्। हीनं कुर्यादित्यर्थः॥ रेखाप्रतीचीसंस्थाने स्वरेखादेशात्स्वस्य पश्चिमदिग्भागस्थिते स्वदेशे ग्रहेभ्यः कलादिस्थाने प्रक्षिपेद्यो
जयेत् युक्तं कुर्यात् गणक इति शेषः॥ ते सिद्धाः ग्रहाः स्वदेशजाः स्वदेशीयाः भवंति॥ पूर्वमहर्गणस्य लंकादेशीयत्वेन तदुत्पन्नग्रहाणां लं
कादेशीयत्वात्॥ अत्रोपपत्तिः॥ यद्यपि भूमेः करंडाकारत्वेन सर्वत्राभिन्नः परिधिरिति स्फुटपरिध्यसंभवस्तथापि निरक्षदेशस्य मध्यस्फुट

219
1918

सू० टी०

१०

नेनोक्तो भूपरिधिस्तद्देशीयानामेव॥ तदन्यत्र तदनुरोधेन रत्नानां लघुत्वसंभवेनोत्तरोत्तरं न्यूनपरिधिः स्वदेशे स्फुटसंज्ञः॥ एवं नवत्यक्षांशे
मेरुस्थाने वडवास्थाने च परिध्यभावः॥ निरक्षदेशे परमउक्तः परिधिरतो यत्राक्षांशाः नवतिः परमास्तत्र लंबांशाभावः॥ यत्राक्षांशाभावस्तत्र
लंबांशाः परमा नवतिः॥ लंबाक्षांशौ तु वक्ष्यमाणस्वरूपौ॥ तथा च लंबांशह्रासानुरोधेन परिधेरपि ह्रास इति परमलंबांशैर्नवतिमितैरुक्तो भूप
रिधिस्तदा स्वदेशीयलंबांशैः क इत्यनुपात उपपन्नोपि रत्नाश्रितांशेभ्योनुपातानामसंभवेन सर्वैरुपेक्षितत्वाच्च ज्यानुपातस्य सर्वैरंगीकृतत्वात् प्रमाणस्था
ने प्रमाणांशज्या परमा त्रिज्या इच्छास्थाने इच्छांशानां ज्या लंबज्येति युक्तमुक्तमुपपन्नं स्पष्टपरिध्यानयनं॥ देशांतरोपपत्तिस्तु लंकादेशीयो ग्रहः स्वदेशा
तः समसूत्रयोर्दक्षिणोत्तरस्थनिरक्षदेशासन्नस्तत्र कार्यः॥ तदर्थं लंकादेशात्स्वनिरक्षदेशयोरंतरयोजनज्ञानमावश्यकं॥ एतत्तु स्मादृशां अ
मितिपरिक्षणः ध्यपचयवत्तदंतरतोपचितं लंकोत्तरदक्षिणसूत्रस्थस्वरेखादेशात्स्वदेशयोरंतरं स्वपरिधिस्थगणनया ज्ञातमस्मात्स्वपरिधिने
दमंतरं योजनात्मकं तदोक्तपरिधिना किमित्यनुपातेन लंकात्स्वनिरक्षदेशयोरंतरं उक्तपरिधिस्थं ज्ञानं॥ ततोर्कोदयद्वयांतरकालेनार्को भूप
रिधिं क्रामति तत्र ग्रहाः स्वां स्वां गतिं कलात्मिकां॥ मतिक्रामंत्यत उक्तपरिधिना ग्रहगतिकलास्तदा प्राक्सिद्धलंकात्स्वनिरक्षदेशांतरयोजनैः क
इत्यनुपातेनोक्तपरिध्योर्गुणहरयोस्तुल्यत्वेन नाशात् स्वरेखादेशात्स्वदेशयोरंतरयोजनानि (इत्येकानुपातेनैव देशांतर) निग्रहगतिगुणा नि
स्वपरिधिभक्तानि फलं ग्रहस्यांतरकलाः यद्यपि परिधिना गतिकलास्तदा स्वरेखादेशात्स्वदेशयोरंतरयोजनैः का इत्येकानुपातेनैव देशांतरमु
क्तफलमुपपन्नं भवति। तथापि निरक्षदेशपदार्थसंबंधाभावादिदमुपपन्नं फलं निरक्षदेशीयं कथमित्याग्रहनिरतातिमंदस्यावबोधार्थं गुरुभू
तमप्यनुपातद्वयमुक्तं॥ नन्वनयोपपत्तौ लंकादेशात्स्वनिरक्षदेशस्य पूर्वभागस्थितत्वे लंकादेशार्धरात्रात्स्वनिरक्षदेशार्धरात्रमर्वाग्भ
वति॥ तदुदयकालात्स्वल्पावलानिलवेगेन पूर्वभागे पूर्वमेवोदयात्॥ अतोग्निमकालीनग्रहस्य पूर्वकालिकत्वसिध्यर्थं तत्फलं न्यूनं कार्यं॥ एवं नि १०
रक्षदेशस्य लंकातः पश्चिमस्थत्वे लंकोदयानंतरोदयसद्भावाल्लंकार्धरात्रादग्निमकालेर्धरात्रमतः पूर्वकालिकग्रहस्याग्निमकालिकत्वसि
ध्यर्थं तत्फलं योज्यं॥ चक्रशोधितपातस्यायं संस्कारविपरीत इति ज्ञेयं॥ स्वनिरक्षदेशस्य लंकातः पूर्वापरभागस्थत्वं स्वरेखादेशात्स्व
देशस्य पूर्वापरभागस्थस्यानुरोधेनेति स्वनिरक्षदेशस्वमोर्यग्यो तरेखया तदर्धरात्रयोरभिन्नत्वात् स्वदेशार्धरात्रेपि स्वनिरक्षदेशार्ध
रात्रकालिका एव ग्रहा भवितव्यास्ते इति सर्वमुक्तमुपपन्नं॥ ६१॥ अथ रेखास्वरूपं तद्देशांश्चकांश्चिदाह॥ राक्षसालयदेवौकःशैलयोर्मध्य
सूत्रगाः॥ रोहीतकमवंती च यथा सन्निहितं सरः॥ ६२॥ राक्षसालयं लंकादेवानां ग्रहरूपः पर्वतो मेरुः॥ अनयोर्मध्ये ऋजुसूत्रं तत्र स्थिता
देशाः रेखाः लंकादक्षिणसूत्रस्थास्त्वनुपयुक्तास्तत्र मनुष्याभावात्साहिति नोक्ताः॥ तानार्थमुदाहरति रोहीतकमिति॥ यथा रोहितकं

नगरं॥ अवंती उज्जयिनी सन्निहितं सरः कुरुक्षेत्रं चाकारस्तथेत्यव्ययपरः॥ तथान्यान्यपि परस्परसन्निहितनया ज्ञेयानि॥ ६२॥ ननु येन स्वस्थानरेखा
पुरात्पूर्वतोपरत्र वा कियद्योजनांतरेणास्तीति न ज्ञायते तेन देशांतरफलादिकं कथं कार्यमित्यतः श्लोकत्रयेणाह॥ अतीत्योन्मीलयेदिंदोः पश्चात्तद्गणिता
गतात्॥ यदा भवेत्तदा प्राच्यां स्वस्थानं मध्यतो भवेत्॥ ६३॥ अप्राप्य च भवेत्पश्चादेवं चापि निमीलनात्॥ तयोरंतरनाडीभिर्हन्याद्भूपरिधिं स्फुटं॥ ६४
षष्ट्या विभज्य लब्धैस्तु योजनैः प्रागथापरैः॥ स्वदेशपरिधिर्ज्ञेयः कुर्याद्देशांतरं हि तैः॥ ६५॥ चंद्रस्य सर्वग्रहाणां तर्गतोन्मीलनकालात्॥ विना देशां
तरं गणितागतात् चंद्रग्रहणोक्तप्रकारगणितागतात्॥ अतीत्य तत्कालस्यातिक्रमणं कृत्वा पश्चादनंतरकाले मंदावबोधार्थमिदं अन्यथातीत्य पश्चादित्य
नयोरेकतरस्य वैयर्थ्यापत्तेः॥ तच्चंद्रबिंबस्योन्मीलनं परावर्तनीत्यर्थः स्यात्तदा तदा स्वर्थः स्वाभिमतस्थानं मध्यरेखादेशात्पूर्वदिग्विभवेत् तिष्ठती
त्यर्थः॥ अप्राप्य तत्र निक्रमणमकृत्वा पूर्वकाल एव चकाराच्चंद्रोन्मीलनं यदि स्यात्तर्हि मध्यरेखातः स्वस्थानमित्यर्थः॥ पश्चात्पश्चिमदिग्भागे भ
वेत्तिष्ठतीत्यर्थः॥ ननु चंद्रस्य स्पर्शमोक्षसंमीलनोन्मीलनकाले पुन्मीलनकाल एव कथं गृहीत इत्यत आह॥ एवमिति वा प्राक्तोतरेण निमीलनात्॥
चंद्रसंमीलनकालात् एवं चंद्रग्रहणाधिकारोक्तगणितप्रकारज्ञातादनंतरकाले संमीलनं यदि तर्हि मध्यरेखादेशात्स्वस्थानं पूर्वदिग्भागे तिष्ठति॥
पूर्वकाले संमीलनं यदि तर्हि मध्यरेखादेशात्स्वस्थानं पश्चाद्भागे तिष्ठतीत्यर्थः॥ अपि च व्यक्तिनिश्चयार्थे तेनोन्मीलनसंमीलनकालयोर्भिन्नत्वरीतिस्फुर
सः॥ तथा चोन्मीलनग्रहणमुपलक्षणार्थं॥ तत्रापि बाहुल्यस्पर्शमोक्षयोर्ग्रहणाद्यंतरूपयोरनिश्चयत्वसंभावनयोक्तिर्मुख्यग्रहाणामध्यस्थयोः सं
मीलनोन्मीलनयोर्निश्चयत्वेनोक्तिः कृतेति भावः॥ अथ देशांतरयोजनपुरःसरं देशांतरफलमित्याह॥ तयोरिति प्रत्यक्षोन्मीलनकाल गणितागतोन्
मीलनकालयोः संमीलनकालयोः स्पष्टद्वयोर्वा अंतरघटीभिः भूपरिधिं स्पष्टं स्वदेशभूपरिधिं लंबज्यान्तैरुक्तात्प्रयगतं हन्यात् गुणयेत्॥ तादृशं गु
णितं स्पष्टपरिधिं षष्ट्या भक्त्वा लब्धैः प्राक्प्राग्योजनैः पूर्वविभागयोजनैः अथ अथवा अपरैः पश्चिमविभागावस्थितैर्योजनैः स्वदेशपरिधिः स्वदेश
स्य परिधिरवधिः स्वदेशस्थानमंडलरूपः तुकाराद्रेखादेशादंतरितइत्यर्थः॥ ज्ञेयः कर्णकेनेति शेषः स्वरेखास्वदेशयोरंतरयोजनानि फलमि
ति फलितार्थः तैरंतरयोजनैर्देशांतरं तेन देशांतराभ्यस्तेत्यादि प्रागुक्तप्रकारेण ग्रहाणां देशांतरफलं कालात्मकं कुर्यात्॥ गणक इति शेषः॥ हि कारा
त्तत्संस्कारोप्यभिन्नप्रकारत्वादभिन्न इत्यर्थः॥ अत्रोपपत्तिः॥ विना देशांतरसंस्कारं ग्रहगणितं स्वरेखादेशीयं भवति। अतो गणितागतस्पा धि
तोन्मीलनसंमीलनादिकालाः स्वरेखादेशे सिध्यंति॥ स्वदेशे पूर्वविभागस्थे प्रथमं स्वस्य सूर्योदयादिकालास्तदनंतरं रेखायाः इति चंद्रग्रहण
स्य सर्वदेशेषु युगपत्संभवाद्गणितागतकालाद्रेखादेशस्थात् नंतरं स्वस्पर्शादिकालो भवति॥ एवं स्वदेशपश्चिमविभागस्थे प्रथमं रेखादेशो
दयादिकालास्तदनंतरं स्वदेशे इति रेखास्थगणितागतस्पर्शादिकालाद्व्यात्मकापूर्वमेव स्पर्शादिकालो भवत्यतः सम्यगुपपन्नमतीत्यादि सार्धं

221
1918

श्लोकोक्तं॥ स्वदेशात्स्वदेशात्सूर्योदयात्प्रागवधिरूपघात्मककालयोरंतरं देशांतरघटिकाः सिद्धाः सूर्योदयद्वयांतरकाले नीलोत्पलभूपरिधिमतिक्रामतीति
षष्टिसावनघटीभिर्भूपरिधियोजनानि स्वदेशीयानि तदा तत्कालांतररूपदेशांतरघटीभिः कानीत्यनुपातेन रेखादेशस्वदेशयोरंतरयोजनानि॥ अ
तोऽपप्यः पूर्वदिशेव बदेशांतरं भवति। सूर्यग्रहणस्य सर्वदेशे युगपदसंभवात्तदुन्मीलनकालादिनोक्तदिशानैव ज्ञानमित्यनुक्तिरिति ध्येयं॥ ६५॥ अ
थ वारप्रवृत्तिकालज्ञानमाह॥ वारप्रवृत्तिः प्राग्देशे क्षपार्धेऽभ्यधिके भवेत्। तद्देशांतरनाडीभिः पश्चादूने विनिर्दिशेत्॥ ६६॥ पूर्वभागस्थितस्वाभि
मतदेशे तद्देशांतरनाडीभिः पूर्वप्रकारज्ञातदेशांतरघटीभिः अभ्यधिके अर्धरात्रे युक्तार्धरात्रसमये अर्धरात्रादनंतरं देशांतरघटीकाले इत्य
र्थः॥ वारप्रवृत्तिः वारस्यादिभूतकालस्यात्रेखातः पश्चिमभागस्थदेशे पूर्वप्रकारज्ञातदेशांतरघटीभिः ऊने अर्धरात्रे अर्धरात्रात्पूर्वमेव देशांत
रघटीकाले वारप्रवृत्तिं विनिर्दिशेत् गणकः कथयेत् अत्रोपपत्तिः॥ यमकोटिसूर्योदयकाले लंकार्धरात्रसमयरूपो ग्रहवारप्रवृत्तिरूपः स्वदेशी
कदेशेरेखातः पूर्वापरभागयोः स्वार्धरात्रकालादनंतरं पूर्वं क्रमेण तदर्धरात्रे देशांतरघटीभिर्भवति। स्वनिरक्षदेशे स्वदेशार्धरात्रयोर्युगपत्संभ
व॥ अतउपपन्नं वारप्रवृत्तिरित्यादि॥ नन्वेतत्कालज्ञानं किमर्थमुक्तं प्रयोजनाभावादिति चेन्न॥ अहर्गणोत्पन्नग्रहस्य तात्कालिकत्वात्तत्काल
ज्ञानेन स्वार्धरात्रसमस्य तत्कालस्य चयदंतरं तेन तात्कालिकग्रहस्य चालने कृते सति स्वार्धरात्रसमयग्रहः पूर्वसाधित एव भवतीति मंदफल
यस्यैव प्रयोजनत्वात्। तात्कालज्ञानेन ग्रहस्य देशांतरसंस्कारकारणमिति लाघवाच्च॥ अतएव समनंतरमेव ग्रहस्येष्टकालिकत्वसिध्यर्थं
चालनोक्तिः संगच्छते॥ एतेनैतत् ततः अर्धरात्रात्तन्निरक्षरात्र्यर्थं पंचदशघटिकात्मककाले उत्तरगोले कोदयाच्चरघटीमितान्निमकाले
दक्षिणगोले कोदयाच्चरघटीमितपूर्वकाले इति फलितं॥ पूर्वपश्चिमदेशयोर्देशांतरघटीभिरधिकोने काले क्रमेण वारप्रवृत्तिरिति व्याख्याने स्व
र्योदयकालरूपं वारप्रवृत्तिबाधकमपास्ततच्छब्दस्य पूर्वपरामर्शादर्धरात्रादित्यर्थस्यानुपपत्तेः॥ पंचदशघटिकाकालस्य क्षपार्धशब्द
कासिद्धेश्च श्रीभगवताहर्गणस्य लंकायामर्धरात्रिकत्वेन लंकार्धरात्रकालिकत्वोक्तेः स्वदेशतात्कालरूपवारप्रवृत्तिकालज्ञानस्योक्तस्य संगत्युप ११
पत्ते व्यवहारयोग्यलंकासूर्योदयकालवारप्रवृत्तेरसंगत्यभावाच्च॥ ६६॥ अथ ग्रहस्य तात्कालिकीकरणमाह॥ इष्टनाडीगुणा भुक्तिः षष्ट्या
भक्त्या कलादिकं॥ गते शोध्ये युतं गम्ये कृत्वा तात्कालिको भवेत्॥ ६७॥ यत्कालिको ग्रहस्तत्कालसमयपरत्राभीष्टकाले या इष्टघट्यस्ताभिर्गुणि
ता ग्रहमध्यमगतिः षष्ट्याभक्ताफलं कलादिकं गते गताभीष्टकाले पूर्वकाले भीष्टसतीत्यर्थः शोध्य ग्रहे ग्रहे हीनं गम्ये भविष्यामाभीष्टकाले सति ग्रहे
युतं कृत्वा गणकेन विधायतात्कालिकः स्वाभीष्टसमयिको ग्रहः भवेत्॥ गणकेन ज्ञातो भवेत्॥ अत्रोपपत्तिः॥ षष्टिसावनघटीभिर्गतिकला
स्तदाभीष्टगतैष्यघटीभिः का इत्यनुपातेनावगतकालात्मकचालनेन ग्रहः क्रमेण युतोनस्तात्कालिको ग्रहो भवति॥ चक्रशोधितपातस्यवि

परीतमिति ज्ञेयं॥ चालितस्येष्टग्रहापेक्षया चालितमध्यमग्रहः स्पष्टः कृतश्चेत्सूक्ष्मः इति सूचनार्थमत्र ग्रहचालनमुक्तं॥ ६७॥ अथ चंद्र
स्य परमविक्षेपज्ञानमाह॥ भचक्रलिप्ताशीत्यंशः परमं दक्षिणोत्तरं॥ विक्षिप्यते स्वपातेन स्वक्रांत्यंतादनुष्णगुः॥ ६८॥ अनुष्णगुश्चंद्रः स्वक्रां
त्यंतात् विषुवद्वृत्तानुकारेणावलंबितश्चंद्रः स्वासन्नक्रांतिवृत्तप्रदेशो नाकृष्यते॥ तथा तत्स्थानात्स्वभोगमितरेखायास्सन्नाद्यावधिकाभीष्टस्था
नभूतक्रांतिवृत्तप्रदेशादपि स्वपातेन चंद्रपातेन दक्षिणोत्तरं दक्षिणस्यामुत्तरस्यां वा लतस्त्रेण विक्षिप्यते त्यज्यते॥ स्वभोगस्थानक्रांतिवृत्त
प्रदेशे चंद्रबिंबस्थानुपातेन नरीयते॥ ततोपि चंद्रबिंबस्थलांतरे दक्षिणोत्तरसूत्रेण किंचिदंतरेण त्यज्यते इत्यर्थः॥ एतेन सूर्यस्य पाता
भावात्स्वभोगस्थानीयक्रांतिवृत्तप्रदेशे बिंबं भवति। न विक्षिप्तमित्यनुष्णगुरित्यनेनापि सूचितं परमविक्षेपे दक्षिणोत्तरमित्यस्य विशेषणे
नाह॥ भचक्रेति॥ द्वादशराशिकलानां षट्शताधिकैकविंशतिसहस्रमितानां २१६०० मशीतिभागः खसप्तयमकलामितः परमं यस्य तद्द
क्षिणोत्तरमित्यर्थः। चंद्रस्य परमो विक्षेपो रखभशतिफलितं केचित्तत्र सर्वस्य शराभावात् तत्कक्षालोभचक्रस्य पंचमकक्षात्वात्ततोपि चंद्रकक्षायाः
अष्टमत्वात्तत्र दक्षिणोत्तररूपदिग्द्वये चंद्रस्य परमविक्षेपेण पंचाष्टघातरूपाशीत्यंशो भचक्रलिप्तानां परमचंद्रविक्षेप इत्युपपत्तिमाहुः
६८॥ अथैवं भौमादयोऽपि स्वपातैर्विक्षिप्यंते इत्येषामपि परमविक्षेपानाह॥ तन्नवांशं द्विगुणितं जीवस्त्रिगुणितं कुजः॥ बुधशुक्रार्कजाः पातैः
विक्षिप्यंते चतुर्गुणमिति॥ ६९॥ तन्नवांशाः तस्य चंद्रपरमविक्षेपस्य नवमभागः त्रिंशतं द्विगुणितं त्रिंशतं नवति कलामितपरमांतरेण विक्षि
प्यते॥ चतुर्गुणं त्रिंशतं विंशत्यधिकशतकलामितपरमांतरेण बुधशुक्रशनैश्चराः स्वस्वपातैः प्रत्येकं विक्षिप्यंते॥ स्वभोगक्रांतिवृत्तप्रदेशात्त्य
ज्यंते। केचित्त्वापि त्रयस्त्रिंशत्कलाबिंबाच्चंद्रनवांशद्विगुणेन सत्र्यंशकलासप्तकस्य गुरुबिंबस्य तद्रूपविक्षेपणं युक्तं मन्यामहे भौमस्याधःस्थत्वा
त्त्रिगुणं परमविक्षेपणमस्माद् बुधशुक्रयोर्लघुपृथुबिंबयोरधःस्थत्वाच्चतुर्गुणं परमविक्षेपणं तुल्यं नात्याधिकं एवं शनेरुच्चकक्षास्थत्वेपि
मंदत्वाद्बुधशुक्रविक्षेपणतुल्यपरमविक्षेपणं युक्तमित्युपपत्तिमाहुः॥ ६९॥ नन्वेषामत्र कथने का संगतिरित्यतः पूर्वोक्तमुपसंहरन्नाह
एवं त्रिघनरंध्रार्करसार्कार्कदशाहताः॥ चंद्रादीनां क्रमादुक्ता मध्या विक्षेपलिप्तिकाः इति॥ ७०॥ एवं पूर्वश्लोकाभ्यां त्रिघनः सप्तविंशतिः
रंध्राणि नव द्वादश। षट् द्वादश। द्वादश। एतेदशगुणिताः क्रमादुक्ताः कक्रमात्। चंद्रादीनां वारक्रमाच्चंद्रभौमबुधगुरुशुक्रशनीनां विक्षेपकलाः
मध्याः अग्रे परमशरकलानामनियतत्वेनोक्ताः कथिताः तथा च मध्यत्वेनैषामत्र प्रसंगसंगत्या कथनमिति भावः॥ ७०॥ अथ पूर्वापरग्रंथयो
रसंगतिनिवारणायाधिकारसमाप्तिं फक्किकयाह॥ ॥ इति श्रीसूर्यसिद्धांते मध्यमाधिकार इति मयं प्रति सूर्यांशपुरुषेण सूर्योक्तस्यैव कथ

221
1918

नारेतदुक्तं स्याधिसूर्यसिद्धांतत्वं॥ तत्र मध्यममानेन गणितमभिक्रियते यस्मिन्नेतादृशो ग्रंथैकदेशः परिपूर्त्तिमाप्त इत्यर्थः॥ ॥रंगनाथेन र
चिते सूर्यसिद्धांतटिप्पणे॥ मध्याधिकारः पूर्णोयं तद्गूढार्थप्रकाशके॥१॥ ॥इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगण
कविरचिते गूढार्थप्रकाशके मध्याधिकारः पूर्णः॥ ॥अथ स्पष्टाधिकारो व्याख्यायते॥ तत्र ग्रहाणां मध्यमातिरिक्तस्पष्टक्रियायां कारणमाह॥
अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः॥ शीघ्रमंदोच्चपाताख्या ग्रहाणां गतिहेतवः॥१॥ शीघ्रोच्चमंदोच्चपातसंज्ञकाः पूर्वोक्तपदार्थाः जीववि
शेषाः सूर्यादिग्रहाणां गतिकारणभूताः संति॥ ननु कालेनैव ग्रहचलनं भवतीति कालो गतिहेतुर्न तेइत्यत आह॥ कालस्येति। पूर्वप्रतिपादितका
लस्य स्वरूपाणि। तथा चैषां कालमूर्त्तित्वेन ग्रहगतिहेतुत्वं नासंभवतीति भावः॥ ननु कालस्य घट्यादिमूर्त्तित्वादेषां तदात्मकत्वाभावात् कथं का
लमूर्त्तित्वमित्यत आह॥ भगणाश्रिता इति॥ भगोलस्थक्रांतिवृत्तानुसृतग्रहगोलस्थक्रांतिवृत्तप्रदेशाश्रिता राश्यादिमिता इत्यर्थः॥ तथा च ग्रहरा
श्यादिभोगानां कालवशेनैवोत्पन्नत्वात् तदात्मकानां कालमूर्त्तित्वमिति भावः॥ ननु दृश्यंते कुतो नेत्यत आह अदृश्यरूपा इति वायवीयशरीरा अव्यक्त
रूपत्वाद् प्रत्यक्षा इति भावः॥ एवं च ग्रहाणां उच्चादिसद्भावात् स्पष्टक्रियोत्पन्नेति तात्पर्यं॥१॥ अथानयोरुच्चपातयोर्मध्ये उच्चयोर्गतिहेतुत्वं प्रति
पादयति॥ तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः॥ प्राक्पश्चादपकृष्यंते यथासन्नं स्वदिङ्मुखं॥२॥ तेषामुच्चसंज्ञकजीवानां वायुरूपाये
रज्जवस्ताभिर्बद्धाः बिंबात्मकग्रहाः तैः उच्चसंज्ञकजीवैः सव्यवामहस्तैः उच्चबहुत्वेन हस्तबाहुल्याद् बहुवचनं॥ हस्तामित्यर्थः॥ स्वादिङ्मुखं
स्वाभिमुखं यथा आसन्नं ग्रहबिंबं भवति तथा प्राक्पश्चात् पूर्वपश्चिममार्गाभ्यामित्यर्थः॥ अपकृष्यंते अयमभिप्रायः॥ भचक्रगोलस्थक्रांति
वृत्तानुसृतग्रहकक्षागोलांतर्गतक्रांतिवृत्ते कक्षारूपे स्वस्वप्रदेशे ग्रहोच्चपातास्तिष्ठंति संति॥ तत्र बिंबव्यासोनकक्षाकारसूत्रं प्रवहवा
यवेतिरिक्तवायुरूपं स्वतो गतिः स्वस्थानेकंपमानं ग्रहबिंबव्यासेन पूर्वापरे प्रोतमुजीवहस्तद्वयांतर्गतमस्ति॥ अथ ग्रहबिंबमुच्चस्थानात् पूर्वस्मि १२
न्स्वशास्यागच्छदपि वामहस्तास्थितसूत्रेणोच्चस्थानात् पूर्वरूपेण ग्रहस्थानात् पश्चिमरूपेण वहत्सूत्रावयवात्मकेन स्वस्थानात् स्वश्वास्वाभिमुख
मपकृष्यते निरंतरमुच्चैरेवतैः स्वशास्यावत् पश्चांतरं तयोः अंतरं तन्मार्गेणाकर्षणासंभवात्। पूर्वस्मिन्गच्छमानं ग्रहबिंबं सव्यहस्तस्थितसूत्रे
णोच्चस्थानात् पश्चिमरूपेण ग्रहस्थानात् पूर्वरूपेण वृहत्सूत्रावयवात्मकेन स्वस्थानात् पूर्वस्मिन् स्वाभिमुखमाकृष्यते स्वशास्यानिरंतरं यावद
तदभावस्तावदिति॥२॥ अथानेनैवैकरूपां पूर्वाधिकारावगतां गतिं त्यक्त्वा ग्रहस्य विलक्षणां गतिं प्राप्ता ग्रहा इत्याह॥ प्रवहाख्यो मरुत्तांस्तु स्वोच्चा
भिमुखमीरयेत्। पूर्वापरापकृष्टास्ते गतिं यांति पृथग्विधां॥३॥ प्रवहाख्यः प्रवहसंज्ञकः मरुद्वायुः पश्चिमाभिमुखभ्रमः तान् ग्रहान् तुकारा
दुच्चानि स्वोच्चाभिमुखं स्वस्य प्रवहभ्रमेणोच्चगमनदर्शनात्॥ तत्संमुखं पूर्वदिशं यांतीति तात्पर्यार्थः॥ ईरयेत् पूर्वाभिमुखभ्रमणसिद्धप्राग्युक्त

ग्रहचलनवत् रूपेण चालयतीत्यर्थः॥ अतः कारणात् ग्रहाः पूर्वापरापकृष्टाः उच्चदैवतैः पूर्वपश्चिमदिशोराकृष्टाः॥ पृथग्विधां प्रथमावगतैकरूप
भिन्नप्रकारावगतां प्रतिक्षणं विलक्षणां गतिं गमनक्रियां यांति प्राप्नुवंति॥ अवकृष्टानाकर्षणाभ्यां प्रतिदिनं ग्रहाणां गतेरन्यत्वात् तदनुसारेण ग्रह
चारज्ञानं युक्तमिति ग्रहाणां स्पष्टक्रियोत्पन्नेति भावः॥ यद्यपि ननु वायुरज्जुभिः कथं ग्रहाणामाकर्षणं संभवति तद्रज्जूनां विरलतया घनीभूतत्वा
भावेनाकर्षणायोग्यत्वादित्यत आह। प्रवहाख्य इति। उच्चदेवतास्तद्यस्थितकक्षाकारसूत्रं वायुः प्रवहवायुः संबंधात् प्रवहसंज्ञेन पश्चिमा
मुखभ्रमप्रवहात्मकः तान् ग्रहान् स्वोच्चाभिमुखं स्वोच्चदेवतास्थानसंमुखं ईरयेत् प्रेरयेति॥ तुकारादुच्चस्थानात् पूर्वस्मिन् ग्रहे वायुः पश्चि
मगत्या ग्रहं चालयति॥ पश्चिमस्थे वायुः पूर्वगत्या ग्रहं चालयतीत्यर्थः॥ तथा च कक्षाकारसूत्रं तदा तदा तथा तथा भ्रमतीति दैवतैराकृष्यंते
इत्युपचाराद्व्यते इति भावः॥ अत एव ग्रहाणां स्पष्टक्रियोत्पन्नेत्याह॥ पूर्वापरापकृष्टा इति॥ उच्चदैवतैः पूर्वापरदिशयोराकृष्टा ग्रहाः पृथ
ग्विधां मध्यमातिरिक्तप्रकारां गतिं गमनक्रियां यांति अतो न केवलं मध्यक्रियया निर्वाहः॥३॥ अथ प्राक्पश्चादपकृष्यंते इत्युक्तं तद्विशदयति
ग्रहात्प्राक् भगणार्धस्थः प्राङ्मुखं कर्षति ग्रहं॥ उच्चसंज्ञोपरार्धस्थस्तद्वत्पश्चान्मुखं ग्रहं॥४॥ ग्रहस्थानात् पूर्वभागस्थराशिषट्कस्थितः उच्च
संज्ञो जीवः ग्रहबिंबं पूर्वदिगभिमुखं स्वाभिमुखं कर्षति आकर्षयति॥ अपरार्धस्थः ग्रहस्थानात् पश्चिमभागस्थराशिषट्कस्थित उच्चसंज्ञो
जीवइत्यर्थः॥ ग्रहबिंबं पश्चान्मुखं पश्चिमदिगभिमुखं स्वाभिमुखं तद्वत्॥ आकर्षतीत्यर्थः॥४॥ अथ पूर्वोक्तसिद्धं फलितमाह॥ स्वोच्चापकृ
ष्टा भगणैः प्राग्वत् यांति यद्ग्रहाः॥ तत्तेषु धनमित्युक्तमृणं पश्चान्मुखेषु तु॥५॥ स्वोच्चजीवाकर्षिताः ग्रहाः पूर्वाभिमुखं भगणैः राशिभिः भगो
लस्थक्रांतिवृत्तानुसृतकक्षागोलांतर्गतक्रांतिवृत्ते द्वादशराश्यंकितप्रदेशे विभागैरित्यर्थः॥ यत्पत्संख्यामितं गच्छंति तत्तत्संख्या
मितं भागादिकं फलरूपं तेषु पूर्वावगतग्रहराश्यादिभोगेषु धनं योज्यं॥ पश्चान्मुखेषु पश्चिमाकर्षितग्रहपूर्वावगतराश्यादिभोगेषु तुकाराद्यत्सं
ख्यामितं फलरूपं पश्चिमतो गच्छंति। तदित्यर्थः ऋणं हीनं इति एतत्पूर्वैः कथितं॥५॥ अथ पातानां ग्रहविक्षेपरूपगतिहेतुत्वं प्रतिपादयति
दक्षिणोत्तरतोऽप्येवं पातो राहुः स्वरंहसा॥ विक्षिपत्येष विक्षेपं चंद्रादीनामपक्रमात्॥६॥ चंद्रादीनां विरविग्रहाणां अपक्रमात्॥ क्रांति
वृत्तस्थस्पष्टग्रहभोगस्थानात् दक्षिणोत्तरतः दक्षिणस्यामुत्तरस्यां वा दिशि अपिशब्दः पूर्वापराभ्यां समुच्चयार्थकः एषः गणितागतपातः
पातराश्यादिभोगस्थानं अत्राप्यपिशब्दः उच्चेन समुच्चयार्थको न्वेति॥ एवं उच्चेन पूर्वापरयोः फलांतरं भवति तथेत्यर्थः विक्षेपणं स्वरंहसा
आत्मवेगेन विक्षिपति करोति। विशिष्टवाचकानां पदानां विशेषणवाचकपदसमवधाने विशेष्यमात्रार्थकत्वात्। चंद्रादीन् विक्षिपतीति
तात्पर्यार्थः॥ ननूच्चेन स्वाधिष्ठितजीवद्वारा ग्रहाकर्षणं क्रियते॥ तथा पातेनाचेतनात्वाद् भागावेन ग्रहविक्षेपणं कर्तुमशक्यमित्यत आह॥

223/1918

सू॰ टी॰

१२

राहुरिति॥पातस्थानाधिष्ठाजीदेवताराहुर्जीवविशेषः। चंद्रपातस्वरूपे देत्यविशेषो राहुः रहति त्यजति ग्रहमिति राहुरिति व्युत्पत्तेः॥६॥ अथैतद्वि
शदयति॥उत्तराभिमुखं पातो विक्षिपत्यपरार्धगः॥ग्रहं प्राग्भगणार्धस्थो याम्यायामपकर्षति॥७॥अपरार्धगः ग्रहस्थानात्पश्चिमविभागस्थितः
भगणार्धस्थितिकराशिषट्कस्थितो राहुः ग्रहबिंबं स्वराश्यादि भोगस्थानीयप्रदेशात् ॥उत्तरादिगभिमुखं विक्षिपति विक्षेपांतरेण त्यजति॥प्राग्भ
गणार्धस्थः ग्रहस्थानात्पूर्वविभागस्थितराशिषट्कप्रस्थितः दक्षिणस्यां दिशि अपकर्षति विक्षिपति॥ ७॥ अथ बुधशुक्रयोर्विशेषमाह॥ बु
धभार्गवयोः शीघ्रात्तद्वत्पातो यदास्थितः। तच्छीघ्राकर्षणात्तौ तु विक्षिप्येते यथोक्तवत्॥ ८॥ बुधशुक्रयोः शीघ्रोच्चात् जात्यभिप्रायेणैकवचनं।
तथा च तदुच्चाभ्यां तद्वत्पूर्वोक्तवत् अवस्थितपातो तदुच्चजीवो दक्षिणोत्तरयोस्त्यजत इति पूर्वोक्तरीत्या न्यायसिद्धमत्र तदुच्च स्तत्र बद्ध त्वाद्बुधशुक्रयो
स्तथा विक्षेपणं न्यायसिद्धमेवेति भावः नन्वभौमगुरुशनीनामेवं कथं नो क्तमनयोर्वा कथमेतदुक्तं सर्वेषामेकरीतिकथनस्य समुचितत्वात्॥
किं च भौमगुरुशनीनां मुच्चदेवतास्वकक्षास्थाः इति फलमुपपन्नं भवति॥ बुधशुक्रयोरुच्चदेवतयोः कक्षातो दक्षिणोत्तरयोः स्थितत्वेन पूर्वोक्तरीत्या
फलानुपपत्तिः॥विलक्षणप्रवहवायुस्त्वन्मस्य देवतासंबंधस्य स्वरूपभूपरिध्याकारत्वेन कक्षाकारताभावात्॥ विना कक्षाकारता फलो त्पादनस्य
पृश्यत्वाच्च॥ न च विलक्षणप्रवहवायुसत्वं देवतासंबद्धमहाकाशगोले कक्षाकारत्वाभावेपि कक्षातुल्यं स्थानांतरे इति फलोत्पत्तिर्यान्योन्य
गंतरसत्वे नापि कल्पनेयमिति वाच्यं॥ उच्चदेवतास्थानस्य कक्षातो दक्षिणत्वे तस्माद्बौमरप्रदेशस्योत्तरत्वावश्यंभावेनोच्चबुधशुक्रयोरेकदिग्वि
क्षेपतुल्यनियमानुपपत्तेः॥ तत्कथमिदं संगतं भवदुक्तमिति चेत् अत्रोच्यते॥ स्वकक्षासंगीकृत्य तद्दूषणोद्धारमेनेन भवदुपालंभनकर्तुरसनाछे
दस्तत्त्वार्थप्रकाशेनावश्यंकरणीयस्तथाहि॥ स्वशीघ्रोच्चाद्बुधशुक्रयोः यदंतरं राश्यात्मकं तद्व्यातः॥ तेनांतरेण युक्तः पूर्वानीतपात इत्यर्थः॥ य
था बुधशुक्रयोरपरत्पूर्वार्धक्रमेण आस्थितो वास्थितः तुकारात्तथेत्यर्थः॥ तच्छीघ्राकर्षणात्सा द्वत्पाताभ्यां शीघ्रवेगेनाकर्षणं तस्मात्पातस्थाना
धिष्ठातृदेवताभ्यां स्वस्थलस्थितग्रहसंबद्धवायुसूत्रस्याति वेगाकर्षणरचनादित्यर्थः॥ तौ बुधशुक्रौ उक्तवत् उत्तरदक्षिणक्रमेण विक्षिप्येते
तथा च सर्वग्रहसाधारणविक्षेपकथनं पातभेददर्शनार्थं बुधशुक्रयोः पृथगुक्तं॥ न त्वस्मिन्नर्थे उच्चयोर्विक्षेपणं प्रतीयते॥ येन प्रागुक्तसर्ववि
लोपाशंकनीयं॥ पातभेदोक्तिकारणं च ये चात्र पातभगणाः कथितास्ते भगोलस्ते शीघ्रकेंद्रभगणैरधिकाः स्युः॥ स्वल्पाः स्पष्टमुदिता स्वल्पकेंद्र १२
युक्तौ पातौ तयोः पठितचक्रपातौ विधेयाविति भास्कराचार्योक्तमिति दिक्॥८॥ स्यादेतत् परमुच्चदेवतयोरविशेषत्सूर्यचंद्रयोः समं फलं कुतो
न भवतीत्यत आह॥ महत्वान्मंडलस्यार्कः स्वल्पमेवापकृष्यते॥ मंडलाल्पतया चंद्रस्ततो बह्वपकृष्यते॥९॥ सूर्यः मंडलस्य बिंबस्य महत्वात् गु
रुत्ववत्वात् स्वल्पमितरग्रहापेक्षया अल्पं परमं फलं॥ एवकारो निर्धारणे॥ अपकृष्यते उच्चजीवेनाकृष्यते॥ चंद्रः मंडलाल्पतया बिंबस्य लघुत्वेन

ततः सूर्यफलात् बहु अधिकं परमं फलमुच्चजीवेनाकृष्यते॥९॥ ॥अथातएव भौमादीनां मत्स्यमूर्तित्वाद्राभ्यां फलाधिकत्वं संभवतीत्याह॥ भौमा
दयोल्पमूर्तित्वाच्छीघ्रमंदोच्चसंज्ञकैः॥ दैवतैरपकृष्यंते सुदूरमतिवेगिताः॥१०॥ भौमादयः पंच ग्रहाः अतएवातिवेगिताः अत्यंतं वेगः संजा
तो येषां ते। बिंबलघुत्वेनोच्चद्वयाकर्षणेन च बहुपरमफलाः इत्यर्थः नन्वर्कचंद्रयोः कक्षाकारविलक्षणप्रवहवायुचलत्वेन फलोत्पादनं युक्तं। भौ
मादीनां तु प्रत्येकमुच्चसद्भावादायुरत्याकर्षणासंभवेन कक्षाकारप्रवहविलक्षणवायुचलनेन फलोत्पादनार्थमंगीकृतं कथं संभवति॥ उच्चद्वय
स्थानस्थैकत्वाभावात्॥ न ह्येकमेव वायुमंडलं युगपद्विरुद्धगत्योराश्रयस्वतो भवितुमर्हतीति चेन्न। भौमादीनां शीघ्रमंदोच्चदेवताद्वयेन तत्स
न्मार्गेण ग्रहबिंबकर्षस्यैव स्वरूपत्वान्न तत्र वायुमंडलचलनकल्पनं सूर्यचंद्रयोरप्येवमेवांगीकारे बाधकाभावाच्च। वायुमंडलकल्पनं तु तद्धात
रश्मीत्युक्तानुपपत्यनतिप्रयोजनो। च॥ तद्धातरश्मिभिर्बद्धा इत्यस्य पश्चिमभ्रमात्मकप्रवहवायोस्वस्याकाशगोले समसूत्रसंबंधेन स्थिता
इति ग्रहस्थितिस्वरूपान्यथासमर्थनात्। नहि तदन्तरे तु गर्भेणानुपपत्तिः शंकनीया। उच्चदेवताकल्पनेनाकाशस्थग्रहाणां तथात्वस्वरूपत्वात्
दाकर्षणात्फलद्वयसंस्काररूपकस्फलोत्पादनं संगच्छते॥ अतएव स्वस्वग्रहबिंबप्रोतं कक्षाकारमिति कल्पनमपि निरस्तं॥ उच्चद्वयतुल्यकर्षणे
न विरुद्धकर्षणेन च सूत्रमंगलभंगापत्तेरिति॥१०॥ ॥अथैतदुपसंहरति॥ अतो धनर्णस्फमहत्तेषां गतिवशात् भवेत्॥ आकृष्यमाणास्ते दे
वैर्यान्ति यांत्यनिलाहताः॥११॥ अतः पूर्वोक्तस्फुटाकर्षणप्रतिपादनात् तेषां भौमादीनां गतिवशात् आकर्षणोत्पन्नचलनवशात्। स्फमहत् अत्य
धिकं फलं धनर्णं स्वोच्चापहृतं स्यादित्याभवति॥ न चाकर्षणोत्पन्नचलनं कथं न प्रत्यक्षमित्यत आह॥ आकृष्यमाणा इति। ते रूच्चपातदेवतैः एवमुक्तप्र
कारेण आकृष्यमाणाः आकर्षिताः एते भौमादयः व्योम्नि स्वस्वाकाशगोले अनिलाहताः पश्चिमाभिमुखानवरतप्रवहवाय्वाहताः यांति गच्छंति॥
तथा च बलेन तत्स्वस्वपूर्वगतिर्यथा न प्रत्यक्षा न तथा पूर्वगतिविरुद्धात्मकमेतदाकर्षणचलनमानियतं प्रवहवायुभ्रमणप्राबल्याद प्रत्यक्षमि
तिभावः॥११॥ अथैवं गतिकारणाच्च सर्वेषां ग्रहाणां भौमादीनां फलितैकागतिरष्टभेदात्मकेत्याह॥ वक्रानुवक्राकुटिलामंदामंदतरासमा। तथातिशी
घ्रा तराशीघ्रा ग्रहाणामष्टधा गतिः॥१२॥ भौमादिग्रहाणामष्टप्रकारागतिः फलिता॥ तत्र वक्रेत्यादि समेत्यंतं षट्प्रकारागतिः॥ तत्रातिशीघ्रा
शीघ्रारख्यामंदामंदतराः समाः॥ ऋज्वी पंचविधा ज्ञेया या वक्रासानुवक्रगाः॥ शीघ्रतराशीघ्रेति गतिद्वयं॥ तथा मुच्चेये॥ आसां स्वरूपज्ञानमग्रेस्फु
टं॥१२॥ अथैनामष्टधागतिं भेदद्वयेन क्रोडयति। तत्रातिशीघ्रेत्यादि समेत्यंता इत्येवं पंचधागतिः ऋज्वी मार्गगतिः ज्ञेया॥ यावक्रासानुवक्रे
गति॥ तत्राष्टविधगतिषु अतिशीघ्रेत्यादि समेत्यंताः। इत्येवं पंचधागतिः। अनुवक्रगमनेन सह वर्तमाना। पूर्वश्लोके नुवक्रगतेर्वक्राकुटिलरू
मध्याभिधानाद्भयथासन्नत्वाच्च वक्रानुवक्राकुटिलाइति गतिर्वक्रा ज्ञेया॥ तथा च ग्रहाणां मार्गवक्रेति गतिद्वयं॥१३॥ अथ ग्रहाणां स्पष्टक्रियां
प्रतिजानीते॥ तत्तद्गतिवशान्नित्यं यथा दृक्तुल्यतां ग्रहाः॥ प्रयांति तत्प्रवक्ष्यामि स्फुटीकरणमादरात्॥१४॥ नित्यं प्रत्यहं॥ तत्तद्गतिवशात्॥ ता

2-21
1918

स्तागतयएकस्मिन्दिने वी घ्रापरदिनेति वी घ्रे स्यादिनायस्मिन्दिने यागतिस्तत्संबंधादित्यर्थः॥ग्रहाः सूर्योदयः॥ यथायेन प्रकारेण दृक्तुल्यतां विधितग्रहसमतागच्छंति॥ तत्तादृशं स्फुटीकरणं स्पष्टक्रियां गणितप्रकारं आदरात् अत्यंताभिनिवेशात् एतेनासंगतत्वनिरासः॥ प्रवक्ष्यामि स्पष्टत्वेन कथयामि॥१४॥ अथ तत्र प्रथमं ज्यासाधनार्थं ज्यापिंडान्विवक्षुस्तदानयनं श्लोकाभ्यामाह॥ राशिलिप्ताष्टमो भागः प्रथमं ज्यार्धमुच्यते॥ तत्तद्विभक्तलब्धोनमिश्रितं तद्द्वितीयकं॥१५॥ आद्येनैवं क्रमात्पिंडान् भक्त्वा लब्धोनसंयुताः॥ खंडकाः स्युश्चतुर्विंश ज्यार्धपिंडाः क्रमादमी॥१६॥ एकराशिकला नाम द्वादशशतानामष्टमोंशस्त्वाश्विमितः प्रथममाद्यं ज्यार्धं संपूर्णजीवार्धपिंडकः कथ्यते तदभिज्ञैः। ततः प्रथमज्यार्धात् तेन प्रथमज्यार्धेन भक्ताल्लब्धेन हीनं॥ अन्यस्याप्रसंगात् प्रथमज्यार्धं अनेन युक्तं तत्प्रथमज्यार्धं द्वितीयकं॥ ज्यार्धं भवति॥ द्विगुणप्रथममेकोनं॥ तृतीयादीनामानयनार्थमुक्तप्रकारमतिदिशति॥ आद्येनेति॥ प्रथमज्यार्द्धपिंडेन एवमुक्तरीत्या क्रमात्॥ सिद्धपिंडान् भक्त्वा लब्धेनोनयाः खंडं अनेन युताः खंडकाः असिद्धाव्यवहितसिद्धज्यार्द्धपिंडाः असिद्धपिंडाः भवंति॥ यथायथा प्रथमं खंडं २२५ प्रथमभक्तफलं १ द्वितीयखंडं ४४९ प्रथमभक्तफलं २ अर्धाधिकावयवस्यैकाधिकत्वेन ग्रहस्यसोप्रदायिकलासकलैक्यं ३ नं प्रथमं २२२ अनेन द्वितीयखंडो ४४९ युतस्तृतीयं ६७१ एवमिदं प्रथमखंडभक्तफलं ३ अनेन पूर्वफलैक्यं ३ युतं ६ जातं सर्वफलैक्यं ॥१२॥३ अनेन प्रथमखंडं हीनं २१९ अनेन तृतीयं ६७१ युतं जातं चतुर्थं ८९० एवमिदं प्रथमखंडभक्तफलं ४ पूर्वलब्धैक्येन प्रथमखंडरूपं २१९ ज्यांतररूपखंडकमनेन हीनं २१५ अनेन चतुर्थयुतं जातं पंचमं ११०५ एवमग्रेपि अधोक्तरीत्या संख्यखंडानां संभवात् खंडनियममाह॥ स्युरिति॥ एवं चतुर्थविंशत्संख्याकाः ज्यार्धपिंडाः कार्याः॥ न तदधिकाः॥ अत्र एकविंशाद्द्विंशाद्युपष्टास्वं चदशादपि॥ सप्तमाद्वादशसप्तदशान्त्याधोत्तरमतमिति न्यस्तसिद्धांतोक्तस्वल्पेर्ध्वाधिकावयवस्यैकाधिकत्वेन न ग्रह इति ध्येयं॥ गणितस्याविकृतत्वात्॥ सिद्धाः पिंडाः कथं नोक्ता इत्यत आह॥ क्रमादिति॥ सिद्धाः पिंडाः क्रमात् समनंतरमेवोच्यते अत्रोपपत्तिः॥ समायां भूमौ वृत्तं भगणकलांकितं तिर्यगूर्ध्वाधररेखा समितरेखाभ्यां चतुर्भागं कार्यं॥ तत्रोर्ध्वरेखासक्तपरिधिप्रदेशाद्भयत्र समं मत्र समविभागं विगणय्य तदग्रयोर्बद्धसूत्रं वृत्ते द्विगुणविभागमितसंपूर्णचापस्य संपूर्णज्या अन्यगणिते ऊर्ध्वरेखा तोर्धज्या एव प्रयोजनात्तदर्धचापस्यतदर्धमर्धज्या एवं वृत्तचतुर्थांशे ऊर्ध्वरेखातोभीष्टांशानां चापार्धकाणामर्धज्याभीष्टाः गण्याः तत्र भगवतास्त्रैच्छ्या वृत्तचतुर्थांशे त्रिराशिमिते चतुर्विंशज्याः कल्पिताः तद्वीनं तु वृत्ते चक्रकलानां मंकिलत्वात्तत्परिधिव्यासार्धं त्रिराशिज्यांतिमाः भनंदाग्निमितपरिधौ खबाणसूर्यमितो व्यासस्तदा चक्रकलापरिधौ क इत्यनुपातेन व्यासानयनं॰ १४

यथा॰ चक्रकलाः २१६०० खबाणसूर्यगुणाः १७०००००० भनंदाग्निभक्ताः व्यासः ६८७६ एतदर्धं मंतिमा ज्या ३४३८ अथवृत्ते चापज्ययोर्विवेकेन योरतुल्यमेवेपि भगवता कोपिकृत्तभागः समोस्त्यन्यथामलकादौ सर्षपाद्यवलंबनेन स्यादिति मत्वा तद्भागस्य ज्यात्तुल्यैवेति वृत्तस्वर्णवत्यंशोदंडवदृश्यते तु सइति शाकल्योक्तेः प्रथमा ज्या चक्रकलाद्वादशांशरूपैकराशिकलानामष्टभागस्तत्त्वाश्विमितः॥ एतन्मितमेव प्रथमचापमतएतं तदंतरेणाभीष्टा ज्याश्चतुर्विंशत॥ अथ चतुर्विंशतिजीवानां यथोत्तरमुपचयात्तदंतररूपखंडानां यथोत्तरमपचयस्य वृत्ते ज्याकनेन प्रत्यक्षत्वाज्ज्यांतररूपखंडानामंतरं यथोत्तरमुपचितमिति द्वाविंशतिचतुर्विंशतिज्यानामंतरयोरंतरमिदं परमं खंडांतरं सूक्ष्मज्यासक्तिप्रकारेणावगतं १५।१६।१८ अतस्त्रिज्यया येदं खंडकांतरं तदा प्रथमज्ययाकिमित्यनुपातेन फलप्रमाणयोः फलेनायवर्षे प्रमाणे स्थानेतत्त्वाश्विनः॥ अनेन भक्ता प्रथमज्याफले पूर्वद्वितीयखंडयो द्वितीयखंडयोरंतरं॥ अनेन पूर्वखंडहीनं द्वितीयखंडं भवति॥ तत्र पूर्वखंडं प्रथमाज्यातुल्यमेव॰ द्वितीयखंडं प्रथमज्यायां युतेयज्या॰ एवमस्यास्तत्त्वाश्विभागलब्धं द्वितीयतो॰ तच्च पूर्वखंडं प्रथमज्यातुल्यमेव॰ द्वितीयखंडं प्रथमज्यायां युतं द्वितीयज्या॰ एवमस्यास्तत्त्वाश्विभागलब्धं द्वितीयतृतीयखंडकयोरंतरं॥ अनेन द्वितीयखंडमूनं तृतीयखंडमित्यनेन द्वितीयाज्यायास्तृतीज्याया॰ एवं चतुर्थाद्याः॥ तत्र पूर्वमर्द्धाभ्यधिकग्रहणे नोत्तरत्राधिकांतरयातत्संभावनया क्वचित्क्वचिदर्द्धाभ्यधिकावयवस्यैकाधिकत्वेनाग्रह इत्युपपन्नं श्लोकद्वयं॥१६॥ अथैताः सिद्धाः॥ श्लोकषट्केनयनुक्रमाज्यार्धपिंडज्ञानमाह॥ तत्त्वाश्विनोंकाब्धिकृता रूपभूमिधरर्तवः॥ खांकाष्टौ पंचशून्येशा बाणरूपगुणेंदवः॥१७॥ शून्यलोचनपंचैकाश्छिद्ररूपमुनींदवः॥ वियच्चंद्रातिधृतयो गुणरंध्रांबराश्विनः॥१८॥ मुनिषड्यमनेत्राणि चंद्राग्निकृतदस्रकाः॥ पंचाष्टविषयाक्षीति कुंजराश्विनगाश्विनः॥१९॥ रंध्रपंचाष्टकयमा वस्वद्र्यंकयमास्तथा॥ कृताष्टशून्यज्वलना नागाद्रिशशिवह्नयः॥२०॥ षट्पंचलोचनगुणाश्चंद्रनेत्राग्निवह्नयः॥ यमाद्रिवह्निज्वलना रंध्रशून्यार्णवाग्नयः॥२१॥ रूपाग्निसागरगुणा वस्वग्निकृतवह्नयः॥ प्रोह्योत्क्रमेण व्यासार्द्धादुत्क्रमज्यार्द्धपिंडकाः इति॥ तथा समुच्चयेएतानुक्तम ज्यार्धपिंडान् उत्क्रमेण॰ उपांत्यपिंडादिप्रथमपिंडांतः प्रत्येक॰ व्यासार्द्धात् त्रिज्यारूपपरमपिंडं॥ प्रोह्य॰ न्यूनीकृत्य॰ क्रमेण उत्क्रमज्यार्धपिंडाः भवंति॰ यथात्र योर्विंशतिमज्यार्धमुक्तं रूपाग्निसागरगुणा इति वस्वग्निकृतवह्नय इति चरमे पिंडाहीनं सप्तप्रथमउत्क्रमज्यार्द्धपिंडः॥ एवं द्वाविंशतिमं चरमाच्छुद्धं द्वितीय उत्क्रमज्यार्द्धपिंडः एवमग्रेपीति चतुर्विंशति उत्क्रमज्यार्द्धपिंडाः॥ अत्रोपपत्तिः॥ ज्याचापयोर्बाणरूपमंतरमुत्क्रमज्या॰ यद्यपि पूर्वार्धज्यावद्धारास्यं न संभवति स्युत्क्रमज्यापिंडा इति वक्तुमुचितं नोत्क्रमज्यार्द्धपिंडा इति तथापि भगवता परिभाषार्धचापया घशरागाभावे नोत्क्रमज्यायाः पूर्णशरांशत्वादुत्क्रमज्यार्द्धमित्युक्तं॥ तु ज्यार्द्ध अथ वृत्तचतुर्थांशे

227
1918

सू० टी०

१५

सर्वज्यां कृतेन यद्दृश्यानां ज्यानिज्याता हीनातकोट्यंशानामुत्क्रमज्येति स्फुटं दृश्यते॥ अतउक्तं ज्यार्धक्रमेणोत्क्रमज्यासाधनार्थं व्युत्क्रमेण त्रि
ज्या ४४ ह्रासोत्क्रपिंडा उत्क्रमज्यापिंडा इत्युपपन्नं प्रोक्ते त्यादि॥२२॥ अथ श्लोकपंचकेनोत्क्रमज्यापिंडानुपूर्वोक्तसिद्धान्ति ब्रधाति मुनयोरंध्रय
मलारसषड्गमुनीश्वराः॥ पट्टेकारूपषड्दस्ना सागरार्थहुताशनाः॥२३॥ खर्तुवेदानवाध्यर्था दिङ्गोस्त्यर्थ कुंजराः॥ नगांबरवियच्चंद्रा
रूपभूधरशंकराः॥२४॥ शरार्णवहुतांशैकाभुजंगाक्षिशरेंदवः॥ नवरूपमहीध्रैकागजैकांकनिशाकराः॥२५॥ गुणाश्विरूपनेत्राणि
पावकाग्निगुणाश्विनः॥ वस्वर्णवार्थयमलास्तुरंगर्तुयमाश्विनः॥ नवाष्टनवनेत्राणि पावकैकयमाग्नयः॥ गजाग्निसागरगुणाउत्क्रमज्यार्धपिं
डकाइति॥ एतेउत्क्रमज्यापिंडाः पूर्वसिद्धाः महीभृः पर्वतः॥ भुजेज्याभावेकोट्युत्क्रमज्यापाः पद्मतवाभून्यज्योनात्रिज्यापरमोत्क्रमज्यापिं
डः॥ त्रिज्ययाउभयत्र परमत्वेनार्थसिद्धमंत्यपिंडत्वैति ध्येयं॥२७॥ अथ प्रसंगात्परमक्रांतिज्यांवक्रांत्यानयनमाह॥ परमायक्रमज्यातुस
प्तरंध्रगुणेंदवः॥ तद्गुणाज्यात्रिजीवाप्तातच्चापंक्रांतिरुच्यतेइति॥ न्यूनं चतुर्दशशतं १३९७ परमक्रांतिज्याः तु काराच्चतुर्विंशत्यंश
ानांवक्ष्यमाणज्यानयनप्रकारः॥ तत्रैः कथ्यते॥ अत्रोपपत्तिः॥ विषुवद्वृत्तात्क्रांतिवृत्तभागास्य याम्योत्तरस्यांतरं ध्रुवाभिमुखं वृत्ताकारस्तत्क्रां
तिः॥ तत्र सायनमेषतुलादिस्थानेतयोरंतराभावात्कर्कमकरादौतयोः परमांतरत्वाद्भीष्टभुजज्यावशात्क्रांतिरुपपन्नेति॥ त्रिज्यातुल्यभु
जज्यापरामक्रांतिज्यातदेष्टभुजज्ययाकेत्यनुपातेनफलं ध्रुवाभिमुखं सत्त्वेतदंतररूपार्धचापास्यार्धज्याविषुवद्वृत्ताद्धरमध्यस्य
ात॥ तच्चापंतदंतरकालासिकाक्रांति॥२८॥ अथ फलानयनार्थं केंद्रे यद्भुजकोटिज्ये कार्ये इत्याह ग्रहसंशोध्यमंदोच्चात्तथाशीघ्राद्वि
शोध्य च॥ शेषं केंद्रपदंतस्माद्भुजज्याकोटिरेववेति॥ ग्रहंराश्यादिकं॥ मंदोच्चात्॥ भागानीतस्वकीयराश्यादिकं मंदोच्चं छीतोग्रहोमंदकेंद्रं शी
घ्रोच्चाद्धीनोग्रहः॥ शीघ्रकेंद्रंभवतीत्यर्थः॥ तस्मात्केंद्रात्सदं भोगात्॥ संशोध्य॥ नुनीरूत्य॰ शीघ्रात्॥ भागानीमराश्यादिशी॰ घ्रोच्चात्॥ चःसमु १५
च्चयेउभीरूत्य शेषं॰ राश्यात्मकं॥ नथाउच्चसंबंधेन॰ केंद्रंमंदोच्चान्॰ राशित्रयात्मकं विषमं समं पदं ज्ञेयं त्रिराश्यंतर्गतेचे॥ प्रथमं विषमं पदं
॥ ततः षड्राश्यंतर्गतेचेऊनं केंद्रंद्वितीयं समं पदं॥ ततोनवराश्यंतर्गतंचेत्तृतीयं विषमं पदं॥ ततोनवोनं चतुर्थं पदं समंमित्यर्थः॥ अ
त्रोपपत्तिः॥ उच्चस्थानाभिमुखमुच्चरेखवतैग्रहणोकेरुच्चाकृष्टः किंपरंतरेणेति ज्ञानार्थमुच्चहीनोग्रहः केंद्रमुच्चग्रहणवशात्तदाख्यं॥ त
त्रभगवतास्वेच्छयामहाउच्चंपरं तरेणात केंद्रं कृतं उभयथाभुजकोट्योस्तुल्यत्वात्॥ द्वादशराश्यंकितेवृत्तेउच्चस्थानाच्चतुर्विभागात्मने ए
केकोभागोराशित्रयात्मकः पदसंज्ञः॥ अथोच्चस्थानाकृष्टः कस्मिन्परेस्तीति भ्रन्यभिषणावोनेकेंद्रं कृतं॰ ज्यानोपदांतर्गतत्वात्॥ ग्रहाधिष्ठि
तपदाद्भुजज्याकोटिज्ययोर्ज्ञाने॥२९॥ ननुपदेग्रहस्यराशिविभागात्मकेनैकत्वाद्भुजकोटिज्ययोरतुल्ययोः साधनं कथमित्यत आह

गताद्भुजज्याविषमेगम्यात्कोटिः पदेभवेत॥ युग्मेतुगम्याद्बाहुज्याकोटिज्यानुगताद्भवेत॥ विषमेपदेगताभुज्यास्यात्गम्याकोटिस्यात्समेग
ताकोटिज्यास्यागम्यादित्यर्थः॥ भुजज्यास्यात्॥ गम्यात्॥ यद्बाहुज्याकोटिज्यानुगताद्वेदितिविषमेपदं॥ गतात्॰ ग्रहस्य॰ ज्या॰ पदादित
यदंतराशिविभागात्मकं प्राप्तातेनस्मादित्यर्थः॥ भुजज्यास्यात्॥ गम्यात्॥ गतोनत्रिभं ग्रहस्यपदादितोयदुतावधिकमेष्यं॥ तस्मात्कोटिः
कोटिस्यात्॥ युग्मे॰ समे॰ तुकारात्पदे॰ गम्याभुजज्या॰ गतात्कोटिज्यास्यात् तुकारोविशेषद्योतकः एकस्मादेवोक्तरीत्या॥ इयं साधितमित्यर्थः
अत्रोपपत्तिः॥ विषमपदेग्रहोच्चाधरएवांतरानुसारेणफलमुत्पद्यतेतोरत्नांतस्तदंतरमेइज्याभुजरूपाः तदर्धचापंतदंतराशाव
त्भागस्थाः गताः ऊर्ध्वाधररेखामत्स्यसंपन्नतिर्यग्रेखाग्रहयोरंतस्त्रमर्धज्यापदांतः कोटिज्याः भुजोत्क्रमजोनव्यासार्धरेखारूप
कोटितुल्यत्वात्॰ तत्तरद्वचापंभुजांशोनंत्रिभमितिगम्यात्कोटिज्या॰ समपदेग्रहोच्चाधररेखांतरंतिर्यगर्धज्याभुजंज्येतितदर्धचापं
पदेष्यंतिर्यग्रेखाग्रहतरंतिर्यगर्धज्याकोटितुल्यत्वात्कोटिस्तच्चापंपदगतमित्युपपन्नगतादित्यादि॥३०॥ अथाभीष्टकलानांज्यासाध
नंश्लोकाभ्यामाह॥ लिप्तास्तत्त्वयमैर्भक्ता लब्धं ज्यापिंडकंगतंगतगम्यांतराभ्यास्तंविभजेत्तत्त्वलोचनैः॥३१॥ तदवाप्तफलंयोज्यंज्या
पिंडेनतसंज्ञके॥ स्याद्भुजज्याविधिरयमुत्क्रमज्यास्वपिस्मृतइति यस्यराश्यात्मकस्यपदांतर्गतस्यज्याकर्तुमिष्टातस्यकलाः कार्याः
तत्त्वाश्विभिर्भक्ताः॥ लब्धं चतुर्विंशज्यापिंडेषुपूर्वोक्तेषुलब्धसंख्याकः पिंडोगतो भवति॥ तदग्रिमपिंडएष्यः॥ पूर्वतुस्वरूपोक्तार्थ
पिंडानां ज्यार्धेस्युक्तिरिदानीनुतेषामेवार्धत्यागेनज्यापिंडत्वोक्तिः॥ अर्धग्रहणात्गणितक्रियापाया॥ कुत्रतापेक्षैः॥ नतुपूर्वपिं
डाद्विगुणागुणितक्रियायोग्यायाइत्याशयेनाधीनुक्तिः॥ गौरवात्॥ भागेवशिष्टेतत्गतेष्यपिंडयोरंतरेणगुणितं॥ तत्त्वाश्विभिर्भ
जेत॥ तस्मात्सदांपतकलादिकं फलंनत॥ गतेज्यापिंडेयुक्तं कार्यं॰ भुजज्याभीष्टांशकलानामर्धज्यारूपात्क्रमज्याः भवति॰ भुजको
ट्योः स्वरूपभेदाभावात्॥ अयमुक्तः प्रकारउत्क्रमज्यापिंडेषु कथितः॥ अभीष्टांशकलानामुत्क्रमज्यापिंडेरुक्तविधिनोत्क्रमज्या
स्यादित्यर्थः॥ अत्रोपपत्तिः॥ तत्त्वाश्विकलाभिरेकाज्यातदाभीष्टकलाभिः केत्यनुपातेनगतज्या॰ ततस्तत्त्वाश्विकलाभिर्गताग्रि
मज्यांतरंलभ्यतेतदाशेषकलाभिः किमित्यनुपातागतलब्धेनयुक्ताभीष्टज्या॥३२॥ अथज्यातोधनुरानयनमाह॥ ज्यांप्रो
ह्यशेषं तत्त्वाश्विहतं तद्विवरोद्धृतं॥ संख्यातत्त्वाश्विसंवर्गे संयोज्यंधनुरुच्यते इति यस्य धनुःकर्तुमिष्टं तस्मिन्नभुद्धपूर्व
ज्यापिंडंन्यूनीकृत्यः शेषं वाकृति गुणाः तद्विवरोद्धृतं। संख्यातत्त्वाश्विसंवर्गे संयोज्यंधनुरुच्यते इति यस्यधनुःकर्तुं
मिष्टंतस्मिन्नशुद्धपूर्वज्या तयोः शुद्धाशुद्धपिंडयोरंतरेणभक्तं फलं॰ शुद्धज्यायत्समातत्मसंख्यातत्त्वाश्विनाः। संवर्गः घाते॰

229
1918

संबंधोऽयं॰ सिद्धं धनुः कथ्यते अत्रोपपत्तिः॥ व्यासार्धमाद्यत्रितत्तमा वास्या यकलास्ततम संख्यागुणितत त्वाश्विनः व्यांतरेण तत्वाश्विकलास्त स्त्र
शेषव्यस्या कारत्वनुपातागतफलयुता इत्युपरीत्येन सुगमता॥ ३३॥ अथ ग्रहाणां मंदपरिध्यंशानिबद्धः प्रथमं सूर्य चंद्रयोराह रदवेमंदपरिध्यं
शा मनवः शीतगोरशाः॥ युग्मांते विषमांते च नखलिप्तोनितास्तयो योरिति॥ सूर्यस्य परमाकृष्णोत्पन्न परमफलवीपरगमरूपपरममंदफलाशा
नां व्यासपरमफलज्याः तत्तुल्यव्यासार्धेनोत्पन्नवृत्ते कक्षावृत्तस्थिताग्राप्रमाणेनयेंशास्ते मंदपरिध्यंशाः केंद्रयुग्मपदांते॰ नीचोच्चसमे केंद्र च
तुर्दश॰ चंद्रस्य तत्र॰ ते द्वात्रिंशत्॰ केंद्रविषमपदांते नीचोपाभ्यं त्रिभोंतरिते॰ चकारादुक्तमंदपरिध्यंशाः भवंति॥ ३४॥ अथ भौमादीनामाह॥ यु
ग्मांतेर्थाद्रयः खाग्नीस्सुराः सूर्या नवार्णवाः॥ ओजे द्व्यगाव सूपमारदारुद्राग जा व्ययइति॥ भौमस्य पंच सप्ततिः बुधस्य त्रिंशतिगुरोस्त्रयस्त्रिं
शत्॥ शुक्रस्य द्वादशाः शनेरेकोनपंचाशत्॰ पूर्वोक्तमंदपरिध्यंशा इति वक्ष्यमाणाकुजादिनामिति चाकान्वेति॥ एते॰ युग्मपदांते ओजे विषम
पदांते॰ भौमस्य द्विसप्ततिः। बुधस्याष्टाविंशतिः। गुरोर्द्वात्रिंशत्। शुक्रस्यैकादशाः शनेरष्टचत्वारिंशत्॥ ३५॥ अथ भौमादीनां युग्मपदांते
शैघ्रपरिध्यंशानाह॥ कुजादिनामतः शैघ्र्या युग्मांतेर्थाग्निदस्रकाः॥ गुणाग्निचंद्राः खनगाद्विरसाक्षीणि गोग्नयइति। भौमादीनां। अतः। मं
दपरिध्यंशकथनानंतरं। शैघ्र्याः शीघ्रपरिध्यंशाः युग्मपदांते॰ भौमस्य पंचत्रिंशदधिकं शतद्वयं॰ बुधस्यात्र युक्तिरिदधिकं शतं। गुरोः सप्त
तिः। शुक्रस्य द्विपञ्चाशदधिकं शतद्वयं॥ शनेरेकोनचत्वारिंशत्॥ ३६॥ अथैतेषां द्विषमपदांते शैघ्रपरिध्यंशानाह॥ ओजांते द्वित्रियमला द्वि
विश्वेयमपर्वताः॥ खर्तुदस्रा वियद्वेदाः शीघ्रकर्मणि कीर्तिता इति॰ विषमपदांतेः शीघ्रकर्मणि शीघ्रफलसाधनार्थं परिधयउक्ताः॥ एते शीघ्र
परिधयः कुजादीनामिति पूर्वोक्तमन्वयेति। भौमस्य द्वात्रिंशन्नः। बुधस्य द्वे तेरव। गुरोर्द्विसप्ततिः। शुक्रस्य षड्पञ्चाधिकं शतद्वयं। शनेश्चत्वारिं
शत्। अत्र कीर्तिता इत्यनेन युग्मांते फलाभावादेव परिधयः कथं संभवंति। अतो विषमपदांते परमफलस्य सत्वात्तत्रैव युक्ताः परिधयः॥ शनिमं
दशीघ्रपरिध्योः क्रमेणाधिकन्यूनत्वं च संज्ञाव्यापातात् युक्तमित्यादिनाशंकनीयं॥ आगमप्रामाण्यात्। अतिन्यूनत्र प्रमाणस्य युक्तिः कालवशा
देति प्रमसिद्धांतो केश्चेति सहचितं॥ ३७॥ अथाभीष्टकेंद्रसंबंधेन परिधिभागानयनमाह॥ ओजयुग्मांतरगुणा भुजज्या त्रिज्ययोद्धृता॥ युग्मे
वृत्ते धनर्णं स्यादोजादूनाधिके स्फुटमिति॥ भुजज्याः यस्तपरिधिः स्फुटीकर्तुमिष्यते तत्केंद्रस्य मंदशीघ्रान्यतरस्य भुजज्याः ओजयुग्मांतरगुणा वि
षमसमपदांतीयकेंद्रीयविषमपदांतीयपरिधेः सकाशात् ऊनाधिकेः क्रमेण धनर्णं हीने युक्तमधिके हीनं स्फुटं परिधिमानं स्यात्॥ अत्रोप
पत्तिः युग्मपदांतीयस्थानपरिधेर्विषमपदांतीयपरिधिर्यावतान्यूनाधिकस्तदंतरं विषमपदत्वाद्भुजज्योपचितमतस्त्रिज्यातुल्य
भुजज्यया तदंतरं तदेष्टभुजज्यया किमिति फलं युग्मपरिधेः ओजपरिधेर्न्यूनत्वे क्रमेणमधिकत्वे धनमिति विषमपदपरिधेराधिकन्यू
१६

न युग्मपरिधाववर्णधनं कृतमित्युपपन्नं॥ ३८॥ अथ भुजकोटिफलानयनमंदफलानयनं चाह तद्गुणो भुजकोटिज्ये भगणांशविभाजिते। तद्भुजज्या
फलधनुर्मांदलिप्तादिकं फलमिति भुजकोटिज्ये॰ मंदशीघ्रान्यतरसंबंधेन केंद्रभुजकोटिज्ये तद्गुणाः स्वीयस्फुटपरिधिना गुणिते॰ भगणांशैः षष्ट्य
धिकशतत्रयेण भक्ते॰ भुजफलकोटिफले स्तः। मंदकेंद्रभुजज्योत्पन्नफलस्य धनुः कलादिकं मांदफलं भवति॥ अत्रोपपत्तिः॥ कक्षास्थोच्चस्था
ने स्थितदेवतया स्वहस्तस्थितसूत्रप्रोतं ग्रहबिंबस्वाभिमुखाकर्षणेन कक्षास्थानात्स्वपरमफलज्यांतरितस्थाने आकर्षणसूत्रमार्गरूपतिर्यक्
र्णमार्गेणाकृष्यते॥ तेन मध्यग्रहस्थाने केन्द्रेखासन्नतद्वृत्तप्रदेशरूपोच्चनीचकक्षाप्रदेशादंत्यफलज्याव्यासार्धेनीत्पन्नवृत्ते भगणांशांकिते भ्रम
ध्यग्रहस्याग्रेखासक्तेन तद्वृत्तप्रदेशरूपोच्चस्थानात्केंद्रांतरेण कक्षाविपरीतमार्गेण तद्वृत्तपरिधौ ग्रहो भवति॥ अस्मिन्नीचोच्चवृत्ते तदूर्ध्वरेखा
ग्रहयोस्तिर्यगंतरसूत्रमर्धज्याकारं फलं ज्यानुरूपं केंद्रभुजे॥ तस्मिन्नेव वृत्ते व्याससमितति र्यग्रेखाग्रहयोरंतरमूर्ध्वाधरमर्धज्याकारं परम
फलज्यानुरूपं कोटिफलं॰ एते तत्कक्षास्थभुजज्याकोटिज्यावद्भुजकोटिरूपे इति कक्षास्थभगणांशप्रमाणेन ते भुजज्याकोटिज्यारूपे भुज
कोटी तदा कक्षास्थभागप्रमाणवृत्तद्यागुणनीचोच्चपरिधिभागैः के इत्यनुपातेन फलरूपस्थवद्भुजकोटी फले॰ तत्र नीचोच्चपरिधि
वृत्तस्थग्रहभ्रमध्यसत्र्यंकर्णरूपं कक्षावृत्ते चलस्थंतत्र स्पष्टोग्रहभोगः॥ नीचोच्चवृत्तमध्यस्पष्टग्रहभोगस्थानयोः कक्षावृत्ते पदांतरांश
मानंतत्फलं॰ तदर्धज्या तिर्यक्सूत्रं मध्यग्रहस्थोर्ध्वाधररेखारूपमध्यसूत्रात्स्पष्टग्रहभोगस्थानसकफलंज्या॰ कर्णाग्रेभुजफलं तद्वा
त्रिज्याग्रमितेतरनुपाताद्वगतोस्या धार्यफलं॰ तच्च मंदफलज्या भुजफलरूपा कर्णानुपातापेक्ष्या भगवता गीकृताः मंदकर्णस्य त्रिज्यासन्न
त्वेन स्वल्पान्तरेण त्रिज्यातुल्यत्वेनांगीकारात्॥ तच्चापं मंदफलमित्युपपन्नं सर्वमुक्तं॥ चोधार्थं छेद्यकन्याश्च यथा॥ ३९॥ अथ शीघ्रफलं स्फो
कचयेणाह शैघ्र्यं कोटिफलं केंद्रे मकरादौ धनं स्मृतं॥ संशोध्यं तु त्रिजीवायां कर्क्यादौ कोटिजं फलं॥ ४०॥ तद्बाहुफलवर्गैः स्थान्मूलं कर्णश्चलाभिधः
त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितं॥ ४१॥ लब्धस्य चापं लिप्तादिफलं शैघ्र्यमिदं स्मृतं एतदादौ कुजादीनां चतुर्थे चैव कर्मणीतिः शीघ्रसंबं
धि॰ कोटिफलं मकरादिषड्राशीघ्रकेंद्रे त्रिज्यायां योज्यमुक्तं॰ कर्क्यादिषड्भे शीघ्रकेंद्रे कोट्युत्पन्नं फलं त्रिज्यायां हीनं कार्यं॥ तुर्विशेषे। तेन मं
दकर्मण्येतन्निःयाभिरासः कोटिफलसंस्कृतत्रिज्याभुजफलयोर्वर्गयोर्योगात्॰ मूलं॰ सिद्धं॰ शीघ्रसंबंधिफलं॥ कथितं। भौमादीनामेतत्॰ शीघ्र
फलं भवेत्॰ प्रथमे कर्मणि॰ चतुर्थे कर्मणि च समुच्चये॰ कार्यं॰ एवकाराद्वितीयतृतीयकर्मणोर्नेत्यर्थः॥ अर्थात्तत्र मंदफलं संस्कार्यमिति सिद्धं॥ अ
त्रोपपत्तिः। मंदस्पष्टभोगस्थानीयकक्षावृत्तप्रदेशाद्ग्रहबिंबं शीघ्रोच्चस्थानस्थितदेवतया स्वहस्तस्थितसूत्रेण स्वाभिमुखं शीघ्रांत्यफ
लज्यांतरेणाकृष्यते। तदा मंदस्पष्टस्थानाच्छीघ्रांत्यफलज्यया वृत्ते भांशांकिते शीघ्रनीचोच्चसंज्ञे पूर्ववरीत्या शीघ्रोच्चस्थानाच्छीघ्रकेंद्रांतरेण क

231
1918

सामार्गं वैपरीत्येन नग्रहबिंबं भवति ॥ नन्वपूर्ववत्कोटिफलभुजफले कोटिभुजौ ॥ कक्षास्थतिर्यग्रेखातः शीघ्रनीचोच्चवृत्ततिर्यग्व्यासरेखाचि
ज्यांतरेणोत्तिज्या कोटिफलयोगो मकरादौ कर्कादौ कोटिफलोनत्रिज्या शीघ्रनीचोच्चपरिधिस्थग्रहकक्षातिर्यग्रेखयोरंतररज्जुसूत्ररूपा
कोटिः। कोटिभूलभूमध्ययोरंतरं कक्षातिर्यग्रेखांतर्गतभुजफलं तुल्यं भुजः। ग्रहभूमध्यस्थं तिर्यक्कर्णः कोटिभुजफलयोर्वर्गयोगमूलं
ततः कक्षयाकर्णस्त्रयंयन्नलग्नं तत्र स्पष्टो ग्रहभोगः। कक्षामध्यस्त्रा ह्रस्वकालस्पष्टभोगस्थानपर्यंतमर्धज्याकारं सूत्रं शीघ्रफलज्या
शीघ्रकर्णाग्रे भुजफलं तदा त्रिज्याग्रे किमित्यनुपातेन ज्ञाताः अस्याश्चापं मंदस्पष्टग्रहभोगस्थानयोरंतररूपं शीघ्रफलं। अथ शीघ्रनीचोपपत्त
लमध्यज्ञानाय मंदस्पष्टज्ञानमावश्यकं। ननु शीघ्रफलसंस्कारेण स्पष्टज्ञानं। तत्र स्फुटसाधितं मंदफलसंस्कृतमध्यग्रहो मंदस्फुटः स्प
ष्टः रतिः। एवं मध्यग्रहस्यासन्नस्फुटत्वसिध्यर्थं फलयोः संस्कारस्यावश्यकत्वात् आदि प्रथमं मंदफलं शीघ्रफलसंस्कृतान्मध्यग्रहसाधित
मंदफलापेक्षया सूक्ष्ममिति प्रथमं शीघ्रफलार्धसंस्कृतमध्यग्रहान्मंदफलं शीघ्रफलसंस्कृतमध्यग्रहे संस्कार्यं स्फुटासन्नो भवति ॥ १२ ॥ न
नु सूर्यचंद्रयोः शीघ्रफलाभावात् कथं स्पष्टत्वं भवतीत्यत आह उत्तरं वदन्नेव तदा ये कुजादीनामित्यर्धं स्फुटयति: मांदं कर्मैकमर्केंद्वोर्भौमादीनामथोच्य
ते ॥ शैघ्र्यं मांदं पुनर्मांदं शैघ्र्यं चत्वार्यनुक्रमादिति ॥ सूर्यचंद्रयोर्मांदं कर्मैकं तथा तयोः शीघ्रफलाभावात्केवलेन मंदफलेनैव स्पष्टत्वं ॥ एवं मि
तेन सहजमंदफलं साध्यः मध्यग्रह एवं मंदनीचोच्चमंडलमध्यज्ञानाभ्यां कर्मांतरापेक्षेत्युपपत्तिः स्पष्टा ॥ अथानंतरं भौमादीनां उच्यते प्रागुक्तं
स्फुटनया कथ्यते ॥ तथाह शैघ्र्यमिति। प्रथमतो मध्यग्रहात्साधितशीघ्रफलं मध्यग्रहे संस्कार्यं मंदस्पष्टो भवति अस्मादपरि शीघ्रफलं सा
धितमस्यैव संस्कार्यमेवमनुक्रमात् ॥ चत्वारि कर्माणि भवतीति प्रागुक्तत्यर्थार्थं ॥ ४३ ॥ अत्रापि विशेषमाह। मध्ये शीघ्रफलस्यार्धं मांद
मर्धफलं तथा ॥ मध्यग्रहे मंदफलं सकलं शैघ्र्यमेव चेति ॥ मध्यग्रहे स्वसाधितशीघ्रफलस्यार्धं संस्कार्यः। अस्मात्साधितमंदसंबंधिः १८
अर्धफलं साधितमंदफलस्यार्धमित्यर्थः ॥ तथा यस्मात्साधितं तस्यैव संस्कार्यो शीघ्रफलार्धसंस्कृते संस्कार्यमिति फलितार्थः ॥ अस्मात्सा
धितमंदफलं संपूर्णं मध्यग्रहे संस्कार्यं मंदस्पष्टो भवत्यस्मात्साधितं शीघ्रफलं संपूर्णं च समुच्चये तेन मंदस्पष्टे संस्कार्यं। एवं कारात्कुजादी
त्यासिद्धो ग्रहः स्पष्टो नान्यथेति अत्रोपपत्तिः। मंदफलं स्फुटसाधितं वास्तवं स्फुटस्तमंदफलं। सापेक्षस्यान्योन्याश्रयात्सूक्ष्ममंदफलसा
धनमशक्यमपि भगवता तदासन्नसाधनार्थमर्धस्फुटादेव मंदफलं साधितं मध्यग्रहसाध्यग्रहसाधितं। मंदफलापेक्षया सूक्ष्मं अर्ध
स्फुटस्य फलद्वयार्धसंस्कृतो मध्यग्रहः। अत्रापि मंदफलस्यार्धं शीघ्रफलार्धसंस्कृता किंचित्सूक्ष्मत्वार्थं साधितमित्युपपन्नं मध्ये शीघ्र
फलस्येत्यादि ॥ ४४ ॥ ननु फलयोः संस्कारः कथं कार्य इत्यत आह। अजादिकेंद्रे स सर्वेषां शैघ्र्ये मांदे च कर्मणि धनं ग्रहाणां लिप्तादि तुलादा

वृणमेव चेति सर्वेषां ग्रहाणां शैघ्र्ये कर्मणि मांदे कर्मणि चकारः समुच्चये कलात्मकं फलं। मेषादिषड्भांतर्गतकेंद्रे युतं कार्यं चकारेऽव्यवस्था
र्थकः एवकारः फलयोगानयनप्रकारभेदेऽपि धनर्णशास्तिभेदेऽस्य बहुदार्थकः। अत्रोपपत्तिः ॥ पूर्वाकर्षण्ये ग्रहस्य फलं धनं यथा दाकर्षणेऽृणमिति
प्रागुक्तं। तत्र ग्रहात् उच्चपर्यंतं केंद्रे ग्रहा ये तु पूर्वाकर्षणमेषादिकेंद्रं भवति ॥ पश्चादाकर्षणे तु तुलादिकेंद्रं भवतीति तथोक्तमुपपन्नं ॥ ४५ ॥ अथ
ग्रहाणां भुजांतरफलमाह। अर्कबाहुफलाभ्यस्ता ग्रहभुक्तिर्विभाजिता ॥ भचक्रकलिकाभिस्तु लिप्ताः कार्या ग्रहेऽर्कवदिति ॥ स्पष्टसूर्यादिग्रह
गतिः सूर्यस्य भुजफलेन कलात्मकेन गुणिता ॥ द्वादशराशिकलाभिः षट् तत एते कविंशति सहस्रमिताभिर्भक्ताः प्राप्तफलकलाः। ग्रहे सूर्या
दिग्रहे अर्कवत् सूर्यमंदफलधनर्णवशादित्यर्थः ॥ कार्या तुलादाधनर्णं संस्कार्याः ॥ अत्रोपपत्तिः। अहर्गणस्यैकरूपमध्यममानेन
सवान्तद्युसन्न ग्रहाणां मध्यममानेन यद्धरात्रं सूर्यमिलतात्कालिकं सिद्धं ॥ मध्यममानार्धरात्रे तु मध्यसूर्यमिति क्रांतिप्रदेशोऽध्ये याम्यो
त्तरवृत्तं भवति ॥ अस्मात्कालात्स्पष्टार्धरात्रं स्पष्टसूर्यमितक्रांतिवृत्तप्रदेशो योयाम्योत्तरवृत्तसंयोगरूपं मंदफलधनर्णक्रमेणानंतर
पूर्वकाले भवति एतेनानेन कर्मणा स्फुटार्धरात्रकालीन ग्रहाः मध्यार्धरात्रे सूर्यस्तस्पष्टार्धरा इत्यत्राहर्गणो सम्मतत्वेन सर्वेषामेककालिकत्व
सिध्येत् भावादिति। तत्र मंदफलकलानां कलसूत्र एकराशिकलाभिः सायनस्पष्टार्कक्रांत्यंतरान उदयासवो लभ्यंते तत्रामंदफलकलाभिः
केद्व्यनुपातेन ततो होरात्रासु भिगतिकलास्तदा मंदफलकलासुभिः का इति फलकला ग्रहे धनर्णमंदफलवशात् धनर्णं कार्या इति सिद्धं
तत्रापि भगवता लोकानुकंपयस्वल्पांतरेण नाक्षत्रदिने ग्रहगतिभोगमंगी कृत्य चक्रकलापरिवर्तात्मकनाक्षत्राहोरात्रेण गतिकलास्तदा
सूर्यमंदफलकलाभ्रमेण तकाइत्येकानुपातात्लाघवादीनि ताश्चालनकलाइत्युपपन्नं ॥ ४६ ॥ अथ स्पष्टगतिं विवक्षुश्चंद्रस्य प्रथमं वि
शेषमाह ॥ स्वमंदभुक्तिसंशुद्धा मध्यभुक्तिर्निशापतेः। दोर्ज्यांतरादिकं कृत्वा भुक्तावृणधनं भवेदिति ॥ ग्रहगतिसाधने वक्ष्यमाणे गतिफ
लं ग्रहगतेः साधितं तथा चंद्रगतिफलं न साध्यं किंतु चंद्रस्य मध्यमगतिः। स्वस्य। चंद्रस्य मंदः मंदोच्चः तस्य दिनगत्याहीना कार्याः तादृशीग
तेः सकाशात् दोर्ज्यांतरादिकं दोर्ज्यांतरमादिभूतं यस्यैतादृशं गतिफलं वक्ष्यमाणप्रकारे दोर्ज्यांतरगुणा भुक्तिरित्यादौ दोर्ज्यांतरादेवग
तिफलोत्पत्तेः। सिद्धं कृत्वा चंद्रमगतौ ऋणधनं वक्ष्यमाणरीत्या भवति। अत्रोपपत्तिः। वक्ष्यमाणं गतिफलं केंद्रगत्योपपन्नमित्यादिस्येन
सूर्यादिग्रहाणां विचंद्राणां मंदोच्चगतेरत्यल्पत्वात्स्वगत्यैव गतिफलमुक्तं ॥ तत्र चंद्रस्य तथा साधने बहुतरपातान्तस्य मंदोच्चगत्यू
नस्वगतिः केंद्रगतेः फलं साधितं। गतिफलं यत्तेः साध्यं तत्तावेव संस्कार्यमिति वक्ष्यमाणरीतिर्यदा सापि चंद्रभुक्त्यादिस्फुटमन्यथा कें
द्रगते रूपम्रे वस्फुटत्वं स्यात् चंद्रगतेरिति ॥ ४७ ॥ अथ ग्रहाणां मंदस्पष्टगतिवासनास्तत्र तत्पूर्वगतिफलानयनपूर्णकां श्लोकाभ्या

233
1918

सू॰ टी॰ मात्रग्रहभुक्तेः फलं कार्यं ग्रहवन्मंदकर्मणि॥ दोर्ज्यांतरगुणा भुक्तिस्तत्त्वनेत्रोद्धृता पुनः॥४८॥ ॥स्वमंदपरिधिक्षुण्णा भगणांशोद्धृता कलाः॥ क

२८ र्कादौ तु धनं तत्र मकरादौ क्षयं स्मृतमिति॥ मंदकर्मणि गतिमंदफलक्रियापि भिन्ना मित्यर्थः॥ ग्रहवत्॥ ग्रहमंदफलानयनरीत्याः परिधिः गुण

नभगणांशभजनात्मचापमित्यात्मकयाः ग्रहगतेः सकाशात्॰ फलं॰ ग्रहं मंदगतिफलं साध्यं। यथा ग्रहमंदफलं केंद्रभुजज्यातः साधितं तद्वद्

दृंगतिफलं ग्रहगतेः सा अमित्यर्थः॥ यथाहि ग्रहमंदफलांतर्येकदिनांतरीयस्य ग्रहगतिमंदफलत्वाद् भुजज्ययोरेकदिनांतयोरातफलं मंदगति

फलं पर्यवसितं। तत्र केंद्रदोर्ज्यांतरगुणेति॥ ग्रहमध्यगतिः केंद्रगतिरूपा उच्चगतेरत्यल्पत्वात्। दोर्ज्यांतरगुणाः भुजज्यानयनावसरे यज्ज्या

पिंडांतरं तेन गुणिता पंचाशत्तिभिर्भक्ताः पुनः अनंतरमित्यर्थः॥ ग्रहमंदपरिधिना स्फुटेन गुणिताः षष्टियुतशतत्रयेण भक्ताः फलं गतिमं

दफलकलाः। यद्यपि गतिज्यातः फलज्यानयनं कृत्वा तच्चापं गतिफलं समुचितं तथापि ग्रहगतेस्तत्वाल्पिभ्योन्यूनत्वात् ज्याचापयोस्तुल्यत्वेन

तदनुक्तावक्षतिश्चेद्धस्यलुस्वल्पांतरत्वात्तत्करणमुपेक्षितं। मंदस्पष्टगतिसिध्यर्थं मध्यगतौ फलसंस्कारमाह कर्कादाविति तदुक्तं कार्यं मकरा

दावृणं स्मृतं कर्कादाविति॥ तत्रः ग्रहमध्यगतौ॰ पूर्वानीतफलं कर्कादिषड्भागतकेंद्रे धनं मकरादिषड्भांतकेंद्रे ऋणमुक्तं॥ तुकारान्मंदस्पष्टाग

तिः सिद्धा भवतीत्यर्थः॥ अत्रोपपत्तिः॥ ऋणफलोपचये पूर्वफलादग्निमफलमधिकं हीनमिति फलांतरगता ऋणा॰ ऋणफलापचये पूर्वफला

दग्निमं फलं न्यूनं तीनमिति फलांतरगतौ धनं॥ धनफलोपचये पूर्वफलादग्निमफलमधिकं युतमिति फलांतरं गतौ धनं॥ ऋणफलापचयस्त

मकरादितः त्रिभे॰ धनफलोपचयस्तु तुल्यादितः प्राक् त्रिभे इति कर्कादिकेंद्रगतिफलं धनं धनफलापचये पूर्वफलादग्निमं दफलं न्यूनं यु

तमिति फलांतरं गता ऋणा॥ धनफलापचयस्तु कर्कादितः प्राक् त्रिभेः ऋणफलोपचयस्तु मेषादितः प्राक् त्रिभे इति मकरादिकेंद्रे गतिफलमृणं

सिद्धमिति॥ ४९॥ अथ श्लोकाभ्यां स्पष्टगतिसाधनमाह मंदस्फुटीकृतां भुक्तिं प्रोह्य शीघ्रोच्चभुक्तितः॥ तच्छेषं विवरेणाथ हन्यात्त्रिज्यान्यक १८

र्णयोः॥ ५०॥ चलकर्णहृतं भुक्तौ कर्णे त्रिज्याधिके धनं। ऋणमूने धिके प्रोह्य भुक्तिर्वक्रगतिर्भवेदिति॥ मंदस्पष्टां गतिः प्राक् सिद्धां शीघ्रो

च्चगतेः पातयित्वा॰ तच्छेषं त्रिज्यां त्यकर्णयोः त्रिराशिज्या द्वितीयशीघ्रकर्णयोः त्रिराशिज्या द्वितीयशीघ्रकर्णयोः ग्रंथांतरे कवास्पत

थं द्वितीयशीघ्रफलकोटिज्ययास्येति ध्येयं। अंतरेण गुणयेत्। तच्च सिद्धं तच्छीघ्रकर्णे द्वितीयेन भुक्तं॥ फलं मंदस्पष्टगतौ॰ द्वितीयशीघ्रकर्णेः

त्रिज्याधिके॰ गृहीतफलकोटिज्यातोधिके सति॰ हीने च सति॰ धनमृणं क्रमेण कार्यं स्पष्टगतिः स्यात्। ननु यदा मंदस्पष्टगतितो गतिशीघ्र

फलमधिकं तदा मंदस्पष्टगतौ फलमूनं न स्यादिति तत्स्पष्टगतिज्ञानं कथं न चैतदसंभवइति वाच्यं नीचासन्ने ग्रहे फलकोटिज्यातः शीघ्रक

र्णांतरकी घ्रकर्णस्य न्यूनत्वात् फलस्याल्पत्वं मंदस्पष्टगत्याधिकत्वसंभवादित्यत आह॥ अधिके इति॥ मंदस्पष्टगति। अधिके फले पात्यपि

त्वा॰ शेषं वक्रगतिः पश्चिमगतिः स्यात्। तथा च वक्रेति। अत्रोपपत्तिः॥ फलांशाः रवौ कोनांतरसिंजिनीच्छीघ्रकेंद्रभुक्तिः क्रांतिहृद्धिः शोध्याः स्वशी

घ्रभुक्तेः स्फुटखेटभुक्तिः शेषं वक्रा विपरीतशुद्धाविति सिद्धांतशिरोमणौ वक्ष्यवसिष्ठसिद्धांतोक्तेः सूक्ष्मः प्रकारस्तस्योपपत्तिस्तत्तदीय

टीकायां व्यक्तात्र द्वकेंद्रभुजस्यार्थं प्रथमार्द्धे युक्तेः इयं गतिः फलकोटिज्ययागुण्याः कर्णेन भक्ता फलं स्वशीघ्रोच्चगतेः शोध्यं॥ तत्र प्रथममेव

समच्छेदपूर्वकं तत्रोधनार्थं शीघ्रोच्चगतेः कर्णो गुणः। तत्रापि शीघ्रोच्चगतेः केंद्रग्रहगतियोगरूपत्वात्। कार्द्धयं। केंद्रगतावेवफलं हीनं कृत

मिति कर्णगुणितकेंद्रगति॰ फलकोटिज्यागुणितकेंद्रगत्योरंतरं तत्रापि गुणितयोरंतरे वा गुणिते समत्वाल्लाघवाच्च फलकोटिज्याकर्णा

तरेण केंद्रगतिगुणितान् कर्णभक्ते लितशेषमित्यादि हतमित्यंतमुपपन्नं॥ अथ फलकोटिज्यातुल्यकर्णे मुख्यप्रकारेण गतेर्मंदस्पष्टग

तितुल्यतया सिद्धत्वात्फलाभावः॥ कर्णस्य न्यूनत्वे फलस्य शीघ्रकेंद्रगत्यधिकत्वात्तद्द्वनेशीघ्रोच्चगतौ शीघ्रकेंद्रगतिनाशादधिकस्यग

तिफलरूपस्य मंदस्पष्टगतौ हीनत्वं पर्यवसन्नं। कर्णस्याधिकत्वे पूर्वप्रकारफलस्य शीघ्रकेंद्रगतितो न्यूनत्वात् द्वनेशीघ्रोच्चगतौः य

न्यूनं तदधिकपदे स्पष्टगतिः॥ स्पष्टगतिरिति पर्यवसन्नं तदत्र शीघ्रोच्चगतिस्थाने शीघ्रकेंद्रगतिग्रहणेन फलं गतिफलमेवोसन्नं॥ त

न्मंदस्पष्टगतौ फलकोटिज्यातः कर्णस्याधिकन्यूनत्वक्रमेण धनमृणमिसुपपन्नं कर्णे इत्याद्युनेत्यंतं। ऋणफलस्य मंदस्पष्टगतितो

धिकत्वे विपरीतशोधनाच्छेषं पश्चिमगतिर्वक्रस्पष्टेतिसर्वमनवद्यं॥ ५१॥ अथ वक्रगत्युपपत्तिमाह दूरस्थितः स्वशीघ्रोच्चाद्ग्रहः शि

थिलरश्मिभिः सव्येतराकृष्टतनुर्भवेदत्र वक्रगतिस्तदेति॥ स्वशीघ्रोच्चात्। दूरस्थितः। ग्रहो भौमादिकः शिथिलरश्मिभिः। शीघ्रोच्चदेवताहस्त

स्थितग्रहरश्मिबंधनैः रज्जुभिः सव्येतराकृष्टतनुः देवतयाः स्वस्ववामभागे आकर्षितः। ननु शरीरबिंबरूपं यस्यासौ॰ यदा तदा वक्रगतिः

स्यात्। अयंभावः त्रिभाद्यंतरितात्ग्रहो वक्राकारस्तत्रैरश्मिशिथिलैर्दृढबले यथा आकर्षितुं शक्यते भात्रिभाधिकांतरितात् ग्रहो दैवतेर्वक्रा

कारस्तत्रैश्शिथिलरश्मिर्विकर्षितुं न शक्यते नो स्पष्टनरणफलस्थाने ग्रहोवक्री भवतिः आकर्षणाकर्षाभावेन स्वमार्गे वस्तुतो नीचगामित्वसंभ

वादिति॥ ५२॥ अथ यान्केंद्रांशेषु गतिफलमृणं मंदस्पष्टगतितुल्यं भवति। तान्वक्रारंभभागास्तदंभागांश्चिनागतिसाधनप्रकारं ग्रहचक्र

तदन्नानार्थं श्लोकाभ्यामाह कृतर्तुचंद्रैर्वेदेंद्रैः शून्यत्र्येकैर्गुणाष्टिभिः शररुद्रैश्चतुर्थेषु केंद्रांशैर्भूसुतादयः॥५३॥ भवंति वक्रिणस्तै

स्तुस्वैः स्वैश्चक्राद्विशोधितैः। अवशिष्टांशतुल्यैः स्वैः केंद्रैः रुज्झंति वक्रतामिति॥ भौमादयः ग्रहाश्चतुर्थकर्मस्केंद्रांशैः कृतर्तुचंद्रैः रिल्या

पुनरूपैः क्रमेण वक्रिणो भवंति। स्वकीयैः तैः केंद्रांशैः कृततुल्यैः चक्रात् द्वादशराशिभ्यो भवः। विशोधितैः तैः अवशेषसमानैः

मातग्रहभुक्तेः फलं कार्यं ग्रहवन्मंदकर्मणि ॥ दोर्ज्या नरगुणा भुक्तिस्तत्वनेत्रोद्धृता पुनः ॥ ४८ ॥ ॥ स्वमंदपरिधिक्षुण्णा भगणांशोद्धृता कला ॥ क
र्कादौ तु धनं तत्र मकरादावृणं स्मृतमिति ॥ मंदकर्मणि गतिमंदफलं क्रियायामिति मिति त्यर्थः ॥ ग्रहवत् ॥ ग्रहमंदफलानयनरीत्या परिधिः गुण
नभगणांशभजनाद्यनंतचापमितात्मकयाः ग्रहगतेः सकाशात् फलं ग्रहमंदगतिफलं साध्यं । यथा ग्रहमंदफलं केंद्रभुजज्यातः साधितं तद्वत्
केंद्रगतिफलं ग्रहगतेः साध्यमित्यर्थः ॥ यथाहि ग्रहमंदफलानयने कर्कादि मीनांतरीत्या ग्रहगतिमंदफलता भुजज्या बोधे कर्कादिनांतयोरा फलं मंदगति
फलं पर्यवसितं तन्नकेंद्रदोर्ज्या नरगुणेति ॥ ग्रहमध्यगतिः केंद्रगतिरूपा उच्चगतेरत्यल्पत्वात् । दोर्ज्या नरगुणाः भुजज्यानया नावसरे यज्या
पिंडांतरं तेन गुणिता यं चा कलिभिर्भक्ताः पुनः अनंतरमित्यर्थः ॥ ग्रहमंदपरिधिना स्फुटेन गुणिता यष्टियुतशतत्रयेण भक्ता फलं गतिमं
दफलकलाः । यद्यपि गतिज्यातः फलज्यानयनं कृत्वा तच्चापं गतिफलं समुचितं तथापि ग्रहगतेस्तत्वान्भ्यो न्यूनत्वात् ज्याचापयोस्तुल्यत्वेन
नद्गुक्तावस्तलिखं ह्रस्वगुणस्वल्पांतरालारकलतकरणमुपेक्षितं । मंदस्पष्टगतिसिध्यर्थं मध्यगतौ फलसंस्कारमाह कर्कादौ तद्गुणे कार्यं मकरा
दावृणं स्मृतं कर्कादाविति ॥ तत्र ग्रहमध्यगतौ पूर्वानीतफलं कर्कादिषड्रांगतकेंद्रे धनं मकरादिषड्रांतकेंद्रे ऋणं मुक्तं ॥ तुकारान्मंदस्पष्टग
तिः सिद्धा भवतीत्यर्थः ॥ अत्रोपपत्तिः ॥ ऋणफलोपचये पूर्वफलादग्रिमफलमधिकं हीनमिति फलांतरगतावृणा ऋणफलापचये पूर्वफला
दग्रिमं फलं न्यूनं तद्धीनमिति फलांतरगतौ धनं ॥ धनफलोपचये पूर्वफलादग्रिमफलमधिकं युतमिति फलांतरं गतौ धनं ॥ ऋणफलापचयस्त
मकरादितः प्राक्त्रिभे । धनफलोपचयस्त तुलादितः प्राक्त्रिभे रतिकर्कादिकेंद्रे गतिफलं धनं धनफलापचये पूर्वफलादग्रिमं दफलं न्यूनं यु
तमिति फलांतरं गताव्रणो ॥ धनफलापचयस्तु कर्कादितः प्राक्त्रिभेः ऋणफलोपचयस्तमेषादितः प्राक्त्रिभे इति मकरादिकेंद्रे गतिफलमृणं
सिद्धमिति ॥ ४९ ॥ अथ श्लोकाभ्यां स्पष्टगतिसाधनमाह मंदस्फुटीकृतां भुक्तिं प्रोह्य शीघ्रोच्चभुक्तितः ॥ तच्छेषं विवरेणाथ हन्यात्त्रिज्यांत्यकर्णयोः ॥ ५० ॥ चलकर्णहृतं भुक्तौ कर्णे त्रिज्याधिके धनं । ऋणमूनेधिके प्रोह्य भुक्तिर्वक्रगतिर्भवेदिति ॥ मंदस्पष्टा गतिः प्राक् सिद्धा शीघ्रो
च्चगतेः पातयित्वा तच्च वक्ष्यमाणं त्रिज्यांत्यकर्णयोः त्रिराशिज्या द्वितीयशीघ्रकर्णयोः त्रिराशिज्या द्वितीयशीघ्रकर्णयोः ग्रथांतरेक वा स्यत
र्थं द्वितीयशीघ्रफलकोटिज्यायाश्चेति यं अंतरेण गुणयेत् तत्सिद्धं तत्शीघ्रकर्णे द्वितीयेन भुक्तं ॥ फलं मंदस्पष्टगतौ द्वितीयशीघ्रकर्णे
त्रिज्याधिके गृहीतफलकोटिज्यातोधिके सति हीने च सति धनमृणं क्रमेण कार्यं स्पष्टगतिः स्यात् । ननु परा मंदस्पष्टगतिलोगतिशीघ्र
फलमधिकं तदा मंदस्पष्टगतौ फलं न्यूनं न स्यादिति तयस्पष्टगतिज्ञाने कथनमेतरसंभवतीति वाच्यं नीचासन्ने ग्रहे फलकोटिज्या शीघ्रक
र्णांतरशीघ्रकर्णस्य न्यूनत्वात् फलस्य वक्रमंदस्पष्टगत्यधिकत्वसंभवादित्यत आह ॥ अधिके इति ॥ मंदस्पष्टगति । अधिके फले पात्यपि

235/1918

त्याः शेषं वक्रगतिः पश्चिमगतिः स्यात् । तथा च नक्षत्रितः । अत्रोपपत्तिः ॥ फलांतरवशात् नरसिंजिनी शीघ्रोच्चकेंद्रभुक्तिः क्रांतिहृद्विशोध्याः स्वशी
घ्रभुक्तेः स्फुटखेटभुक्तिः शेषं च वक्रा विपरीतशुद्धाविति सिद्धांतशिरोमणौ स्फुटवसिष्ठसिद्धांतोक्तेः सूक्ष्मः प्रकारस्तस्योपपत्तिस्तत्टीय
टीकायां व्यक्तात्र द्वंद्वकेंद्रभुक्त्यर्थं प्रथमाद्द मुक्तं । इयं गतिः फलकोटिज्यया गुण्या कर्णेन भक्ता फले स्वशीघ्रोच्चगतेः शोध्यं ॥ तत्र प्रथममेव
समच्छेदपूर्वकं शोधनार्थं शीघ्रोच्चगतेः कर्णो गुणः । तथापि शीघ्रोच्चगतेः केंद्रग्रहगतियोगरूपत्वात् । कांउहूयं । केंद्रगताविवफलं हीनं हत
मिति कर्णगुणितकेंद्रगतिः फलकोटिज्यागुणितकेंद्रगत्योरंतरं तत्रापि गुणितयोरंतरे वा गुणिते समत्वाल्लाघवाच्च फलकोटिज्याकर्णा
तरेण केंद्रगतिर्गुणिता कर्णभक्ते तिलशेषमित्यादि हृतमित्यंतमुपपन्नं ॥ अथ फलकोटिज्यातुल्यकर्णे मुख्यप्रकारेण गते मंदस्पष्टग
तितुल्यत्वतया सिद्धत्वात्फलाभावः ॥ कर्णस्य न्यूनत्वे फलस्य शीघ्रकेंद्रगत्यधिकत्वात्तद्धीने शीघ्रोच्चगतौ शीघ्रकेंद्रगतिनाशादधिकस्य ग
तिफलरूपस्य मंदस्पष्टगतौ हीनत्वं पर्यवसन्नं । कर्णस्याधिकत्वे पूर्वप्रकारफलस्य शीघ्रकेंद्रगतितो न्यूनत्वात् हीने शीघ्रोच्चगतौः य
न्यूनं तदधिकपदे स्पष्टगतिः ॥ स्पष्टगतिरिति पर्यवसन्नं तदत्र शीघ्रोच्चगतिस्थाने शीघ्रकेंद्रगतिग्रहणेन फलं गतिफलमेवोसन्नं ॥ त
न्मंदस्पष्टगतौ फलकोटिज्यातः कर्णस्याधिकन्यूनत्वक्रमेण धनमृणमित्युपपन्नं कर्णेत्यादि धनेत्यंतं । ऋणफलस्य मंदस्पष्टगतितो
धिकत्वे विपरीतशोधनाच्छेषं पश्चिमगतिरेवस्पष्टेति सर्वमनवद्यं ॥ ५१ ॥ अथ वक्रगत्युपपत्तिमाह दूरस्थितः स्वशीघ्रोच्चाद्ग्रहः शि
थिलरश्मिभिः सव्येतराकृष्टतनुर्भवेद्वक्रगतिस्तदेति । स्वशीघ्रोच्चात् । दूरस्थितः । ग्रहो भौमादिकः । शिथिलरश्मिभिः । शीघ्रोच्चदेवताहस्त
स्थितग्रहरश्चिंवप्रोत रज्जुभिः । सव्येतराकृष्टतनुः देवतयाः स्वस्य वामभागे आकर्षितः । ननु शरीरबिंबरूपं यस्यासौ यदा तदा च वक्रगतिः
स्यात् । अयंभावः । त्रिभाद्यंतरितो ग्रहो दूरताकारस्तत्र रश्मिशिथिले दीर्घले यथा आकर्षितुं शक्यते तथा त्रिभाधिकांतरितो ग्रहो दैवते र्दूरता
कारस्तत्र शिथिलैराकर्षितुं न शक्यते नो स्पष्टगतिफलस्थाने ग्रहो वक्री भवति । आकर्षणाकर्षाभावेन स्वनमार्गे वस्तुतो नीचगामित्वसंभ
वादिति ॥ ५२ ॥ अथ यांशैः शीघ्रगतिफलमृणं मंदस्पष्टगतितुल्यं भवति । ता वक्रारंभभागास्तदंभागांश्च विनागतिसाधनप्रकारं ग्रहचक्र
न्तरतज्ञानार्थं श्लोकाभ्यामाह कृतर्तुचंद्रैर्वेदेंद्रैः शून्यत्र्येकैर्गुणाष्टिभिः शररुद्रैश्चतुर्थेषु केंद्रांशैर्भूसुतादयाः ॥ ५३ ॥ भवंति वक्रिणस्तै
स्तु स्वैः स्वैश्चक्राद्विशोधितैः । अवशिष्टांशतुल्यैः स्वैः केंद्रैः रुज्झंति वक्रतामिति ॥ भौमाद्याः ग्रहाश्चतुर्थकर्मसंस्कृतैः केंद्रैः कृतर्तुचंद्रैरित्या
द्युक्तरूपैः क्रमेण वक्रिणो भवंति । स्वकीयैः तैः केंद्रांशैः कृतुल्यैः चक्रात् द्वादशराशिभ्यो गेभ्यः । विशोधितैः हीनैः । अवशेषसमानैः

स्वकीयैश्चतुर्थकेंद्रांशैः तुकारः क्रमार्थे। भौमादयो व[illegible]स्त्यजंति। परिवर्तैर्वा रहयं भुजतुल्यत्वेन नीचासन्ने मंदस्पष्टगतितुल्यगति
फलस्य संभवादिति॥५४॥ अथ वक्रांतभागानाम तुल्य[illegible]कारणांतरमप्याह महत्वाच्छीघ्रपरिधेः सप्तमे भृगुभूसुतौ। अष्टमे जीवराशि
जौ नवमे तु शनैश्चर इति शीघ्रकेंद्रस्य सप्तमे राशौ शुक्रभौमौ वक्रत्वं त्यजतः अष्टमे राशौ गुरुबुधौ वक्रत्वं त्यजतः नाहिः अत्र शुक्रगुर्वोः पूर्वो
द्देशादुत्तरापेक्षया अभ्यधिकत्वज्ञापकः॥ नवमे राशौ शनिर्वक्रत्वं त्यजति तुरेवार्थे लेन शनिरेव तत्र वक्रत्वं त्यजतीति नान्ये अनुकारणमाह
महत्वादिति। अन्येषां शीघ्रपरिधेः आयुक्तस्य महत्वात्। शनेः शीघ्रपरिधेरधिकत्वात्। तथा च परिध्याधिकत्वेन पूर्वमेव वक्रत्यजनमं
न एव भौमशुक्रयोर्बुधगुरुभ्यां प्रथमोद्देशः। शनेस्तु तत्तरां बुधगुर्वोः शनितः पूर्वोद्देशः। भृगुभूसुतौ जीवराशिजाविति अत्र परिध्यधि
कत्वेन शुक्रगुर्वोः प्रथमकेवलमुद्देशः। न भागानामत्यल्पक्रम इति भावः। ननु परिध्याधिकत्वे पूर्वं पूर्वराशौ वक्रत्यजने कोत्पत्तिरिति
चेच्छृणु। अन्यगतिसंबंधशीघ्रकर्णास्तलोशास्तां कालांतरे स्यादेवं विलोमविधिना शीघ्रोच्चगतेः फलकोटिज्या। अस्याः फलज्या अस्यास्त्रिज्या
भ्यस्तं भुजफलं चलकर्णविभाजितमित्यस्य विलोमविधिना भुजफलं। अस्मात्तद्गुणो भुजकोटिज्ये भगणांशविभाजिते इत्यस्य विलोम
प्रकारेण भुजांशा ज्ञानार्थं भौमादीनां भुजज्या उत्तरोत्तरमधिकाः॥ शीघ्रपरिधिभ्यो यथोत्तरमपवर्ग्य हरेभ्यो लब्धत्वात्। हरादिकं न्यून
त्वाभ्यां फलयोर्न्यूनाधिकत्वनिश्चयात्। तासां चापानि भुजभागा यथोत्तरमधिका वक्रारंभे तद्देते च तुल्याः। अतस्तौ यथदेव क्रां
तत्वात् भुजभागाः षड्भुताः यथोत्तरमधिकं शीघ्रकेंद्रं ते पांच क्रांते भवंति। वक्रारंभस्य हि तीयपदे संभवाद्भुजभागहीनाः षड्राशयस्तेषां
वक्रारंभे यथा पठितं केंद्रं भवति। तस्मात्करीत्या भौमशुक्रयोः पञ्चराशौ बुधगुर्वोः पञ्चमराश्याशनैश्चतुर्थराश्याविति ज्ञेयं। इदं भगव
ता विना चक्रत्वे धनमायातः शीघ्रकेंद्रांशा ज्ञाता अहक्रांत ज्ञाने लोकानुकंपार्थमनतिप्रयोजनमुक्तमिति ध्येयं॥५५॥ अथ चंद्रा १९
दिग्रहाणां विक्षेपसाधनं श्लोकाभ्यामाह कुजार्किगुरुपातानां ग्रहवच्छीघ्रजं फलं॥ वामं तृतीयकं मांदं बुधभार्गवयोः फलं॥५६॥ स्वपातो
नादूहात् ज्ञाता शीघ्राभ्युज सौम्ययोः विक्षेपघ्नांत्यकर्णाप्ताविक्षेपास्त्रिज्यया विधोरिति। भौमशनिगुरूणां ये पाताः मध्याधिकारागग
तास्तेषां शीघ्रजं फलं। स्वग्रहसंबंधि चतुर्थकर्मस्थं शीघ्रफलं पूर्ववत्सिद्धं। ग्रहवत्। स्वस्वग्रहे यथासंस्फुटं तथा संस्कार्यं। ग्रहाच्छीघ्र
फलं ग्रहे यत्कृतं तदा तत्साततं देवफलं पाते ज्यं। चेद्गुणं तदा हीनमित्यर्थः। बुधशुक्रयोः। तृतीयकं। तृतीयकर्मसंबंधि मांदं फलं। तत्पात
योर्विपरीतं संस्कार्यं बुधशुक्रयोर्मंदं धनं ऋणं चेत्तत्पातयोस्तदेव फलं ऋणं धनं क्रमेण कार्यमित्यर्थः॥ अनुक्ततात्चंद्रस्य यथागत एव योतो

237/1918

द्येयः। स्पष्टग्रहात्। स्वस्य फलसंस्कृतो यः पातस्तेन हीनाद्भुजज्या बुधशुक्रयोर्विशेषमाह। शीघ्रादिति। शुक्रबुधयोः शीघ्रोच्चात्सातेन
हीना भुजज्या। न त्वनेन बुधशुक्राभ्यां भुजज्या। विशेषस्य सामान्यबाधकत्वात्। अर्थात् पूर्वोक्तं चंद्रभौमगुरुशनीनां सिद्धं। मध्याधि
स्व मध्यमविक्षेपकलाभिर्गुण्याः चतुर्थकर्मणि यः शीघ्रकर्णस्तेन भक्ताः फलं ग्रहाणां विक्षेपकलाः स्फुटाः भवंति। ननु चंद्रस्य शीघ्रकर्णासंभ
वात्तत्त्वालोनं न तद्भुजस्याव भगुणिता केन भज्येत्यत आह त्रिज्ययेति। चंद्रस्य विक्षेपसाधने तादृशी भुजज्या त्रिज्यया भाज्येत्यर्थः॥ अत्रोप
पत्तिः। यथा विषुववृत्तात् क्रांतिवृत्तं याम्योत्तरभागौ परं तरेण याम्योत्तरस्त्वे सा ध्रुवाभिमुखी क्रांतिस्तथा क्रांतिवृत्ताद्विक्षेपवृत्तभागो यत्त
रेण याम्योत्तरस्तत्र स विक्षेपः। कदंबाभिमुखः। तथाहि। विक्षेपवृत्तानि ग्रहबिंबैर्भिरवाधिष्ठितानि सूर्यव्यतिरिक्तग्रहाणां षण्णां स्वस्व
गोलभिन्नानि। सूर्यस्य नित्यं क्रांतिवृत्तस्थत्वमेव नातिक्रांतिः। एते स्वस्वगत्या भ्रांतान्यवगच्छंति। तत्र विक्षेपक्रांतिवृत्तसंपाते पातस्थाने त
त्पदुत्तरप्रदेशेवस्थिते ग्रहबिंबवत्प्रदेशैक्यात्तदंतराभावेन ग्रहविक्षेपाभावः। यथा तस्माद्ग्रहबिंबं गच्छेति तथा ग्रहबिंबं क्रांतिवृत्तस्थि
त्यंगयोर्याम्योत्तरं वांतरं क्रांतिवृत्ताद्ग्रहस्य भवति। तदेव विक्षेपसंज्ञं मध्यपातान्निभांतरे ग्रहे मध्याधिकारोक्तः। अंतराले पातस्थानाद्ग्र
हबिंबं क्रांतिवृत्तपरं तरेण नवतितरंगात्रयाद्यात्सकंपातो ग्रहरूपं तद्भुजज्यया तः। त्रिज्याभुजज्यया परमविक्षेपस्तदेष्टया भुजज्यया कृति
त्वं चंद्रस्यैव त्रिज्याव्यासार्धगोले परमत्वारस्य गणितागतपातस्य चलस्थितत्वात्। अन्येषां तु परमत्वाराः शीघ्रोच्चदेवताकृष्टग्रहबिंबा
धिष्ठितकल्पितवृत्ते शीघ्रकर्णव्यासार्धे लाक्षिताः। कथमन्यथा शीघ्रफलसंस्कारेण ग्रहस्य स्पष्टत्वं युक्तं। ग्रहबिंबस्य तत्स्थत्वे तस्यात्स्या
पि तत्स्थत्वं युक्तं ग्रहबिंबाधिष्ठितवृत्ते ग्रहभोगस्य मंदस्पष्टत्वेन गणितागतत्वात्तेन मंदस्पष्टोच्चरसाधनमुपपन्नं॥ न दुक्तं सिद्धांत
शिरोमणौ। मंदस्फुटो द्राग्व्यमंडले ग्रहे ग्रहो भ्रमत्यत्र चलत्स्यपातः पातेन युक्तात् गुणितागतेन मंदस्फुटात्सैव चरलः खेटात्स्यादिति। तत्र स्प
ष्टोच्चरसाधनार्थं शीघ्रफलं पाते संस्कृतः शीघ्रफलव्यस्तसंस्कृतस्पष्टग्रहस्य मंदस्पष्टत्वात्। यथोक्तसंस्कृतपातोने स्पष्टग्रहे पातोन मंद
स्फुटग्रहस्य सिद्धेः। अथ बुधशुक्रपातभगणौ वास्तवौ नौक्तौ तौ तु शीघ्रकेंद्रभगणाधिकावतो गणितागतपातयोर्मध्यग्रहेन शीघ्रोच्च
रूपच्छीघ्रकेंद्रयुतयोर्द्वादशराशिशुद्धयोः पातत्वं। तत्र पूर्वपातस्य द्वादशशुद्धत्वाच्छीघ्रकेंद्रचक्रशुद्धं मोज्यमतो लाघवाद्गणितग
तपातस्य। पातो मंदस्पष्टे मंदफलसंस्कृतमध्यरूपे हीन इति। ग्रहयोर्मध्ययोर्गतायथागतमंदफलसंस्कृतं शीघ्रोच्चपातोनमिति
सिद्धं। तत्रापि मंदफलं पाते व्यस्तं कृत्वात् हृतं शीघ्रोच्चकृतं॥ संस्कृतपातपंक्त्या सस्फुटपातयोर्युक्तत्वात् अथैतदानीतविक्षेपेण कर्ण

सू॰ टी॰ व्यासार्धवृत्तेन त्रिज्यावृत्ते स्फुटग्रहस्थाने॰ अंततः कर्णाग्रे यः पूर्वानुपातानीतो विक्षेपस्तदा त्रिज्याग्रे कस्त्यनुपातेन त्रिज्यागुणः कर्णो हरः ।
२० पूर्वं त्रिज्याहरः इति त्रिज्ययोर्नाशाभ्दा भुजज्या परमविक्षेपगुणिता शीघ्रकर्णभक्तेति सर्वमुपपन्नं ॥ ५७ ॥ अथ दिनरात्रिज्ञानार्थं च
रानयनेविवक्षुःप्रथमं तदुपयुक्तां स्पष्टक्रांतिमाह । विक्षेपापक्रमैकत्वे क्रांतिर्विक्षेपसंयुता दिग्भेदे वियुता स्पष्टा भास्करस्य यथागतेति
यस्य ग्रहस्य स्पष्टक्रांतिरभीष्टा तस्य ग्रहस्यायनांशसंस्कृतस्य भुजज्यातः परमापक्रमज्येत्यादिना क्रांतिरयनांशसंस्कृतगोलदि
क्का इति पातस्य विक्षेपोऽपि पूर्वोक्तप्रकारेण पातो नगोलदिक्को ज्ञेयः ॥ गोलस्तु मेषादिषट्कमुत्तरस्तुलादिषट्कं दक्षिणः । अथवा
रक्रांत्योरेकदिक्त्वे क्रांतिः कलाद्यात्मकविक्षेपेण युताः तयोर्दिग्भेदे क्रांतिर्विक्षेपेण वियुताः अंतरिताः शेषो दिक्का स्पष्टा क्रां
तिः स्यात् । ननु सूर्यस्य विक्षेपेण युतातयोर्दिग्भेदे याभावात्कथं स्पष्टाक्रांतिर्ज्ञेया तत्र यत्तु आह भास्करस्येति सूर्यस्य यथाग
तापूर्वागता क्रांतिरेव स्पष्टा क्रांतिः । अत्रोपपत्तिः । विषुवद्वृत्तात्कुहविंबकेंद्रपर्यंतं याम्योत्तरं वृत्तांतरं स्पष्टक्रांतिरिति तयोरेकदिक्त्वे
तद्योगतुल्यमंतरं भिन्नदिक्त्वे तदंतरमितमंतरमिति । अत्र शरस्य क्रांतिः संस्कारयोग्यत्वसंपादिका क्रियालोकभ्रन्यभयात् स्वल्पांत
रत्वाच्चोपेक्षिता भगवता कृपावता अन्यथा शरस्य भ्रवाभिमुखत्वे भगवदुक्तमायनदृक्कर्म कथमभ्युपगतं स्यादित्यलं ॥ ५८ ॥ अथ
दिनरात्रिमानज्ञानार्थमहोरात्रासून्साधयति ग्रहोदयप्राणाहताः स्वखाष्टैः ॥ कोद्धृताः गतिः चक्रासवो लब्धयुताः स्वाहोरात्रासवः
स्मृता इति । ग्रहस्ये ये यनामचरासंस्कृताः राशोदयमाणाभिः रशोदयासवस्तैर्गुणितानिजस्फुटगतिः कलाभाष्टाद्यांत भक्ता फलेन
युताश्चक्रासवः षष्टिघटिकानामसवः षड्तायुतैकविंशतिसहस्रमिताः स्वस्य ग्रहस्याहोरात्रासवः कालतत्त्वज्ञैः कथिताः ॥ अत्रो २०
पपत्तिः ॥ ग्रहः पूर्वगत्या लंबितः प्रवहेण गतिभोगकालेन भचक्रपरिवर्तानंतरं मुहूर्तत्वो भचक्रपरिवर्तिकालः षष्टिघटिकास्व
मितो ग्रहगतिकलासंबंधासात्मककालेनाधिको ग्रहोरात्रमसात्मकं नाक्षत्रप्रमाणेन भवति । तत्रैकराशिकलाभिर्ग्रहसंबंध
राशयुदयप्राणास्तदा गतिकलाभिः के इत्यनुपातेन गत्यसवस्त्युपपन्नो ग्रहोदयेत्यादि॰ अनेनैव श्लोकेन ग्रहाणामुदयांतर
कर्मास्तीत्युक्तं भगवता तथाहि॰ अनुपातानीतमध्यग्रहाणां निश्चिताहोरात्रमानांतरकाले सिद्धत्वान्मध्यमध्यरात्रकाले ग्रहा
णां सिद्धिः । रविमध्यगत्यसूनां प्रतिरात्रौ भिन्नत्वेन मध्यमसूर्याहोरात्रमानस्यनियतत्वाभावात्तदंतरस्य राशिकावगतग्रहाणां नियत
मध्याहोरात्रमानांतरेणाई रात्रे यत्संस्कारेण भवंति तदेवोदयांतरं॰ तत्साधनं भगवता स्वल्पांतरत्वादुपेक्षितं॰ कथमन्यथा

गतिकलासुनां समत्वमुपेक्ष्य गतिकला नामसवो भगवदुक्ताः संगच्छंते॰ उदयांतरस्य गतिकलासुभेदोत्पन्नत्वात् ॥ ५९ ॥ अथ चरोपयुक्तां
क्रांतिज्यां चाह क्रांतेः क्रमोत्क्रमज्ये कृत्वा ततो क्रमज्यया हीना त्रिज्यादिनव्यासदलं तद्दक्षिणोत्तरमिति॰ स्पष्टक्रांतेः क्रमोत्क्रमज्ये॰ हे पि
प्रसाध्य॰ तत्र॰ तन्मध्ये क्रांत्या क्रमज्यया त्रिज्या हीना॰ दिनव्यासदलं॰ अहोरात्रवृत्तस्य व्यासार्द्धः द्युज्येत्यर्थः तत्र दिनव्यासार्द्धं दक्षिणोत्त
रं॰ दक्षिणगोले उत्तरगोले च स्यात् । क्रांतेर्गोले द्वयेपि समत्वात् । अपरा क्रांतिज्यैव॰ अत्रोपपत्तिः ॥ क्रांत्यंशानां क्रमज्या क्रांतिज्या भुजः
विषुवद्वृत्तानुकारस्याहोरात्रवृत्तस्योभयगोले तुभयतः व्यासार्द्धं द्युज्या कोटिस्त्रिज्या कर्ण इति गोले प्रत्यक्षं त्रिज्यावृत्ते उन्मंडलेया
म्योत्तरवृत्ते वा प्रत्यक्षं । तत्र भुजकर्णयोर्वर्गांतरपदं कोटिरिति क्रांतिज्यावर्गोनात्त्रिज्यावर्गान्मूलं द्युज्या॰ तत्रापि भुजोत्क्रमज्यया
हीना त्रिज्या कोटिक्रमज्या स्यादिति वृत्ते प्रत्यक्षदर्शना क्रांत्युत्क्रमज्यया त्रिज्या द्युज्या स्यादिति लाघवेन वर्गमूलनिरासेनोक्तं
भगवता क्रांतेरित्यादि ॥ ६० ॥ अथ चरानयनपूर्वकदिनरात्रिमानसाधनं श्लोकद्वयेनाह क्रांतिज्या विषुवद्भाघ्नी क्षितिज्या द्वाद
शोद्धृता । त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः ॥ ६१ ॥ तत्कार्मुकमुदक्क्रांतौ धनहीनापृथक्स्थिते ॥ स्वाहोरात्रचतुर्भागे दिनरा
त्रिदले स्मृते ॥ ६२ ॥ याम्या क्रांतौ विपर्यस्ते द्विगुणे तु दिनक्षपे ॥ विक्षेपयुक्तोनितया क्रांत्या भानामपि स्वके इति ॥ क्रांतिज्या॰ विषु
वद्दिनीयमध्याह्ने द्वादशांगुलशंकोः छायया गुण्या॰ द्वादशभक्ता फलं कुज्या स्यात् ॥ सा॰ त्रिज्यया॰ गुणिता॰ अहोरात्रार्द्धकर्णाप्ताः अहो
रात्रवृत्तस्यार्द्धकर्णेन॰ व्यासदलेन द्युज्यया भक्ता॰ फलं चरजा ज्या॰ चरज्येत्यर्थः ॥ तस्याश्चरज्यायाः धनुः असुवश्चरासवो भवंति
॥ तत्कार्मुकं स्वाहोरात्रचतुर्भागे॰ स्वस्य चरसंबंधिनो ग्रहस्य प्रागुक्ता होरात्रासवस्तेषां चतुर्थांशे पृथक्स्थिते स्थानद्वयस्थे॰ उत्तरक्रांतौ सत्यां
क्रमात् धनहीनौ॰ युतहीनौ कार्यौ॰ तौ क्रमेण॰ दिनरात्रिदले॰ दिनार्धरात्र्यर्धे कालविद्भिरुक्ते॰ दक्षिणक्रांतौ सत्यां॰ विपर्यस्ते दिन
रात्रिदले । यत्र हीनं तद्दिनार्धं॰ यत्र युतं तद्रात्र्यर्धमित्यर्थः ॥ तुकारान्तौ दिनार्धरात्र्यर्द्धे॰ द्विगुणे॰ दिनक्षपे ॥ दिनमानरात्रिमा
ने ग्रहस्य स्तः । उक्तरीत्या नक्षत्राणामपि दिनरात्रिमाने साध्ये इत्याह विक्षेपेत्यादि॰ नक्षत्रध्रुवाणामानीतया क्रांत्या॰ नक्षत्र
विक्षेपेनैकभिन्नदिक्क्रमेण युक्तया॰ अंतरितया॰ उक्तप्रकारेण सिद्धया॰ स्वके॰ नक्षत्रदिनरात्रिमाने साध्ये इत्यर्थः ॥ अत्रोपपत्तिः
द्वादशांगुलशंकुः कोटिः । पलभा भुजः ॥ अक्षकर्णः कर्णः । क्रांतिज्या कोटिः । कुज्या भुजः । अग्रा कर्ण इत्यक्षक्षेत्रयं प्रसिद्धं ॥ तत्र द्वादशकोटौ फलभा भु
जः क्रांतिज्याकोटौ को भुज इत्यनुपातेन कुज्या॰ तत्स्वरूपं तु निरक्षदेशक्षितिजस्वदेशक्षितिजांतरालस्थिताहोरात्रवृत्तप्रदेशस्य द्युज्याप्र
माणेन ज्येति॰ त्रिज्याप्रमाणेन तज्ज्या चरज्येति द्युज्याप्रमाणेन के इत्यनुपातेन चरज्या॰ तद्धनुश्चरासवो होरात्रवृत्ते खंडप्रदेशेन निरक्षस्वक्षितिजां

237/1918

सू० टी०

२१

नगाले॰ उत्तरगोले स्वक्षितिजस्य निरक्षक्षितिजादधःस्थित्वान्निरक्षक्षितिजयाम्योत्तरवृत्तांतराले होरात्रवृत्तचतुर्थांशत्वाद्होरात्रास
चतुर्थांशोचरासवो युताः दिनार्धं हीनाः अर्धं॰ दक्षिणगोले स्वक्षितिजस्य निरक्षक्षितिजादूर्ध्वस्थत्वाद्हीना दिनार्धं युता रात्र्यर्धमित्युपपन्नं
सर्वं क्रांतिज्येत्यादि॥६३॥ अथ ग्रहस्य नक्षत्रानयनमाह॥ भभोगोष्टशतीलिप्ताः खाश्विशैलास्तथा तिथेः॥ ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिना
दिकमिति॥ अष्टशतमिताः कलानक्षत्रभोगाः॥ प्रसंगात्तिथिभोगमाह खाश्विशैला इति॥ तीर्थविंशत्यधिकसप्तशतमिताः कलास्तथा भोगइ
त्यर्थः॥ यस्य ग्रहस्य नक्षत्रज्ञानमिष्टं तस्य ग्रहस्य राश्यादिस्त्रिंशद्गुणभागा षष्टिगुणिताः कलाद्यो ज्यारंतिपरिभाषया कलानक्षत्रभो
गभक्ताः फलं ग्रहस्य गतनक्षत्राणि शेषं वर्तमाननक्षत्रस्य गतकलाः॥ तस्मात्तस्य गतादिज्ञानयनमाह भुक्त्येति॰ ग्रहस्य कलात्मिका गत्या गं
तारि भारिकं गतं भगहरणेन तस्या एवमेवं शेषो गाडागाद्गलि गतं॰ कलाद्यागे नैष्यदिनादिकं साध्यं॰ अत्रोपपत्तिः॥ भचक्रभोगेन सप्तविंशति
नक्षत्राण्यश्विन्यादीनि पश्चाद्भुनत्त्यतः सप्तविंशतिनक्षत्राणां चक्रकलाः षड्गुणयुतैकविंशतिसहस्रयुताः भोगस्तदैकनक्षत्रस्य करस्यानुपा
तेनाष्टशतकलाभोगः॥ एवं तिथेर्भांशादिमासत्रिंशदंशत्वात्भांशमासस्य सूर्यचंद्रांतरैकभगणत्रिंशत्तिथीनां चक्रकलाभोगस्तदैकति
थेः करस्यानुपातेन विंशत्यधिकसप्तशतकलाभोगः॥ अथाष्टशतकलाभिरेकं नक्षत्रं तदा ग्रहकलाभिः किमित्यनुपातेन फलम् अश्विन्यादीनि
ग्रहभुक्तानि शेषकलाग्रहाधिष्ठितनक्षत्रस्य गतं। भभोगाद्धीनं तस्यैष्यं आभ्यां ग्रहगत्यैकदिने तदा भोग्यकलाभिः किमित्यनुपातेन गतैष्यदि
नमानं भवति। एवं चंद्रादिनक्षत्रं तैश्च॥६४॥ अथ प्रसंगाद्योगानयनमाह॥ रवींदुयोगलिप्ताभ्यो योगा भभोगभाजिताः॥ गतागम्याश्च षष्टि
घ्ना भुक्तियोगाप्तनाडिका इति॥ सूर्यचंद्रयोगस्य राश्यादिकस्य परिभाषया याः सकलास्ताभ्यो योगाः विष्कंभादयो भभोगभाजिताः। भभोगेन पूर्वोक्ते
न विभक्ताः भवंति॰ एकैकयोगस्य भभोगमितो भोगः। स प्रत्येकं ताभ्यो पनीय यन्मिताः। शुद्धास्तन्मिता योगाः गताः॥ यस्य भभोगेन शुद्धिस्तवर्तमानइ
त्यर्थः॥ कलाभभोगभक्तागता योगास्तदग्निमो वर्तमान इति तत्पर्यार्थः॥ तस्य शेषं गतं। भोगोत्पत्तिं तमेषां ताभ्यां घटिकाद्यानयनमाह॥ गतागि
एतावेष्यप्रश्नः समुच्चये। कलाः षष्टिगुणिताः कार्याः ताभ्यो भुक्तियोगात्ताडिकाः॥ रविचंद्रकलात्मकगत्योर्योगेन भजनाल्लब्धघटिकागतैष्याः भ
वंति॰ अत्रोपपत्तिः॥ सूर्यचंद्रयोगमितग्रहस्य नक्षत्राणि विष्कंभादिसंज्ञानि योगोत्पन्नत्वाद्योगाः॥ अतस्तदानयनं पूर्वोक्तवत्। अतएव सू
र्यचंद्रयोगतुल्यतद्गत्यायष्टिसाधनघटिकास्तदागतैष्यकलाभिः काइत्यनुपातेन गतैष्यघटिकानयनं युक्तमुक्तं॥६५॥ अथ प्रसंगात्ति
थ्यानयनमाह॥ अर्कोनचंद्रलिप्ताभ्यस्तिथयो भोगभाजिताः॥ गतागम्याश्च षष्टिघ्ना नाड्यो भुक्त्यंतरोद्धृता इति॥ पूर्वार्धव्याख्यानं श्लोकपूर्वा
र्धरीत्या ज्ञेयमुत्तरार्धं स्पष्टं॥ अत्रोपपत्तिः॥ तिथिभोगकलाभिरेकातिथिस्तदा सूर्योनचंद्रकलाभिः का इत्यनुपातेन फलं गततिथयः॥ वर्तमा
नतिथेर्गतैष्ये शेषशेषोनभोगकले। ताभ्यां गत्यंतरकलाभिरनुपातेन गतैष्यघटिकाः पूर्ववत्॥६६॥ अथ पंचांगावशिष्टं करणानयने विवक्ष २१

241/1918

स्तावत्स्थिरकरणान्याह ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदं॥ किंस्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्धतः इति॥ कृष्णपक्षीयायाश्चतुर्दश्या
स्तिथेर्द्वितीयार्धान्॰ द्वितीयार्धमारभ्येत्यर्थः॥ चकारः एवार्थे॰ तेनान्यतिथ्येतितिथिपूर्वार्धस्य च निरासः॥ स्थिराणि करणानि॰ तान्याह शकु
निरिति चतुरम्रिस्तृतीयं॰ अनेन शकुनिनागयोः क्रमेण प्रथमद्वितीयत्वं सूचितं॰ तु कारात्क्रमेण तिथ्यर्धेषु भवंति॥ किंस्तुघ्नं चतुर्थं॰ तु रंतावधि
धानकस्तेनोक्तामिरिक्तं स्थिरकरणं नास्तीति सूचितं॥६७॥ अथ चरकरणान्याह बवादीनि ततः सप्त चराख्यकरणानि च॥ मासेष्टकृत्वा एकैकं
करणानां प्रवर्तत इति॰ ततः॥ स्थिरकरणचतुष्टयानंतरं॥ बवादीनि चरसंज्ञानि करणानि सप्त भवंति॰ एतत उक्तमानि शुक्लप्रतिपद्द्वितीयार्धत
श्चतुर्थं तं भवंति। तिथ्यर्धेनत्वंचम्यादिति॥ करणानि भवंतीत्यस्य तमासे इति॰ चरकरणानां बवादीनां सप्तानां मध्ये एकैकं॥ एकमेकं करणं
मासे॰ स्थिरकरणकालोनितत्रिंशत्तिथ्यात्मकमासे॰ स्वल्पांतरात्मासग्रहणं॥ अष्टकृत्वः। अष्टवारं। प्रवर्तते॰ प्रकर्षेण तिष्ठति॰ भवतीत्यर्थः॥
तथा चपंचम्या परार्धे तानि पुनः पुनः परिभ्रमंति भ्रमंति कृष्णचतुर्दश्यापूर्वार्धपर्यंतमिति भावः॥६८॥ ननु स्थिरकरणे क्रावपरार्धतः स्पुत्र
मेषां चतुर्णां तिथ्यर्धभोगेन शुक्लप्रतिपत्पूर्वार्धपर्यंतं क्रमेणावस्थानमुक्तं चरकरणानां तु केवलं ज्याचार्यं तंतरं कृष्णचतुर्दश्यापूर्वार्धपर्यंतमेकत्वपरि
भ्रमोस्तिन्यत तस्तत्संदेहयद्यत्परत्वात्तिथ्यर्धभोगं सर्वेषां करणानां प्रकल्प्येत॥ एषा स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणामिति॥ स प्ता
नां चकरणानां॰ प्रात्येक॰ तिथ्यर्धश्चासौ भोगश्च तं॰ तिथ्यर्धकालमितावस्थानं॰ प्रकल्प्येत। एकमनिर्णितत्वात्मासार्थोपरत्नभवतीति न्यायात्क
रणत्वेनैषामवस्थानं न तुल्यंकुर्यादित्यर्थः॥ अतएव तिथ्यर्धं करणं स्मृतमित्युक्त्या चांद्रमासे त्रिंशत्तिथ्यात्मके षष्टिकरणानां संनिवेशाच्च
करणानामेव परिभ्रमणं प्रतिमासमनियततिथिभोगं करणं भवतीति तद्धारणं प्रतिमासनियततिथिभोगकरणकसिध्यर्थं चरकरणा
नामष्टवारपरिभ्रमणोत्तरमवशिष्टतिथ्यर्धचतुष्टये स्थिरकरणान्युक्तानीति तात्पर्यार्थः॰ तत्रापि कृष्णचतुर्दश्यापरार्धतस्तत्कल्पनं तद्दिष्टा
नियामकं स्वतंत्रेच्छस्यानियोगानर्हत्वात्॥ अथाग्रिमग्रंथासंगतित्वं निरासार्थमुक्ताधिकारमुपसंहरति॥ एषेति॰ हे मय॰ सूर्यादीनां॰ सप्तग्र
हाणां॰ एषा॰ इत्थं स्यादि संकल्पयति यत्तं यावाप्तौ तां स्फुटगतिरेव गतिः॥ स्पष्टक्रियाज्ञानसंपादिकाः प्रोक्ता तुभ्यं॰ मयोक्ताः एतेन स्पष्टा
धिकारः परिसमाप्तमिति सूचितं॥६९॥ रंगनाथरचिते सूर्यसिद्धांतटिप्पणे॥ स्पष्टाधिकारः पूर्णोयं तद्गूढार्थप्रकाशके॥ २॥
इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके स्पष्टाधिकारः पूर्णः॥ श्री अथ त्रिप्रश्नाधि
कारो व्याख्यायते॥ ॥ नत्वा विनाप्रश्नं गुरोस्तत्प्रतिपदाने छात्रुरयाहितावलरितं छात्राणां ज्ञानासंभवात्प्रयाणो दिग्देशकालानां प्रश्नात्
त्रिविप्रश्नयुक्तेस्तावद्दिग्ज्ञानं श्लोकचतुष्टयेनाह॥ शिलातलेंबुसंशुद्धे वज्रलेपेपि वा समे॥ तत्र शंकंगुलैरिष्टैः सममंडलमालि
खेत्॥१॥ तन्मध्ये स्थापयेच्छंकुं कल्पनाद्वादशांगुलं॥ तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः॥२॥ तत्र बिंदू विधायोभौ वृत्ते पूर्वापरा

सू॰ टी॰
२२

भिधो॥ तन्मध्येतिमिनारेखाकर्तव्यादक्षिणोत्तरा॥ २॥ याम्योत्तरदिशोर्मध्येतिमिनापूर्वपश्चिमा॥ दिङ्मध्यमत्स्यैः संसाध्याविदितस्तद्वदेवहीति
तन्त्र॰ दिक्साधनोपक्रमे॥ प्रथमं अंबुसंशुद्धे॰ जलवत्समीकृते॰ शिलाप्रदेशे॰ अपिवा॥ अथवा॥ तदभावे अन्यत्र वज्रलेपे॰ चलारादौ॰ पुष्टादिना
समस्थानिकृते॰ शंकांगुलैः॥ शंकुस्थांगुलविभागमानगृहीतैरभीष्टसंख्याकांगुलैः॥ व्यासार्धरूपैः वृत्तं॥ भवकं॥ आलिखेत॥ सर्वतः केंद्राद्वृत्त
परिधिरेखातुल्यास्यात्तथेत्यर्थः॥ ततस्तन्मध्ये॰ तस्यवृत्तस्यकेंद्ररूपमध्ये॥ कल्पनयाद्वादशसंख्याकांगुलानितुल्यानियस्मिंस्तं॰ द्वाद
शविभागंकृतमित्यर्थः॥ शंकु॰ समतलमस्तकपरिधिकाष्ठदंडं॰ स्थापयेत॥ तेनः पूर्वापरार्धयोः॥ दिनस्यप्रथमद्वितीयविभागयोः तच्छा
याग्रं॰ स्थापितशंकोः॰ तच्छायाग्रप्रदेशः मंडलपरिधौयस्मिन्विभागेस्पृशेत॥ दिनस्यप्रथमविभागेलुस्पृणंछायाग्रंतत्वृत्ते यत्र प्रवि
शतिदिनस्यापरार्धेयानुस्पृणंवृत्तेयत्रनिर्गच्छतीत्यर्थः॥ तत्रनिर्गमप्रवेशस्थानयोः॥ उभौ॰ द्वौ॰ विंदू॰ पूर्वापरसंज्ञौक्रमेण॰ वृत्ते॰ परिधि
रेखायां॰ कृत्वा॰ तन्मध्ये पूर्वापरविंदू॰ तरमध्ये॰ तिमिना॥ मत्स्येनः रेखाकार्या॰ सादक्षिणोत्तररेखाभवति॥ मत्स्यस्तुविंदूत्तरालसूत्र
मितेनव्यासार्धेन विंदुद्वयकेंद्रकल्पितेनवृत्तद्वयंनिष्पाद्यवृत्तद्वयसंयोगाभ्यांवृत्तद्वयपरिधिर्विभागाभ्यामंतर्गतमत्स्याकारस्थानंभवति
तत्रैकःसंयोगोमुखंवाद्वयवृत्तभागसंमार्जनेनअपरसंयोगस्तुपुच्छमितववृत्तभागद्वयसंमार्जनेन॥ मुखमच्छावध्यजीरेखादक्षिणोत्त
ररेखा॰ तत्रविंदोःसकाशेरेखाग्रंदक्षिणादिक्॰ पश्चिमविंदोःसकाशेरेखाग्रमुत्तरादिक्॰ अनंतरंपूर्ववृत्तंमत्स्यस्यसंमासंमार्जनीयः॥ शं
कुस्थापनस्थानान्निष्क्रान्तसमस्तकेवलदक्षिणोत्तररेखास्थितेतितात्पर्यं॥ दक्षिणोत्तरदिशोर्मध्यस्थाने॥ तिमिनाः दक्षिणोत्तररेखाभिलेन
व्यासार्धेनदक्षिणोत्तरस्थानाभ्यांपूर्ववत्प्रत्येकंवृत्तंविधायपूर्ववत्सिद्धेनमत्स्येनेत्यर्थः॥ पूर्वपश्चिमारेखाकार्या॥ तत्रपूर्वविंदोरासन्नंपू
र्वरेखाग्रंपूर्वापश्चिमविंदोरासन्नरेखाग्रंपश्चिमेतिमत्स्यसंमार्जनेनकेवलापूर्वापररेखापिसिद्धा॥ अथरेखासंयोगस्थानादिक्सा
धनोपक्रमोक्तपूर्ववृत्तमालिखेत॥ तद्वृत्तपरिधौयत्ररेखालग्नातत्रदिगितितद्वृत्तमध्यस्यदिक्चतुष्टयंवृत्तेसिद्धं॥ तद्वृत्त॥ यथादक्षि २२
णोत्तराभ्यांपूर्वापरासाधितातत्प्रकारेणेत्यर्थः॥ एवकारोन्यप्रकारनिरासार्थकः॥ विदिश्चयेन॰ विदिशः॥ कोणदिशः॥ दिशांपूर्वासिद्ध
दिशांयेमध्यमत्स्याअव्यवहितदिग्द्वयांतरोत्पन्नालपुवस्तैः॥ संसाध्याः॥ सम्यक्प्रकारेणसाध्याःरेखावृत्तसंयोगस्थलेनज्ञेयाः॥ अ
त्रोपपत्तिः॥ क्षितिजपूर्वापरवृत्तसंयोगौपूर्वापरविभागस्थौपूर्वापरदिशौतत्रपूर्वापरविभागज्ञानंसूर्योदयास्ताभ्यां॰ तत्रक्षितिजे
पूर्वापरवृत्तंकुत्रलग्नमितिज्ञानंतुविषुवद्वृत्तक्रांतिवृत्तसंपातस्थसूर्योदयास्तस्थलज्ञानेन॰ विषुवद्वृत्तस्यपूर्वापरक्षितिजवृत्तसं
पातयोःसंबंधतात॥ अथान्यस्मिन्दिनेसूर्योदयास्तावग्रांशांतरेणयाम्योत्तरेभवतःइतिसूर्योदयास्तस्थानाभ्यामग्रांशांतरेणोत्तर

243
1918

याम्योपूर्वापरस्थानंभवतीतिक्षितिजस्यमहत्वाद्दूरत्वाच्चलदानेनपूर्वापरज्ञानमशक्यमतस्तत्सूत्रेणस्वाभीष्टप्रदेशेज्ञानार्थमभी
ष्टसमस्थलेक्षितिजानुकारंवृत्तंकृतं॰ तत्रापिसूर्योदयास्तसमसूत्रेणस्थलज्ञानस्यदुःशक्यताछायार्थंशंकुस्थाप्य॥ तथापिसूर्योदयेछा
यानंत्यात्वृत्तपरिधौतदग्रस्पर्शाभावः॥ परंतुयथायथासूर्यऊर्ध्वंभवतितथातथाछायाह्रासायत्रछायावृत्तपरिधौयदाप्रविशतितत्छा
यातात्कालिकीवक्ष्यमाणभुजोग्रस्तोर्द्वज्याकारेणदयस्तदुत्क्रमज्यायत्रपरिधिप्रदेशेलगतितत्रशंकुस्थानस्यपश्चिमा॰ छायाग्रस्यपू
र्वापरसूत्राद्भुजांतरेणयाम्योत्तरपतनात॥ सूर्यपारिदिशिछायापतनाच्च॰ एवंदिनापरार्धेसूर्योयथायथाधःसंचरतितथातथाछा
यावृद्धेःशंकुछायावृत्तपरिधौयस्मिन्यदानिर्गच्छतितात्कालिकोवक्ष्यमाणभुजोग्रस्तोर्धज्याकारेणस्तस्थानाद्दयस्तदुत्क्रमज्यायत्रप
रिप्रदेशेलगतितत्रशंकुस्थानस्यपूर्वा॰ तत्सूत्रंपूर्वापरसूत्रं॰ इदंशंकोरूपलक्षणात्वेनज्ञानंतथाछायोपलक्षणेनापिप्रदेशस्यपू
र्वापरसूत्रज्ञानं॥ तथाहि॰ छायाग्रेविशतितत्रापश्च॰ छायाग्रंनिर्गच्छतितत्रपूर्वा॰ तत्रापिप्रवेशनिर्गमयोरेककालत्वासंभवाद्यत्कालि
कोप्रवेशस्तत्कालेछायायाःपश्चिमत्वंतत्रवस्तुभूतं॥ तत्कालेनिर्गमनस्यपूर्वत्वासंभवः॥ एवंनिर्गमकालेनिर्गमस्थानस्यपूर्वत्वंवस्तु
भूतं॥ तत्कालेप्रवेशस्यपश्चिमत्वासंभवः॥ एवंनिर्गमकालेनिर्गमस्थानस्यपूर्वत्वंवस्तुभूतं॥ तत्कालेप्रवेशस्यपश्चिमत्वासंभवः॥
एककालिकस्थित्यर्थमुभयोरेकतरंचिह्नंचाल्यंतत्कालिकभुजयोरंतरेण॰ तत्रपूर्वचिह्नंभुजांतरांगुलैरयनदिशिचाल्यंपश्चिमचि
ह्नंवाव्यस्तायनदिशिचाल्यं॰ तत्रसूत्रंसूत्रमध्यदेशस्यपूर्वापरसूत्रं॰ एतन्मध्यस्थापितशंकोःछायाग्रप्रवेशनिर्गमचिह्नाभ्यांयथो
क्तरीत्याभुजदानेनसिद्धपूर्वापरसूत्रेणभिन्नत्वात॥ तदुक्तंसिद्धांतशिरोमणौ॰ तत्कालापमजीवयोस्तुविवराद्याकर्णमित्याहताल्लं
बज्याप्तमितांगुलैरयनदिक्पश्चिमस्फुटचालितेति॥ तदेतद्भगवतालोकानुकंपयास्वल्पांतरत्वादेकतरविंदुचालनंनोक्तंस्वार्थंकिं
चिल्लघुत्वेविवनिर्गमप्रवेशविंदुपूर्वापराभिधायुक्ता॰ एवंचाभीष्टस्थानंप्रवेशनिर्गमसूत्रमध्यपथाभवतितथानेनप्रकारेणमंडल
केंद्रेशंकुस्थापनाभीष्टप्रदेशापूर्वापरदेशेमध्येइति॥ तन्मध्येदक्षिणोत्तररेखाविंदुद्वयोत्पन्नमध्यमत्स्यरेखैवेति॥ याम्योत्तरम
ध्येपूर्वापरारेखादिङ्मध्यमत्स्येनेतियाम्योत्तरदिशोरित्यादिसम्यगुक्तं॰ ननुपूर्वापरविंदुभ्यांमत्स्येनयादक्षिणोत्तररेखातदग्राभ्यां
मत्स्येनरेखापूर्वापरविंदुस्पृष्टेवेतिपूर्वतस्यास्तवविंदूत्तरत्वेनसिद्धत्वात्पुनःसाधनंव्यर्थमन्यथादक्षिणोत्तररेखायाअसंगतत्वा
पत्तेरितिवेत्सत्यं॰ दक्षिणोत्तररेखाशुद्ध्यर्थमेवपूर्वापरविंदुस्पृष्टरेखायाःपुनःसाधनमितिकेचित॥ वस्तुतस्तुदक्षिणोत्तरपूर्वापर

सू० टी०

२२

सूत्रसंपातरूपाभीष्टस्थानात्केंद्रात्स्यागुक्तं वृत्तस्य वक्ष्यमाणोपयोगित्वेनावश्यकत्वात्तस्य च पूर्वापरबिंदूंतर सूत्राधिकव्यास सूत्रत्वा
द्विदंतरे रेखाम्लानाग्रयोर्व ईवीक्षा सात्वम वृत्ते पूर्वापरे रेखाभवति० तस्याविंदोरूपर्यधश्च वक्रत्वं कदाचित्स्यादत० प्रथममेव पूर्वरेखा
सिध्यर्थ बिंदूंतरसिध्यमस्यमुख्य पुच्छगतरेखा बाधिंदूतराधिकत्वेन तदुत्पन्नमत्स्यरेखायां नज्याः स्फुतरामधिकत्वेन पुनः पूर्वा
परेरेखासाधनं युक्ततरमिति तत्त्वं० एवंमेवाप्यवहितदिग्द्वयांतरोत्पन्नत्व पुमत्स्यैश्च तुभिः सूत्रैर्वृत्ते कोणदिशः तदिदमभीष्टस्था
नकेंद्रकमंडले दिगष्टकं सिद्धं॥२॥ अथादि स्यसूत्रसंपातभूपाभीष्टस्थानात्कालिकछायाग्रस्थानमाह चतुरस्रं बहिः कुर्यात्सूत्रैर्मध्या
द्विनिर्गतैः भुजसूत्रांगुलैस्तत्र दत्तैरिष्टप्रभास्मृतेति॥ मध्यात्। अभीष्टस्थानाद्दिग्रेखासंपातरूपात्॥ विनिर्गतैः। निःसृतैः। सू
त्रैः। अष्टदिग्रेखारूपैः। बहिः दिक्सूत्रसंपातकेंद्रकवृत्ताद्बहिः अनेन वृत्तकरणं पूर्वमनुक्तं द्योतितं॥ अन्यथा बहिरित्यस्यानु
पपत्तेः॥ इदं वृत्तग्रहणे तु दिग्रेखासंपातस्यमनुसानुपपत्तेः॥ चतुरस्रं कोणदिग्रेखाधिकसूत्रकर्णद्वयतुल्यं समचतुर्भुजं कुर्यात्
तथा चतरद्वर्गं समं० नममचतुरस्रं० भुजसूत्रांगुलैः॥ वक्ष्यमाणभुजमितसूत्रस्यांगुलैः॥ निर्गमप्रवेशकालिकैः। दत्तैः। पूर्वापरसूत्रादध
ज्यावदीयमानैस्तत्र च तेष्वस्मिन्प्रदेशे भुजाग्रे तत्प्रदेशे इष्टप्रभानिर्गमप्रवेशान्यतरकालिकछायाग्रमुक्तं प्रतीति स्फुटदिक्सूत्रसं
पातस्थशंकुनालेयाः अत्रोपपत्तिः॥ वक्ष्यमाणभुजस्य छायाग्रपूर्वापरसूत्रांतरत्वेन प्रतिपादितत्वाद्दिष्टछायाग्रमुक्तदिशा तत्त्व
सम्यक्० चतुरस्रकरणं वक्ष्यमाणन्यासाधकमात्र परेरेखानुकाररेखायावेतांतस्तदुद्दिवक्कि जुत्वासिध्यर्थमिति॥५॥ अथपूर्वा
परेरेखायाः संज्ञांतरमाह। प्राक्पश्चिमाश्रितारेखा प्रोच्यते सममंडलं॥ उन्मंडलं च विषुवन्मंडलं परिकीर्त्यते इति। प्राक्पश्चिमाश्रि
ताः पूर्वपश्चिमसंबद्धासाधितारेखा सम वृत्तसु च्यते। सैवरेखा० उन्मंडलं० विषुवन्मंडलं च० समुच्चये० उभयसंज्ञकं कथ्यते॥ अ २२
त्रोपपत्तिः॥ क्षितिजपूर्वापर वृत्तसंयोगौ पूर्वापरे० तत्सूत्रं पूर्वापरसूत्रमिति पूर्वापरवृत्तस्यभूमावूर्ध्वाधरानुकारिवृत्तत्वेनादर्श
नाद्रेखाकारतयैव दर्शनाच्च पूर्वापरवृत्तमवितत्सूत्रं॥ पूर्वापरवृत्तस्य सममंडलत्वेनाभिधानात्तद्रेखा सममंडलसंज्ञोक्ताः। अथ
स्वनिरक्षदेशक्षितिजवृत्तस्योन्मंडलाख्यस्य तत्संयोगयोः संलग्नत्वात्तन्मध्य सूत्रत्वेन पूर्वापरसूत्रस्यापि सत्वात् पूर्वापरसूत्र
मुन्मंडलसंज्ञं॥ एतेनान्यदेशे क्षितिजसंज्ञायास्वदेशक्षितिजसंज्ञा स्फुतरांसिद्धेति पूर्वापरसूत्रस्य क्षितिज वृत्तसंज्ञा द्योतिताः
पूर्वापरस्थानयोः क्षितिजवृत्तस्य संलग्नत्वात्॥ उल्लिखितत्॥ वृत्तस्य क्षितिजानुकारितात्त्वा। एवंनिरक्षदेशपूर्वापरवृत्तं विषु

245
1918

वन्मंडलाख्यं पूर्वापरस्थानयोः संलग्नमिति तन्मध्यसूत्रत्वेनापि पूर्वापरसूत्रस्य सिद्धत्वात्पूर्वापरसूत्रं विषुवन्मंडलसंज्ञं० क्रां
तिवृत्तस्य दृग्वृत्तस्य च चलत्वात्कदाचित्केन पूर्वापरस्थानसंलग्नतात्तत्संज्ञानोक्तेति ध्येयं॥६॥ अथाग्राज्ञानमाह रेखा प्राच्य
परासाध्या विषुवद्भाग्रगा तथा॥ इष्टछाया विषुवतोर्मध्यमग्राभिधीयते इति॥ तस्मिंश्चतुरस्रे पूर्वापररेखात उत्तरभागे विषु
वद्भाग्रगा अक्षभाग्रप्रदेशस्था० अक्षभांगुलांतरितेत्यर्थः॥ प्राच्यपरा रेखा० पूर्वापररेखानुकाररेखा० तथा० सर्वतस्तुल्यांतरे
ण० यथेष्टछायाग्रे रेखा भुजांतरेण तथाक्षभांतरेण कार्या० अनंतरं० इष्टछायाविषुवतोः। इष्टछायाग्ररेखाक्षभाग्ररेखयोरित्यर्थः
मध्यं० चतुरस्रेंगुलात्मकमंतरालं सर्वतस्तुल्यं॥ अग्राकर्णवृत्ताग्रा० उच्यते० अत्रोपपत्तिः। भुजस्य कर्णवृत्ताग्रापलभासंस्कारे
णाग्रेंडवत्वात् दक्षिणगोले पलभाधिकोत्तरभुजसद्भावेन पलभोनो भुजोग्रेति प्राच्यपरसूत्रादुत्तरभागेक्षमाग्ररेखा भुजमध्ये भवती
ति द्वयोरेखयोरंतरमग्रा पलभोनभुजरूपा० एवमुत्तरगोले उत्तरभुजस्य पलभा न्यत्वाद्भुजोनपलभाग्रेति पलभारेखा प्राच्यपर
सूत्रादुत्तरभागस्था भुजरेखा तोथग्रांतरेणोत्तरदिशीति द्वयोरंतरं भुजोनपलभारूपं कर्णवृत्ताग्रा० एवं दक्षिणभुजस्य पलभो
नाग्रात्वात्पलभायुतोभुजोग्रेति। प्राच्यपरसूत्राद्भुजाग्रपलभाग्ररेखयोः क्रमेण याम्योत्तरत्वात्तयोरंतरालं पलभाभुज्यैक्य
रूपमग्रा० पलभायाः शंकुतलानुरूपत्वात्तदोत्तरत्वं छायासंबंधायुक्तं॥ गोलेशंकुतलस्य दक्षिणत्वाद्भूहात्परिदिशि छायास
द्भावाच्च० अतएव प्राच्यपरसूत्राद्दक्षिभागे दक्षिणभुजवशादक्षभाग्ररेखा कल्पने उक्तानुपपत्त्या सम्यगुत्तरभागपूर्वापरसूत्रा
दिति विषुवद्भाग्रगेत्यत्रव्याख्यातं॥ ७॥ अथ प्रसंगात् ज्ञातछायातः कर्णज्ञानं तत्शुद्धिं चाह शंकुछायाकृतियुतेर्मूलं कर्णो
स्यवर्गतः॥ प्रोस्यशंकुकृतिं मूलं छाया शंकुर्विपर्ययादिति। द्वादशांगुलशंकुछायायां वर्गयोगास्पदं छायाकर्णः स्यात्॥ अथा
स्य शुद्धिरूपं छायासाधनमाह अस्येति० छायाकर्णस्य वर्गातः शंकुवर्गं चतुश्चत्वारिंशदधिकं शतं॥ विशोध्य० मूलं छाया०॥
प्रकारांतरेण छायाकर्णः शुद्धिमात् शंकुरिति विपर्ययात्॥ छायासाधनवैपरीत्यात्॥ छायाकर्णवर्गाच्छायावर्गं विशोध्य मूलं
मित्यर्थः॥ शंकुर्द्वादशांगुलमितः स्यात्॥ अत्रोपपत्तिः॥ द्वादशांगुलशंकुः। कोटिरक्षभाभुजस्तत्कृत्योर्योगपदं कर्णस्तत्स्य
कर्णः कर्णरत्याघस्तक्षेत्रायापुक्तरीत्योपपन्नं० ननु दिक्साधनोत्तरमिष्टप्रभाग्राकर्णसाधनं भगवता सर्वज्ञेन किमर्थमुक्तं० अग्रेग्रादीनां
त्वतंत्रंतयोक्तत्वात्० नचविनागणितेश्रममयाज्ञानार्थमिदं युक्तमुक्तमिति वाच्यं॥ वक्ष्यमाणभुजज्ञानस्याग्रोपजीव्यत्वेन तस्याश्च भुजोप

जीव्यत्वेनान्योन्याश्रयात्गणितज्ञाताग्राया: पुन: साधनस्य व्यर्थत्वाच्च० न च भुजस्य शंकुतलैर्दत्तैरित्यनेनेष्टछायाग्रं ज्ञातमिति न० किंतु
तदुत्पत्तिस्थानसंपातस्थशंकोरंतपरिधौ छायाग्रज्ञानात् तत्पूर्वापरसूत्रांतरे भुजसद्भावाद्विनागणितं भुजोपि ज्ञात इति नान्योन्याश्रय इ
ति वाच्यं। तथापि भगवतः सर्वस्य निःप्रयोजनत्वेनानुचितत्वात्। विनाप्रयोजनं मंदोऽकेरव्यभावाच्च० नहि दिक्साधने ग्राभुजादिकमावश्य
कं न युक्तिर्युक्ता। किंच० कर्णसाधनस्य गणितेन त्वया वक्ष्यमाणकर्णसाधनतुल्यत्वेनात्र कथनमनुचितं। नहि दिक्साधनार्थं भाकर्णमित्याह त
दिति सिद्धांतशिरोमणियुक्तिवदत्र छायाकर्णउपयुक्तो येन तदुक्तिर्युक्तेति चतुरस्रमिसारि श्लोकचतुष्टयमन्येन मंदबुद्धिना क्षिप्तेन भगवतो क्त
मितिवेद्यं च भुजसाधनं पञ्जीव्याग्रापाल लघुप्रकारेण सिद्धौ दिशाः सम्यक्सिद्धा इति दिक्साधनशुध्यर्थमग्रासाधने० प्रकारांतरेणापि व
क्ष्यमाणमित्यत्र तृतीयाग्रयाग्निज्यालभ्यते तदानयागतयाके अनुपाते न साधितकर्णसंवादेनेष्टभुजावगमार्थं कर्णसाधनं चोक्तं। अन्यथाग्रया
कर्णस्तदाग्निज्यातृतीयाग्रयाफ इति फलस्य ग्निज्यातुल्यत्वात्तुल्यत्वानयनार्थं वा कर्णसाधनमिति केचित्॥ वस्तुतस्तु मंडले छायाप्रवेशनिर्ग
मस्थानस्थितसूत्रपूर्वापरबिंदोः प्रत्येकरेखेति रेखाद्वयं सर्वतस्तु त्वांतरं कार्यं तेनान्यतरेणान्यरो बिंदुभ्यास्यस्तौ पूर्वापरबिंदुस्तद्रेखा च
पूर्वापरमध्यस्थानस्य पूर्वापररेखेति० तत्रोभयबिंदुरेखयोरंतरांगुलमानं स्वल्पत्वात्कृणयितुमशक्यमतः प्रत्येकरेखे प्रकल्प्य तन्मध्य
केंद्रात्सूर्यवृत्तं प्रत्येकमिति वृत्तद्वयं कुर्यात् तत्र स्वस्ववृत्ते स्वस्वप्राच्यपररेखास्पृष्टा कार्या ताभ्यां स्वस्वकालिकौ भुजौ स्वस्ववृत्ते देयौ तद
छायाग्रे रेखे स्वस्ववृत्ते कार्ये० स्वस्वप्राच्यपरसूत्रात्स्वस्ववृत्ते उत्तरभागे स्वभांगुलोत्तरेण रेखे कार्ये ततः स्वस्ववृत्ते स्वस्वलद्रेखयोरंतरं स्वस्व
वृत्ते उभयकालिकर्णवृत्ताग्रे बहुत्वेन गणयितुं शक्यतदंतरं पूर्वबिंदोर्याम्योत्तरं कर्णवृत्ताग्रासाधनकथनेनानीतं। भुजांतरस्य विद्वत्तरत्वा
त्तस्य चाग्रांतरत्वेन फलितत्वात्॥ विषुवद्दिने गोलभेदेषु भुजांतरमग्रायोग इति बिंदोर्याम्योत्तरं कर्णवृत्ताग्रासाधिमंतरमग्रायोग इति० तेनोत्त
रीत्या बिंदोश्चात्यल्पत्वात्तत्र पूर्वापरस्त्रुतं स्फुटमित्याशयेन भगवता ग्रानिरूपिता तस्याः शुध्यर्थं कर्णोपि साधित इति तत्त्वं॥८॥ अथ पूर्वाधिकारे २४
क्रांत्याद्यानयनमुक्तं तत्पूर्वाधिकारावगतग्रहात्केवलान्न साध्यमिति॥ श्लोकाभ्यामाह त्रिंशत्कृत्वो युगे भानां चक्रं प्राक्परिलंबते० तद्गु
णाद्भूदिनैर्भक्ताद्द्युगुणाद्यदवाप्यते॥९॥ तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः॥ तत्संस्कृताद्ग्रहात्क्रांतिछायाचरदलादिकमिति
भानां चक्रं राशीनां वृत्तं॥ क्रांतिवृत्तं स्वस्वविक्षेपमितशलाकाग्रप्रोतनक्षत्रगुणैर्युक्तमित्यर्थः॥ युगे महायुगे प्राक्पूर्वविभागे० त्रिंशत्कृ
त्वः॥ त्रिंशत्संख्याकृतिर्विंशति० षट्शतमित्यर्थः॥ परिलंबते० ध्रुवाधारभगोलस्थानात् तद्द्वारनवलंबते॥ अत्र परिलंबते॥ इत्यनेन भच
क्रपूर्णभ्रमणाभावयुक्तोन्यथाग्रहभगणप्रसंगेन मध्याधिकार एवैतदुक्तं स्यात्॥ तथा च तद्द्वारमवलंबनोत्त्यापरावर्त्य यथास्थितं भवती

247/1918

त्यागतं तत्रापि स्वस्थानात्तथैव पश्चिमतोप्यवलंबने सचितं॥ एवं च भचक्रं पश्चिमाभिमुखं तदीश्वरेच्छया प्रथमतः कतिविद्भागैश्चलति० ततः
परावृत्य यथास्थितं भवति। ततोपि तद्भागैः क्रमेण पूर्वतश्चलति ततोपि परावर्त्य यथास्थितमित्येकाविलक्षणो भगणः तेन प्राग्वित्युपलक्ष
णं० पश्चिमावलंबनानुक्तिस्तु संवारकाले तदाभावात्॥ अत्र विंशत्कृत्वे इति पाठः प्रामादिकः॥ युगपदृष्टांत कृत्वा हि भचक्रं प्राग्वीलंबते इति सोमसि
द्धांतशिरोधात्० तत्पश्चाच्चलितं चक्रमिति ब्रह्मसिद्धांतोक्तेश्च० अहर्गणात्॥ तद्गुणात्० षट्शतगुणितात् भूदिनैः॥ युगीयसूर्यसावनदि
नैः॥ भक्तात्। तत्फलं भगणादिकं प्राप्यते तस्य भगणत्यागेन राश्यादिकस्य भुजः कार्यस्तस्मात् दशाप्तांशाः॥ दशाभिर्भजनेनाप्तभागास्त्रिगु
णिताः अयनसंज्ञकाः ज्ञेयाः॥ भुजांशास्त्रिगुणिता दशभक्ता फलमयनांशा इति तात्पर्यार्थः॥ तत्संस्कृतात् तैरयनांशैर्भचक्रपूर्वापरचलनव
शाद्युतहीनाद्ग्रहात्॥ पूर्वापरचक्रचलनावगमस्त्वयनग्रहस्य षड्भानां तर्गतांतर्गतत्वक्रमेण० क्रांतिछायाचरदलादिकं साध्यं न केवलाद्धि
ग्रोक्तः॥ छाया वक्ष्यमाणा चरदलं० चरं पूर्वाधिकारोक्तं० आदिशब्दादयनवलनमायनदृक्कर्म संगृह्यते० तदपि तत्संस्कृताद्ग्रहात्क्रांति
दिस्यवक्तव्यं० अन्येषामत्र तदुपजीव्यत्वाद्ग्रहणं अथ तथापि क्रांतिरित्युक्त्वा केवलक्रांतिज्ञानार्थं तत्संस्कृतग्रहात्क्रांति० साध्या० पु
रार्थान्तरोपजीव्यायाः क्रांतेः साधनं तु केवलादित्यस्य वारणार्थं क्रांतिमात्रे तत्संस्कृतात्साध्यमिति सूचकं छायाचरदलादिकथनं॥ अत्रो
पपत्तिः॥ ईश्वरेच्छया क्रांतिवृत्तं स्वमार्गे पश्चिमतः सप्तविंशत्यंशैः क्रमोपचितैश्चलितं॥ तत्र० परावृत्य स्वस्थाने आगत्य तत्स्थानात्पू
र्वतः सप्तविंशत्यंशैश्चलितं तथा च स्वस्थानादिभतक्रांतिविषुवद्वृत्तसंपाताश्रितक्रांतिवृत्तप्रदेशो रेवत्यासन्नः प्रागानीतग्रहाभोगावधिरू
पः स्वस्थानात्सर्वमपरत्र वा क्रांतिवृत्तमार्गगतः॥ विषुवद्वृत्ततद्भागस्य पश्चिमभागः पूर्वभागो वा गतः संपाते तद्वृत्तयोर्याम्योत्तरांतराभावा
त्क्रांत्यभावः पूर्वसंपातप्रदेशे तु तयोर्याम्योत्तरांतरगता क्रांतिरुत्पन्ना तो यथास्थितग्रहभोगात्क्रांतिरसंगतेति संपातावधिकग्रहभोगात्क्रां
तिर्युक्ता० तत्र संपातावधिकग्रहभोगज्ञानार्थं पूर्वसंपातावधिकः पूर्वाधिकारोक्तो ग्रहभोगो वर्तमानसंपातपूर्वसंपाताश्रितक्रांतिवृत्तप्रदेशयो
रंतरभागैरयनांशाख्यैः पूर्वसंपातप्रदेशस्य पूर्वपश्चिमावस्थानक्रमेण युतहीनो भवति० क्रांत्युपजीव्यपदार्था अपि वर्तमानसंपातादुत्पन्ना
इति तत्साधनमपि तत्संस्कृतग्रहात्॥ अथायनांशज्ञानं तु षट्शतभगणोत्थाः पूर्वानुपातरीत्याहर्गणाद्ग्रहभोगो भगणादिकस्तत्र गतभगणास्त्विकंपर
पूर्वभचक्रावलंबनं गतं० वर्तमाने वारंभे पश्चिमावलंबनाद्राशिषट्कांतर्गततराश्यादिके पश्चिमावलंबनमनंतरगते पूर्वावलंबनं॥ तत्रापि त्रिभां
तर्गतानांतर्गतत्वक्रमेण चलनं परावर्तनं चेति भुजः साधितस्ततो नवत्यंशैः सप्तविंशतिभागास्तदा भुजांशैः क इत्यनुपातेन गुणहरौ नवभिरप
वर्त्य भुजांशास्त्रिगुणिता दशभक्ता इति सर्वमुपपन्नं॥१०॥ अथोक्तस्यायनांशस्य प्रत्यक्षसिद्धत्वमिति सार्धश्लोकेनाह। स्फुटं॥ दृक्तुल्यतां गच्छेद

सू॰ टी॰

२५

पूर्वेविषुवद्दये॥ प्राक् चक्रं चलितंहीने छायार्कात्करणागते॥ ११॥ अंतरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके इति॰ अयने॰ दक्षिणोत्तरायण
संधौविषुवद्दये॥ गोलसंधौ चलितं चक्रं ऋतुल्यता॥ दृष्टिगोचरतां॥ स्फुटमनायासे॰ गच्छेत॥ तत्र प्रत्यक्षतस्तन्मितमंतरं दृश्यत इत्यर्थः॥
तथा च स्पष्टपादिका लेरेवतीयोगताराखन्नावधिमेषतुलाद्योः कर्कमकराद्योर्विषुवायनप्रवृत्तिरिदानीं त्वन्यत्र तत्स्वरूपे प्रत्यक्षे इति क्रांतिवृ
त्तं चलितमन्यथा तदनुपपत्तेरितिभावः॥ ननु पूर्वातोपरत्र वा चलितमिति कथं ज्ञेयमित्यत आह प्रागिति। छायार्कात्। यद्दिने सूर्यस्यायनदि
क्परावर्तनमुदये प्राच्यपरसूत्रे छत्वं वा तस्मिन्दिने अन्यस्मिन्दिने वा मध्याह्नछायातो वक्ष्यमाणप्रकारेण सूर्यः साध्यस्तस्मादित्यर्थः। करणागते॰
प्राग्युक्तकरणानीतः स्पष्टः सूर्यस्तस्मिन्नित्यर्थः॥ ऊने सति॰ अंतरांशैः॥ सूर्ययोरंतरांशैः॥ चक्रं॰ क्रांतिवृत्तं॰ प्राक्॥ पूर्वस्मिन्। चलितमिति ज्ञे
यं॥ अथ॰ यदि॰ अधिके सति शेषैः॥ सूर्ययोरंतरांशैः। चक्रं॰ आवृत्य॰ परिवृत्य॰ पश्चात्॥ पश्चिमाभिमुखं॰ तथा चलितमिति ज्ञेयं॥ अत्रो
पपत्तिः॥ छायातो वक्ष्यमाणप्रकारेण सूर्यो वर्तमानसंपाताद्गणितागतस्तु रेवतीयोगतारासन्नाद्यावधिलोऽनयोरंतरमयनांशाः॥ त
त्र क्रांतिवृत्तस्य पूर्वचलने गणितागतार्काच्छायार्कोऽधिको भवति॥ पश्चिमचलने तु न्यूनो भवतीति सम्यगुपपन्नं॥ ११॥ अथ चराद्युप
जीव्यां पलभामाह॰ एवं विषुवती छाया स्वदेशे यादिनार्द्धजा॥ दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभेति॰ स्वाभीष्टदेशे॰ एवं विषुवती॰ च
लितविषुवद्दिनसंबंधाः॥ रेवत्यासन्नस्थानस्थायुपचाराद्विषुवसंज्ञातद्यावर्तकमेवमिति। दिनार्द्धजा॰ मध्याह्निकीया॰ यन्मिताः॥
द्वादशांगुलशंकोः छाया दक्षिणोत्तररेखायां॰ निरक्षोत्तरदक्षिणदेशे क्रमेणोत्तरस्यां॰ दक्षिणस्यां॰ प्रभाया॰ दक्षिणोत्तररेखास्थत्वं
विना मध्याह्नासंभवात्॥ सा॰ तन्मिताः तत्र॰ तस्मिन्नभीष्टदेशे॰ विषुवत्प्रभा॰ अक्षभा॰ भवति॰ एतेन द्वादशांगुलशंकुः कोटिः पलभा
भुजस्तत्कृत्योर्योगपदं कर्ण इत्यक्षकर्णः कर्ण इत्यक्षक्षेत्रं वक्ष्यमाणोपयुक्तं प्रदर्शितं। तदा सूर्यस्य विषुवद्वृत्तस्थत्वाद्विषुवत्प्रभेति
संज्ञोक्ता॥ १२॥ अथ लंबाक्षयोरानयनमाह शंकुछायाहते त्रिज्ये विषुवत्कर्णभाजिते॥ लंबाक्षज्ये तयोश्चापे लंबाक्षौ दक्षिणौ सदेति॥
त्रिज्ये द्विस्थानस्थे॰ शंकुछायाहते॰ एकत्र द्वादशगुणिता॰ परत्र प्राग्युक्तया विषुवत्प्रभया गुणिता॰ विषुवत्कर्णभाजिते उभयत्राक्षकर्णेन भ
क्ते फले क्रमेण॰ लंबज्याक्षज्ये॰ तयोर्ज्ययोर्धनुषी क्रमेण लंबाक्षौ सदोभयगोले॰ दक्षिणदिक्स्थौ भवतः॥ अत्रोपपत्तिः॥ याम्योत्तरवृ
त्ते निरक्षस्वदेशखमध्यपूर्वापरवृत्तयोर्यदंतरं तदक्षः॥ याम्योत्तरवृत्ते दक्षिणक्षितिजाद्विषुवद्वृत्तस्य यदंतरं तल्लंबः॥ उभावूर्ध्वगोले खपूर्वाप
रवृत्ताद्दक्षिणौ॰ तज्ज्ये लंबज्ये भुजकोटित्रिज्याकर्ण इत्यक्षक्षेत्रादक्षकर्णे कर्णे द्वादशफलभे कोटिभुजौ तदा त्रिज्याकर्णे का वित्यनु

२५

249/1918

पाताभ्यां लंबाक्षज्ये॰ तद्धनुषी लंबाक्षाविस्युपपन्नं॥ १३॥ अथ मध्याह्नछायातोक्षानयनं श्लोकाभ्यामाह॥ मध्यछायाभुजस्तेन गु
णितास्त्रिभमौर्विका॥ स्वकर्णाप्ता धनुर्लिप्ता नतास्ता दक्षिणे भुजे॥ १४॥ उत्तराश्चोत्तरे याम्यास्ताः सूर्यक्रांतिलिप्तिकाः॥ दिग्भेदे मिश्रि
ताः साम्ये विश्लिष्टाश्चाक्षलिप्तिका इति॥ अभीष्टदिने माध्याह्निकी छाया भुजसंज्ञो ज्ञेयः। तेन भुजेन त्रिज्यागुणिताः मध्याह्नछायाक
र्णेन भक्ता [...] लब्धस्य धनुः कलाः नताः नतसंज्ञाः ताः॥ नतकलाः। दक्षिणे भुजे मध्याह्नछायारूपभुजे॰ प्रा
च्यपरसूत्रान्मध्याद्दक्षिणदिक्स्थे सति। उत्तरदिक्काः उत्तरे भुजे दक्षिणाः वा विषयव्यवस्थार्थकः॥ ताः नतकलाः सूर्यक्रांतिकलाः प्राग्युक्ताः
दिग्भेदे। स्वदिशोर्भिन्नत्वे मिश्रिताः संयुक्ताः साम्ये॰ अभिन्नदिक्त्वे विश्लिष्टाः अंतरिताः चो विषयव्यवस्थार्थकः। अक्षकलाः भवंति। अ
त्रानावश्यकभुजसंज्ञया भगवतोपपत्तिरुक्ता॰ तथाहि॰ द्वादशांगुलशंकुकोटौ मध्याह्नछायाकर्णे वा मध्यछायाभुजस्तथा स्वस्वस्तिका
न्मध्याह्नकाले सूर्यस्य याम्योत्तरवृत्ते यदंतरेण नतत्वं तान्नतकलाः। तज्ज्ञानं तांशज्या मध्याह्ने नतांशज्यारूपशंकोस्त्रिज्याकर्णे वा भुजइति
मध्याह्नछायाकर्णे मध्याह्नछायाभुजस्तदा त्रिज्याकर्णे को भुज इत्यनुपातेन नतज्यातद्धनुरत्र कलात्मकत्वान्नतकलाः। तासां संबधाद्
ति छायादिग्विपरीतदिक्काः॥ अथ क्रांत्यंशाक्षांशयोरेकदिक्त्वे योगेन नतांशा इति दक्षिणा नतकलाः दक्षिणक्रांतिकलाभिहीना अक्षां
शाः भवंति क्रांत्यंशाक्षांशयोर्भिन्नदिक्त्वे तरेण नतांशा यदि दक्षिणास्तदा क्रांत्यूनाक्षांशस्य नतत्वादुत्तरक्रांतियुता अक्षांशाः यदि तूत्तरास्तदाक्षे
न क्रांतेर्न नतत्वान्नतोनोत्तरक्रांतिरक्ष इति सम्यगुपपन्नं केचित्तु भुजग्रहणादभीष्टकाले प्राच्यपरसूत्राच्छायाग्रयदंतरेण याम्यमुत्तरं वा भुज
स्तं स्वल्पांतरान्मध्यछायां प्रकल्प्य तस्याः कर्णं चानियोक्तदिशा नतलिप्तास्ता अभीष्टक्रांतिसंस्कृता अक्षांशाः भवंतीत्याहुः॥ १५॥ अथा
क्षात्पलभानयनमाह॥ ताभ्योक्षज्या च तद्वर्गशेषस्य त्रिज्याकृतेः पदं॥ लंबज्यार्कगुणाक्षज्या विषुवद्भाथ लंबयेति॰ ताभ्योक्षकलाभ्योक्ष
ज्या भवंति॥ च॰ समुच्चये॰ अक्षज्यावर्गत्रिज्यावर्गान्तरशेषान्मूलं लंबज्या॰ अनंतरं अक्षज्या द्वादशगुणाः लंबज्या॰ लंबज्यायाः॰ गुणाभ
क्तभजनसंबंधाद्भक्ते इत्यर्थसिद्धं॥ अत्रोपपत्तिः॥ अक्षकलानां ज्याक्षज्या तस्यास्त्रिज्याकर्णे भुजत्वात्तद्वर्गोनात्रिज्यावर्गान्मूलं लंबज्या
कोटिः॥ तयाक्षज्या भुजस्तदा द्वादशकोटौ को भुज इत्यनुपातेन विषुवच्छायेति॥ १६॥ अथाक्षज्ञानेन नतभागेभ्यः क्रांतिद्वारा सूर्यसाध
नं सार्द्धश्लोकाभ्यामाह स्वाक्षार्कनतभागानां दिक्साम्येंतरमन्यथा॥ दिग्भेदेपक्रमः शेषस्तस्य ज्या त्रिज्ययाहता॥ १७॥ परमापक्रमज्याप्ता
चापं मेषादिगो रविः॥ कर्कादौ प्रोज्झ्य चक्रार्द्धात् तुलादौ भार्धसंयुतात्॥ १८॥ मृगादौ प्रोज्झ्य भगणान्मध्याह्नेर्कः स्फुटो भवेदिति स्वदेशा
क्षांशेष्टदिनीयमध्याह्नसूर्यनतांशयोः॥ भागानां बहुत्वाद्बहुवचनं॥ एकदिक्त्वे॰ अंतरं॥ अन्यदिक्त्वे॰ अन्यथा॰ योगः कार्यः शेषः

उक्तसंस्कारसिद्धोर्कः क्रांतिः स्यात्॥ तस्यापक्रमस्य ज्या० त्रिज्यया गुण्या० परमक्रांतिज्यया भाज्या० फलस्य धनुर्भागादिकं
भयादिगः भयादिशा त्रितयोनगतार्कः स्यात्॥ कर्कादित्रये र्कं॥ चक्राधीन॥ षड्राशिनः। आगतार्कं त्यक्त्वा शेषं० माध्याह्नकाले स्फुटा
र्कः स्यात्। तुलादित्रितये। षड्युतागतार्कान्। स्फुटोर्को ज्ञेयः॥ आगतार्कः षड्युतः स्फुटार्कः स्यादित्यर्थः॥ मकरादित्रये र्कं द्वादशराशि
भ्य आगतार्कं त्यक्त्वा शेषमयनांशसंस्कृतं स्फुटार्कः स्यात्॥ करणागतः ज्ञानार्थव्यस्तायनांशसंस्कृत इत्यर्थ सिद्धं० पूर्वंतत्संस्कृतग्रहा
क्रांतिः साध्येत्यर्थः स्यात्। अत्रोपपत्तिः एकदिशि क्रांत्यक्षयोर्योगो नतं तद्दक्षिणमतोऽक्षोने क्रांतिर्दक्षिणा० भिन्नदिशि क्रांत्यूनाक्षोने
तं दिशि दक्षिणमतं नाक्षोहीनः क्रांतिरुत्तरा। अक्षोन क्रांतिर्नतं उत्तरामतोऽक्षयुते क्रांतिरुत्तरा० अस्या ज्या क्रांतिज्या० परमक्रांति
ज्यया त्रिज्या भुजज्या तदा नया के तीष्टा सायनार्कभुजज्या० तद्धनु० सायनार्कभुजः॥ भुजस्य चतुर्षु पदेषु तुल्यत्वात् प्रथमपदे मेषादि
त्रये सूर्यस्यैव भुजत्वाद्भुज एव सूर्यः॥ कर्कादिद्वितीयपदे षड्भादूनास्यार्कस्य भुजत्वाद्भुजोनषड्भमर्कः। एवं तृतीयपदे तुलादित्रये
षड्भहीनार्कस्य भुजत्वात् षड्भयुतो भुजोर्कः चतुर्थपदे मकरादित्रये सूर्योनभगणस्य भुजत्वाद्भुजोनभगणोर्क इति॥ सर्वं वैपरीत्या
त्क्रमगमतरं॥१९॥ अथागतस्फुटसूर्यस्य करणागतस्फुटतुल्यत्वज्ञानं गतस्फुटसूर्यान्मध्यमस्य करणागतमध्यमार्कतुल्यत्वेन वि
शेषवक्तुं श्लोकार्धेनाह। तन्मांद्यं सकृद्धामं फलं मध्यो दिवाकर इति ॥मा॰ तस्मादागतस्फुटसूर्यान्मांदफलं मंदफलं असकृदेकवारं
वामं० व्यस्तं॥ संस्कृतं स्फुटसूर्ये अहर्गणानीतः स्फुटसूर्यः स्यात्। अयमर्थः॥ स्फुटसूर्यं मध्यमं प्रकल्प्य पूर्ववन्मंदोच्चात् प्रागुक्तरीत्या मंदफ
लं धनमृणमानीय स्फुटसूर्ये ऋणं धनं कार्यं मध्यमसूर्यः। अस्मादपि मंदफलं स्वस्फुटसूर्ये व्यस्तं संस्कृतं मध्यमोऽस्मादपि मंदफलं स्यैवं व्य
स्तं मध्यमार्क इति यावदविशेषस्तावदसकृत्साध्यो र्को मध्यो हर्गणानीतो भवतीति॥ तथा च मध्यमार्कात् स्फुटार्कसाधने एकवारं मं
दफलसंस्कारः॥ स्फुटार्कान्मध्यार्कसाधने त्वनेकवारं मंदफलव्यस्तसंस्कार इति० विशेषोभिहितः॥ अत्रोपपत्तिः॥ मध्यमसूर्यादा २६
नीतमंदफलेन संस्कृतो मध्यः स्फुटोर्को भवति० अयं वा तेनैव मंदफलेन व्यस्तसंस्कृतो मध्यो भवति॥ तत्र स्फुटार्कान्मध्यार्कसाधने म
ध्यमज्ञानाभावात्तदानीतमंदफलज्ञानमशक्यं। अतः स्फुटसूर्यं मध्यमं प्रकल्प्यानीतमंदफलेनाभिमतासन्नेन स्फुटोर्को व्यस्तसंस्कृ
तो मध्यासन्नः॥ अस्मादपि मंदफलमभिमतासन्नमपि पूर्वस्मात्सूक्ष्ममिति यावदविशेषे मध्यार्कसाधितं मंदफलं भवतीति निरवद्यं
सर्वमुक्तं॥ अथ मध्याह्ने छायाकर्णयोरानयनं विवक्षुः प्रथमं तात्कालिकनतांशज्ञानं कथमत्स्तद्भुजकोटिज्ये कार्ये इत्याह॥ स्वाक्षाप
क्रमयोर्गोदिसाम्ये ऽन्तरमतोन्यथा॥ शेषं नतांशाः सूर्यस्य तद्बाहुज्या च कोटिजेति दिक्साम्ये। एकदिक्के० यतिभंगो वार्षत्वान्न दोषः॥

25/1918

त्र दृग्ज्यां नाम मध्याह्नकालिकसूर्यक्रांत्यंशयोर्योगः॥ अतउक्तादेकदिक्त्वात्॥ अन्यथा वैपरीत्ये० भिन्नदिक्केइत्यर्थः॥ अक्षांशक्रांत्यंशयो
रन्तरं कार्यं० शेषं० संस्कारोत्पन्नं० सूर्यस्य मध्याह्ने नतांशाः॥ तेषां नतांशानां भुजरूपाणां ज्याः कोटिज्याः तद्दृग्नवति शुद्धाः कोटिस्तत्तउत्पन्ना
ज्याः च० समुद्दिष्टे साध्याः अत्रोपपत्तिः याम्योत्तरवृत्ते सूर्यस्य मध्याह्ने स्वस्वस्तिकान्तरं नतांशाः॥ विषुवद्वृत्तपर्यंतमक्षांशाः॥ विषुवद्वृत्तसूर्य
योरंतरं क्रांत्यंशाः॥ अतो दक्षिणक्रांतौ क्रांत्यक्षयोर्योगो नतांशाः उत्तरक्रांतौ क्रांत्यूनाक्षोन क्रांतिर्वा दक्षिणोत्तरनतांशाः॥ तेषां ज्या दृग्ज्या भुजः॥
नतकोटिज्या महाशंकुः कोटिः॥ त्रिज्या कर्ण इति छायाक्षेत्रे तदंशानां भुजत्वात्॥२०॥ अथ छायाकर्णयोरानयनं महाशंकुमानांगुलाभ्यस्ते भु
जत्रिज्ये यथाक्रमं॥ कोटिज्यया विभज्याप्ते छायाकर्णावहर्दले इति भुजत्रिज्ये० नतांशज्यात्रिज्ये इत्यर्थः॥ शंकोः प्रमाणांगुलानि द्वादश तै
र्गुणिते कार्ये० उभयत्र० कोटिज्यया नतांशोननवत्यंशज्ययेत्यर्थः॥ भक्ताः लब्धे० द्वे० यथाक्रमं॥ भुजज्यात्रिज्यास्थानीयफलक्रमेण० म
ध्याह्ने० छायातत्कर्णौ भवतः। अत्रोपपत्तिः। द्वादशांगुलशंकुः। कोटिरिष्टछाया भुजस्तत्स्थो योगपदं कर्ण इति छायाकर्णः कर्ण इति छा
याक्षेत्रे० महाशंकुकोटिदृग्ज्यात्रिज्ये भुजकर्णौ तदा द्वादशांगुलशंकुकोटौ का इत्यनुपातेन मध्याह्नकाले छायातत्कर्णौ भवतः साधकयो
स्तात्कालिकत्वादिष्टमुपपन्नं॥२१॥ अथ भुजसाधनं विवक्षुः प्रथमं तदग्राकर्णाग्रे आनयति॥ क्रांतिज्या विषुवत्कर्णगुणाप्ता शंकुजीवया॥ अ
र्काग्रा स्वेष्टकर्णघ्नी मध्यकर्णोद्धृता स्वका इति। सूर्यक्रांतिज्या० अक्षकर्णगुणिता० शंकुजीवया० शंकुर्द्वादशांगुलस्तद्रूपा ज्या तया इत्यर्थः॥ द्वादशभि
र्विभक्तफलितं॥ भक्ताः फलं सूर्यस्याग्रा० उपलक्षणाद्ग्रहस्यापि इयमग्रा० स्वाभिमतकालिकछायाकर्णेन गुणिताः मध्यकर्णोद्धृता० कर्णस्य
व्यासस्य० मध्यं० अर्धमिति मध्यकर्णो व्यासार्द्धं० त्रिज्या तयेत्यर्थः। पूर्वापरमथ मत्तमजघन्यसमानमध्यमध्यमवीराश्चेति सूत्रेण मध्य
परस्य पूर्वनिपातः। भक्ताः फलं स्वकास्वकर्णाग्रा स्यात्। अत्रोपपत्तिः॥ क्रांतिज्या मंडलकोटिरग्रा क्षितिजे कर्णः कुज्या भुज इत्यक्षक्षेत्रे द्वादश
कोटावक्षकर्णः कर्णस्तदा क्रांतिज्याकोटौ कः कर्ण इत्यनुपातेनाग्राः त्रिज्यावृत्ते इयं कर्णवृत्ताग्रेत्युपपन्नं॥२२॥ अथ भुजानयनं श्लोकार्धेनाह
विषुवद्भायुतार्काग्रा याम्ये स्यादुत्तरो भुजः। विषुवत्संदिशो ध्वोदग्गोले स्याद्बाहुरुत्तरः॥२३॥ विपर्ययाद्भुजो याम्यो भवेत्प्राच्यपरांतरे। माध्या
ह्निको भुजो नित्यं छाया माध्याह्निकी स्मृतेति॥ अर्काग्रा० सूर्यस्याभीष्टकालिककर्णाग्रा याम्ये॥ दक्षिणगोले० विषुवद्भायुता अक्षछायया युता
उत्तरदिक्को भुजः स्यात्० उत्तरगोले० विषुवत्यां० फलभायां० कर्णाग्रां विशोध्य० न्यूनीकृत्य शेषमुत्तरदिक्को भुजः स्यात्। ननु कर्णाग्राफलभा
यां यदा न शुध्यति तदा कथं भुजः साध्य इत्यत आह विपर्ययादिति। अक्षभां कर्णाग्रायां विशोध्य शेषं दक्षिणो भुजः स्यात्। ननु भुजस्य याम्य
त्वमुत्तरत्वं वा कस्मादित्यत आह प्राच्यपरांतरे इति० पूर्वापरसूत्रांतरालप्रदेशे याम्ये उत्तरे वा भुजः स्यादित्यर्थः। ननु तथापि द्वितीयावधेर

स॰टी॰ तुनतयोरंतरस्याप्रसिद्धेः पूर्वापरवृत्तयोस्तयोरंतरं भुजस्तस्याशंकायोरंतरं मध्याह्नछायास्वरूपकथनच्छलेनाह माध्याह्निकीति। माध्याह्नकालिको
भुजःस्मृतः। माध्याह्निकी। माध्याह्नकालिकी छाया ज्ञेया। तथा च छायाग्रं याम्यपरस्वा याम्यमुत्तरं वा यदंतरेण स भुज इति व्यक्तीकृतं। अत्रोपप
२७ त्तिः॥ शंकुमूलं याम्यपरस्वा याम्यमुत्तरं वा यदंतरेण स याम्योत्तरो भुजो ग्रहस्य। शंकुस्तु ग्रहाद्दवलंबसूत्रं क्षितिजसमसूत्रावधि। तत्रायं
भुजः। शंकुतलाग्रयोः संस्कारजः॥ शंकुतलं तु स्वाहोरात्रवृत्तस्थितोदयास्तसूत्रावध्यंतरमुत्तरदक्षिणगोलक्रमेणोत्तरदक्षिणाः तत्र ग्रहपर
रिभ्रमणेतरे स्याद्यस्मिन्निति शंकुतलमुत्तरमग्रापि व्यस्तदिके ति तत्संस्काराद् भुजो गोले प्रत्यक्षः॥ समहाशंकोरिति। महाशंकोरमंतदादृ
द्वादशांगुलशंकोः करइत्यनुपातेन भुजः पूर्वापरसूत्राच्छायाग्रावधिः तत्र शंकुतलाग्रे द्वादशांगुलशंकोः साधिते तत्संस्कारेण भुजः स एव। त
त्रा यथा पूर्वं साधिता। शंकुतलं तु द्वादशांगुलशंकोः पलभा। महाशंकुः कोटिः शंकुतलं भुजो दृग्ज्या कर्ण इत्यक्षक्षेत्रे द्वादशकोटौ पलभा भुजस्त
दा महाशंकुकोटौ को भुज इत्यनुपातेन शंकुतलमानीय महाशंकोरियं द्वादशांगुलशंकोः किमित्यनुपातेन गुणहारयोस्तुल्यत्वान्नाविनाप
लभायाएवावशिष्टत्वात्। सा तु सदा। दक्षिणगोले ग्रायाश्चरत्वादेकदिक्केनपलभानयोर्योगउत्तरोभुजः॥ उत्तरगोले ग्रायाः दक्षिणत्वेन
भिन्नदिक्कापलभाग्रयोरंतरं भुजस्तत्र पलभायाः तो ध्रुमुत्तरो भुजो ग्रायाः तो ऽधिकं दक्षिणो भुजः मध्याह्ने छायाया भुजरूपत्वान्मध्याह्नका
लिको भुजो मध्याह्नच्छायेति सर्वं युक्तं॥ २४॥ अथ याम्योत्तरवृत्तस्थछायाकर्णमुक्त्वा पूर्वापरवृत्तस्थछायाकर्णमुक्त्वा पूर्वापरवृत्तस्थ
छायाकर्णप्रकारद्वयेनाह लंबाक्षजीवे विषुवच्छाया द्वादश शशगुणे॥ क्रांतिज्यासे तु लौ कर्णौ समंडलगे रवाविति लंबज्याक्षज्ये क्रमेण
क्षभा द्वादशाभ्यां गुणिते। उभयत्र क्रांतिज्याया भक्ते। तुकारात्मले॥ समवृत्तस्थेऽर्के॥ तौ। दृग्योग्यछायासंबंधौ कर्णौ भवत उभयत्र छाया
कर्णः स्यात्। अत्रोपपत्तिः। स्वमस्तकोपरि पूर्वापरानुकारेण यद्वृत्तं तत्सममंडलसंज्ञं। तत्रस्थस्य छायाकर्णानयनं। पलभाभुजोक्षकर्णक २८
र्णस्तदा क्रांतिज्याभुजे कः कर्ण इति समशंकुः क्रांतिज्याभुजे समशंकुकुज्योनतद्द्वयोः क्रमेण कर्णकोटित्वात्। अस्मात् कुमानांगुलाभ्यस्ते इ
त्यादिना त्रिज्याद्वादशगुणितानेन भक्ता। तत्र छेदं लंबं च परिवर्त्य हरस्य शेषः कार्यो भभागहरणे गुणनाविधिश्चेत्युक्तेः पलभयापि गु
ण्याः क्रांतिज्याक्षकर्णाभ्यां भक्ता। तत्र त्रिज्या द्वादशगुणिताक्षकर्णभक्ता लंबज्यैव सिद्धा तो लंबज्या पलभागुणिता क्रांतिज्याभक्ता फलं
समवृत्तगतछायाकर्णः। अथात्रैव पलभाभुजो द्वादशकोटिरक्षज्याभुजे का कोटिरिति लंबज्याग्रहणे पलभयोस्तुल्यत्वान्नाशाद्क्षज्या
द्वादशगुणा क्रांतिज्याभक्ता छायाकर्णः समंडलगतः॥ क्रांतिज्यायाः सदापं कर्णौ सिध्येन्नहि सर्वदा समवृत्तगतो ग्रह इति समवृत्त
गतग्रहस्यैव कर्णः साध्यो नान्यदेति सूचनार्थं सममंडलगे रवावित्युक्तं॥ २५॥ ननु ग्रहाधिष्ठिताहोरात्रपूर्वापरवृत्तसंपातादवलंब

25th
1918

रूप समशंकोर्गोले प्रत्यक्षसिद्धस्य साधनार्थं समवृत्तस्थत्वाभावेपि छायाकर्णः साध्यः। सममंडलगे रवावपि स्युक्तिस्तस्याधिष्ठिता
होरात्रवृत्तपरा। न त्वन्यदा न साध्यो न्यथा॥ अलक्ष्यत्वेन प्रकारस्याति प्रसंगापत्तेः॥ न हि प्रकारे तद्व्यावर्तकं विशेषणं प्रसिद्धं येन नाति
प्रसंगः॥ परं तु यदा सममंडलेक्षांशाधिका क्रांतिस्तदा ग्रहाधिष्ठितं ध्रुरात्रवृत्तानामसंबद्धस्तदा गोले समशंकोरदर्शनात् तत्र कथं सा न म
निवारितमिति स्वतः सममंडलगे रवावित्यस्य पूर्वोक्त एवार्थ इत्यभिप्रायं सममंडलकर्णानयनप्रकारांतरकथनच्छलेनाह सौम्याक्षोनाय दा
क्रांतिः स्यात्तदा पुरदलश्रवः विषुवच्छायया भ्यस्तः कर्णो मध्याग्रयोद्धृत इति। यदोत्तरा क्रांतिरक्षादल्पा स्यात्तदा पुरदलश्रवः समवृत्त
स्थार्ककांतिसाधितमध्याकर्णः। ननुमध्याह्नकालिकाः अक्षभया गुणितः॥ मध्याग्रया। गृहीतमध्याह्नकर्णाग्रया। भक्तः फलं सममंड
लगतग्रहबिंबस्य छायाकर्णः स्यात्॥ अत्र सौम्यत्वेन दक्षिणक्रांतौ तदसाधने सममंडलगतग्रहबिंबं स्यादर्शनादिति स्फुटमुक्तमन्यथा
क्षाल्पक्रांतौ दक्षिणगोले समशंकोः प्रत्यक्षत्वात्तन्निवारणानुपपत्तेः॥ अत्रोपपत्तिः॥ सममंडलप्रवेशकालिकमध्याह्नछायाकर्णादव
स्थितात्कर्णेन द्वादशांगुलशंकुस्तदा त्रिज्याकर्णेन क इति मध्यशंकुस्तात्कालिकः॥ द्वादशकोटावक्षभाभुजस्तदा महाशंकुकोटौ
क इति शंकुतलं द्वादशयोर्नाशात्पलभात्रिज्याघातो मध्यकर्णभक्त इति। अनेन भुजेन मध्यशंकुस्तदाग्राभुजेन क इति समशंकुर्द्दृ
ग्ज्याग्रामध्याकर्णघातो मध्यकर्णपलभाभ्यां भक्तोग्राभुजे समशंकुतद्दृग्योः कोटिकर्णत्वात्। अस्मात्पूर्वप्रकारेण छायाकर्णानयने॥ द्वाद
शयोर्नाशान्मध्यकर्णफलभात्रिज्याघातोग्रामध्यकर्णाभ्यां भक्त इति तुल्ययोर्मध्यकर्णमितगुणहरयोर्नाशाकरणेन सिद्धं॥ स्वतंत्रेच्छस्य
नियोक्तुमशक्यत्वात्॥ तत्रापि भाज्यहरौ त्रिज्यया परवर्त्य हरस्थानेमध्यकर्णगुणिताग्रा त्रिज्याभक्तेति मध्यकर्णाग्रा सिद्धा तोमध्योग्र
तोक्ष्यत इत्युक्तं॥ भाज्यस्थाने तु मध्यकर्णपलभाघात इति। दक्षिणगोले समवृत्तस्थग्रहादर्शनान्न साधितः॥ उत्तरगोलेपि क्रांतिरक्षाधि
का तदा सममंडलप्रवेशासंभवान्न साधितः॥ सममंडलावध्यक्षांशत्वात्॥ अल्पक्रांतौ तत्संभवान्साधितः॥ न हि सिद्धं गोले गणितसाध्य
मानाभावादित्युपपन्नं। सौम्येत्यादि। भास्कराचार्यैस्तु मार्तंडः सममंडलं प्रविशति स्वल्पे पमे स्यात्पलाद्दृग्यो हि उत्तरगोल एव सविशान्
माध्यातदैवास्य भाः अग्रात्पि समांस्य मंडलमिनेयः शंकुः स्याद्घातेन नेंतस्तो विपरानुपातविधेयनैवं स्वचिद्दुष्यतीत्यनेन तत्राधि
साधितः॥ २६॥ अथाभिमतकर्णेन स्वस्वकाले भुजार्थं कर्णदत्राग्रासाध्येति सूचनार्थं कर्णाग्रामुक्तप्रकारेण पुनरपि मध्यक
र्णइति प्रागुक्तस्य स्फुटीकरणार्थमाह स्वक्रांतिज्या त्रिजीवाघ्नी लंबज्याप्ता प्रमौर्विका॥ स्वेष्टकर्णहता भक्ता त्रिज्यया ग्रा कुलादिके ति
स्वाभिमतकालिक क्रांतिज्या त्रिज्यया गुणिता लंबज्यया भक्ता फलमग्राज्यारूपायाः लंबज्याकोटौ त्रिज्या। कर्णः क्रांतिज्याकोटौ कः

कर्णइत्यग्रेस्युपपत्तिः॥ उत्तरार्द्धं पुनरुक्तं व्याख्यानप्रायं॥२७॥ अथकर्णछायाकोणसाधनार्थं कोणशंकुहग्ज्ये श्लोकपंचकेनाह त्रिज्या
वर्गार्धतोग्रज्यावर्गोनाद्द्वादशादिनात्॥ पुनर्द्वादशनिघ्नाच्चलभ्यंते यत्फलं बुधैः॥२८॥ शंकुवर्गार्द्धसंयुक्तविषुवद्वर्गभाजितात्॥ तदेवक
रणीनामतांपृथक्स्थापयेद्बुधः॥२९॥ अर्कघ्नाविषुवच्छायाग्रज्ययागुणितातथा॥ भक्ताफलाख्यंतद्वर्गसंयुक्तकरणीपदं॥३०॥ फलेनहीनं
संयुक्तं दक्षिणोत्तरगोलयोः॥ याम्योत्तरयोर्विदिशोः शंकुरेवंयाम्योत्तररवौ॥३१॥ परिभ्रमतिशंकोस्तु शंकुरुत्तरयोस्तुसः॥ तत्त्रिज्यावर्ग
विश्लेषान्मूलं दृग्ज्याभिधीयतेइति० पूर्वप्रकारानीतेतत्कालिकाग्रज्यया० नतुकर्णाग्रायाः पूर्वं कर्णस्यैवासिद्धेः। वर्गार्धहीनात्। त्रिज्या०
वर्गार्धात्० द्वादशगुणात्॥ पुनर्द्वितीयवारं० द्वादशगुणात्॥ चः समुच्चये० तेनद्वादशगुणितस्यद्विधास्थापनानिरासाच्चतुश्चत्वारिं
शदधिकशतगुणितादित्यर्थः। पृथग्गुणकोक्तिस्तुगुणनसुखार्थंशंकोर्द्वादशांगुलात्मकस्यवर्गार्द्धेन० द्विसप्तत्यायुक्तेनपलभावर्गेण
भाजितात्। बुधैर्गणितकर्तृभिः यत्संख्यामितंफलंप्राप्यते॥ तत्संख्यामितंकरणीनामसंज्ञयाकरणी० तां० करणी० बुधोगणकः पृथ
गेकत्रस्थानेस्थापयेत्। ततोद्वादशगुणितापलभाअग्रज्ययापूर्वगृहीतयागुणिता। तथाद्विसप्ततियुतेनपलभावर्गेणभक्ता० लब्धं
फलसंज्ञं० तस्यफलस्यवर्गेणयुक्तायाः करण्याःमूलं। दक्षिणोत्तरगोलयोःक्रमेणफलेनोनयुतंएवमुक्तप्रकारेणसिद्धः शंकुः शंकोः
गणितकर्तुःसकाशाद्दक्षिणोत्तरेस्वयंपरिभ्रमतिसति। तुकारःक्रमार्थे० क्रमेण० याम्योत्तरयोर्विदिशोः आग्नेयनैर्ऋत्योरीशानी
वायव्योः कोणयोरित्यर्थः॥ द्वितीयतुकारः पूर्वापरदिनविभागक्रमार्थकत्वेनविदिशोर्विन्यस्तान्वेति० तेनदिनपूर्वासिद्धेआग्नेयेशा
न्योर्दक्षिणोत्तरक्रमेण० दिनापरार्द्धेनैर्ऋत्यवायव्योर्दक्षिणोत्तरक्रमेणफलितार्थः॥ सः कोणसंज्ञः शंकुःस्यात्॥ कोणशंकुत्रिज्ययो
र्वर्गांतरान्मूलं दृग्ज्या च्यते। अत्रोपपत्तिर्बीजेकवर्णमध्यमाहरणेन० तत्रयावत्तावत्कल्प्यमव्यक्तराशेर्मानंतस्मिन्कुर्वतोद्दिष्टमेव
तुल्यौपक्षौसाधनीयौत्रयत्नान्यस्याक्षिसान्वापिसंगुण्यभक्तेत्युक्तेः समौपक्षौसाध्यौ० तदर्धकोणशंकुमानं॥ या१ द्वादशकोटी
फलभाभुजःशंकुकोटीकोभुजइतिकोणशंकुतुल्ययाकोटिः | प $\frac{१}{२}$ | अग्रयायुतंदक्षिणगोलेभुजः॥ या० | प० | अ ३३ | उत्तरगोलेऽग्रया
| अ ३३ | समवृत्तादक्षिणेयानंशंकुन | लभुजः या | प १ |
तरितंभुजः॥ तत्रसमवृत्तादुत्तरेशंकुतलोनाग्राभुजः या | प १ |
| अ ३३ | कोणस्यदक्षिणोत्तरपूर्वापरसूत्रमध्यत्वाद्भुजःतुल्यसमचतुरस्रेकर्णः स्वस्वस्तिकात्कोणसूत्रसर्वेनतांशानांज्यादृक्
ज्यातिभुजवर्गोद्विगुणोदृग्ज्यावर्गः दक्षिणगोले | याव० पव १ | या० प० अ २४ अव ३३ | उत्तरगोले याव० प० या० प० अ २४ अ |
| व ३३ | अयंकोण शंकु० या० व | र्ग० याव० हीनत्रिज्यावर्गरूपदृग्ज्यावर्गयाव० त्रिव० समइतिपक्षौसमछेदीकृत्यछेदगमेप | याव० पव० या० व ७२ |

| या० प० अ २४ अव ३३ या० रू त्रिव ७२ | उत्तरगोले० पक्षान्यपक्षा० | याव० पव० या० प० अ २४ अव ३३ या ७२ या० रू त्रिव ७२ | क्षयोः शोधनार्थंन्यासः दक्षिणगोले० अथएको
| याव० पव ७३ याप अ २४ अव त्रिव ३३ |
व्यक्तंशोधयेदन्यपक्षादित्याद्यन्यस्येतरस्माच्चपक्षादित्युक्तेनाव्यक्तपक्षेव्यक्तवर्गस्थानेद्विसप्ततिपलभावर्गयोगोयावद्वर्ग
गुणोव्यक्तस्थानेपलभाचतुर्विंशतिघातोयावद्गुणोदक्षिणगोलेधनमुत्तरगोलेऋणंरूपपक्षेतुचतुश्चत्वारिंशदधिकशत
गुणितेनत्रिज्यावर्गार्द्धेनतुल्यत्वात्तुल्यगुणलाघवार्थंतथैवन्यस्तः॥ तत्राप्येकदेवगुणानार्थंत्रिज्यावर्गार्द्धमग्रावर्गेणहीनंच
तुश्चत्वारिंशदधिकशतगुणमितिसिद्धं० सार्द्धराशिज्याधिकाग्रायांतुत्रिज्यावर्गार्द्धेनहीनोग्रावर्गश्चतुश्चत्वारिंशदधिकश
तगुणऋणं० अथ० अव्यवर्गादिसदावशेषंपक्षौतदेष्टेननिहत्यकिंचित। क्षेप्यंतयोर्येनपदप्रदस्यादव्यक्तपक्षोस्यपदेनभूयः
॥ व्यक्तस्यपक्षस्यसमक्रियैवमव्यमानेखलुलभ्यतेतदित्युक्तेः पक्षयोर्मूलार्थमव्यक्तवर्गांकेनापवर्तनं कार्यं वर्गांकस्तद्विसप्तति
युतः पलभावर्गः॥ तेनापवर्तितेव्यक्तपक्षेप्रथमस्थानेयावद्वर्गःसिद्धः द्वितीयस्थानेद्विमितगुणकस्यपृथक्करणादर्कघ्नावि
षुवच्छायाग्रज्ययागुणितातथाभक्तापलाख्यमित्युक्त्याफलंद्विगुणंया० वद्गुणंदक्षिणोत्तरगोलक्रमेणधनमृणं० रूपपक्षेतपक्षनि
तकरण्याख्यंसार्द्धराशिज्यानाग्रायामूनाधिकायाधनमृणं०॥ ततोपिमूलार्थंपक्षयोरव्यक्तांकार्धरूपफलस्यवर्गोयोजितः॥
तत्राव्यक्तपक्षेवातनपूर्वकमूलग्रहणेप्रथमस्थानेयावत्॥ द्वितीयस्थानेफलंदक्षिणोत्तरगोलयोर्धनमृणं॥ यथा | या० फ० या० फ० |
उत्तरगोलव्यक्तस्वर्णत्वेवा | या० फ० | उभयथामध्याव्यक्तनाशसंभवात्॥ रूपपक्षेतुमूलग्रहणेतद्वर्गसंयुक्तकरणीपदमिति
सार्द्धराशिज्यानधिकाग्रायां० अधिकायांतुकरण्यूनस्यफलवर्गस्यमूलं॥ तथाचत्रिज्यावर्गार्धतोग्रज्यावर्गोनादित्यत्रसार्धरा
शिज्याधिकाग्रायामुक्तानुपपत्तावपिद्वृत्तिछुद्धिविधेयदेहशोध्यंनशुध्यद्विपरीतशुध्या० विधिस्तदाप्रोक्तवदेवकिंतुयोगेवियोगः
सृधियाविधेयइतिभास्करोक्त्या अग्रज्यावर्गोनादित्यत्राग्रावर्गणाग्रावर्गार्द्धहीनादित्यर्थद्वयनक्रमेणन्यूनाधिकाग्रासंबद्ध
त्वानक्षतिरितिध्येयं। अथपुनः समशोधनार्थं पक्षयोर्न्यासः दक्षिणगोले | या० फ० | करण्यमफलवर्गपटस्यफलतोन्यून
त्वानस्यक्षयोर्गव्यासः | या १ फ १ | अव० एकाव्यक्तमित्यादिना० शोधव्यक्ते | अ० प० | ताहरेद्वपतोपव्यक्तमानेजायतेव्यक्त
राशेरित्यनेनचप्रथम | या १ प १ | स्थानेपदंफलेनहीनमित्युपपन्नं॥ द्वितीयस्थानेपदेनहीनंफलमित्युक्तंकोणशंकुर्भवतात
नाततःऋणस्यास्थितिविपरीतत्वात्॥ तस्मादुत्तरगोलेस्थितिविपरीतमधोगोलेदृग्यमपिदृग्पतयेननक्तथमावश्यकं० नाप्य

सू॰टी॰

२८

कर्णइत्यत्रेत्युपपत्तिः॥ उत्तरार्द्धेपुनरुक्तंव्याख्यातप्रायं॥२७॥ अथकर्णछायाकोणसाधनार्थंकोणशंकुदृग्ज्ये श्लोकपंचकेनाह त्रिज्या
वर्गार्धतोग्रज्यावर्गोनाद्द्वादशाहतात्॥ पुनर्द्वादशनिघ्नाच्चलभ्यंतेयत्फलंबुधैः॥२८॥ शंकुवर्गार्द्धसंयुक्तविषुवद्वर्गभाजितात्॥ तदेवक
रणीनामतांपृथक्स्थापयेद्बुधः॥२९॥ अर्कघ्नाविषुवच्छायाग्रज्ययागुणितातथा॥ भक्ताफलाख्यंतद्वर्गसंयुक्तकरणीपदं॥३०॥ फलेनहीं
नंसंयुक्तंदक्षिणोत्तरगोलयोः॥ याम्ययोर्विदिशोःशंकुरेवंयाम्योत्तरेरवौ॥३१॥ परिभ्रमतिशंकोस्तुशंकुरुत्तरयोस्तुसः॥ तत्रिज्यावर्ग
विश्लेषान्मूलंदृग्ज्याभिधीयतेइति॰ पूर्वप्रकारानीतेत्कालिकाग्रज्यया॰ नतुकर्णाग्रायाः पूर्वंकर्णस्यैवासिद्धेः। वर्गेनहीनात् त्रिज्या॰
वर्गार्द्धात॰ द्वादशगुणात्॥ पुनर्द्वितीयवारं॰ द्वादशगुणात्॥ चःसमुच्चये॰ तेनद्वादशगुणितस्यद्विधास्थापननिरासाच्चतुश्चत्वारिं
शदधिकशतगुणितादित्यर्थः। पृथग्गुणकोक्तिस्तुगुणनसुखार्थंशंको द्वादशांगुलात्मकस्यवर्गार्द्धेन॰ द्विसप्ततायुक्तेनपलभावर्गेण
भाजितात्॥ बुधैर्गणितकर्तृभिःयत्संख्यामितंफलंप्राप्यते॥ तत्संख्यामितंकरणीनामसंज्ञयाकरणी॰ तां॰ करणी॰ बुधोगणकःपृथ
गेकत्रस्थानेस्थापयेत्। ततोद्वादशगुणितापलभाग्रज्यया पूर्वगृहीतयागुणिता। तथाद्विसप्ततियुतेनफलभावर्गेणभक्ता॰ लब्धं
फलसंज्ञं॰ तस्यफलस्यवर्गेणयुक्तायाःकरण्याःमूलं। दक्षिणोत्तरगोलयोःक्रमेणफलेनोनयुतंएवंमुक्तप्रकारेणसिद्धःशंकुःशंकोः
गणितकर्तुःसकाशाद्दक्षिणोत्तरेसूर्येपरिभ्रमतिसति। तुकारःक्रमार्थे॰ क्रमेण॰ याम्ययोत्तरयोर्विदिशोःआग्नेयनैरृत्योरीशानि
वायव्योःकोणयोरित्यर्थः॥ द्वितीयतुकारः पूर्वापरदिनविभागक्रमार्थकत्वेनविदिशोरित्यत्रान्वेति॰ तेनदिनपूर्वासिद्धेआग्नेयेशा
न्योर्दक्षिणोत्तरक्रमेण॰ दिनापरार्द्धेनैरृत्यवायव्योर्दक्षिणोत्तरक्रमेणफलितार्थः॥ सःकोणसंस्थःशंकुःस्यात्॥ कोणशंकुत्रिज्ययो
र्वर्गांतरान्मूलंदृग्ज्योच्यते। अत्रोपपत्तिर्बीजेनैकवर्णमध्यमाहरणेन॰ तत्रयावत्तावत्कल्प्यमव्यक्तराशेर्मानंतस्मिन्कुर्वतोद्दिष्टमेव
तुल्यौपक्षौसाधनीयौअत्रयत्ताव्यक्ताक्षिप्ताचापिसंगुण्यभक्तेत्युक्तेःसमौपक्षौसाध्यौ॰ तदर्धकोणशंकुमानं॥ या१ द्वादशकोटी
फलभाभुजःशंकुकोटीकोभुजइतिकोणशंकुतुल्ययाकोप | १ २ | अग्रयायुतंदक्षिणगोलेभुजः॥ या॰ | प॰ | अ॰ | उत्तरगोलेग्रयो
ल भुजः या॰ | प ॰ | अ ॰ | समवृत्ताद्दक्षिणेयानशंकुल
नरितंभुजः॥ तत्रसमवृत्तादुत्तरेशंकुतलोनाग्रा भुजः या॰ | प॰ |
| अ॰ | कोणस्यदक्षिणोत्तरपूर्वापरसूत्रमध्यस्थत्वाद्भुजःतुल्यसमचतुरस्रेकर्णःस्वस्वस्तिकात्कोणस्थसूर्यनतांशानांज्यादृक्
ज्यातिभुजवर्गोद्विगुणोदृग्ज्यावर्गःदक्षिणगोले | याव॰ पव॰ | या॰ प॰ अ २४ अव | उत्तरगोले याव॰ प॰ या॰ प॰ अ २४ |
| व | अयंकोणशंकु॰ या॰ व | र्ग॰ याव॰ हीनत्रिज्यावर्गरूपदृग्ज्यावर्गयाव॰ त्रिव॰ समइतिपक्षौसमछेदीकृत्यछेदगमेप | याव॰ पव॰ या॰ व७२ |

255/1918

| या॰ प॰ अ २४ अव॰ या॰ रूत्रिव७२ | उत्तरगोले॰ यदन्यपक्षा॰ | पव॰ पव॰ या॰ प॰ अ २४ अव॰ या७२ या॰ रूत्रिव७२ | क्षयोःशोधनार्थंन्यासःदक्षिणगोले॰ अथएका याव० पव७३ यावअ २४ अवत्रिवई |
व्यक्तंशोधयेदन्यपक्षादिपाण्यस्येतरस्माच्चपक्षादित्युक्तेनाव्यक्तपक्षेव्यक्तवर्गस्थानेद्विसप्ततिपलभावर्गयोगोयावद्वर्ग
गुणोव्यक्तस्थानेपलभाचतुर्विंशतिघातोयावद्गुणोदक्षिणगोलेधनमुत्तरगोलेऋणंरूपपक्षेतुचतुश्चत्वारिंशदधिकशत
गुणितेनत्रिज्यावर्गार्द्धेनतुल्यत्वात्तुल्यगुणलाघवार्थंतथैवकृतः॥ तत्राप्येकदेवगुणानार्थंत्रिज्यावर्गार्द्धमग्रावर्गेणहीनंच
तुश्चत्वारिंशदधिकशतगुणमितिसिद्धं॰ सार्द्धराशिज्याधिकाग्रायांतुत्रिज्यावर्गार्द्धेनहीनोग्रावर्गश्चतुश्चत्वारिंशदधिकश
तगुणऋणं॰ अथ॰ अव्यक्तवर्गादिचेदवशेषंपक्षौतदेष्टेननिहत्यकिंचित्। क्षेप्यंतयोर्येनपदप्रदस्यादव्यक्तपक्षोस्यपदेनभूयः
॥ व्यक्तस्यपक्षस्यसमक्रियैवमव्यक्तमानंखलुलभ्यतेतदित्युक्तेःपक्षयोर्मूलार्थमव्यक्तवर्गांकेनापवर्तःकार्यः वर्गांकस्तुद्विसप्तति
युतःपलभावर्गः॥ तेनापवर्तितेव्यक्तपक्षेप्रथमस्थानेयावद्वर्गःसिद्धः द्वितीयस्थानेद्विमितगुणकस्यपृथक्करणादर्कघ्नावि
षुवच्छायाग्रज्ययागुणितातथाभक्तापलाख्यमित्युक्त्याफलंद्विगुणंया॰ वर्गांदक्षिणोत्तरगोलक्रमेणधनमृणं॰ रूपपक्षेपवर्ति
तेकरण्याख्यंसार्द्धराशिज्यानोग्रायामूनाधिकायांधनमृणं॥ ततोपिमूलार्थंपक्षयोरव्यक्तांकार्धरूपफलस्यवर्गोयोजितः॥
तत्राव्यक्तपक्षेवातनपूर्वकमूलग्रहणेप्रथमस्थानेयावत्॥ द्वितीयस्थानेफलंदक्षिणोत्तरगोलयोर्धनमृणं॥ यथा | या॰ फ॰ या॰ फ॰ |
उत्तरगोलेव्यक्तस्वर्णत्वंवा | या॰ फ॰ | उभयथामध्याव्यक्तनाशसंभवात्॥ रूपपक्षेतुमूलग्रहणेतद्वर्गसंयुक्तकरणीपदमिति
सार्धराशिज्यानधिकाग्रायां॰ अधिकायांतुकरण्यूनस्यफलवर्गस्यमूलं॥ तथाचत्रिज्यावर्गार्धतोग्रज्यावर्गोनादित्यत्रसार्धरा
शिज्याधिकाग्रायामुक्तानुपपत्तावपिक्वचिच्छुद्धिविधौयदेहशोध्यंनशुध्येद्विपरीतशुध्या॰ विधिस्तदाप्रोक्तवदेवकिंतुयोगेवियोगः
स्मृधियाविधेयइतिभास्करोक्त्यास्याःअग्रज्यावर्गोनादित्यत्राग्रावर्गेणाग्रावर्गेहाहीनादित्यर्थद्वयेनक्रमेणन्यूनाधिकाग्रासंबद्धे
नवानक्षतिरितिध्येयं। अथपुनःसमशोधनार्थंपक्षयोर्न्यासःदक्षिणगोले | या॰ फ॰ | करण्यमफलवर्गयंटस्यफलतोन्यून
त्वात्तत्पक्षयोरपिन्यासः | या१ फ१ या१ प१ | अनर्कादव्यक्तमित्यादिना॰ शेषाव्यक्ते | अ॰ प॰ | नाहरेद्रूपतोयंव्यक्तमानंजायतेव्यक्त
राशेरित्यनेनचप्रथम स्थानेपदंफलेनहीनमित्युपपन्नं॥ द्वितीयस्थानेपदेनहीनंफलमित्यृणंकोणशंकुर्भवतीय
नोक्तःऋणस्यस्थितिविपरीतत्वात्॥ नस्पृष्टगोलेस्थितिविपरीतमधोगोलेदृश्यमपिदृश्यतेयेनतत्कथमावश्यकं॰ नाप्य

म० टी०

२९

धोगोलत्वस्यत्वात्तत्प्रत्यापत्तिः॥ ऊर्ध्वगोलस्य छायासाधकत्वेन साधनात्तत्र छायासंभवादेवाप्रयोजकत्वात्॥ उत्तरगोले तु॥
[या० फ०१ / या० प०१] [वा / नु] [या१ फ१ / या१ प१] प्रथमस्थाने फले नयुतं परमुपपन्नं॥ द्वितीयस्थाने फले नोनं पदमित्युक्तं त्वामीकः॥ छायापयुक्तत्वात् क
रण्यनफलवर्गपदस्य फलतो न्यूनत्वात्तस्य तयोरपि न्यासः [या१ फ१ / या१ प१] [वाया१ फ१ / या१ प१] अत्र प्रथमस्थाने प
दिनयुक्ते फले कोणशंकुरुपपन्नः॥ द्वितीयस्थाने पदहीने फले कोणशंकुरिति तद्द्वयमु पपन्नं० ननिदंत
त्रोर्ध्वगोले दिनार्ध एव कोणशंकुः द्वयं द्वयस्य तावद्भगवता कथमुपेक्षितमिति चेन्न० तत्र त्रिज्यावर्गार्धतरत्यत्र व्यस्तशोधनात्फलेन
हीनसंयुक्तमित्यर्थसिद्धेर्भगवता तद्द्वयस्यानुपेक्षितत्वात्॥ समवृत्तात् दक्षिणस्थले कोणशंकुर्दिनपूर्वापरार्धक्रमेणाग्नेय्यां नै
र्ऋत्यां वा० उत्तरस्थले ऐशान्यां वायव्यां वा भवतीति सर्वमुपपन्नं० अत्र बीजक्रियोपपादकसूत्राणामुपपत्तिविस्तरभीत्या नो
क्तास्ता तत्र तत्कृष्णदैवज्ञगुरुचरणरचितायां भास्करीयबीजटीकायां सम्यगुक्ता बोध्येति॥ शंकुः कोटिस्त्रिज्या कर्णस्तर्गा त
रपदं दृग्ज्या दृग्वृत्तनतांशज्येति तत्त्रिज्यावर्गविश्लेषात्मूलं दृग्ज्येत्युपपन्नं॥ ३२॥ अथैतच्छायाछायाकर्णयोरानयनमा
ह स्वशंकुना विभज्याप्ते दृक्त्रिज्ये द्वादशाहते छायाकर्णौ तु कोणेषु यथास्वं देशकालयोरिति० कोणीयदृग्ज्यात्रिज्ये वा द्वादशगु
णे दृग्ज्यासंबंधिकोणशंकुना भक्ते० लब्धे० दृग्ज्यात्रिज्याक्रमेण० छायाछायाकर्णौ स्तः तु कारादेवं॥ कोणेषु चतुर्षु० देश
कालयोः यथास्वं० स्वमनतिक्रम्येति यथास्वं० यथादेशं यथाकालं छायाछायाकर्णौ साध्यौ० अयमर्थः॥ क्वचिद्देशे च
तुर्षु कोणेषु क्वचिच्च कोणद्वये० क्वचिच्च दिनार्ध एव कोणद्वये इत्यादि देशकालानुरोधेन यथायोग्यमिति॥ अत्रोपपत्तिः॥
प्रागुक्ता स्पष्टा च॥ ३३॥ अथ दिक्प्रदेशसंबंधेन छायाकर्णा युक्ता कालसंबंधेन सार्धश्लोकाभ्यामाह त्रिज्योदक्चरजायुक्ता
याम्यायां तद्विवर्जिता॥ अंत्या नता क्रमज्योना स्वाहोरात्रार्धसंगुणा॥ ३४॥ त्रिज्याभक्ता भवेच्छेदो लंबज्याघ्नोऽथ भाजितः॥
त्रिभज्यया भवेच्छंकुस्तद्वर्गं परिशोधयेत्॥ ३५॥ त्रिज्यावर्गात्पदं दृग्ज्या छायाकर्णौ तु पूर्ववदिति० उत्तरगोले० चरोत्प
न्नया ज्यया० चरज्ययेत्यर्थः॥ पूर्वं चरानयने चरज्या पाचरजेति संज्ञोक्तेः॥ युक्ता त्रिज्या० अंत्या स्यात्० याम्यगोले० त
या० चरज्ययोना त्रिज्या अंत्या स्यात्॥ नतोत्क्रमज्योना० स्वेष्टदिवसगतघटिका दिनगतघटिका वा दिनार्धात् गतास्तत्र न
तसंज्ञः॥ ताभिरुन्नतं दिनार्धनतकालो घटिकात्मकस्तस्यास्तत्क्रमज्योनिता स्वतत्त्वयमैरित्यादिविधिना मुनयोरध्ययमलाद्

२९

252
1918

त्यायुक्रमज्यापिंडैर्ज्योत्क्रमज्या० पंचदशघटिकाधिकनते तु पंचदशघटिकोनगतस्य क्रमज्याखंडैः क्रमज्या० तया युक्ता त्रिज्योत्क्रम
ज्या भवति० तया हीनेत्यर्थः॥ स्वाहोरात्रार्धसंगुणा० गृहीतचरज्यासंबंध्यहोरात्रवृत्तव्यासार्धद्युज्या तया गुणिता० त्रिज्यया भक्ता० फलं०
छेदसंज्ञं स्यात्० अथानंतरं छेदो लंबज्यया गुणितः त्रिज्यया भाज्यः फलमिष्टकाले शंकुः स्यात्॥ तस्य शंकोर्वर्गं त्रिज्यावर्गाच्छोधयेत्॥ शे
षस्य मूलं दृग्ज्या० आभ्यां छायाकर्णौ तु पूर्ववत्॥ पूर्वोक्तरीत्या भवतः॥ अत्र छायाकर्णाविति कोणछायाकर्णसाधनश्लोकांतर्भागस्य ग्रह
णात् श्लोकोक्तरीत्या भीष्टशंकुदृग्ज्याभ्यां छायाकर्णौ साध्याविति सूक्तं॥ अत्रोपपत्तिः॥ याम्योत्तरवृत्तोर्ध्वभागग्रहाधिष्ठितद्युरात्रवृत्त
संपाताद्भिन्नद्युरात्रसंपातद्वयं बद्धरयाम्सत्तत्र क्षितिजसंबद्धयाम्योत्तरवृत्तसूत्रसंपातपर्यंतमहोरात्रवृत्ते सूत्रे त्रिज्यानुरूद्धं
व्यासार्धमुत्तरगोले चरज्यायुता त्रिज्या० दक्षिणगोले चरज्ययोना त्रिज्या० उन्मंडलयाम्योत्तरसूत्राद्वाह्योरात्रवृत्तव्यासार्धं त्रिज्यात्मक
त्वात्॥ उन्मंडलस्योत्तरदक्षिणक्रमेण क्षितिजादूर्ध्वाधः स्थत्वेन नयाम्योत्तरसूत्रयोर्मध्ये चरज्यात्वाच्च० ग्रहाहोरात्रवृत्ते याम्योत्तराहो
रात्रवृत्तसंपातादुभयत्र नतघटिकांतरेण स्थाने तत्र स्थानं नतकालस्य संपूर्णज्या० तन्मध्यादूर्ध्वसूत्रं शररूपं नतोत्क्रमज्या० तया हीनांत्या
ग्रहस्थानादहोरात्रवृत्ते उदयास्तसूत्रपर्यंतमसुसूत्रं त्रिज्यानुरूद्धमिष्टांत्या तत्तुल्याभ्यां त्वहोरात्रव्यासस्त्रिज्यांतर्गता० सा द्युज्याप्रमाणसा
धितेष्टहृतिरिति द्युज्यागुणा त्रिज्याभक्ता फलं छेदः॥ अस्याग्निज्याकर्णे लंबज्या कोटिस्तदेष्टहृतिकर्णे का कोटिरित्यनुपातेनेष्टशंकुः॥
अस्मादृग्ज्या छायातत्कर्णा उक्तरीत्या सिध्यंतीत्युक्तमुपपन्नं॥ ३६॥ अथ श्लोकत्रयेण छायाकर्णाभ्यां नतकालानयनमाह अभीष्टछा
याया भ्यस्ता त्रिज्या तत्कर्णभाजिता॥ दृग्ज्या तद्वर्गसंशुद्धात्त्रिज्यावर्गाच्च यत्पदं॥ ३७॥ शंकुः स त्रिभजीवाघ्नः स्वलंबज्याविभाजितः॥ छे
दः स त्रिज्यया भ्यस्तः स्वाहोरात्रार्धभाजितः॥ ३८॥ उन्नतज्या तया हीनास्वांत्या शेषस्य कार्मुकं॥ उत्क्रमज्याभिरेवं स्युः प्राक्पश्चार्धनतास
वः इति॥ अभीष्टकालिकछायया गुणिता त्रिज्या० गृहीतछायायाः छायाकर्णेन भक्ता फलं दृग्ज्या० दृग्ज्यायाः वर्गेण हीना त्रिज्यावर्गाद्य
त्पदं स्यात् इतं मूलं च काले यत्तदो नित्यसंबंधात् परः॥ अभीष्टशंकुः॥ स इष्टशंकुस्त्रिज्यया गुणितः॥ स्वदेशीयलंबज्यया भक्तः फलं
छेदः॥ सः॥ छेदः॥ त्रिज्यया गुणितः द्युज्यया भक्तः॥ उन्नतकालस्य ज्या विलक्षणाः यद्वनुरुन्नतकालो न भवति० तया० आनीतयोन्नतज्य
या हीना० स्वांत्या० स्वद्युज्यासंबद्धचरज्यया वगता त्वा० अवशेषस्य० उत्क्रमज्याभिः॥ युनयोर्धपमला इत्यायुक्तज्यापिंडैः॥ धनुः॥ अव
शेषस्य त्रिज्याधिकत्वे तु यदधिकं तस्य क्रमज्यापिंडैर्धनुर्भवतु पंचदशघटितयुक्तमुत्क्रमधनुर्भवतीति॥ एवं प्रकारेण सिद्धाः दिनस्य पूर्वा
र्धापरार्धयोर्नतकालासवो भवंति॥ अत्रोपपत्तिः॥ द्वौ कर्णव्यासार्धागमाः॥ तत्र छेदस्त्रिज्यापरिणतइष्टांत्या० तस्या० ज्यात्वासंभवः॥ अ

म॰ टी॰

३९

वध्युदयास्तस्य त्रस्याहोरात्रवृत्तव्यासस्य त्रलाभावादित्युपपन्नं। तज्ज्याकारेणस्वल्पांतरत्वेन दर्शनादुन्नतज्येत्युक्तं॥ अतएव भास्क
राचार्यैः। इष्टांत्यकामुन्नतकालमौर्वीतुल्यां प्रकल्प्येत्याद्युक्तं॥ तद्गुणुरस्तनामुन्नतकालत्वापत्यातयाहीनेत्यादिभागस्यव्यर्थत्वापत्ते
रितिदिक्॥ ३९॥ अथेष्टकालिकाग्रयाक्रांतिज्याहारात्सूर्यसाधनं सार्धश्लोकेनाह॥ इष्टाग्रापघ्नीतुलं बज्यास्वकर्णांगुलाभाजिता। क्रां
तिज्यासात्रिजीवाघ्नी परमापक्रमोद्धृता॥ ४०॥ तच्चापं भादिकं क्षेत्रं पदैस्तत्र भवोरविरिति॰ इष्टकालिककर्णाग्रयागुणितालंबज्या॰
तुकारात्अग्रज्यायाविशास॥ तात्कालिकछायायाः कर्णांगुलसंख्याभिर्भक्ता॰ फलंक्रांतिज्या॰ सा॰ क्रांतिज्या॰ त्रिज्यया गुणिता॰ पर
मक्रांतिज्यया भक्ता॰ फलस्य धनुःराश्यादिकंक्षेत्रं स्थानं भुजइति यावत्॥ पदैश्चतुर्भिस्त्रिभिन्नजातैस्तत्रपदेभवउत्पन्नः॥ यथोक्तरी
त्याकर्कादेश्चापचक्रार्द्धत्यागपुत्त्यान्तर्वः स्यात्॥ अत्रोपपत्तिः॥ कर्णाग्रे कर्णाग्रालभ्यते त्रिज्याग्रेके स्यग्रा॰ त्रिज्याकर्णेलंबज्याकोटि
स्तदाग्राकर्णेकाकोटिरित्यनुपातेनत्रिज्ययोस्तत्वल्पयोर्गुणहरयोर्नाशादिष्टकर्णाग्रागुणितलंबज्याकर्णभक्ताक्रांतिज्या॰ अस्याः स
र्वानयनं प्रागेवोक्तमिति पुनरुक्तत्वात्फ़गमंतरं॥ ४०॥ अथभाभ्रमणमाह। इष्टार्कमध्ये प्राक्पश्चाद्वृत्तेबाहुत्रयांतरे॥ मत्स्यद्वयांतरयु
तेस्त्रिस्पृक्सूत्रेणभाभ्रमइति॥ अभिमतेदिवसेमध्ये॰ पूर्वविभागे॰ पश्चिमविभागे॰ बाहुत्रयांतरेः पूर्वापरसूत्राद्भुजत्रयांतरे स्था
ने धृते॰ अयमर्थः॥ पूर्वापरसूत्रस्यमध्यस्थानाद्भुजांगुलांतरेणचिन्हमेकं॰ द्वितीयंपूर्वविभागेपूर्वापरसूत्रात्कालांतरीयभुजां
गुलांतरेणचिन्हः तृतीयंपश्चिमविभागेपूर्वापरसूत्रादितरकालांतरीयभुजांगुलांतरेणत्रिचिन्हमेवमेकस्मिन्दिवसेकालत्रयेस्व
भुजांतरेणपूर्वापरसूत्राच्चिन्हत्रयेकृतेसतीति॰ मत्स्याद्वयांतरयुतेः॥ अव्यवहितचिन्हाभ्यांप्रत्येकं मत्स्यमुत्पाद्येति मत्स्यद्वयस्य
प्रत्येकमुखपुच्छगतसूत्रमध्यस्थयोः। स्वमार्गानुसारेण प्रसारितयोर्योगो यस्मिन्स्थानेतस्मादित्यर्थः॥ त्रिस्पृक्सूत्रेणाचिन्हत्र
यलग्नतुल्यसूत्रमितेनव्यासार्धेन॰ भाभ्रमः। छायामार्गमंडलंभवति॰ प्रथमांतिमकालांतर्गतकालिकछायाग्रंतद्वृत्तपरिधौभवतीत्य
र्थः॥ अत्रोपपत्तिः॥ प्राच्यपरसूत्राद्भुजांतरेणछायामिति॥ छायाग्रत्रयंज्ञात्वातत्स्पृक्परिधिरूपस्यमध्यज्ञानार्थमव्यवहितचिन्ह
द्वयमत्स्याभ्यामव्यवहितचिन्हमध्यस्यदक्षिणोत्तरसूत्रेभवतः॥ तत्रवृत्तपरिधिप्रदेशेभ्यः केंद्रस्यतुल्यांतरत्वेनाव्यवहितचिन्हमध्य
स्थानस्यावश्यं। परिधिस्थत्वात्तत्सूत्रमपिकेंद्रेलग्नंभवत्येवंप्रत्येकाव्यवहितचिन्हमध्यसूत्रयोर्योगस्तद्वृत्तकेंद्रंसिद्धं॥ मध्यरेखा
ज्ञानार्थं मत्स्यद्वयं॰ तत्केंद्राद्वृत्तेभागत्रयस्पृग्भवतीतिकिंचित्रंयद्यपिछायाग्रस्यस्वल्पचलनानुरोधेनचलनात्तस्यलघुवृत्ताकारासं
भवात्प्रतिक्षणंपुराग्रवृत्तभेदाद्व्यथक्रांतिभेदानुपपत्तेरित्येकवृत्तपरिधौछायाग्रभ्रमणंनसंभवस्ततएवभास्कराचार्यैर्भास्त्रिप्र ३०

श्राभ्रमणंनसरित्युक्तं। तथापिसाधकभाग्राणामवश्यमेकवृत्तस्थत्वसंभवात्तदंतर्वर्तिनांछायाग्राणासपरिधिस्थत्वंस्वल्पांतरत्वा
दंगीकृत्यभगवताकृपालुनाछायाग्रदर्शनंविनापिछायाग्रस्थानज्ञानमन्यकालिकछायाग्रस्थानयोर्दर्शनेनाभीष्टसमयेमेषादिनाछा
दितरवीशस्यादिस्वर्पज्ञानोपजीव्याग्राभुजादिज्ञानार्थमुक्तं॥ बहुकालांतरितभागाग्रहणंस्थूलं॥ अल्पांतरितेकिंचित्सूक्ष्ममितिध्ये
यं॥ ४१॥ अथकालज्ञानमुक्त्वातदुपजीवकत्वादेशाद्युपयुक्तलग्नज्ञानेविवक्षुस्तदुपयुक्तस्वोदयज्ञानार्थमेषादित्रयाणांलंकोदया
न्साधनपूर्वकंतच्चिबंधनंश्लोकाभ्यामाहत्रिभद्युकर्णार्द्धगुणाःस्वाहोरात्रार्द्धभाजिताः॥ क्रमादेकद्वित्रिभज्यास्तच्चापानि॥ पृथक्पृथ
क्॥ ४०॥ स्वाधोधःपरिशोध्यानिमेषाल्लंकोदयासवः॥ स्वागाष्टयोर्थगोगैकाः शरत्र्यंककहिमांशवइति॰ एकद्वित्रिभज्याः। एकराशिज्या
द्विराशिज्यात्रिराशिज्याः॥ त्रिराशिद्युज्ययागुणाः क्रमात्स्वक्रांतिज्यासंबंधिद्युज्याभिर्भक्ताः फलानांधनूंषिभिन्नभिन्नस्थानस्था
प्यानिस्थानद्वयेस्थाप्यानीत्यर्थः॥ अनंतरं॥ स्वाधोधः। स्वादधोधः॥ एकराशिज्यासंबंधिफलंयथास्थितं॥ ततःप्रथमफलंद्विती
यफलाद्द्वितीयफलंतृतीयफलान्नूनीकृत्य॰ पृथगनुक्तौप्रथमफलंद्वितीयफलान्न्यूनंकृतंसद्द्वयोःफलयोर्मार्जनीतृतीयेशोध्यास्
भवः॥ प्रथमस्यज्ञानासंभवश्चेतिप्रथमद्वितीययोःपृथक्स्थापनमावश्यकमतएवात्रिधापृथगित्युक्तं। मेषात्॥ मेषमारभ्यराशि
त्रयाणांलंकोदयासवोभवंति॰ प्रथमफलंमेषस्योदयासवः॥ प्रथमोनद्वितीयफलंवृषोदयासवः॥ द्वितीयोनतृतीयफलंमिथुनस्योद
यासवइत्यर्थः॥ नियतत्वात्तन्मानमाहस्वागाष्टपइति॰ मेषमानेसप्ततियुतंषोडशशतं॥ वृषमानेपंचोनमष्टादशशतं॥ मिथुन
मानेपंचत्रिंशदधिकमेकोनविंशतिशतमित्यर्थः॥ अत्रोपपत्तिः॥ सिद्धांतशिरोमणौमेषादिजीवाः श्रुतयोपवृत्तेलग्नमिजेक्रां
तिगुणाभुजाःस्युः॥ तत्कोटयश्चद्युमिवासवृत्ते व्यासार्धवृत्तेपरिणामितानां॰ चापिधुतासामसवस्ततोयेतेषोविशुद्धादुदयानिरक्षे
इतितत्स्वरूपोत्स्याभिज्याकर्णात्रिराशिद्युज्याकोटिस्तदेकद्वित्रिराशिज्याकर्णद्युकाइत्यनुपातेनकोटयोद्युज्याप्रमाणेनाहोरात्रवृ
त्ते॰ तत्स्थकरणार्थंत्रिज्याप्रमाणेनमाप्यारिति॥ द्युज्याप्रमाणेनैतास्तदात्रिज्याप्रमाणेनकाइत्यनुपातेनत्रिज्ययोर्गुणहरयोस्तुल्य
त्वेननाशादेकादिराशिज्यास्त्रिराशिद्युज्यायाभक्ताइत्युपपन्नाः॥ आसाधनंषि॥ एकादिराशीनामुदयासवस्तत्र प्रत्येकराश्युदया
र्थज्ञानार्थंस्वाधोधः॥ शोधनमित्युपपन्नं॥ त्रिभद्युकर्णार्द्धगुणाइत्यादिलंकोदयासवइत्यंतं॥ अत्रलंकापदंनिरक्षदेशपरंव्याख्येयं॥
सर्वनिरक्षदेशास्वेषसंस्थानस्योस्येकतुल्यत्वेनोक्तरीत्यान्निरक्षदेशेतत्सिद्धौबाधकाभावात्॥ अन्यथास्वनिरक्षदेशेतत्साधनार्थंग्रहण

259
1918

स्०टी०

२३

देशांतरसंस्कारकरणापत्तेः॥ मिश्रोदयकरणार्थं स्वनिरक्षदेशीयाद्यंतरसंस्कारस्यसमनंतरमेवोक्तत्वादितिदिक्॰ खागाष्टयइत्यादयु
क्तप्रकारगुणितकर्मैवोपपत्तिः॥२३॥ अथैभ्यः स्वदेशोदयासून्श्लोकार्धेनाह स्वदेशचरखंडोनाभवंती दोरुदयासवइति॰ एभेसिद्धाः स्व
यदेशासंबंधेनयान्युत्पन्नानिचरखंडानि॰ चरानयनप्रकारेणोक्तादिशाशीनां चराणयानि योक्तरीत्यास्वधोधः शोधितानि मेषादित्रि
भुनानानांराशीनां चरखंडानि भवंति॥ तैरूनाः संतः शोदयासवः॥ चरखंडसंबंधिदेशेमेषादित्रयाणामुदयासवोभवंतीत्यर्थः॥ अत्रो
पपत्तिः॥ मेषादेर्मिथुनांतोनाडीभिस्तिथिमितानिसूहृत्ते॰ लगति कुजे तदधः स्थेपश्चात्ताभिश्चरोनाभिरितिभास्करोक्त्या प्रत्येको
दयासूत्तानं प्रत्येकचरेणेति॰ प्रत्येकचरं तु चरखंडमित्युपपन्नं॥ २४॥ अथावशिष्टराशीनामुदयानाहव्यस्ताव्यस्तैर्युताः स्वैः स्वैः
कर्कटाद्यास्ततस्त्रयः उत्क्रमेणषडेवैतेभवंतीष्टास्तुलादयः॥ उत्क्रमेणस्थापिताः स्वैः स्वैः मेषादिचरखंडैस्त्रिभिः। व्यस्तैः। उ
दयक्रमेणस्थापितैः। युताः कर्कादयस्त्रयः कन्यांताः क्रमेण ज्ञातोदयासमानाः भवंति॥ एवं षण्णमुक्ताव्वसिद्धानामुदयासूत्तान
माह उत्क्रमेणेति॰ एते॰ उक्ताः मेषादयः कन्यांताः षट्खंडकाः उत्क्रमेण॰ कन्यासिंहकर्कयुक्क्रमेण॰ एवं कारोमेषवृषादिक्रमनि
रासार्थः॥ तुलादयः षड्राशयः। इष्टाः ज्ञातस्वदेशोदयाः क्रमानाः भवंति॰ तथा चकन्योदयस्तत्तुलायाः सिंहोदयो वृश्चिकस्य॰ कर्कोद
यो धनुषः मिथुनोदयो मकरस्य॰ वृषोदयः कुंभस्य॰ मेषोदयो मीनस्येति सिद्धं॥ अत्रोपपत्तिः॥ कन्यातादलुपांतस्तिथिमितनाडीभि
रूहृले॰ लगति कुजे चार्धस्ते पश्चात्ताभिश्चरा धाभिः॥ तद्विहितैः स्वखंडैश्च क्रमस्तौ कन्यांतो वा ह्यपांतो वा॰ चरखंडैरूना ढ्यास्ते न निरक्षो
दयाः स्वदेशे स्युरिति भास्करोक्त्यासुगमा॥२५॥ अथाभीष्टकालेऽर्कण धनलग्नसाधनार्थं गतभोग्यासूनाह गतभोग्यासवः कार्या भा
स्कराद्दिष्टकालिकात्॥ स्वोदयाःस्कहता भुक्तभोग्या भक्ताः स्ववह्निभिरिति॰ इष्टकाले चालनेन संजातात् सूर्यात् गतभोग्यासवः॥ ३१
गतासवोभोग्यासवश्चसाध्याः कथं साध्या इत्यत आह। स्वोदयासूहता इति॥ भुक्तभोग्या॰ सूर्याक्रांतिराशेर्यैर्भुक्तभागाः सूर्यस्य भो
ग्या एवचाल्पकाः ते त्रिंशतः शुद्धाः भोग्या भागाः। सूर्याक्रांतराशेः स्वदेशोदयासुभिर्गुणिताः त्रिंशताभक्ताः गतासवो भोग्यासवः॥
क्रमेणभवंति॥ अत्रोपपत्तिः॥ यस्मिन्काले लग्नसाध्यं तस्मिन्काले सूर्यासाध्योन्यथा तात्कालिकलग्नसिद्धिर्न स्यात्। अथैतदर्थं सू
र्याक्रांतराशेर्भुक्तासवोभोग्यासवश्चसाध्याः॥ सूर्योदयात्कालपर्यंतं पूर्वाग्निमकालयोस्तद्राशेरुग्नत्वात्। अनंतरं चराख्युदयास
गणनयालग्नज्ञानस्यसूत्रास्यतासु॥ अतस्त्रिंशद्भागैरुदयासवस्तदाभुक्ताभोग्यभागैः के इति भुक्तभोग्यकालासवः। अत्रोदया
कालासूत्रांसंपातावधिराशिग्रहणेनोत्पन्नत्वात् सूर्ये यनांशासंस्कृतो ग्राह्यः॥ अन्यथा सूर्याक्रांतराशेरुक्तोदयसंबंधाभावादसंग

361
1918

तापत्तेः। अतएव युक्तायनांशादयमः असाध्यः कालोऽत्र खेटात्खलु भुक्तभोग्याद्विलिलिभास्कराचार्योक्तं संगच्छते॰ न च कुरी सौदृषि
कार्को देवभुक्तभोग्यासवः साध्याः सूर्योदयात्कालावधि इष्टो लग्नत्वात्। नहीष्टकाले तद्राशिर्लग्ने येन तद्गतभोग्यासवः साध्यः॥ औ
पिनात्कालिकार्कात्सूर्योदयावधिकास्ते तात्कालिकार्कास्य सूर्योदयकालिकत्वाभावात्॰ तत्कथं भगवता सर्वज्ञेन भास्कराद्दिष्ट
कालिकादित्युक्तमिति चेत्। उच्यते॥ उदयानां नाक्षत्रत्वात् नाक्षत्र एव योग्यास्ताः स्वत्वसिद्धाः॥ सर्वत्र साधित घटीनां सावनत्वात्
नामनाक्षत्रीकरणमावश्यकमन्यथा तद्गणनानुपपत्तेः तदर्थं ग्रहोदयप्राणहता इत्यायुक्तावृष्टि सावन घटीषु गतिकलोत्थन्वासु
वाधिकानाक्षत्रसार्धं तदेष्टसावनघटीषु किंमदधिकमित्यनुपाते नागतफलयुक्ताः सवनाः कार्याः तथा चागतफलस्य स्वेत्रावयव
उदयासुभिरष्टादशशतकलात्स्तदागतासुभिः कारत्यनुपातसिद्धात्प्रादुराशतोदयासौ गुणहरयोस्तुल्यत्वेन नाशादवशिष्टचाल
नस्वरूपः स्वसैवोक्तः॥ सावनास्त्वविहततरचन्द्रिताः। तथा चेष्टकालिकोऽर्कोयत्काले लग्नं तत्कालास्तुर्वगृहीतसावनघटो नाक्षत्रा
एवभवंतीति भगवता सम्यगुक्तं भास्कराद्दिष्टकालिकादिति॰ अनेनैवाभिप्रायेणैव भास्कराचार्यैः रप्युक्तं॥ लग्नार्थमिष्टघटिकायदिसा
वनाग्न्याप्तात्कालिका करणेन भवेयुराद्यः॥ अर्कोदयादिसदृशीत्यइहापने यास्तात्कालिकतमथन क्षिपेत तदाक्ष्य इति॥ २६
अथाभीष्टघटिकाभ्यः कण धनलग्नसाधनं श्लोकाभ्यामाह अभीष्टघटिकासुभ्यो भोग्यासून्प्रविशोधयेत्॥ तद्वत्तदेष्टलग्नासूनेवया
नांस्तथोत्क्रमात्॥ २७॥ शेषं वह्निशताभ्यस्तमशुद्धेनविभाजितं॥ भागहीनं चयुक्तं च तल्लग्नं क्षितिजेतदेति॥ अभीष्टकालेयाः सूर्यो
दयात्घटिकास्ता मत्स्रभ्यः॥ भोग्यासून् शोधयेत्। तदनंतरं॥ तदेष्टलग्नासून्॰ सूर्याक्रांतराशेरग्निमराशयष्टच्यलग्नानि॰ तेषा
मुदयास्नपि॰ तद्वत्। क्रमेणशोधयेत्॥ येरा श्युदयेन शुध्यति सोशुद्धस्तेन त्रिंशो योऽभक्तं॥ चेदिष्यते नचैषाभावे यानकार्या श्च
न्यसिद्धेरितितत्त्वितं॥ फलेनभागादिनायुक्तसंबंधेनहीनं॥ चकारादशुद्धराशि संख्यामानं॥ भोग्यसंबद्धभागादिफलेनयुक्तं। चु
कारादभिमशुद्धराशि संख्यामानं॥ तत्॰ आगतराश्यादिमानं संबंधिसंपातावधिक क्रांतिवृत्तैकप्रदेशरूपं तदा॥ अभीष्टकाले॰
क्षितिजे॰ क्षितिजवृत्तपूर्वविभागे लग्नं समस्तयंसंबंधेन लग्नस्वरूपी स्याभीष्टकालेतल्लग्नंस्यादित्यर्थः॥ फलोत्थार्थं ग्रहाणां
योगतीरेवनासंपाताबधिलाग्रहास्तत्संक्लिष्टलग्नस्यापिफलादेशार्थं ततएव संगुचितं ग्रहणमित्यागतलग्नं संपातावधि
कमयनांशैर्व्यस्तसंस्कुर्यादितिस्वतः सिद्धमितिनोक्तं॰ न च पूर्वमेव सूर्यस्यायनांशासंस्कारानुत्पत्त्या लग्नमपियथास्थितमित्या
यनांशाव्यस्तसंस्कारोनुक्तः। स गतइति वाच्यं॥ स्थूलत्वात्॥ लग्नार्थं सूर्ये यनांशसंस्कारस्य तत्त्वं स्थूलात् द्रष्टाक्रांति च्छायास्वर

सू॰ सि॰
३२

रव्यादिक्रमित्यवतारिप रसंग्रहीत सूत्र॰ अथ भगवतायनांशायस्त संस्कारः कं डेन नो करति लग्नं संपाताव धिकमेव फलादेशार्थं ग्र
हीतं॰ सूर्यस्य तु लग्नार्थमयनांशसंस्कारस्य कलात्॥ उदयनांसंपाताव धिकत्वादिति चेन्मैवं॰ भागहीनं च युक्ते च तल्लग्नं क्षितिजे
सदेत्य ऽ स्यास साग्निम श्लोका दिस्थाना स्य श्वादिस्सस्या र त्याव भा क्पश्चा ऽ कमलेने भागे रयनांशैः क्रमेणहीने युक्ते लग्नं स्या
दित्यर्थेन भगवतः कं डोक्ते: सिद्ध त्वाच्च॰ अत्रोपपत्तिः॥ अभीष्ट घटिकासु भोग्यगतासु शेषा धने सूर्याक्रांतराशिर्लग्नं नेतिज्ञा
तं॥ ततो ग्निमपश्चाद्वा स्पष्ट यशो धने भुक्तो राशि र्लग्नं नेति ज्ञातं॰ ततोयो राश्युदयेन शुध्यति स एव राशि रभीष्टकाले क्षिति
जे लग्न इति॰ तस्यैको भागो लग्न इति ज्ञानार्थमशुद्ध राश्युदयासुभिस्त्रिंशद्भागास्तदा शेषासुभिः का इत्यनुपातेन भुक्त भोग्य
क्रमेण लग्नराशेर्भोग्य भुक्त भागादिकं सिद्धं। तत्र भोग्य भागास्त्रिंशतः शुद्धागता भागा लग्नराशेर्भवंती त्यशुद्ध राशि संख्या
तो भाग्य भागाः शुद्धा लग्नं भवति। भुक्त भागाश्च भुक्त राशि संख्यायां युक्ताः लग्नं भवति॰ अयनांशास्तु संस्कारो ग्रहपंक्ति स्थत्व
र्थः अन्यथा फलादेशार्थं ग्रहायनांशासंस्कृता ग्राह्या इति सर्वं निरवद्यं॥ ४८॥ अथ प्रसंगान्मध्यलग्नानयन विशेष सूत्र
नार्थमाह मासमश्वान्नतनाडीभिस्तस्माक्कोच्छ्रे रसासुभिः। भागीक्षय धने कृत्वा मध्यलग्नं तदा भवेदिति दिनार्धात् गत दिनगत
शेष ही नं दिनार्धं क्रमेण प्राक्पश्चिमनतं॥ रात्र्यर्धात् गत रात्रिशेष गत युते दिनार्द्धं प्राक्पश्चिमं नतं जातकपद्धतौ प्रसिद्धं॥ न
त घटिकाभिः तस्मात्कालिक सूर्यात्॰ निरक्षदेशराश्युदयासुभिः॥ पूर्वोक्तप्रकारेण सिद्ध राशि भागादिकं प्राक्पश्चिमन
त क्रमेण सूर्ये॰ क्षय धने॰ हीन युते कृते तदाभीष्टकाले मध्यलग्नं १० दशमलग्नं स्यात्। अयमभिप्रायः॥ प्राङ्नतेन तद्घस
भ्यः सूर्यक्रांतराशेर्निरक्षोदयासुभिर्भुक्तासुन्विशोध्य तत्पूर्वराशीनां निरक्षोदयासंश्च विशोध्य शेषं त्रिंशद्गुणमशुद्धनि
रक्षोदयभक्तं फलेन भागादिना शोधि तग्रहसंख्यातुल्य राशिभिश्च सूर्यो हीनो मध्यलग्नं॰ एवं पश्चिमनतेन तद्घटीसुभ्यः
सूर्याक्रांतराशेर्निरक्षोदयासुभिर्भोग्यासून्विशोध्य तदग्निमराशीनां निरक्षोदयासंश्च विशोध्य शेषं त्रिंशद्गुणमशुद्धनिर
क्षोदयभक्तं फलेन भागादिना शोधितग्रहसंख्यातुल्य राशिभिश्च सूर्यो युतो मध्यलग्नं॰ एवं भुक्तं भोग्यासुभ्यो ल्पकाले पी
ष्टासव स्त्रिंशद्गुणिताः सूर्याक्रांतराश्युदयभक्ताः फलेन भागादिना हीनयुतो र्को मध्यलग्नं स्यात्॥ अनेन प्रकारेण लग्नमपि ३२
साध्यं भवेदुपपत्तिः॥ ऊर्ध्वयाम्योत्तरवृत्ते यः क्रांतिवृत्तप्रदेशो लग्नस्तन्मध्यलग्नं तत्साधनार्थमभीष्टकाले याम्योत्तरवृ

263
1918

त्तायुराश्रवृत्ते सूर्यो यावता घटी विसनतकालः प्राक्पश्चिमसंज्ञः अर्धरात्रमारभ्य दिनार्धपर्यंतं प्राक्पालं॰ तत्र प्राङ्नते सूर्यस्य याम्योत्तर
वृत्तात्पूर्वस्थत्वेन सूर्यात्पूर्वराशिभागा एव याम्योत्तरवृत्ते लग्ना इति सूर्याद्व्युत्क्रमेण लग्नरीत्यानतघटीभिः साध्यं॰ पश्चिमनते तु सूर्यस्य या
म्योत्तरवृत्तात्पश्चिमस्थत्वेन सूर्याग्निमराशेर्मध्यलग्नत्वात्सूर्यादधिकं क्रमलग्नरीत्यानतघटीभिः साध्यं॥ तत्राहत्ता घा याम्योत्तरवृत्त
स्य पंचदशघ घंतरेण नियतत्वान्निरक्षोदयासुभिः साध्यमिति॰ शेषा क्रियोपपत्तिस्त्वतिस्पष्टतरेति संक्षेपः॥ ४९॥ अथ कालसा
धनमाह भोग्यासूनूनकस्याथ भुक्तासूनधिकस्य च॥ सपिंड्यांतरलग्नासूनेवं स्यात्कालसाधनमिति॰ अथानंतरं॰ लग्नार्कयोर्मध्य
योयंतमूनस्तस्य भोग्यासून्॰ अधिकस्य भुक्तासून्॰ संपीड्य॰ एकीकृत्य॰ अंतरलग्नासून्॰ सूर्यलग्नमध्ये ये लग्नराशयस्तेषा
मुदयासून्॰ च॰ समुच्चये॰ एकीकृत्य॰ एवमुक्तप्रकारेण॰ कालस्य सिद्धिर्भवति॰ अत्रोपपत्तिः॥ ऊनाधिकमग्ने एवं भवतीन्यूनतुल्य
लग्नस्य भोग्यकालोंतरस्थराश्युदययुतोधिकतुल्यलग्नस्य भुक्तकालेन युतस्तल्लग्नयोरंतरवर्ती कालः सिद्धः स्यात्॥ ५०॥ अथैवं
लग्नार्काभ्यां साधितकालस्य दिनरात्र्यंतर्गतत्वज्ञानमाह सूर्यादूने निशाशेषे लग्नेर्कादधिके दिवा॥ भचक्रार्द्धयुताद्वूनेरधिके स
प्ताद्धरमिति सूर्यात्॥ निशायंतर्गतत्वेन न्यूने लग्ने सति पूर्वप्रकारसिद्धः कालो रात्रिशेषो भवति॥ सूर्यात्षड्भांतर्गतत्वेनाधिके ल
ग्ने पूर्वप्रकारसिद्धः कालो दिने स्यात्। षड्युतात्सूर्यादधिके लग्ने॰ लग्नसषड्सूर्याभ्यामानीतः पूर्वरीत्या कालः। अतस्तमयात्॥
सूर्यास्तकालात्॥ परमनंतरं रात्रावित्यर्थः॥ एतेन रात्रौ इष्टकाले गते सषड्सूर्याल्लग्नं साध्यमिति सूचितं॥ अत्रोपपत्तिः॥ सूर्यो
दये सूर्यतुल्यलग्नत्वात्सूर्यादूनाधिके लग्ने क्रमेण रात्रिशेषे दिने च कालः स्यात्॥ एवमस्तकाले सषड्सूर्यस्य लग्नत्वात्तदधिके
लग्ने रात्रावेव कालः सिध्येदित्यादि स्फुगमतरं॥ ५१॥ अथाग्निमग्रंथस्यासंगतित्वनिरासार्थमधिकारसमाप्तिं फक्किकयाह इति
त्रिप्रश्नाद्यधिकार इति॰ दिग्देशकालानां प्रतिपादने दं परिसमाप्तमित्यर्थः॥ दिशासाधनं शिलातलेइत्यादि नियतं॰ तत्सं
बंधेन॰ समकोणयाम्योत्तरशंकूनां साधनान्यपि दिगंतरगतान्यानियातानिः पलभालंबाक्षादिसाधनं देशानिरूपणं नियतम
श्वरादिसाधनमनियतं॥ कालसाधनं तद्दृशाच्छायादिसाधनं च कालनिरूपणमिति विवेकः॥ ॥ रंगनाथेन विरचिते सूर्यसि
द्धांतटिप्पणे॥ त्रिप्रश्नस्याधिकारोयं पूर्णो गूढप्रकाशके॥ ३॥ ॥ इति श्री सकलगणकसार्वभौम बल्लालदैवज्ञात्मज रंगनाथगणक
विरचिते गूढार्थप्रकाशके त्रिप्रश्नाधिकारः पूर्णः॥ ॥ अथ चंद्रग्रहणाकारो व्याख्यायते॥ तत्र प्रथमं सूर्यचंद्रयोर्बिंबयोजनानि

सू॰टी॰
३३

ततस्फुटीकरणं च सार्धश्लोकेनाह। सार्धानि षट्सहस्राणि योजनानि विवस्वतः॥ ॥विष्कंभो मंडलस्येंदोः सहाशीत्या चतुःशतं॥ १॥
स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटाविति। षट्सहस्राणि॰ सार्धानि॰ सतत्रयस्यार्धं पंचशतं। तत्सहचेतनमानानि॰ पंचषष्टित्रि
शद्योजनानि सूर्यस्य॰ मंडलस्य॰ गोलरूपबिंबस्य॰ विष्कंभः व्यासः चंद्रस्य॰ अशीत्या सह॰ अशीत्यधिकं। चतुःशतं योजनानि॰
तौ व्यासौ स्पष्टयोजनात्मकौ गत्या गुणितौ निजमध्यगत्या भक्तौ स्फुटौ स्तः॥ अत्र गणितेन व्यासस्यैव बिंबव्यवहारोऽभियुक्तानां। अत्रोपपत्तिः
त्रिज्यामितकर्णेन मध्यमकक्षायां भ्रमणात्तत्र पतद्बिंबव्यासात्मकं तन्मध्यमं। तत्र स्वल्पांतरेण मध्यगत्यंगीकारान्मध्यगत्येदं तदा स्फु
टगत्या किमिति स्पष्टं बिंबं नीचोच्चवशादुच्चेपुनरं॥ गत्योः परमाधिकं न्यूनत्वात्॥ ॥अथ सूर्यबिंबं चंद्रकक्षायां साधयंस्तयोः कलात्मक
बिंबानयनं सार्धश्लोकेनाह। रवेः स्वभगणाभ्यस्तः शशांकभगणोद्धृतः॥ शशांककक्षागुणितो भाजितो वार्ककक्षया॥ २॥ विष्कंभश्चंद्रकक्षायां
तिथ्याप्ता मानलिप्तिकाः इति। सूर्यस्य विष्कंभः प्रागुक्तो स्पष्टो व्यासः स्वभगणैः॥ सूर्यभगणैः गुणितः॥ चंद्रभगणैर्भक्तः॥ वा॰ अथ
वा॰ चंद्रकक्षया वक्ष्यमाणया गुणितः सूर्यकक्षया वक्ष्यमाणया भक्तः चंद्रकक्षायां॰ चंद्राधिष्ठिताकाशगोले सूर्यव्यासः स्पष्टो भवति॥
ततो व्यासयोजनसंख्याः॥ पंचदशभक्ताः॥ सूर्यचंद्रयोर्बिंबव्यासप्रमाणकलाः भवंति॥ अत्रोपपत्तिः॥ चक्रकलाभिश्चंद्रकक्षायोजना
नि॥ तदैककलया कानीति चंद्रकक्षास्थितैककलायां पंचदश योजनानि॥ अतश्चंद्रस्य स्वकक्षयास्थितत्वात्स्पष्टचंद्रबिंबव्यासयोज
नानि पंचदशभक्तानि चंद्रबिंबव्यासकलाः भवंति। एवं सूर्यकक्षायामेककला सार्धत्रिशतद्वययोजनैरिति स्पष्टसूर्यव्यासस्तैर्भक्तो व्या
सकलाः भवंति॰ तत्र सूर्यलोकेंद्रांतराचंद्राकाशस्थदर्शनात्प्रत्यक्षतो विविक्तांतरेण दर्शनाभावाच्च चंद्रकक्षाप्रमाणेन सूर्यबिंबव्या
सः सूर्यकक्षया चंद्रकक्षयार्केंद्वनुपातेन गणितार्थमवस्तुभूतः साधितः॥ न तु वस्तुतश्चंद्रकक्षायां सूर्यमंडलावस्थानं॰ सूर्य
ग्रहणे चंद्रस्य छादकत्वानुक्तिप्रसंगात्॥ अथ सूर्यस्पष्टव्यासश्चंद्रभगणभक्तः खकक्षारूप चंद्रकक्षया गुणितः सूर्यभगणभक्तो ख ३३
कक्षारूपसूर्यकक्षया भक्त इति खकक्षारूपगुणहरयोर्नाशात्सूर्यभगणगुणितश्चंद्रभगणभक्त इति पूर्वकक्षयोरनुक्तेरयं प्रकारो मु
ख्यत्वात्प्रथममुक्तः। ततश्चंद्रकक्षास्थितसूर्यबिंबव्यासः। पंचदशभक्तः सूर्यबिंबव्यासकलाः सिद्धा इत्युपपन्नमुक्तं॥ ३॥ अथोपयु
क्तो भूछाया श्लोकाभ्यां साधयति॥ स्फुटेंदुभुक्तिर्भूव्यासगुणिता मध्ययोद्धृता॥ लब्धं सूचीमहीव्यासस्फुटार्कश्रवणांतरं॥ ४॥ मध्येंदु
व्यासगुणितं मध्यार्कव्यासभाजितं॥ विशोध्य लब्धं सूच्यां तु तमोलिप्तास्तु पूर्ववदिति॰ स्पष्टा चंद्रस्य गतिः भूव्यासेन गुणिता॥ मध्य
या चंद्रस्य गत्या भक्ता॰ फलं सूचीसंज्ञं स्यात्। भूव्यासस्पष्टसूर्यबिंबव्यासयोरंतरं॥ मध्येन चंद्रबिंबव्यासेन गुणितं चतुःशत

265/1918

योजनेन गुणितं॥ मध्येन सूर्यबिंबव्यासेन पंचषष्टिशत योजनेन भक्तं॥ फलं सूच्यां प्राकृसिद्धायां॰ न्यूनीकृत्य॰ तु कारोऽत्रैवं॰ तमः॥
भूछायारूपं योजनात्मकं॥ भाभावस्तम इति छायायास्तमस्त्वात्॥ अस्य कलात्मकं मानमाह लिप्ता इति॥ तत्तस्य पूर्वसंबद्धानुक्तेरुत्तर
त्रसंबंधकारेण स्कंबोधः॥ अतएव पूर्ववाक्यसमाप्तिस्तु तमः पदमत्रान्वेति पूर्ववत्॥ तिथ्याप्ता मानलिप्तिका इति पूर्वोक्तेन भूछायायाः
कलाः कार्याः॥ अत्रोपपत्तिः॥ भूव्यासहीनं रविबिंबमिंदुकर्णाहतं भास्करकर्णभक्तं॥ भूविस्तृतिर्लब्धफलेन हीना भवेत्कुभाविस्तृतिरिंदु
मार्गे इति सिद्धांतशिरोमणौ स्पष्टप्रकार उक्तोऽस्योपपत्तिसरीकायां व्यक्ता॰ तत्र भूव्यासोनस्य रविबिंबस्य ४९०० स्वल्पांतरांगीकार
ण स्पष्टगतिभक्त मध्यगतिगुणितचंद्रमध्ययोजनकर्णरूपस्पष्टेंदुयोजनकर्णो गुणः तादृशस्सूर्यकर्णो हरस्तत्रैततत्वेंदुस्य कलाकर
णार्थं त्रिज्यागुणः॥ चंद्रकर्णस्तारकोहर इति चंद्रस्य स्पष्टमध्यगत्योस्तुल्यगुणहरत्वेन नाशात्त्रिज्यामध्येंदुयोजनकर्णयोस्त्रिज्यापवर्त
नेन हरः पंचदशरूप उक्तो ग्रंथे॰ अवशिष्टो भूव्यासहीनमध्यार्कबिंबयोजनानां रविस्पष्टगतिमध्यमगतिगुणाहरौ चंद्रसूर्ययोर्मध्य
योजनकर्णावपि क्रमेण गुणहरौ॰ तत्र कर्णस्थाने लाघवात्तयोर्बिंबयोजनानि गृहीतानि॰ यद्यपि सूर्यचंद्रयोर्मध्ययोजनकर्णानुसारि
त्वाभावाद्बिंबयोजनग्रहणमनुचितं॥ तथास्वल्पांतरांगीकारेण तद्दोषः॥ इंदुव्यासार्कव्यासयोर्भूगोलव्यासयोस्तत्कक्षाभूकर्णगुणितामही
मंडलभाजिताः तत्कर्ण इति तत्कक्षाव्यासाभावेतु स्फुटतरं॥ तत्रापि स्पष्टार्कबिंबयोजनग्रहणे मध्यार्कयोजनबिंबं सूर्यस्पष्टगतिगुणि
तं॥ सूर्यमध्यगतिभक्तमिति सिद्धं॥ न चोक्तरीत्या सूर्यस्पष्टमध्यगतिगुणहरौ भूव्यासमध्यार्कबिंबयोजनांतरस्यासन्नोनकेवलं
बिंबस्येति भूव्यासस्तारतोमहाव्यासरत्पनेन कथं सिद्धमिति वाच्यं। भगवता स्वल्पांतरेण महीव्यासस्य यथास्थितस्यैवांगीकारात्॥ म
हीव्यासस्फुटार्कश्रवणांतरमिति सूक्त्यामप्यस्फुटपदस्योभयत्रान्वयेनार्कश्रवणसन्निधानेन च सूर्यबिंबस्फुटरीत्यैव महीव्यासस्य
स्फुटत्वसिद्धेश्च॰ अथैतत्खंडस्थितं फलं भूव्यासाद्धीनं भूभायोजनानि॥ तत्र कलाकरणार्थं भूव्यासस्यापरखंडस्य त्रिज्यागुणः। स्प
ष्टचंद्रगतिभक्तं मध्यगतिगुणितं चंद्रमध्ययोजनकर्णरूपस्पष्टयोजनकर्णो हरस्तत्र त्रिज्यामध्ययोजनकर्णौ गुणहरौ गुणेनापवर्त्य ह
रस्थाने पंचदश॰ चंद्रस्पष्टमध्यगती गुणहराविति सूच्युक्तोपपन्नाः भूभायाः सूच्यनुकारत्वात्। प्रथमखंडेऽपि तथैव खंडहीनं भूभायोजनानि
कामा पंचदशभक्ता कलादिकेत्युक्तमुपपन्नं॥ यदि तु भूव्यासहीनं रविबिंबमित्यादिना मध्याबिंबानुक्तेः॥ प्रथममेव स्पष्टार्कबिंबग्रहणं
तदा महीव्यासस्य स्पष्टत्वाप्रसिध्या महीव्यासस्फुटार्कश्रवणांतरमित्येव यथाश्रुतं सम्यक्॰ परंतु तदा भूव्यासोनार्कबिंबस्य सूर्यमध्य
स्पष्टगतिहरगुणाववशिष्टौ वाच्याववि भगवता स्वल्पांतरत्वादनुक्तौ॥ न चानुपाते सूर्यचंद्रयोर्मध्ययोजनकर्णावेव गृहीतौ न स्फुटावि

त्रिमध्यस्फुटगतौ हरगुणावनुपात्तौ नोक्ताविति वाच्यं॥ चंद्रस्य स्पष्टयोजनकर्णस्वरूपग्रहणेनोक्तत्वसत्त्वादनुक्तत्वापत्तेः॥ न च चंद्रकर्ण
स्य मध्यत्वेन ग्रहीते बहंतरमतः स्पष्टत्वेन तस्य ग्रहे स्वल्पत्वमुपपन्नमतः॥ सूर्यकर्णस्य मध्यत्वेन ग्रहीतेऽल्पान्तरमिति वाच्यं॥ मध्यार्कबिंबयो
जनेग्रहणे न स्फुटार्कश्रवणानुपपत्तेः॥ न चोभयथाग्रहीते प्रत्येकमल्पान्तरमपि बहंतरमत एकत्र सूर्यगतिग्रहणमुचितमिति वाच्यं॥ विनि
गमनाविरहात्॥ पूर्वं सूर्यबिंबस्यैवांतरं यस्य एम मध्यगतिगुणहरौ न महीव्यासस्य प्रांत्येन भयोरिति स्फुटसूक्ष्मविनिगमके तु प्रांत्ये सूर्यगति
ग्रहणस्यौचित्यात्॥ अथ महीव्यासस्य प्रथमखंडस्य चंद्रगतिग्रहणेन सूच्युक्तावेव द्वितीयखंडस्य भूव्यासोन स्फुटरविबिंबस्यार्थात्सू
र्यगतिग्रहणं सूचितमिति॥ नष्टतिरिति चेन्न आख्याप्रसंगे सूर्यगतिग्रहणे मानाभावात्॥ उपपत्तेरप्रसंगाच्च॥ अन्यथात्रापि चंद्रगति
ग्रहणापत्तेरिति॥ एतेन चंद्रमध्यगत्या भूव्यासस्तदा चंद्रस्य एगत्याकृ इति भूव्यासरूपं खंडं स्पष्टं सूचितं सूर्यबिंबप्रमाणेनापरं भूव्या
सोन स्फुटरविबिंबखंडं तदा चंद्रबिंबप्रमाणेन किमिति स्पष्टं द्वितीयखंडं तयोः स्पष्टयोरंतरस्य सूचीति सर्वमुपपन्नमिति निरस्तं॥ उक्ता
नुपाताभ्यां तयोः स्पष्टत्वसिद्धौ मानाभावात्॥ स्पष्टत्वस्याप्रसंगाच्च चंद्रसूर्ययोर्मध्यबिंबानुपपत्तेश्च॥ यत्तु भूव्यासस्य स्पष्टत्वं स्वसिद्धरूपमनु
पपद्यमानं हृदि ज्ञानता भूव्यास एव प्रथमखंडं भूव्यासोन स्पष्टरविबिंबस्य मध्यकर्णानुपाताभ्यामल्पांतरेण प्रवर्तनात् मध्यबिंबे गुणहरा
स्या यदि हितीपूर्वखंडमुभयोरंगुलीकरणं चंद्रमध्यकर्णेन त्रिज्यामिताः कलास्तदाभ्यां कास्त्यनुपाते प्रमाणफलापवर्तनेन प्रमाणस्थानापन्न
पंचदशहरेणेति तयोरंतरं भूस्फुटे ज्ञानराजदैवज्ञैः सिद्धांतसुंदरे॥ इनावनीव्यासवियोगनिघ्नशशांकबिंबं भक्तं॰ फलोन भूव्याससमा
कुभासौ शरेंदुभक्ताकलीकालादिकास्यादिति ग्रंथेन॰ अत्र सूर्यव्यासः॥ स्फुटार्कबिंबयोजनात्मकः॥ न मध्ययोजनात्मकः॥ चंद्रार्कबिंबे
गुणहरौ मध्ययोजनात्मकौ न स्फुटबिंबयोजनात्मकौ टीकाकृताचिंतामण्यभिमतौ॰ उपजीव्यसूर्यसिद्धांतविरोधात्॥ तदुक्ततदुपपत्या
पितदसिद्धेश्च॰ अत्र यादपितृभ्यां कारुचिंतामणपुक्तं॥ मध्यमस्य भूभाबिंबस्यानयनं फलाविशेषेण मध्यकर्णावेव गुणहरौ प्रकल्प्योक्त
विधिनासिद्धस्य मध्यमबिंबस्याथ दिममध्यगत्यंतरेणेदं स्फुटगत्यंतरेण किमित्यनुपातेन स्फुटत्वं मूलकृदनुक्तमपि कार्यमिति तगस्येत
रवत्तेन भूभायोऽनुसस्यानसमंजसं॥ अन्यथागतिवशेन साधितार्कचंद्रबिंबवच्चंद्रगत्यंतरकलाभ्यो विकृताभ्य एव भूभायाः साधनाप
त्तेरिति॥ तदसत्॥ स्फुटेंदुभुक्तिभूव्यासगुणिता मध्ययोश्रुतेति सूर्यसिद्धांतोक्तयुक्तिसिद्धस्त्वानुक्त्या भूव्यासस्यैवाविकृतस्य ग्रह
णादेतत्स्वपरदोषगवेषणापलुविलेन॥५॥ अथ ग्रहणद्वयसंभूतिमाह भानोर्भार्धे महीछाया तत्तुल्येऽर्के समेऽपि वा॥ शशांकपा
नियतं किं यद्भागाधिकोनके इति॥ समेतान्त काशात्॥ षड्भांतरे भूछाया सूर्यात्परदिक्स्थात्॥ तत्तुल्ये॰ सषड्भार्करूपछायापक्षे वारि

नासमे चंद्रपाते॰ अपि वा॰ अथवा॰ सूर्यतुल्ये चंद्रपाते॰ सूर्यचंद्रयोः प्रत्येकं ग्रहणं॰ ननु समत्वाभावेऽपि ग्रहणमित्यत आह किंयद्भागे स्यादि॰
सषड्भार्का हा कतिपयैर्भागैरधिके॰ ऊनेऽपि चंद्रपाते ग्रहणं॥ तथा च नसत्तिः भागाश्च चंद्रग्रहणे द्वादशनिश्च पार्थं सूर्यग्रहणे तु नतांशाप
उंशास्तस्मात्सत्समस्त्यापातनतः॥ अत्रोपपत्तिः॥ सषड्भार्के केवलाकान्यत्र तुल्यचंद्रपाते शराभावः॥ चंद्रस्य तत्तुल्यत्वात्॥ तेन चंद्रो भूछा
यायां भवतीति ग्रहणमेवं शरसत्वेऽपि मानैक्यखंडादल्पे भूछायामंडलैकदेशस्यसत्वेन ग्रहणं॰ एवं शराभावे मानैक्यखंडाल्पूनशरे च चंद्रमं
डलं सूर्यमंडलस्याछादकं भवति॥ परंतु तत्र रावेति तिसंस्कृतः॥ अतः सम्यगुक्तमुपपन्नं॥ ६॥ ननु तत्कुत्र भवतीत्यतस्तयोर्ग्रहणयोः का
लमाह तुल्यौ राश्यादिभिः स्यातां॥ मावास्यांतकालिकौ॥ सूर्येंदु पौर्णिमास्यंते भार्धे भागादिकौ समाविति॥ आमावास्यांत काले तुल्यौ सूर्य
चंद्रौ राश्याद्यवयवैः समौ भवतः॥ पौर्णिमास्यंते॥ भागादिकौ तुल्यौ सूर्यचंद्रौ षड्भांतरे स्यातां॰ तथा चामांते सूर्यचंद्रयोरेकत्रावधीधरांतरेन
सत्वात्सूर्यग्रहणं॰ पौर्णमास्यंते चंद्रभूभयोरेकत्रावस्थानाच्चंद्रग्रहणं॰ एतेन पूर्वश्लोके शशांकपातेऽस्यत्र चंद्रचंद्रपातौ ग्रहौ नत्राघाविति
सूचितं॥ एतच्छ्लोकस्य वैयर्थ्यापत्तेः॥ अत्रोपपत्तिः॥ अमांते सूर्यचंद्रयोः पूर्वापरांतराभावेन योगात्तुल्यौ सूर्यचंद्रौ॰ पौर्णमांते भचक्रार्धां
तरत्वात्षड्भांतरे भागादिसमाविति॥ ७॥ अथ पर्वांते सूर्यचंद्रचंद्रपातानां साधनमाह॥ गतैष्यपर्वनाडीनां स्वफलेनोनसंयुतौ समलि
प्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथेति॥ तौ सूर्यचंद्रौ॰ गतैष्यपर्वनाडीनां॥ यत्कालिकौ सूर्यचंद्रौ तात्कालात्कृताए व्यावादर्शांत पौर्णिमांतान्य
तर घटिकास्तासां स्वफलेन॰ स्वगतिसंबंधेन यत्फलं षष्टिनाडीगुणाभुक्तिः॰ एष्याभक्ताकलादिकमिति॥ मध्याधिकारोक्तेनानीतं तेन॰ ग
तैष्यक्रमेणोनयुतौ तत्र समकलौ स्तः॥ य घापि समौ भवाविति वक्तुं युक्तं॥ तथाप्यन्यतिथ्यंती यत्साधितौ समकलाविति॥ द्योतनार्थं समक
लाविन्युक्तं॰ पातः स्वगत्युत्पन्नफलेन॰ अन्यथागतैष्यक्रमेण युतोनः॥ तात्कालिकः पूर्वोक्तेकालिकः स्यात्॥ अत्रोपपत्तिश्च्यालंनश्लोकंभ॥
तत्रतिथ्यंते भागांतरत्वेन कलादिसाम्यः पातस्य चक्रशोधितत्वेनेतरग्रहवैपरीत्यं॥ ८॥ अथ प्रागुक्तानां बिंबानां प्रयोजनमाह छादको भा
स्करस्येंदुरधःस्थो घनवद्भवेत्॥ भूछायां प्राङ्मुखश्चंद्रो विशत्यस्य भवेदसाविति॰ सूर्यमंडलस्याछादकश्चंद्रः स्यात्॥ नन्वाकाशे द्वयोः
सत्वेन सूर्य एव चंद्रस्य छादकः कथं न स्यादित्यत आह॥ अधःस्थ इति॥ वक्ष्यमाणकक्षाध्याये सूर्यकक्षातोऽधः कक्षास्थत्वाच्चंद्रस्यैवाछादक
त्वेन पूर्धस्थः छादको येन सूर्यचंद्रस्य छादकः॥ ननु विनैकत्रावस्थानं न भवत्यत आह घनवदिति॰ यथाधःस्थो मेघः सूर्यस्याछादको भवति
तथा चंद्रो भवतीत्यर्थः॥ प्राङ्मुखः॥ पूर्वाभिमुखो गच्छंश्चंद्रो भूछायां प्रति प्रविशति॥ अंतः कारणादस्य चंद्रस्य॰ असौ भूभा॰ आछादिका भवेत्॥

263
1918

स० टी०
३५

तथा च सूर्यग्रहणे सूर्यचंद्रबिंबयोः प्रयोजनं ॥ चंद्रग्रहणे चंद्रभूभाबिंबयोः प्रयोजनमिति भावः । अत्रोपपत्तिः ॥ चंद्रो दर्शांते सूर्याद् अधो भवतीति चंद्रः सू
र्यस्याछादकः ॥ भूभा भूच्छाया सा तमंडलात्मना आछादकत्वं । चंद्रस्याधो ग्रहाभावोऽस्तु उपरितनभूम्याप्रतिबद्धाः सूर्यकिरणाः भूगोलेन पतंति । अतोऽतिःप्र
मध्यं चंद्रस्य भूभा ग्रासे वा इति चंद्रस्य भूभाछादिका ॥ ९ ॥ अथ ग्रासानयनमाह तात्कालिके इति विक्षेप छाद्य छादकमानयोः ॥ योगार्धात् ग्राह्यत्
शेताव छन्नं तद् भवेदिति । यः छाद्यते स छाद्यः सूर्यग्रहणे सूर्यः ॥ चंद्रग्रहणे चंद्रः । यः छादयति स छादकः ॥ सूर्यचंद्रग्रहणयोः क्रमेण चंद्रभूभे ।
तयोः पूर्वानीतमानककलयोः । एकत्र स्थाप्य योग ॥ तात्कालिकचंद्रशर पूर्वोक्तप्रकारेण साधितं विक्षेपकलादिकं विशोध्य यद् अवशिष्टं ततं । तत्प्रमाणं छ
न्नं । छादकेन छाद्यस्य याबान् मंडलप्रदेश आछादितः स्यात् स प्रदेशात्मकं ग्रासरूपं ग्रहणं तत्त्वज्ञैः कथ्यते ॥ अत्रोपपत्तिः ॥ छाद्यछादकमंडलनेमि
योगे ग्रहणारंभरूपे मंडलकेंद्रयोरंतरं तद्बिंबखंडयोगरूपं ॥ बिंबस्य अर्धं समानां अर्धत्वात् ॥ ततः समताया पबार्धयोगार्धरूपं यतं ॥ ततो यथा
प्रवेशस्तथा ग्रासो भवतीति पर्वांते छाद्यछादकयोर्बिंबांतर्मितत्वात् इष्टे विक्षेपे मंडलयोगस्तदंतरमिति स एव ग्रासः ॥१०॥ अथ संपूर्णन्यूनग्र
हणज्ञाने ग्रहणाभावज्ञानं चाह यद् इष्टं यत् अधिके तस्मिन् सकलं न्यूनमन्यथा ॥ योगार्धादधिके न स्याद्विक्षेपे ग्राससंभव इति तस्मिन् । छन्नमाने ।
अधिके । ग्रास्यमानाधिके । पद्यस्य कारणात् । ग्रास्यमानमस्ति । अंतःकरणात् । सकलं । संपूर्णं ग्रहणं भवति ॥ अन्यथा । ग्रास्यमानान्न्यूने ग्रासे ।
न्यूनं ग्रास्यमानांतर्गतं ग्रहणं स्यात् । मानैक्यखंडात् । विक्षेपे । अधिके सति । ग्रासासंभवः ॥ ग्रहणं न स्यात् । अत्रोपपत्तिः ॥ ग्रास्यमानाधिके ग्रासे
संपूर्णग्रहणेऽन्यूनेन्यूनं ॥ मानैक्यखंडादधिके विक्षेपे मंडलस्पर्शासंभवात् ग्रहणाभावः ॥ ११ ॥ अथ स्थित्यर्धविमर्दार्धे श्लोकाभ्यामाह ग्राह्य
ग्राहकसंयोगवियोगौ दलितौ पृथक् । विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यां मुनेपदे ॥१२॥ पदत्र संगुण्य सूर्ये हीर्भुक्त्यंतरविभाजिते । स्यातां स्थितिवि
मर्दार्धनाडिकादिफले तयोरिति ॥ ग्राह्यग्राहकमानयोर्योगांतरे अर्धिते ॥ पृथक् । स्थानांतरे स्थाप्ये । अनिमज्जि यायां कदाचित् भुद्दल संभवे पु ३५
नः भिन्नार्थमेतयोरेव स्थापनत्वात् ॥ तद्वर्गाभ्यां । योगार्धांतरार्धयोर्वर्गाभ्यां । विक्षेपवर्गेण वर्जिताभ्यां । उभे । द्वे । मूले । षष्ट्या गुणयित्वा । सूर्यचं
द्रयोर्गत्यंतरकलाभिर्भक्ते । तयोः योगवियोगयोः स्थानिः घटिकादिफले । क्रमेण स्थित्यर्ध विमर्दार्ध भवतः ॥ अत्रोपपत्तिः ॥ ग्रहणाद्ग्रहणांतर्यते ।
मन्नबिंबनेमिस्पर्शकालेमानैक्यखंडं कर्णः स्पर्शमोक्षकालिकशरो भुजः ॥ स्पर्शमोक्षाभ्यंतरकालिकशराग्रमध्यकालिकशराग्रयोरंतरं स्पर्श
परं कोटिरिति ॥ तत्खंडसाधकं से च । एवं संपूर्णग्रहणे संमीलनोन्मीलनकालयोरंतरकालो मर्दस्तन्मध्यग्रहणात् संमीलनोन्मीलनकाला
वधि खंडेन साधकं छाद्यछादक मंडलकेंद्रयोरंतरं मानांतरार्धं परं तुल्यं कर्णः ॥ तात्कालिकशरो भुजः शराग्रयोरंतरं विक्षेपवत्सेपूर्वापरं कोटि
रिति क्षेत्रं ॥ संमीलनं छाद्यमंडलस्याछादनसमाप्तिः ॥ उन्मीलनं तु छादकमंडलाद् आछादितसंपूर्णछाद्यमंडलस्य निःसरणारंभः तत्र स्पर्शमोक्षसं

269
1918

मीलनोन्मीलनेले कालान्नामज्ञानान्मध्यकालिकविक्षेपग्रहणं । भुजकर्णवर्गांतरपदं कोटिरिति पूर्वश्लोकोक्तमुपपन्नं । छाद्यछादकमंडल
केंद्रयोः पूर्वापरांतराभावे मध्यग्रहसंभवाच्छाद्यछादकयुतिर्गत्यंतरकलाभिः षष्टिघटिकास्तदानीतकोटिकलाभिः काइत्यनुपातेन स्थितिम
र्दखंडे । तत्र चंद्रग्रहणे भागतेः सूर्यगत्यनुरोधात् सूर्यगत्यमित्युपपन्नं द्वितीयश्लोकोक्तं ॥१३॥ अथ स्थित्यर्धविमर्दार्धे असकृत्साध्ये इति
श्लोकाभ्यामाह स्थित्यर्धनाडिकाभ्यामाहस्थित्यर्धनाडिकाभ्यस्तागतयः षष्टिभाजिताः । लिप्तादि प्रग्रहे शोध्यं मोक्षे देयं पुनः पुनः ॥१४॥ न हि क्षे
पः स्थितिदलं विमर्दार्धं तथा सकृत् । संसाध्यमन्यथा पाते लिप्तादिफलं स्वकर्मिति ॥ सूर्यचंद्रपातानां गतयः स्थित्यर्धगतीभिर्गुणिताः ष
ष्ट्या भक्ताः । फलं कलादि । प्रग्रहे । स्पर्शस्थित्यर्धनिमित्तं सूर्यचंद्रयोर्हीनं ॥ मोक्षे । मोक्षस्थित्यर्धनिमित्तं ॥ सूर्यचंद्रयोर्देयं । योज्यं । चंद्रपाते ।
तल्लिप्तादिफलं । स्थित्यर्धपद्यानीतं कलादि पूर्वफलं । स्वर्णं । स्वगत्युपपन्नं । अन्यथा विपरीतं । प्रग्रहस्थित्यर्धनिमित्तं योज्यं । मोक्षस्थि
त्यर्धनिमित्तं हीनमित्यर्थः संसाध्य । कृत्वा । तद्विक्षेपः तात्कालिकचंद्रपाताभ्यामानीतशराग्रकलाभिः ॥ कलानां बहुत्वाद्विक्षेपैरिति बहुवचनं ।
विक्षेपाभ्यामित्यर्थः ॥ पुनः पुनः स्थितिदलं कार्यं । अयमेकं पुनः पदं स्पर्शस्थित्यर्धसंबद्धं । द्वितीयं मोक्षस्थित्यर्धं पुनः पदं । तेन स्पर्शस्थित्य
र्धसाधितचंद्रपाताभ्यामानीतशरेण प्रागुक्तप्रकारेण स्पर्शस्थित्यर्धं साध्यं । मोक्षस्थित्यर्धसाधितचंद्रपाताभ्यामानीतशरेण पूर्वोक्तरीत्या
मोक्षस्थित्यर्धं साध्यमित्यर्थः ॥ तत्रोभयमसकृत् वारं वारं । स्पर्शस्थित्यर्धानीतचालनेन मध्यकालिकौ चंद्रपातौ चुक्तरीत्या प्रचाल्य तच्छ
रेण पूर्वोक्तरीत्या स्पर्शस्थित्यर्धमेवं यावदविशेषः ॥ एवं मोक्षस्थित्यर्धानीतचालनेन मध्यकौ चंद्रपातौ उक्तरीत्या प्रचाल्य तच्छरेण पूर्वोक्त
रीत्या मोक्षस्थित्यर्धमस्मादप्युक्तरीत्या मोक्षस्थित्यर्धमेवं यावदविशेषः इत्यर्थः ॥ ननु स्थित्यर्धविमर्दार्धयोरुक्तरीत्यैः कथं विमर्दार्धमसकृत्सा
ध्यमिति तन्न । मित्यत आह विमर्दार्धमिति । तथा । स्पर्शमोक्षस्थित्यर्धसाधनरीत्या असकृत्पावधे विशेषस्तावत् स्पर्शमर्दार्धमोक्षमर्दा
र्धं च साध्यं । यथा हि । स्थित्यर्धनाडिकाभ्यां स्पष्टविमर्दार्धनाडिकाग्रहात् । स्पर्शमर्दार्धमोक्षमर्दार्धं साध्ये आभ्यां प्रत्येकमसकृत् स्पर्शम
र्दार्धमोक्षमर्दार्धं स्फुटे स्तः ॥ अत्रोपपत्तिः ॥ प्रागुक्तरीत्या स्पर्शमोक्षसंमीलनोन्मीलनकालिकशरबशादितितद्ज्ञानान्मध्यकालिकशरग्र
हणे न स्फुटं स्थित्यर्धमर्दार्धं चातो मध्यकालानंतरेण पूर्वाग्रिमकालयोस्तेषां संभवात् तत्कालचालितचंद्रपाताभ्यां विक्षेपस्तात्कालिको भ
वति । परं स्फुटः । स्फुटस्थित्यर्धाद्यानीतत्वात् । अतोऽस्मादानीतस्थित्यर्धादि पूर्वापेक्षया सूक्ष्ममपि स्थूलमित्यसकृत्सूक्ष्ममिति । तत्र
संमीलनोन्मीलनकालयोराकाशस्पर्शमोक्षसंभवात् स्पर्शमोक्षमर्दार्धमिति ध्येयं ॥१५॥ अथ मध्यग्रहणस्पर्शमोक्षकालानाह स्फुटति
थ्यवसाने तु मध्यग्रहणमादिशेत् स्थित्यर्धनाडीकाहीने ग्रासो मोक्षस्तु संयुते इति ॥ स्फुटतिथ्यंतकाले तु काराख्ये तत्पूर्वापरकालनिरासः ।

सू॰टी॰
३८

मध्यग्रहणं। ग्रासोपचयसमाप्तिः कथयेत्। मोक्षस्थित्यर्द्धसाध्यमित्यर्थः॥ तत्रोभयमसकृत्प्रकारं॰ स्पर्शस्थित्यर्द्धोनीतचालनेन मध्यकालि
कौ चंद्रपातावुत्क्रीत्याप्रचाल्य तत्क्रमेण पूर्वोत्क्रीत्या स्पर्शस्थित्यर्धमस्मात्प्रकुर्यात्स्पर्शस्थितर्द्धमेवं यावदविशेषः॥ एवं मोक्षस्थित्यर्द्धोनी
तचालनेन मध्यकालिकौ चंद्रपातावुत्क्रीत्याप्रचाल्य तत्क्रमेण पूर्वोत्क्रीत्या मोक्षस्थित्य॰॥ मध्यग्रहणसंबंधेन मध्यस्पर्शचंद्रानीतमध्य
तिथ्यंतेन तत्संभव इति कश्चिद्भ्रमस्तद्दूरणार्थं स्फुटेति॰ स्थित्यर्धघटिकाभिरूनेतिथ्यंतकाले ग्रासः॥ स्पर्शसंयुते॰ स्थित्यर्धघटीभिर्युते ति
थ्यंतकाले मोक्षः॥ तुकारः स्पर्शमोक्षस्थित्यर्द्धाभ्यां स्पर्शमोक्षकालाविति विपर्यासव्यवस्थार्थकः॥ अत्रोपपत्तिः॥ तिथ्यंतकाले छाद्यछाद
कयोः पूर्वापरांतराभावा योगे मंडलस्पर्शो वा वा भवतीति तत्पूर्वापरिमकालयोर्मध्ये नएवातोऽत्र मध्यग्रहणकालः। केचित्तु॰ पर्वांतः क्लिष्टसाधितो
भवलये स्पर्धंदुनि त्रांतराले अस्मिन्विंबसमागमो न हि यन स्वंद्रः ग्राग्रे स्थितः। तस्मादायनदृक्संस्कृतविशेषरात्री तत्तिथ्यंत के विंवैक्यं भव
तीति किं न विहितं पूर्वैर्न विघ्नो वयमित्यनेनात्र मध्यग्रहणमंवदंति॰ तन्न॰ पूर्वापरांतराभावे योगस्तत्वेन कदंबसूत्रेद्वयो याम्योत्तरांतरस्यैव
सत्वेन यत्र मध्यग्रहणस्योचितत्वात्। अन्यथा भुवमत्रे समसूत्रे वा योगाभ्युपगमेति निगमनाविरहापत्तेः॥ यथागतग्रहयोः कदंबसूत्रेणैव यो
गाभ्युपगमात्। दृक्प्रयपार्थं दृक्कर्मोक्तः॥ ग्रहणद्वयस्य स्वतएव दृग्गोचरत्वात्॥ ग्रहद्वयादर्शनाच्चेत्यादिसंक्षेपः। मध्यग्रहणकालात्पूर्वं स्पर्शस्थि
त्यर्धघटीभिः स्पर्शः॥ अग्रिमकाले मोक्षस्थित्यर्द्धघटिभिर्मोक्षः॥ स्थित्यंतयोस्तंतररूपत्वेन सिद्धेः॥१६॥ ॥अथ संपूर्णग्रहणे निमी
लनोन्मीलनकालावाह॥ तद्दे वविमर्दार्धनाडिकाहीनसंयुते॥ निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे इति। संपूर्णग्रहणे॰ तद्वत्॥ यथा
स्थित्यर्धेनाधिकेतिथ्यंते स्पर्शमोक्षौ तथेत्यर्थः॥ एवकारात्तदिश्वरितिव्युदासः। स्पर्शाविमर्दार्धमोक्षविमर्दार्धघटीभ्यां क्रमेणोनयुते
तिथ्यंते क्रमेण निमीलनोन्मीलनसंज्ञे स्यातां॥ अत्रोपपत्तिः॥ मर्दार्धस्य मध्यकालात्तदंतररूपत्वेन तद्वाधिके तस्मिन्क्रमेण निमीलनोन्
मीलने संपूर्णग्रहणएव भवतः॥ खंडग्रहणे तत्स्वरूपव्याघातात्तदभावः॥१७॥ अथेष्टकाले इष्टग्रासज्ञानार्थं कोटिकलानयनमाह॥
इष्टनाडीविहीनेन स्थित्यर्धेनार्कचंद्रयोः। भुक्त्यंतरं समाहन्यात्षष्ट्याप्ताः कोटिलिप्तिका इति॰। सूर्यचंद्रयोर्गत्यंतरं॰ कलात्मकं ग्रहणारंभा
द्या इष्टघटिकाः स्पर्शस्थित्यर्धप्रध्यनधिकास्ताभिरूनेन स्पर्शस्थित्यर्धेन गुणयेत्। अस्मात्षष्टिविभक्ताः कोटिकलाः भवंति॰ अत्रोप
पत्तिः॥ इष्टकाले छाद्यछादकमंडलकेंद्रयोरंतरं कर्णः तत्कालशराभुजः तत्कालशराग्रमध्यकालिकशराग्रयोरंतरं विक्षेपवृत्ते
कोटिरिति स्पर्शेष्टघटीन्यूनस्पर्शस्थित्यर्द्धघटिकानां कलाः कोटिः सिद्धा॰ पूर्वस्पर्शकालिकोद्याः स्थित्यर्द्धघटिकानां सिद्धत्वात्॥१८
अथात्र सूर्यग्रहणे विशेषमाह॥ भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्द्धसंगुणाः॥ स्फुटस्थित्यर्धसंभक्ताः स्फुटाः कोटिकलाः स्मृता इति॰

३९

2/71
1918

सूर्यस्य ग्रहणे पूर्वोक्तप्रकारेण याः कोटिकलाः। सूर्यग्रहणोक्तस्पष्टस्थित्यर्धानीताः। मध्यस्थित्यर्धेन॰ सूर्यग्रहणोक्तस्पष्टशरानीतस्थित्यर्धे
न संगुणिताः। स्फुटस्थित्यर्धेन सूर्यग्रहणाधिकारोक्तेन भक्ताः संतः स्पष्टाः कोटिकलाः सूर्यग्रहणे तु ईरुक्ताः॥ अत्रोपपत्तिः॥ सूर्यग्रहणे स्प
र्शमोक्षान्यतरमध्यकालयोरंतरस्य स्थित्यर्धत्वात्तस्य च स्पष्टशरोद्भूतस्थित्यर्धलंबनांतरे स्य संस्कारमितत्वात्। स्पष्टस्थित्यर्द्धानुरुद्धानुत्क
रीत्यानीताः कोटिकलाः अपेक्षिताश्च स्पष्टशरोद्भूतमित्यर्द्धानुरुद्धाः॥ एतत्कोटिसंबद्धस्ते च स्पस्थित्यर्धक्षेत्रांतर्गतत्वात्॥ स्पष्टस्थित्यर्धस्य
तत्क्षेत्रोत्पन्नत्वाभावात्॥ अन्यथा स्पष्टशरोद्भूतस्थित्यर्द्धस्य लंबनांतरेण्य संस्कारानुक्तिप्रसंगः अतः स्पष्टस्थित्यर्धेनानीताः कोटि
कलास्तदा स्पष्टशरोद्भूतक्षेत्रजमध्यमरूपस्थित्यर्धेनका इति स्फुटाः कलाः सिद्धाः॥१९॥ अथाभ्यष्टग्रासानयनमाह॥ क्षेपो भुजस्तयोर्वर्गयुते
मूले श्रवस्तु नत। मानयोगार्धतः प्रोह्य ग्रासस्तात्कालिको भवेदिति॥ क्षेपो विक्षेपो भुजः॥ कोटिभुजयोः कर्णसापेक्षता राहतयोरिति॥ क
र्णस्त॰ नयोः॰ कोटिक्षुयोर्वर्गयोगान्मूलं सिद्धएव॰ तत्॰ कर्णात्मकं मूलं॥ ग्राह्यग्राहकमानैक्यार्द्धाद्विशोध्य शेषं तात्कालिकः कल्पितेष्टका
लसंबंधी ग्रासः अर्वाग्यस्या ग्रासः स्यात्। अत्रोपपत्तिः॥ क्षेत्रं पूर्वं प्रतिपादितं॰ स्पर्शकाले मानैक्यखंडस्य कर्णत्वात्तदंतरयोरुभयोर्मध्यकालावधि
त्वादिष्टकर्णोनमानैक्यखंडमिष्टग्रासएव॥२०॥ अथ मध्यग्रहणानंतरमिष्टग्रासानयनमाह॥ मध्यग्रहणतश्चोर्ध्वमिष्टनाडीर्विशोधयेत्
स्थित्यर्द्धान्मौक्षिकाच्छेषं प्राग्वच्छेषं तु मौक्षिकमिति॥ मध्यग्रहणकालात्। ऊर्ध्वमनंतरं॰ चकारो विशेषार्थकलुकारपरः॥ इष्टघटिकाः॥ क्रमं
मौक्षिकात्। मोक्षकालसंबंधात्स्थित्यर्द्धात्॰ न स्पर्शस्थित्यर्धात्। विशोधयेत्। गणक इति कर्ताक्षेपः॥ शेषं कोटिलिप्तादि ग्रासानयनोक्तं
गणितकर्म प्राग्वत्॥ भुक्त्यंतरं समाहन्यादित्युक्तप्रकारेण कुर्यात्। मौक्षिकं॰ मोक्षस्थित्यर्द्धांतर्गतेष्टकाले तु विशेषः। ग्रासाः शेषखंडवर्तितो ग्रा
सावानरो भवति॰ न पूर्ववत्तु तः॥ अत्रोपपत्तिः॥ मध्यग्रहणात्पूर्वमिष्टकालस्य ग्रहणारंभावधिकस्पर्शस्थित्यर्धसंबंधत्वादागतो ग्रासउप
चयात्मकः। नावशिष्टः॥ अवशिष्टमुंडस्य भुक्तत्वेन ग्रस्तत्वासंभवात्। एवं मध्यग्रहणानंतरमिष्टकालस्य मोक्षस्थित्यर्द्धांतर्गतत्वादुत्क
रीत्यानीतो ग्रासोपचयात्मकः। न भुक्तदर्शनात्मको ग्रस्तत्वाभावात्॥२१॥ अथाभीष्टग्रासादिष्टकालानयनमाह श्लोकाभ्यामाह ग्राह्यग्राहक
योगार्धाच्छोध्याः स्वच्छन्नलिप्तिकाः॥ तद्वर्गात्प्रोज्झ्य तत्कालविक्षेपस्य कृतिं पदं॥२२॥ कोटिलिप्ता रवेः स्पष्टस्थित्यर्धेनाहताहताः॥ मध्ये
नस्थित्याभक्तास्ता नाड्यः स्थितिवद्ग्रासनाडिका इति॰ छाद्यछादकमानैक्यखंडात्। अभीष्टग्रासकलाः शोध्याः शेषस्य वर्गात्। अभीष्टग्रास
कालिकविक्षेपस्य वर्गं शोध्य। शेषस्य मूलं कोटिकलाः सूर्यग्रहणे विशेषमाह रवेरिति॰ सूर्यस्य ग्रहणे इति शेषः॥ भानोर्ग्रहे इति पूर्वमुक्तेः
उक्तप्रकारेण याः कलास्ता मध्यग्रहणकालस्पर्शमोक्षान्यतरकालयोरंतररूपेण स्पष्टस्थित्यर्द्धेन गुण्याः॥ स्पष्टशरोत्पन्नेन स्थित्यर्धेन

सू॰ टी॰

४१

मध्यमेनभक्ताः फलं कोटिकला भवंति॥ स्थितिवत्॥ स्थितिमर्दसाधनरीत्या॰ षष्ट्या संगुण्याः सूर्येंदुभुक्त्यंतरभाजिता इत्युक्तेन॥ तासां कोटिक
लानां घटिका या स्ता अभीष्टग्राससंबंधिघटिकाः स्पर्शमोक्षाभ्यंतरस्थितिमर्दांतर्गताः क्रमेण मध्यग्रहणादेवागता वा भवंति। अत्रोपपत्तिः। पूर्वोक्त
सम्यासमागमनतरा॰ परंतु स्वाभीष्टग्रासकालिकशरज्ञानेन सूक्ष्मं तच्छराज्ञानेन मध्यकालिकशरग्रहणे न स्थूलमत एव भास्कराचार्यैः कालसाध
नेन कालबाणेन मुहुः स्फुटरस्त्युक्तमिति विशेषः॥२३॥ ॥अथ वक्ष्यमाणग्रहणपरलेखोपयुक्तं वलनं स्थानयनं श्लोकाभ्यामाह॥ नतज्याक्षज्य
याभ्यस्ता त्रिज्याप्ता तस्य कार्मुकं॥ वलनांशाः सौम्ययाम्याः पूर्वापरकपालयोः॥२४॥ राशित्रययुताद्ग्राह्यात्क्रांत्यंशैर्दिक्समे युताः। भेदेंतरात्ज्यावल
नासप्तत्यंगुलभाजितेति। तत्कालिकं वलनं कर्तुमिष्टं तत्कालिकं नतं चंद्रग्रहणे चंद्रस्य॰ सूर्यग्रहणे सूर्यस्य साध्यंति॥ तद्यथा॰ स्वोदयात्
स्तात्। स्वार्द्धनशेषघटिकाः स्वदिनार्द्धांतर्गताः स्वदिनार्द्धादूनाः क्रमेण पूर्वापरनतघटिकाः भवंति॰ तन्नतं नवतिगुणं स्वदिनार्द्धभक्तं नतांशाः
तेषां ज्या नतज्या सर्वा। स्वदेशाक्षांशज्यया गुणिता त्रिज्यया भक्ता॰ फलस्य धनुः कलात्मकं पश्चिमं पूर्वापरकपालयोः॥ पूर्वापरनतयोः क्रमेणो
त्तरदक्षिणाः वलनांशाः भवंति॰ यत्कालिकं वलनं तत्कालिकाद्ग्राह्यात्। राशित्रययुतात्सायनांशात्पे क्रांत्यंशास्तैरेकदिक्त्वे युताः तेषां ज्या॰ भेदे
भिन्नदिक्त्वे॰ अंतरमन्तरं। क्रांत्यंशवलनांशयोरंतरात्। ज्या॰ सप्तत्यंगुलैर्भक्ता शेषादिस्फुटा॰ अंगुलात्मकं फलं नतरस्योद्दृश्यगुलादिका वलना भव
ति॥ अत्रोपपत्तिः। समवृत्तपूर्वापरादिदिग्भ्यः क्रांतिवृत्तपूर्वापरादिदिशो यावतांतरेण चलिता उत्तरस्यां दक्षिणस्यां वा वलनांशाः तदानयनार्थं
प्रथमतः समवृत्ता गुरुहृदिग्भ्यो विषुवद्वृत्तदिशो यावतांतरेण चलिता दक्षिणोत्तरयोस्तदाक्षवलनं। तथाहि। समप्रोतवृत्ते ग्रहचिह्न
स्थं समविषुवद्दृग्नयार्थमलग्नं तत्प्रदेशानवत्यंशांतरस्य स्वस्वरूपसंप्राच्योरंतरं वलनं तत्तुल्यमेवेतरदिशामंतरं पूर्वकपालस्थग्रहे समवृत्तप्रा
चीतो विषुवद्वृत्तप्राच्या उत्तरत्वादुत्तरं॥ पश्चिमकपालस्थे तु समवृत्तप्राचीतो विषुवद्वृत्तप्राच्या दक्षिणत्वाद्दक्षिणं॥ तत्र क्षितिजस्थे ग्रहे तदंत ३८
रमक्षांशतुल्यं याम्योत्तरवृत्तस्थे ग्रहे तदंतराभावः॥ अतस्त्रिज्यातुल्ययानतकालः॰ ज्ययाक्षज्यातुल्या स्वबलनज्या तदेष्टनतज्यया के स्य
मुपात्॥ गताक्षज्याया धनुराक्षं वलनमुक्तमुपपन्नं॥ द्वितीयं तु विषुवद्वृत्तदिग्भ्यः क्रांतिवृत्तदिशो यावतांतरेण चलिता दक्षिणोत्तरयोस्तदानय
नं वलनं। तथाहि॰ ध्रुवप्रोतवृत्तं ग्रहचिह्नस्थं विषुवद्वृत्ते यत्र संलगति तत्स्थानाच्चतुर्थांशांतरे यत्स्थानं तद्धि विषुवत्प्राची॰ तस्या ग्रहचिह्ना
त्रिभांतरितक्रांतिवृत्तप्राच्या यदंतरेण तदायनं वलनं॥ तत्तुल्यमेवेतरदिशामंतरं॰ उत्तरायणस्थे ग्रहे उत्तरं दक्षिणायनस्थे ग्रहे दक्षिणं॰ त
त्वयनसंधानभावात्मकं॰ गोलसंधौ परमक्रांतितुल्यमतः सत्रिभक्रांतितुल्यं सत्रिभग्रहगोलदिक्कमित्युपपन्नं राशित्रययुताद्ग्राह्यात्क्रांत्यं
शैरिति॥ द्वयोर्वलनयोरेकदिक्त्वे समवृत्तप्राचीतः क्रांतिवृत्तप्राचीत योगरूपं स्फुटवलनांतरेण वलनं द्विभिन्नदिक्त्वे तु वलनां

223
1918

तररूपं स्फुटवलनांतरेण शेषदिशि भवति॰ तज्ज्या स्फुटवलनज्या त्रिज्यावृत्ते॰ अग्रे परिलेखे तत्केन पंचाशदंगुलव्यासार्द्धवृत्ते दानार्थं त्रिज्या
वृत्ते इयं तदा केनपंचाशदंगुलव्यासार्धेके इत्यनुपाते प्रमाणेच्छयोरिच्छापवर्त्तनाद्द्रष्टस्थाने षोडशवत्स्थागात्सप्ततिः अतो दिक्समे युतान्तरात्युप
पन्नं॥२५॥ ॥अथ कलात्मकं बिंबविक्षेपादिनामंगुलीकरणमाह॥ सोन्नतं दिनमध्यार्द्धं दिनार्द्धाप्तं फलेन तु॥ छिद्याद्विक्षेपमानानि तान्येषामंगु
लानि च॥ ति॰ दिनमानं॰ अध्यर्द्धं॰ अर्धं इत्यर्द्धं॰ सार्धं युक्तमित्यर्थः॥ अभीष्टकालिकोन्नत घटीभिः सहितं॰ दिनार्द्धेन भक्तं॰ फलेन॰ तुका
रोवधारणे तस्य दिनमानोन्नतयोगस्य इत्यर्थकः॥ विक्षेपग्रासग्राहकबिंबमानानि॰ तानि॰ पूर्वोक्तानि॰ कलात्मकानि॰ ग्रासादिकमपि ध्येयं॥
भजेत्॥ तुकारस्फलं॥ एवं कलात्मकानां॥ अंगुलानि॰ भवंति॰ अत्रोपपत्तिः॥ उदयास्तकाले बिंबकिरणानां भूमिगोलावरुद्धत्वेनाल्पैर्द्व्य स्थ
किरणानां नयनप्रतिहननाच्च हेतोः बिंबं व्यक्तत्वान्महदाभासते। तत्रांगुलात्मकं बिंबकलात्रयात्मकेनांगुलप्रमाणेन भवति॰ एवं मध्यस्थे ग्रहे तु बिं
बस्य सर्वकिरणावरुद्धत्वान्नयनप्रतिघाताच्च सूक्ष्ममिवाभासते॥ तत्रांगुलात्मकं बिंबकला चतुष्टयात्मकेनांगुलप्रमाणेन भवंति॥ तत्रोदया
स्तकालेंगांकोरभावात्स्वमध्ये तस्य त्रिज्यातुल्यतात्रिज्यातुल्यचांक उदयकालिकैकांगुलमानस्य क। लात्रयस्यैकांगुलमुपचयो लभ्यते त
देष्टांको कस्येत्यनुपाते नाभीष्टकाले फलं युक्तं अयेमेकांगुलस्य कलात्मकमानं भवति॥ अत एव भास्कराचार्यैरुदयास्तकाले सार्द्धद्वयं कला अं
गुलमानमंगी॥ कृत्य स्वाज्यो धृता स्तत्समयो छशंकुः। सार्द्धद्वियुक्तांगुललिप्तिकाः स्युरित्युक्तं॥ तत्र भगवतालोकानुकंपया स्वल्पांतराच्च
मध्याह्नेपि कलाचतुष्टयात्मकमेकांगुलमंगीकृत्य दिनार्धतुल्यपरमोन्नतकाले एव उपचयस्तदेष्टोन्नतकाले क इत्यनुपातागताफलयुक्तं त
यं कलाएकांगुलमानमभीष्टकाले॰ तत्र दिनार्धभक्तोन्नतकालस्य फलरूपत्वात् प्रमाणांसमच्छेदतया योजने त्रिगुणितं दिनार्धसार्धं कगु
णादिनमानरूपमुन्नतकलायुक्तं दिनार्द्धभक्तमिति सिद्धं॥ ततएतत्कलाभिरेकांगुलं तदेष्टकलाभिः किमित्यनुपातेन कलात्मकानाममंगु
लीकरणमुक्तमुपपन्नं॥२६॥ ॥अथाग्रिमग्रंथस्यासंगतित्वनिरासार्थमधिकारसमाप्तिफक्किकया इति चंद्रग्रहणाधिकार इति॰
स्पष्टं॰॥ ॥रंगनाथेरचिते सूर्यसिद्धांतटिप्पणे॥ चंद्रग्रहाधिकारोयं पूर्णो गूढप्रकाशके॥ ९२॥ ॥इतिश्रीसकलगणकसार्वभौमबल्लालदैव
ज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके चंद्रग्रहणाधिकारः संपूर्णः॥ ॥अथ सूर्यग्रहणाधिकारो व्याख्यायते॥ ॥तत्र यत्पदार्थ
विशेषप्रयुक्तश्चंद्रग्रहणाधिकारातिरिक्तः॥ सूर्यग्रहणाधिकारस्तद्विषयो योरभावस्थानादेवोत्पत्तिनियमात्तयोरभावस्थानकथनव्याजेन त
योरुद्वगामाह मध्यलग्नसमे भानौ हरिजस्य न संभवः॥ अक्षोदङ्मध्यमक्रांतिसाम्ये नावनतेरपीति॰ सूर्ये॰ अमावास्यांतकालिके॥ मध्यलग्नसमे
सति॥ दिनमध्यस्थानं ऊर्ध्वयाम्योत्तरवृत्ते लग्नः क्रांतिवृत्तप्रदेशो मध्यलग्नं॰ त्रिप्रश्नाधिकारोक्तं॰ तत्तुल्ये सति॥ मध्याह्ने इति फलितं॰ हरिजस्य॰

स०टी०

३८

लंबनस्याभाव — क्षितिजवशाल्लंबनोत्पत्तेर्लंबनस्यापि क्षितिजवशादहर्गणशब्देनाभिधानात्। संभवउत्पत्तिः। न। नत्र लंबनाभाव इत्यर्थः॥
अथमध्याह्न इति स्फुटार्कदृक्क्षेपयाम्यलग्नसमे इति यत्कोक्तिः कृपालोर्भगवतो नोचितेत्याग्रिमग्रंथार्थतत्त्वविचारणया विमध्याह्ने तदाभावा
नुपपत्तेः॥ सांप्रदायिकव्याख्यानादृत्वतत्त्वार्थो व्याख्यायते॥ लग्नं योरुदयक्षितिजप्रदेशयोः संलग्नक्रांतिवृत्तप्रदेशयोर्मध्यं। ऊर्ध्वमध्यप्रदेशा
त्रिभोनलग्नमित्यर्थः॥ प्रयोगस्तु मध्याह्न इतिवत्॥ ननु त्वेके। लंबनस्याभाव इति। दर्शांतलग्ने प्रथमेविभावनलंबनं त्रिभलग्नतुल्ये। र
वौ च दृग्ज्येऽपि च के च तत्स्यादेवं धनर्णं कवशाच्च विधेयमिति भास्कराचार्येण स्फुटमुक्तेश्च। नत्यभावस्थानमाह असेत्यादि अक्षांशाः उत्तराः। मध्यस्य
मध्यलग्नस्य क्रांत्यंशाः श्च यम्यलग्नस्य दशमभावस्त्रिभोनलग्नं वा याम्यासु भयपक्षेप्युदोषः॥ अनयोक्तं त्वत्ते। अवनतेः नतेः अपिशब्दा
संभवः॥ न। अभाव इत्यर्थः॥ नत्वपिशब्दाल्लंबनस्यापि तत्राभावः। उत्तरक्रांत्यक्षयोस्तुल्यत्वे मध्यलग्नतुल्यार्कत्वाभावेपि तदभावापत्तेः। अत्रोपप
त्तिः। अमावास्यांतकाले समौ सूर्यचंद्रौ। तत्र चंद्रस्य राभावे गर्भीयमाने। भूगर्भकेंद्रस्थानावधि चंद्रस्वस्थाने वेति भूगर्भच्छादकत्वं चंद्रस्य सूर्यस्य छाद्य
त्वं संभवति॥ तत्र मनुष्याणां भूपृष्ठे तेषां सत्ता तत्र भूपृष्ठानीयमानमर्कीयपरिसूर्यचंद्रेन लगत्येव। किंतु चंद्राधिष्ठानगोले चंद्रबिंबाद्ध्र्वलं
गति। तत्र यदा चंद्रभावात्तिरां भूपृष्ठस्थसूर्यस्य चंद्रः छादको भवति। यदा तु स्वमध्ये सूर्यस्तदा भूगर्भस्थभूपृष्ठस्थयोर्नस्य परिणमेकमेव चंद्रे
लगतीति भूपृष्ठेनान्तकाले चंद्रः छादको भवति। अतएव भूगर्भपृष्ठस्थांतरं लंबनं। भूपृष्ठे स्वयोः सूर्यपरिणामं चंद्राधिष्ठानाकाशगोले चंद्रस्य स
र्वत्रे चंद्रबिंबस्यावलंबितत्वात्। अतएव भास्कराचार्यैरुक्तं दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लंबनमिति। अथ चंद्राधिष्ठानगोले भूपृष्ठस्थ
मर्कीयपरिगतं चंद्रबिंबान्त्रिज्याद्ध्र्वं चंद्रदृग्वृत्ते यदंशे लगति तल्लंबनं दृग्वृत्ताकारक्रांतिवृत्ते भवति। यदा तु दृग्वृत्ताद्भिन्नं क्रांतिवृत्तं तदा भूपृष्ठस्थं
चंद्राधिष्ठानगोले चंद्रदृग्वृत्ते चंद्रादध्र्वं यत्रलग्नं तत्र चंद्रगोलस्थक्रांतिवृत्तयाम्योत्तरस्वरूपकदंबप्रोतवृत्तं नमानीय चंद्रगोलस्थक्रांतिवृत्ते यत्रलग्नं त
च्चंद्रबिंबयोरंतरं क्रांतिवृत्ते पूर्वापरं स्फुटलंबनकलाः कोटिः। चंद्रस्य क्रांतिवृत्तानुसारेण गमनात्। प्रोतवृत्ते क्रांतिवृत्तदृग्वृत्तयोरंतरं याम्योत्तरं कर्णा
त्मकं नतिर्भुजः॥ भूगर्भपृष्ठस्थांतरं दृग्वृत्ते केवलं लंबनं दृग्लंबनं कर्णः। दृग्वृत्तस्य कदंबप्रोतवृत्ताकारत्वे क्रांतिवृत्ते तयोरंतराभावाल्लंबनाभावः। या
म्योत्तरमंतरं दृग्लंबनं नतिरेवास्मात्। दृग्वृत्ताकारक्रांतिवृत्ते तु दृग्लंबनमेव क्रांतिवृत्ते तयोरंतरमिति लंबनमुत्पन्नेन तत्र भावश्च॥ तथा च दृग्
वृत्तस्य कदंबप्रोतवृत्ताकारत्वे त्रिभोनलग्नस्थाने वेवो भवति। तद्वृत्तस्य क्रांतिवृत्तयाम्योत्तरत्वेनोदयास्तलग्नमध्यवर्तित्वे नलग्नस्थाना त्रिभोनतरित
त्वात्॥ नहि क्रांतिवृत्ता याम्योत्तरांतर ज्ञानार्थं समप्रोतवृत्तसंगीकार्यं येन दशमभावतुल्यार्के लंबनाभाव उपपन्नः स्यात्। क्रांतिवृत्तस्य गोल
एवत्वेन समप्रोतवृत्तस्य देशावृत्तत्वेन संबंधाभावात्। अतएव भगवता सर्वज्ञेन नतिसाधनार्थमग्रे दृक्क्षेपः कदंबप्रोतवृत्ते त्रिभोनलग्नस्य गम
यस्थ्रेनतदा तस्य दशमभावतुल्यत्वेन दशमभावनतांशाभावाद्दृक्क्षेपाभावः॥ तदा त्रिभोनलग्नस्य नतांशाभावश्च। नतांशाभावस्त्वक्षांशतु

३८

275
1918

ल्योत्तरक्रांतौ। स्फुटार्थं स्पष्टं गीकारे तु दशमभावस्यैव नतांशानां तत्प्रत्येकदृक्क्षेपदृग्गतिर्नतिलंबनयोः साधनार्थं समनंतरमेव भगवतोक्तेः। ननु
वस्तुरूपे। आचार्येण दृक्क्षेपसाधनस्योक्तस्य दृष्टत्वाद्ध्रुवापत्तेरिति सर्वं निरवद्यं॥१॥ ॥अथोदिष्टयोरभावस्थानानि तिरिक्तस्थाने संभवाः प्रतिपा त
दनं प्रतिजानीते। देशकालविशेषेण यथा वनातिसंभवः॥ लंबनस्यापि दृष्टान्यादि गवशाच्च तथा अत इति। देशविशेषेण कालविशेषेण अव
नतिसंभवः॥ नतिकलोत्पत्तिर्गोलस्थित्या यथा भवति॥ लंबनस्य। अपि। समुच्चये। त्रिभोनलग्नस्थाना स्पूर्वापरदिगनुरोधात्॥ चकारात्सं
भवो देशकालविशेषेण यथा भवतीत्यर्थः॥ तथा। तत्तुल्यत्वेन। नतिलंबने आनयनद्वारा मया कथ्यते॥२॥ तत्रापि युक्तादयाभिधानाह
लग्नपर्वविनाडीनां कुर्यात्स्वैरुदयासुभिः॥ भातस्य त्वापक्रमज्यायोलंबज्यातोदयाभिधेति॥ स्वैः। स्वदेशीयैः। उदयासुभिः॥ राशयुदयासु
भिः॥ पर्वघटिकानां लग्नं गणकः कुर्यात्। पर्वांतकालिकं लग्नं साध्यमित्यर्थः॥ यद्यपि पूर्वं लग्नसाधनं स्वादयैरेवोक्तमिति। स्वैरुदयासुभि
रिति व्यर्थं तथापि समनंतरमेव दशमभावसाधनोक्त्या कस्यचिल्लग्नं यत्रोदयैरेवात्र साध्यमिति भ्रमस्य वारणाय पुनरुक्तिः। तस्य लग्न
स्यायनांशसंस्कृतस्य ज्याभुजज्या। परमक्रांतिज्यया गुण्या। स्वदेशीयलंबज्यया भक्तायाफलमुदयसंज्ञं स्यात्॥ अत्रोपपत्तिः॥ लग्नक्रां
तिज्यासाधनार्थं लग्नभुजज्यायाः परमक्रांतिज्यागुणात्त्रिज्याहरस्ततो लंबज्या कोटी त्रिज्याकर्णस्तदा लग्नक्रांतिज्या कोटी कः। कर्णद्र
गुणात्त्रिज्ययोर्नाशात्लग्नभुजज्यापरमक्रांतिज्यागुणा लंबज्यया भक्ता फलमस्याग्राः इयं भगवतोदयसंज्ञोक्ता। लग्नस्योदयसंज्ञत्वात्
॥उदयसंबंधाच्चेत्युक्तमुपपन्नं॥३॥ ॥अथोपयुक्तां मध्यज्यां साधयितुं श्लोकेनाह तदालंकोदयैर्लग्नं मध्यसंज्ञं यथोदितं॥ तत्क्रांत्यक्षांशसं
योगो दिक्साम्येंतरमन्यथा॥४॥ शेषं नतांशास्तन्मौर्विं मध्यज्याभिधीयते इति। तदा। पर्वांतकाले। लंकोदयैः। अक्षदेशीयराश्युदयैः। यथो
दितं। पूर्वोक्तप्रकारेण। जानतपट्टस्युक्तनतघटीभिर्धनमृणं यथायोग्यं। मध्यसंज्ञं लग्नं दशमभावात्मकं साध्यं। अत्र लग्नसंबंधेन
स्वदेशराश्युदयासुस्वरूपणां साधारणाय लंकोदयैरित्युक्तं। तस्य दशमभावस्यायनांशसंस्कृतस्य क्रांतिः॥ स्वदेशाक्षांशाः। अनयोर्योग
एकदिक्त्वे कार्याः। अन्यथा। भिन्नदिक्त्वे। अंतरं तयोरेव। शेषं संस्कारजदिक्का नतांशाः॥ तेषां ज्या कार्याः सा। मध्यलग्ननतांशज्या। मध्य
ज्योच्यते। तत्संबंधात्। अत्रोपपत्तिः स्पष्टा॥ ॥अथाभ्यामुपयुक्तां दृक्क्षेपं लंबनोपयुक्तां दृग्गतिं च सार्धश्लोकेनाह मध्योदयज्याघात्
स्त्रिज्याप्तावर्गितं फलं॥ मध्यज्यावर्गविश्लिष्टं दृक्क्षेपः शेषतः पदं॥५॥ ॥तत्त्रिज्यावर्गविश्लेषान्मूलं शंकुः स दृग्गतिरिति। पूर्वोक्त
मध्यज्या पूर्वानीतोदयाभिधेयोदयज्या। अनयोर्ज्ययोर्घातात्त्रिज्यया भक्तात्। फलं। वर्गितं वर्गः संजातो यस्य तत्। फ
लस्य वर्गः कार्य इत्यर्थः। मध्यज्यायाः वर्गे। विश्लिष्टं। हीनं। वर्गितं फलं कार्यं। शेषान्मूलं दृक्क्षेपः स्यात्॥ दृक्क्षेपत्रिज्ययोर्वर्गांत

म॰टी॰

२१

वोरंतरांशलंबांशकुः। सअनीतः तां कुदृग्गतिसंज्ञो भवति न तु शंकुमात्रं॰ अत्रोपपत्तिः॥ त्रिभोनलग्नस्य दृग्ज्यानयनार्थं से त्रेमध्यलग्नदृग्
ज्याकर्णा त्रिभोनलग्नस्य याम्योत्तरवृत्तात्प्रागपरस्थिते नतत्स्वस्वस्तिकांतरस्थिततदीयदृग्वृत्ते प्रदेशांशज्याकोटिः मध्यलग्नत्रिभोनल
ग्नांतरज्याक्रांतिवृत्तस्थो भुजः। अत्र भुजानयनं चोदयलग्नस्थक्रांतिवृत्तप्रदेशः प्राक्स्वस्तिकांतरयांतरेणोत्तरदक्षिणो भवत्येवमस्तलग्न
प्रदेशः परस्वस्तिकाद्दक्षिणोत्तरः॥ तदनुरोधेन त्रिभोनलग्नप्रदेशः क्रांतिवृत्ते याम्योत्तरवृत्ते रूपतदृग्वृत्ते क्षितिजे याम्योत्तरवृत्तक्षि
तिजसंपातात् तदग्रांतरेण लग्नमवश्यंभवत्यतस्त्रिज्यातुल्यमध्यलग्नदृग्ज्यापालग्ना तुल्यो भुजस्तदाभीष्टतदृग्ज्यायाकरणानुपातेनस
फलमंशाः॥ तदृग्गतिनाम मध्यलग्नदृग्ज्या मृगां अग्रलं त्रिभोनलग्नस्य दृग्ज्या क्षेपाख्या॰ मदृग्गोनात्रिज्यावर्गान्मूलं त्रिभोनलग्नशंकुदृग्गतिसं
ज्ञः॥ अत्रेदमवधेयं॰ त्रिप्रश्नाधिकारोक्तप्रकारेण त्रिभोनलग्नस्य शंकुरवगतो दृग्गतिदृक्क्षेपतुल्येन भवतः। किंतु दृग्गतिदृक्क्षेपाभ्यां क्र
मेण न्यूनाधिके भवतः। सर्वदा धूलीकरणानुभवादेतदानीतौ यौ दृक्क्षेपत्रिभोनलग्नदृग्गत्युपलक्षितौ पिनत्रिज्यावृत्तं दृक्किंतु फलवर्गोनत्रि
ज्यावर्गपदरूपविलक्षणमत्र आसामाई प्रमाणेन सिद्धमिति गम्यते॰॥ अतो दृग्ज्यायास्त्रिज्यावृत्तत्वेन त्रिज्यावृत्तपरिणतो दृक्क्षेपस्त्रिभोन
लग्नस्य दृग्ज्या स्फुटदृक्क्षेपरूपा॰ अस्यास्त्रिज्यावर्गेत्यादिना दृग्गतिः स्फुटा त्रिभोनलग्नशंकुरूपाः एतदनुक्तिः स्वल्पांतरत्वाद्गणित
स्वार्थं कृपालुना कृताः। भिन्नभक्तियागौरवभियेन मार्गांतरं लाघवाद्युक्तमिति दिक्॥६॥ ॥अथ लाघवाद्दृक्क्षेपदृग्गती गणितस्क
न्धार्थं स्थूले कार्ये नाहनतांशबाहुकोटिज्ये स्फुटे दृक्क्षेपदृग्गती इति॰ दशमभावनतांशानां भुजकोट्योः नतांशानतदूलनवतिरूपयोर
नयोर्ज्ये॰ क्रमेण दृक्क्षेपदृग्गती॰ अस्फुटे॰ स्थूले॰ यदा॰ स्फुटे॰ प्रागुक्ते दृक्क्षेपदृग्गति विहाय गणितलाघवार्थं दशमभावनतांशभु
जकोटिज्ये॰ नतच्छायानयन ग्राह्ये॰ पक्षांतरं मध्याभावे नतांशबाहुकोटिज्ये दृक्क्षेपदृग्गती स्फुटे इति॰ तन्न॰ उक्तप्रकारेण तत्सिद्धेस्तत्कथन
स्य वैयर्थ्यात्॰ अत्रोपपत्तिः। त्रिभोनलग्नस्य दशमभावस्य याम्योत्तरवृत्तस्थत्वेन लाघवार्थं दशमभावमेव त्रिभोनलग्नं प्रकल्प्य त
न्नतांशज्या मध्यज्यारूपा त्रिभोनलग्नदृक्क्षेपः उन्नतज्या शंकुदृग्गतिः॥ इदमतिस्थूलं॰ येस्तु भगवतोक्तं मध्यलग्नं दशमभावपरत
या व्याख्यातं तेषां मते एतदुक्तमतिसूक्ष्मं॰ प्रयाससाधितदृक्क्षेपदृग्गती प्रागुक्ते सूक्ष्मे एतित स्थूले इति धेयं॰ भास्कराचार्यैस्तु त्रिभो
नलग्नस्य दशमाईआतेन तोन्नतज्ये यदि वा स्फुटार्थमिति यदुक्तं तदस्यासूक्ष्ममिति धेयं॰॥ ॥अथ लंबनोपयुक्तच्छेदकथनपूर्व
कं लंबनानयनं सार्धश्लोकेनाह एकज्यावर्गतः छेदो लब्धं दृग्गतिजीवया॥ मध्यलग्नार्कविश्लेषज्याच्छेदेन विभाजिता॥७॥ ॥
रवीन्द्वोर्लंबनं ज्ञेयं प्राक्पश्चाद्घटिकादिकमिति॰ एकराशिज्यायाः वर्गात् दृग्गतिजीवयाः प्रागुक्तदृग्गत्याः दृग्गतेः शंकुरूपत्वेन ज्या २१

272
1918

रूपत्वाज्जीवयेति स्वरूपप्रतिपादनं॰ भागहरणेन लब्धं छेदसंज्ञं स्यात्॥ अथ मध्यकर्ग्गं॰ त्रिभोनलग्नदर्शांतकालिकं॰ न तु दशमभावः॥
तात्कालिकः सूर्यः॥ अनयोरंतरस्य त्रिभोनाधिकस्य ज्या॰ छेदेन प्राक्साधितेन भक्ता॰ फलं घटिकादिकं॰ प्राक्पश्चात्। त्रिभोनलग्नरूपमध्य
लग्नस्थानात् सूर्यो परविभागयोः॥ सूर्यचंद्रयोस्तत्कालं लंबनं ज्ञेयं॰ अत्रोपपत्तिः प्रं॥ त्रिभोनलग्नार्कविश्लेषसिंजीनीरूलाहताव्यासदलेन भा
जिता॥ इतान्तकोदित्रिभलग्नशंकुना त्रिजीवयाप्तं घटिकादि लंबनमिति॰ सिद्धांतशिरोमणौ सूक्ष्मलंबनानयनमुक्तं॰ तस्योपपत्तिः स्त
दीयटीकायां स्पष्टा मध्यलग्नस्य त्रिभोनपरत्वेन व्याख्या नात्र मध्यलग्नार्कविश्लेषज्या॰ त्रिभोनलग्नार्कविश्लेषसंजीनीरूपा जाता॰ इ
यं चतुर्गुणा त्रिभोनलग्नशंकुरूपदृग्गत्या च गुण्याः त्रिज्यावर्गेण भाज्येति लंबनानयनप्रकारेण सिद्धं॰ तत्र चतुस्त्रिज्यावर्गयोर्गुणहर
योर्गुणापवर्तने न हरस्थाने एकराशिज्यावर्गः सिद्धः॥ अत्रापि दृग्गत्यैकराशिज्यावर्गो गुणेनापवर्त्य हरस्थाने एव ज्यावर्गतद्दृत्यादिना
छेदउपपन्नः॥ हरस्य छेदाभिधानत्वात्॥ अतो मध्यलग्नार्कस्यापि युक्तमुपपन्नं॥ लंबनघटिकाभिरुभयोश्चालनं वक्ष्यमाणं गणितेआव
श्यकमिति स्वचनार्थं रवींद्वोर्लंबनमित्युक्तं॥ अन्यथा दर्शांतकाले सूर्यगतभूस्थस्त्राक्षेद्रकक्षायां चंद्रचिह्नस्य तद्दृष्टिभिर्लंबनात्। ता
दृयोरुन्नयनुपपत्तिः॥ त्रिभोनलग्नसमेर्के लंबनाभावात्तत्पूर्वापरविभागे सूर्ये सति लंबनं भवतीति प्राक्पश्चादित्युक्तं॰ अत्रेदमवधे
यं॰ लंबनानयने मध्यलग्नस्य त्रिभोनलग्नेन स्वार्थे भेदः पूर्वसाधितसूक्ष्मदृग्गत्या सूक्ष्मोनतांशोत्पादितिराहीत॰ स्थूलदृग्गत्या स्थूलं इति
एवं मध्यलग्ने स्वस्य दशमभावार्थे तु विपरीतमिति॰ एतेन मध्यलग्ने स्वस्य दशमभावार्थः॥ तत्र प्रयाससाधितसूक्ष्मदृग्गत्या सूक्ष्मं
लंबनं॰ नतांशोत्पादितस्थूलदृग्गत्या स्थूलं लंबनमिति सांप्रदायिकोक्तं निरस्तं युक्त्यभावात्॰ न चात्र मध्यलग्नरूपदशमभावग्र
हेऽपि भगोलयुक्त्या प्रतिपादनस्य सत्वात्कथमादिस्योक्तं मध्यलग्नमिति पदं सार्वजनीनदशमभावप्रत्याधिकं त्रिभोनलग्नपरतया ह
ठाद्व्याख्यातं युक्तं॰ नतांशबाहुकोटिज्ये स्फुटे दृक्क्षेपदृक्भती इत्यत्र स्फुटे इत्यनेन भगवतस्तदाशयस्य व्यक्तीकृतत्वादिति वाच्यं॰ तथापि
गौरवसाधितदृक्क्षेपोक्तिभंगवदाशयस्थित्रिभोनलग्नग्रहणं यत्नत्या न्यथा प्रयाससाधितदृक्क्षेपस्य वैयर्थ्यापत्तेरितिसुधिया
विलोक्यमित्यलं विस्तरेविस्तरेण॥८॥ अथ मध्यग्रहणकालज्ञानार्थं तिथौ लंबनसंस्कारं॰ तदसकृत्साध्यमिति चाह मध्यलग्नाधिक
भानौ तिथ्यंतात्प्रविशोधयेत्॥ धनमूने सकृत्कर्म यावद्यावत्सर्वस्थि रीभवेदिति॰ सूर्ये॰ मध्यलग्नं॰ त्रिभोनलग्नं॰ तस्मादधिके सति॰ तिथ्यं
तात् दर्शांतिथ्यंतकालात्। आगतं लंबनं शोधयेत्। सूर्ये॰ त्रिभोनलग्नात्। न्यूने सति तिथ्यंतकाले॰ लंबनं धनं युतं कार्यं॰ एवं॰ कर्म॰ गणित
असकृन्मुहुः कार्यं। अनमर्थः॥ तिथ्यंतकालिकः सूर्यो लंबनघटीभिः क्रमेण पूर्वाग्रिमकाले चाल्यो लंबनसंस्कृततिथ्यंते कोऽभवति॥

तस्माल्लंबनसंस्कृततिथ्यंतकाले लग्नदर्शनाभावो मध्याह्नपूर्वोक्तरीत्या लंबनसाध्यमिदमपि केवलतिथ्यंते संस्कार्योक्तरीत्या लंबनं केव
लमस्मादपि लंबनं तिथ्यंते संस्कार्यमित्यसकृदिति। गणितागतदर्शान्तयावदिति॰ सर्वं लंबनादि॰ यावत्स्थिरं तदवधि॰ स्थिरीभवेत्॥ अवि
लक्षणं॰ यावदविशेषः स्यादित्यर्थः॥ अत्रोपपत्तिः॥ दर्शान्तकाले रविगतभूपृष्ठसूत्राच्चंद्रस्याधोलंबितत्वं त्रिभोनलग्नादिनेर्योः क्रांतिवृत्ते पूर्वा
पराग्रभावेन तत्सूत्रस्थितत्वरूपयुतिर्दर्शान्तकालात्लंबनकालेनाग्रे भवति॰ शीघ्रचंद्रस्य मंदगरवितः पृष्ठस्थितत्वात्। अधिके रवौ
चंद्रस्य पुरःस्थितत्वेन दर्शान्तकालात्लंबनकालेन पूर्वं युतिर्भवति॰ अतो दर्शान्तकाले लंबनसंस्कृतो मध्यग्रहणकालः स्यात्॥ युतिका
लस्य मध्यग्रहणकालत्वात्॥ परं तु तावता लंबनकालेन सूर्यस्यापि क्रांतिवृत्ते चलनात्लंबनसंस्कृतदर्शान्तकाले रविगतभूपृष्ठसूत्राच्चं
द्रस्यालंबितत्वं स्यादेवेति मध्यग्रहणकालत्वमसिद्धः॥ नहि सर्वाधनलंबने कृतलंबने चंद्रस्यालंबनकाले स्थिरो येन तयो युतिः संगता
स्यात्। अतस्तस्माद्दर्शान्तकालात्पुनस्तत्कालिकं लंबनमस्माद्दर्शान्ते पुनः संस्कार्यं मध्यकालः स्यात्॥ एवं लंबनकाले संस्कृतदर्शान्तेऽपि तयोर्भू
पृष्ठसूत्रस्थत्वाभावात्। पुनर्लंबनं साध्यं। तत्संस्कृतो दर्शान्तो मध्यग्रहणं सत्तकृद्विधिना यदा लंबनं पूर्वलंबनतुल्यं सिध्यति। तदाव
गतं तात्कालिकलंबनसंस्कृतो दर्शान्तः स्फुटमध्यग्रहणकाले भूपृष्ठसूत्रेऽन्तयोः संनिवेशाः। यतस्तदा सूर्यगतभूपृष्ठसूत्रे चंद्रयोरंतराभावे
न पूर्वागतलंबनतुल्यलंबनस्येन पुनः सिद्धेः॥ अन्यथा तुल्यलंबनानुपपत्तेः॰ तस्मान्मध्यकालोऽसकृद्यावदविशेषः स्यादित्युपपन्नं मध्य
लग्नेत्यादि॥ ९॥ ॥अथ नतिसाधनमाह॥ दृक्क्षेपः शीततिग्मांश्वोर्मध्यभुक्त्यन्तराहतः॥ तिथिघ्नत्रिज्यया भक्तो लंबनं सावनतिर्भवेदिति॰
दृक्क्षेपः प्रागानीतः। शीततिग्मांश्वोः। चंद्रार्कयोर्मध्यगतीः कलात्मकयोरंतरेण गुणितः। पंचदशगुणितया त्रिज्यया भक्तः। फलं॰ सा॰
देशकालविशेषाभ्यां यागोऽलेखि॰ ह्रासभवति सैवास्मन्गणिते नतिर्भवेत्॥ अत्रोपपत्तिः॥ यदा क्रांतिवृत्ते दृग्वृत्ताकारं तदा नत्यभाव इति प्रागु ५०
क्तं॥ तत्र त्रिभोनलग्नस्य खमध्यस्थितत्वेन दृक्क्षेपाभावः। यत्र च षष्ठ्यंशास्तत्र देशे त्रिभोनलग्नस्य क्षितिजस्थत्वेन परमा नतिः।
परमा नतिकलाः भूगर्भक्षितिजाद्भूपृष्ठक्षितिजस्य भूव्यासार्धांतरेणोच्छ्रितत्वाद्गतियोजनैर्गत्यंतरकलाः लभ्यंते तदा भूव्यासार्धयोज
नैः का इत्यनुपातेन॰ तत्र मध्यगतियोजनानां भूव्यासार्धस्य च तिथितत्वाद्भूव्यासार्धेनापवर्तः कृतः। तेन मध्यगत्यंतरकलानां स्वल्पांत
रेण पंचदशांशाः परमा नतिकलाः॥ अत एव षष्टिघटिकानां पंचदशांशो घटिकाचतुष्टयं परमलंबनं सिद्धं॥ आभिष्टितुल्यदृक्क्षेप
सूर्यगतभूपृष्ठसूत्राच्चंद्रस्य दक्षिणोत्तरेणावनतं भवति॰ अतस्त्रिज्यातुल्यदृक्क्षेपेण मध्यगत्यंतरपंचदशांशेन तिस्तदेष्टदृक्क्षे
पेण के इत्यनुपातेन गत्यंतरगुणाद्दृक्क्षेपाद्धरघातेन पंचदशगुणितत्रिज्यात्मकेन भक्तो नतिकला इत्युक्तमुपपन्नं॥ १०॥ ॥अथ

प्रकारांतरमप्याह नतिसाधनं लाघवाद्दृक्क्षेपात्सप्ततियुताद्वेदाशावनतिः फलं॥ अथवा त्रिज्यया भक्तात्सप्तसप्तकसंगुणादिति॰ सप्तत्या भक्ता
द्दृक्क्षेपात्फलं कलादिका नतिः प्रकारांतरेण भवेत्॥ अथवा॰ प्रकारांतरेण॰ सप्तसप्तकसंगुणात्॥ सप्तानां सप्तकं॰ सप्तवारमाश्रितवर्गः तेन पं
चाशादित्यर्थः। तेन गुणितात् दृक्क्षेपात्॥ त्रिज्यया भक्तात्। फलं कलादिका नतिः॥ अत्रोपपत्तिः॥ दृक्क्षेपस्य गत्यंतरकलामितं ७३१।२७ गुण
कपंचदशगुणितत्रिज्यामितहरौ ५१५७ प्रथमप्रकारे गत्यंतरापवर्तितौ हरस्थाने सप्ततिः॥ द्वितीयप्रकारे पंचदशभिरपवर्त्य गुणस्थाने
स्वल्पांतरोदेकानपंचाशत्॰ हरस्थाने त्रिज्येत्युपपन्नं॥ ११॥ अथ नतेर्दिग्ज्ञानं स्पष्टविक्षेपं चाह मध्यज्यादिग्वशात्सौम्या याम्या चावनतिर्भवेत् दक्षिणोत्त
रा॥ इंदुविक्षेपदिक्साम्ये युक्ता विश्लेषिताऽन्यथेति॰ सा॰ अवनतिः मध्यज्यादिगनुरोधाद्दक्षिणोत्तरा॥ मध्यज्या चेद्दक्षिणा तदा नतिर्द
क्षिणा॰ चेदुत्तरा तदोत्तरा ज्ञेयाभ्यसमुच्चये॰ तेन मध्यज्यानतांशदिक्नति॰ सा दक्षिणोत्तरा नतिः चंद्रविक्षेपदिक्समत्वे॥ तयोरेकदिक्त्वे इत्य
र्थः॥ युक्ताः विक्षेपेण युतेत्यर्थः॥ अन्यथा॰ तयोर्भिन्नदिक्त्वे॰ विक्षेपेणांतरिता॰ शेषदिक्क॰ विक्षेपसंस्कृता नतिः स्पष्टशररूपा स्यात्॥ अत्र चंद्र
विक्षेपो मध्यग्रहणकालिकः इति ध्येयं॥ अत्रोपपत्तिः॥ नतांशदिक्कमध्यज्यावशाद्दृक्क्षेपस्यास्य तत्त्वाद्दृक्क्षेपस्य त्वात्तुल्यत्वे सदृशत्वं पुनरुक्तं॰ अथ रविग
तभूपृष्ठसूत्राच्चंद्रः क्रांतिवृत्तात्तावद्याम्यायामुत्तरस्यां नत्या क्रांतिमंडलाच्चंद्रबिंबावधि विक्षेपतादृग्विगतभूपृष्ठसूत्राच्चंद्राक्रांति
तत्कालनतावधियाम्यानगांतरस्यनतित्वात्क्रांतिमंडलाच्चंद्रबिंबावधिविक्षेपत्वाद्रविगतभूपृष्ठसूत्राच्चंद्रबिंबावधियाम्योत्तरांतरस्यस्पष्टग्र
हणोपयुक्तनतिसंस्कृतविक्षेपरूपस्पष्टविक्षेपत्वाद्योरेकदिशि योगो भिन्नदिशि त्वंतरमित्युपपन्नं॥ १२॥ ॥अथ चंद्रग्रहणाधिकारोक्तमत्रा
तिदिशति॰ तथास्थितिविमर्दार्धं ग्रासात्पानुपथादिनं॥ प्रमाणवलनाभीष्टग्रासादि हिमरश्मिवदिति॥ तथा। विक्षेपसंस्कृतया॰ नत्या स्प
ष्टविक्षेपरूपयेत्यर्थः॥ स्थित्यर्धविमर्दार्धग्रासाः॥ आवनाव्यालंस्पर्शमोक्षसंमीलनोन्मीलनं॥ यथादिनं॰ चंद्रग्रहणे यथोक्तं तथा॰ तु का
रस्तदतिरिक्तरीतिव्यवच्छेदार्थको वकारः परः प्रमाणं मितिमित्यर्थः॥ अवशिष्टमधारवलनेत्यादि॰ वलनादिइष्टग्रासः आदिशब्दादिष्टग्रासा
दिष्टकालानयनं॰ हिमरश्मिवत्॰ चंद्रग्रहणात्करीत्या कार्यमित्यर्थः॥ अत्रोपपत्तिः॥ रविशेषवत्॥ १३॥ ॥अथ स्थित्यर्धे विशेषं रविवि
षये श्लोकचतुष्टयेनाह स्थित्यर्धनाडिकाभ्यस्ता गतयः षष्टिभाजिताः॥ ग्रासमोक्षोद्भवे साध्ये लंबने स्पर्शमुक्तिजे॥ १४॥ प्राक्कपालेऽधिकं म
ध्याद्भवेत्प्राग्ग्रहणं यदि॥ मौक्षिकं लंबनं हीनं पश्चार्धे तु विपर्ययः॥ १५॥ तदा मोक्षस्थितिर्दले देयं प्रग्रहणे तथा॥ हरिजांतरकेऽन्यथे
तत्स्याद्विपर्ययः॥ १६॥ तदुक्तं कपाले स्पर्शे लंबनकेन॥ स्पर्शस्थितिदलं यो ज्या विमर्दार्धेऽपि चोक्तवदिति॥ चंद्रग्रहणाधिकारोक्त
प्रकारेणागत्य साधितस्पर्शस्थित्यर्धमोक्षस्थित्यर्धं च॥ तद्यथा मध्यग्रहणकालिकस्पष्टशरोक्तरीत्या स्थित्यर्धं निमित्तमग्रे वाच्याः

तत्कालयोः प्रत्येकं नतिशरौ प्रसाध्य स्पष्टशरः साध्यः ततः प्रथमकालिकस्पष्टशरात्स्थित्यर्धमनेन पूर्ववन्निथ्यंतकालिकग्रहाग्रनाल्योक्त
रीत्या स्पष्टशरं प्रसाध्य स्थित्यर्धं साध्यमेवमसकृत्स्पर्शस्थित्यर्धं एवमेव द्वितीयकालिकस्पष्टशरात्स्थित्यर्धमनेनाग्रेतिथ्यंतकालिकग्रहान्
प्रसाध्योक्तरीत्या स्पष्टशरं प्रसाध्य स्थित्यर्धं साध्यमेवमसकृन्मोक्षस्थित्यर्धमिति॥ अथाभ्यां स्पर्शमोक्षस्थित्यर्धाभ्यां क्रमेणाहीनयुतादर्शा
न्तकालात् प्राग्वत् उक्तरीत्या लंबनं पुनरसकृत् यास्तो मोक्षोऽवं स्पर्शमोक्षकालिकं कार्यं तथाहि स्पर्शस्थित्यर्धहीनातिथ्यंतात्का
लिकसूर्याल्लग्नदशमभावौ प्रसाध्योक्तरीत्या लंबनं साध्यं तेन स्पर्शस्थित्यूनतिथ्यंते संस्कृत्या स्याल्लंबनमेवमसकृत्स्पर्शकालिकं लंब
नं एवमेव मोक्षस्थित्यर्धयुततिथ्यंतात्तात्कालिकसूर्याल्लग्नदशमभावौ प्रसाध्योक्तरीत्या लंबनं साध्यं तेन स्पर्शस्थित्यूनतिथ्यंते संस्कृ
त्यास्माल्लंबनमनेनापि स्पर्शस्थित्यूनतिथ्यंतं संस्कृत्यास्माल्लंबनमेवमसकृत्स्पर्शकालिकं लंबनं एवमेव मोक्षस्थित्यर्धयुततिथ्यं
तात्तात्कालिकसूर्याल्लग्नदशमभावौ प्रसाध्योक्तरीत्या लंबनं साध्यं तेन मोक्षस्थित्यर्धयुततिथ्यंतं संस्कृत्यास्माल्लंबनमनेनापि मोक्षस्थि
त्यर्धयुततिथ्यंते संस्कृत्यास्माल्लंबनमेवमसकृन्मोक्षकालिकं लंबनमिति॥ प्राक्कपाले त्रिभोनलग्नात्स्वल्पे भागे त्रिभोनलग्नाधिके रवौ
माध्याह्न मध्यकालिकात् अग्राह्यलंबनस्य विभक्तिविपरिणामादन्वयेन लंबनात्॥ प्राग्ग्रहणे प्रग्रहणे स्पर्शः स्पर्शकालिकं अत्रा
पि लंबनमित्यस्यान्वयः लंबनं वेदितव्यं स्यात्॥ मोक्षिकं मोक्षकालसंबंधिलंबनं न्यूनं स्यात् पश्चाभे त्रिभोनलग्नात्स्वल्पे भागे त्रि
भोनलग्नाधिके रवौ तुकारः समुच्चयार्थं चकारपरः विपर्ययः उक्तवैपरीत्यं मध्यकालिकलंबनात्स्पर्शकालिकं लंबनं न्यूनं मोक्ष
कालिकलंबनमधिकमित्यर्थः॥ तदा तर्हि तन्मध्यहरिजांतरं तयोः स्पर्शमोक्षकालिकलंबनयोः मध्यकालिकलंबनेन प्रत्येकम
तरं मोक्षस्थित्यर्धे योज्यं प्राग्ग्रहणे स्पर्शस्थित्यर्धे तथा देयं मोक्षमध्यकालिकलंबनयोरंतरं मोक्षस्थित्यर्धे योज्यं स्पर्शमध्यकालि
कलंबनयोरंतरं स्पर्शस्थित्यर्धे योज्यमित्यर्थः॥ यत्र यस्मिन्काले विपर्ययः उक्तवैपरीत्यं प्राक्कपाले मध्यकालिकलंबनात्स्पर्शका ४३
लिकलंबनमधिकं मोक्षकालिकलंबनं न्यूनं भवतीत्यर्थः॥ तत्र एतत्॥ मोक्षस्पर्शमध्यकालिकहरिजांतरकं लंबनांतरं मोक्षस्थित्य
र्धे मध्यमोक्षकालिकलंबनयोरंतरं स्पर्शस्थित्यर्धे मध्यस्पर्शकालिकलंबनयोरंतरमित्यर्थः॥ शोध्यं हीनं कुर्यात्॥ एतत्॥ लंबनां
तरं योज्यं शोध्यं वा कपालैक्ये द्वयोः स्पर्शमध्ययोर्मध्यमोक्षयोर्वा एककपाले सत्स्वकालिकत्रिभोनलग्नात्स्वस्वकालिकसूर्ये उभयत्राधि
के न्यूने वेत्यर्थः उक्तं कथितं तद्भेदे तयोः स्पर्शमध्ययोर्मध्यमोक्षयोर्भेदे कपालभेदे स्पर्शकालिकत्रिभोनलग्नात्तात्कालिकार्के स्या
धिकत्वे माध्यकालिकत्रिभोनलग्नात्तात्कालिकार्के स्यान्न्यूनत्वे मध्यकालिकत्रिभोनलग्नात्तात्कालिकार्के स्याधिकत्वे मोक्षकालिकत्रिभोन

281
1918

लग्नात्तात्कालिकार्के स्यान्न्यूनत्वे इत्यर्थः॥ लंबनैक्यात् लंबनैक्यं स्पर्शमध्ययोर्भेदे तात्कालिकलंबनयोर्योगः॥ मध्यमोक्षयो
र्भेदे तात्कालिकलंबनयोर्योग इत्यर्थः॥ स्वकीये स्वकीये स्थित्यर्धे संयुक्तं कार्यं स्पर्शस्थित्यर्धे स्पर्शमध्यकालिकलंबनयोर्योगो योज्यः॥ मो
क्षस्थित्यर्धे मोक्षमध्यकालिकलंबनयोर्योगो योज्य इत्यर्थः॥ स्पर्शस्थित्यर्धं मोक्षस्थित्यर्धं च स्फुटं भवति आभ्यां चंद्रग्रहणोक्तदि
शा मध्यग्रहणकालात्पूर्वमपरत्र क्रमेण स्पर्शमोक्षकालौ स्त इत्यर्थः सिद्धं॥ अथोक्तरीत्या विमर्दार्धेऽपि स्पष्टतामतिदिशति विमर्दार्धे
इति॥ स्पर्शविमर्दार्धमोक्षविमर्दार्धे च ग्रहणाधिकारोक्तरीत्या स्पष्टशरेणासकृत्साधिते उक्तवत्॥ स्थित्यर्धोनाधिकात् प्राग्वत्तिथ्यं
तात् लंबनं पुनरित्याद्युक्तरीत्या स्थित्यर्धस्थाने मर्दार्धे ग्रहणेन ग्रासमोक्षोऽङ्गवमित्यत्र संमीलनोन्मीलनो ङ्गवमिति ग्रहणेन प्राग्ग्रहणमित्य
त्र संमीलनग्रहणेन मोक्षिकमित्यत्र उन्मीलनग्रहणे स्फुटं साध्यं अपि समुच्चये चकारात्ताभ्यां संमीलनोन्मीलनकालौ मध्यग्रहणकाला
त्पूर्ववत्साध्याविति इत्यर्थः॥ अत्रोपपत्तिः॥ स्थित्यर्धोनयुतो मध्यग्रहणकालः स्फुटः स्पर्शमोक्षकालः मध्यकालिकलंबनसंस्कारात्॥ स्पर्शमो
क्षकालिकलंबनसंस्कारस्यापेक्षितत्वान्नाहेयः कालो लंबनसंस्कृतः स्फुटः स्वस्वतात्कालिकलंबनसंस्कृतः स्फुटः स्यात्तस्य च भावा
त्॥ पूर्वं स्पर्शमोक्षकालयोरज्ञानात्तात्कालिकलंबनज्ञानाभावाच्च अतो मध्यकालज्ञानार्थं यथा तिथ्यंतादसकृल्लंबनं प्रसाध्य तिथ्यंते
संस्कृत्य मध्यकालस्तथा स्पर्शमोक्षस्थित्यर्धहीनयुक्ततिथ्यंतकालाभ्यां स्पर्शमोक्षतिथ्यंतरूपाभ्यां प्रत्येकं लंबनमसकृत्प्रसाध्य स्व
स्वतिथ्यंते संस्कृत्य स्पर्शमोक्षकालौ स्फुटौ तन्मध्यकालयोरंतरं स्फुटं स्थित्यर्धं तत्र पलंबनेन स्पर्शस्थित्योनतिथ्यंतस्याधिकलंब
नोनितस्य स्पर्शकालत्वान्न्यूनलंबनोनितस्य तिथ्यंतस्य मध्यकालत्वात्तयोरंतरे तिथेः समत्वेन नाशात् स्पर्शस्थित्यर्धे स्पर्शकालिकलं
बनेन युतं मध्यकालिकलंबनेन हीनमिति लंबनयोरंतरे तत्र धनं योज्यं एवं मोक्षस्थित्यर्धयुततिथ्यंतस्य न्यूनलंबनोनितस्य मोक्ष
कालत्वान्मध्यमोक्षकालयोरंतरे पूर्ववरीत्या मध्यमोक्षकालिकयोर्लंबनयोरंतरं धनं मोक्षस्थित्यर्धे योज्यं यदा तु मध्यलंबनाद्धीने
स्पर्शलंबनं मोक्षलंबनं चाधिकं तदा न्यूनलंबनहीनस्य स्पर्शकालत्वादधिकलंबनहीनस्य मध्यकालत्वादुक्तरीत्यादंतरे स्पर्शस्थि
त्यर्धे लंबनांतरं॥ एवमधिकलंबनहीनस्य मोक्षकालत्वान्मध्यमोक्षयोरंतरं मोक्षस्थित्यर्धे लंबनांतरं हीनं॥ धनलंबनेन स्पर्शमध्य
मोक्षेष्वेकोनुपदामध्यलंबनान्न्यूनं स्पर्शलंबनं मोक्षलंबनं चाधिकं तदा स्पर्शस्थित्योनतिथ्यंतस्य न्यूनलंबनाधिकस्य स्पर्शकालत्वा
दधिकलंबनाधिकस्य तिथ्यंतस्य मध्यकालत्वात्तयोरंतरे लंबनांतरं स्पर्शस्थित्यर्धे योज्यं एवं मोक्षस्थित्यर्धयुततिथ्यंतस्याधिकलंब
नाधिकस्य मोक्षकालत्वान्मध्यमोक्षयोरंतरं लंबनांतरं मोक्षस्थित्यर्धे वैरीत्या योज्यं यदा तु मध्यलंबनादधिकं स्पर्शलंबनं मोक्ष

लंबनेन न्यूनेनं तदाप्यधिकलंबनाधिकस्य स्पर्शकालत्वाद्धीनलंबनाधिकस्य मध्यकालत्वात योरंतरे उक्तरीत्या स्पर्शस्थित्यर्धे लंबनांत
रहीनं च वेन्यूनेन लंबनाधिकस्य मोक्षकालत्वात मध्यकालांतरे मोक्षस्थित्यर्धे लंबनांतरहीनमिति सिद्धं० नन्वेवं लंबनांतरहीनपक्षो न सं
गतः॥ आह। तथाहि० ऋणलंबनस्य क्रमेण यथा स्पर्शमध्यमोक्षकालानां यथोत्तरं संभवाच्च मध्यकालिकलंबनात्स्पर्शमोक्षकालि
कलंबनयोः क्रमेणान्यूनाधिकत्वमसिद्धं० एवं धनलंबनस्य क्रमेणोपचयान्मध्यलंबनात्स्पर्शमोक्षकालिकलंबनयोः क्रमेणाधिकन्यून
त्वमसिद्धं० नहि कदाचिन्मध्यकालात्स्पर्शमोक्षकालौ क्रमेणाग्रिमपूर्वकालयोः संभवतो येनोक्तं युक्तं० बाधात। तथा च लंबनांतरयोज्य
मित्यस्यैवोपपन्नत्वे महतैतावता प्रपंचेन नहरिजांतरकेणोध्यं यत्रैतत्स्यादिपर्ययइति सर्वं शंभगवदुक्तं कथं निर्वहतीति चेत्। मैवं लंबन
संस्कृतस्पर्शमोक्षकालयोः स्फुटयोर्वक्ष्यमाणयोः सर्वदा मध्यकालात्क्रमेण पूर्वोत्तरावयवं भावित्वेपि लंबनासंस्कृतयोः स्थित्यर्धोनयुत
तिथ्यंतरूपस्पर्शमोक्षकालयोः परिभाषिकत्वेनावास्तवयोः कदाचिन्मध्यकालर्णधनलंबनाभ्यां स्पर्शस्थित्यर्धमोक्षस्थित्यर्धयोः क्र
मेण न्यूनत्वे मध्यकालादग्रिमपूर्वकालयोः क्रमेणसंभावात्स्फुटौ निर्वाहः॥ परं तणलंबने धनलंबने च मध्यलंबनात्क्रमेण मोक्षस्पर्शलं
बनयोरधिकत्वासंभवः॥ मध्यकालात्पूर्वाग्निमकालयोर्मोक्षस्पर्शयोः परिभाषिकयोः क्रमेणासंभवात॥ अतः साक्षाल्लंबनांतरभावाद्विपर्य
यइत्यनेन विपर्ययविशेषस्यैव विवक्षितत्वं० पूर्वं तु सधारणपाठवदस्य साधारण्येन व्याख्याने कृतमित्यदोषः॥ ननु तथा सकृल्लंबनसा
धनेलंबनस्यस्पष्टस्पर्शमोक्षकालाभ्यां सिद्धत्वेनर्णलंबने मध्यलंबनात्स्पर्शलंबनं न्यूनं न भवत्येव० धनलंबने मोक्षलंबनं न्यूनं न भव
त्येव॥ मध्यकालाद्वास्तवस्पर्शमोक्षकालयोः क्रमेणाग्रिमपूर्वकालयोरसंभवान्निर्णयात॥ अन्यथास्थिरलंबनासंभवात॥ किंच० असकृल्लं
बनसाधने नृपकालास्थिरलंबनं सिद्धं॥ न कालस्य स्पष्टस्पर्शमोक्षकालत्वात्स्फुटस्थित्यर्धसाधनं व्यर्थं॥ नस्वतज्ज्ञानार्थमेवावश्यक
त्वात॥ न च चंद्रग्रहणरीत्या स्पर्शमोक्षकालयोर्ज्ञानार्थं स्फुटस्थित्यर्धोक्तिरिति वाच्यं० गौरवात्स्पर्शात् हरिजांतरकेणोध्यमित्यस्यानुप
पत्तेश्चेति चेन्न० लंबनयोरसकृत्साधनस्यानंगीकारात॥ सकृत्साधितलंबनस्यांतरत्वेपि भगवतास्वल्पांतरेणांगीकारात्॥ अतएव लं
बनपुनरित्यस्य व्याख्यानमसकृदिति पूर्वमुक्तं न युक्तं॥ किंतु मध्यकालार्थलंबनस्य साधनात्स्पर्शमोक्षकालार्थमपि द्वितीयवारं लंबन
साध्यमिति व्याख्यानं पुनरिति वास्यालंकारार्थं वा युक्ततरमिति० अथ यदा स्फुटस्पर्शकालऋणलंबने धनलंबने च मध्यकालतदा स्पर्शमि
त्यर्धोनतिथ्यंतस्पलंबनहीनस्पर्शकालत्वाल्लंबनाधिकतिथेर्मध्यकालत्वात्तदंतरे स्पर्शस्थित्यर्धं तात्कालिकलंबनयोर्योगेन युक्त
स्फुटरीत्योपपद्यते० एवं यदा मध्यकालऋणलंबने स्फुटमोक्षकालधनलंबने तदा लंबनहीनतिथ्यंतस्य मध्यकालत्वान्मोक्षस्थित्यर्ध

283
1918

युतत्तिथ्यंतस्य लंबनाधिकस्य मोक्षकालत्वात्तदंतरे मोक्षस्थित्यर्धं लंबनयोगयुक्तमित्युपपन्नं॥ न चासकृल्लंबनसाधनेनस्पष्टस्पर्शमो
क्षयोः सिद्धौ स्वकृतवर्णांगीकारेणोक्तरीतेः सांतरत्वात्कथं भगवतः सर्वज्ञस्यास्यां रीत्यामभिनिवेश इति वाच्यं॥ असकृल्लंबनसाधनेप्रयासा
धिक्यभयाद्भगवता सर्वत्रैवस्वल्पांतरांगीकाराङ्गीकारात्तु चंद्रग्रहणोक्तरीत्यानुगमार्थं स्फुटस्थित्यर्धसाधनस्यैवोक्तेरिति दिक्॥ वस्तुतस्तु
स्पर्शादिपाताप्राक्स्पर्शोनंतरं मध्यकालस्तदा मध्यलंबनात्स्पर्शलंबनं सन्निभलग्नचतुर्थभावसाधितं कदाचिन्न्यूनं भवति॥ यत्र चोरस्पा
त्पूर्वं मध्यः परतो मोक्षस्तत्र कदाचित्सन्निभलग्नचतुर्थभावानीतमध्यकाललंबनान्मोक्षकालमधिकं लंबनं भवति० यत्र चास्तात्पूर्वं स्पर्शः प
रतो मध्यस्तदा मध्यकाललंबनाद्रात्रिसंबंधात्स्पर्शकाललंबनं कदाचिदधिकं भवति० यत्र चास्तात्पूर्वं मध्यकालः परतो मोक्षस्तदा वि
मध्यकाललंबनान्मोक्षकाललंबनं रात्रिसंबंधे न्यूनं भवति कदाचिदिति० ग्रस्तोदयग्रस्तास्तयोः कदाचिद्द्विर्यसंभवाद्धरिजांतरकेणोध्य
मित्यस्यनायसिद्धिः॥ एतेनलंबनमसकृत्साध्यं० विपर्ययइति। विपर्ययविशेषइति चोक्तं समाधानं निरस्तमिति तत्त्वं॥ विमर्दार्धेप्युक्त
रीतिकल्प्येति सर्वमुपपन्नं॥ भास्कराचार्यैस्तु तिथ्यंतादृणधनास्थितिदलेनाधिकाल्लंबनं तात्कालोत्थनतीषुसंस्कृतिभवस्थित्यर्ध
हीनाधिके॥ दर्शांतेगणितागतेधनमृणंयत्कृविधायासकृत्स्पेग्रहमोक्षसंज्ञसमयावेवं क्रमात्स्फुटौ तन्मध्यकालांतरयोः समाने
स्पष्टे भवेतांस्थितिखंडके वा० दर्शांततोमर्ददलानयुक्तासंमीलनोन्मीलनकालएवमित्यनेन भगवदुक्तादतिसूक्ष्ममुक्तमित्यलं पल्लवितेन॥ १०॥ अथाग्रिमग्रंथस्यासंगतित्वनिरासार्थमधिकारसमाप्तिं फक्किकयाह इति सूर्यग्रहणाधिकाः इति० स्पष्टं॥ ॥ रंगनाथेन र
चिते सूर्यसिद्धांतटिप्पणे॥ सूर्यग्रहाधिकारोयं पूर्णो गूढप्रकाशके॥ ५॥ ॥ इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंग
नाथगणकविरचिते गूढार्थप्रकाशके सूर्यग्रहणाधिकारः पूर्णः॥ अथ परिलेखाधिकारो व्याख्यायते॥ ॥ तत्रत्वं प्रयोजनं० प्रति सं
जानीते० न छेदकमृतेयस्माद्भेदाग्रहणयोः स्फुटाः॥ अत्रं तेन प्रवक्ष्यामि छेद्यकज्ञानमुत्तममिति॥ यस्मात्कारणात॥ ग्रहणयोः चंद्रसूर्य
ग्रहणयोः॥ द्विवचनेन ग्रहणत्वेन पूर्वाधिकारयोरेकाधिकारत्वं निरस्तं भेदाः कस्यादिशा स्पर्शमोक्षौ संमीलनोन्मीलने॥ ग्रस्तांशाः कि
यानित्यादिभेदाः॥ स्फुटाः गोले स्थितिसिद्धावास्तवाः॥ छेद्यकं० गोलस्थितिप्रदर्शकं० कल्पितप्रकारः छेद्यकपदवाच्यस्तं० ऋतेविना०
छेद्यकस्यज्ञानदं ज्ञानसाधकं० छेद्यकज्ञानं० ज्ञापते नेनेति। ज्ञानेपरिलेखसाधकग्रंथे० सर्पांश पुरुषोहं० प्रवक्ष्यामि० कथयामि०
१॥ तत्र प्रथमं वलनसूत्रं लिखेदित्याह स्पसाधितायामवनौ बिंदुं कृत्वा ततो लिखेत॥ सप्तवर्गांगुलेनादौ मंडलं वलनाश्रितमिति० आदौ०
प्रथमं सम्यक्साधितायां० जलवत्समीकृतायां० अवनौ० पृथिव्यां० अभीष्टस्थाने बिंदुं वृत्तमध्यज्ञापकचिह्नं० कृत्वा० ततश्चिह्नात॥ सप्त

स॰टी॰ वर्गांगुलेन॰ एवोनपंचदशांगुलमितेन ग्रासार्धेन॰ मंडलं॰ वृत्तं॰ वलनाश्रितं॰ प्रागुक्तस्फुटवलनमाश्रितं यत्र॰ वलनाग्रबद्धभुजं॰ वलनदा
५१ नार्थं दत्तमित्यर्थः॥ लिखेत्॥ ग्रहणभेदज्ञाने छर्गणकउल्लिखेत्॥ अत्रोपपत्तिः॥ प्रागुक्ता॥ १॥ ॥अथ द्वितीयतृतीयवृत्ते आह ग्रासग्रा
हकयोगार्धसंमितेन द्वितीयकं॥ मंडलं तत्तन्मानैक्यग्रासार्धं ततृतीयकमिति॥ ग्राह्यग्राहकबिंबमानांगुलयोर्योगार्धमितेनांगुलात्मकव्या
सार्धेन॰ द्वितीयं वहितीयकं॰ द्वितीयं वृत्तं लिखेत्॥ तद्वृत्तं समासंज्ञं॥ योगोत्पन्नत्वात्॰ तृतीयकं वृत्तं॰ ग्राह्यबिंबांगुलार्धमितेन व्यासार्धे
न लिखेत्॥ अत्रोपपत्तिः॥ ग्रहणे ग्राह्यमानैक्यखंडं न्यूनत्वात् विक्षेपो मानैक्यखंडवृत्ते इति विक्षेपदानार्थं मानैक्यखंडलिखनं तत्परि
धिकेंद्रस्यार्धकार्धग्रासार्द्धवृत्तेन ग्राह्यवृत्तेन संयोगात् समाससंज्ञं॥ ग्राह्यवृत्तं तु ग्रहणभेदज्ञानार्थमित्युपयुक्तं॰ नहि तद्वृत्तं विना तज्ज्ञ
ानं संभवति॥ २॥ अथ तद्वृत्ते पुनः दिक्साधनादि द्योत्यं स्पर्शमोक्षवलनज्ञानार्थं स्पर्शमोक्षादिदिङ्ज्ञानार्थं वा याम्योत्तराप्राच्यपरासाधनं पूर्व
वदिति॥ आग्नेयी ग्रहणे पश्चान्मोक्षोऽर्कस्य विपर्ययात् इति॰ दिशाम् इति शामे मध्ये॰ याम्योत्तराप्राच्यपरासाधनं॰ पूर्ववत्॥ त्रिज्यातलें बुसं भुदुर
त्यादिविधिनश्चाधिकागोतरीत्या कार्यं॥ तथाहि॰ द्वादशांगुलशंकोर्निष्पन्नेष्टच्छायाग्रस्पृष्टवृत्ते पूर्वांके छाया प्रवेशोपरांके छाया निर्गमस्तन्निबद्ध
भाग्भास्य मुख्या पूर्वरेखा याम्योत्तरा स्यात् तत्रापि काग्रसमा जीवा॰ तस्य रेखाभागेषु मध्ये वृत्ते पूर्वापरे ते याम्योत्तरारेखा भवति॰ तदग्रमत्स्या
त्पूर्वपरारेखामोक्षपतो रलवादि संमा जीवा॰ सा वृत्ते पूर्वापरारेखा भवतीति॥ चंद्रस्य पूर्वदिशि ग्रहणं॰ ग्रहणारंभ॰ स्पर्शो इति यावत्॥ पश्चिम
दिशि मोक्षः॥ ग्रहणांतः॥ अर्कस्य विपर्ययात्॥ स्पर्शः पूर्वो ज्ञेयः॥ ग्रहणादि रूपः स्पर्शः॥ पश्चिमस्यां॰ ग्रहणांतरूपमोक्षः प्राच्यामित्यर्थः॥ अत्रोप
पत्तिः॥ वृत्ते दिक्साधने नदिशः समवृत्ते भवंतीति॥ एतस्मिन् द्वाइलनं तरेण क्रांतिवृत्तदिक्संत्वात्॥ तत्र स्पर्शमोक्षदिङ्ज्ञानार्थं क्रा
ंतिवृत्तप्राच्यपरानुसारेण चंद्रसूर्ययोः स्पर्शमोक्षौ निर्णीतौ॰ ग्रहभोगस्य तद्वृत्तानुसारत्वात्॥ शीघ्रगचंद्रः सूर्यपदंगतरितभच्छाया सूर्यात
नुरूपगमनं प्रतिपश्चाद्रागस्यमिति वारंभं करोत्यतश्चंद्रबिंबस्य पूर्वभागे स्पर्शः॥ भ्रमात् निःक्रम्याग्रे चंद्रो यदा गच्छति तदा चंद्रस्य पश्चाद्भागे भ ४२
ावि वियोगात् पश्चान्मोक्षः॥ सूर्यचंद्रः पश्चादागत्याच्छादयत्यतः सूर्यस्य पश्चिमभागे स्पर्शः॥ भ्रमात् निःक्रम्याग्रे चंद्रोपरागं करोति तदा चंद्रस्य पश्चाद्भा
गे भावि वियोगात् पश्चान्मोक्षः॥ सूर्यचंद्रः पश्चादागत्याच्छादयत्यतः सूर्यस्य पश्चिमभागे स्पर्शः पूर्वभागे मोक्ष इति॰॥ ४॥ ॥अथ वलनवृत्ते व
लनदानमाह॰ यथादिशं ग्रहणं वलनं हिमरश्मिते॥ मोक्षिकं तु विपर्यस्तं विपरीतमिदं रवेरिति॥ चंद्रस्य ग्राह्यस्य स्पार्शिकं वलनं॰ पूर्वबिन्दु
तः॥ यथादिशं॰ दक्षिणं चेद्दक्षिणाभिमुखमुत्तरं चेदुत्तरमुखं वाशांपरसूत्रादर्धज्यावद्वलनाश्रितवृत्ते देयमतएव तद्वृत्तं वलनाश्रितसंज्ञं॥ मोक्षि
कं॰ मोक्षकालिकं॰ तु राहुग्रस्तचंद्रस्य वलनं॰ विपर्यस्तं॰ विपरीतं॰ पश्चिमबिन्दोः पूर्वापरसूत्रादर्धज्यावद्दक्षिणं चेदुत्तरदिगभिमुखमुत्तरं

चेद्दक्षिणदिगभिमुखं देयमित्यर्थः॥ सूर्यग्रहणे विशेषमाह॥ विपरीतमिदं रवेरिति॥ सूर्यस्य ग्राह्यस्य॰ इदं॰ स्पार्शिकं मोक्षिकं वलनं॰ विपरीतं॰ यस्ते॰
मोक्षिकं वपने पूर्वबिन्दोः पूर्वापरसूत्रादर्धज्यावद्दक्षिणं चेद्दक्षिणदिगभिमुखमुत्तरं चेदुत्तरदिगभिमुखं॰ स्पार्शिकं वलनं पश्चिमबिन्दोः पू
र्वापरसूत्रादर्धज्यावद्दक्षिणं चेदुत्तरदिगभिमुखमुत्तरं चेद्दक्षिणदिगभिमुखं देयमित्यर्थः॥ अत्रोपपत्तिः॥ चंद्रस्य पूर्वभागे स्पर्श इति समभंड
लपूर्वबिन्दोर्वलनांतरेण स्पर्श इति तद्वृत्ते यथाशं स्पार्शिकं वलनं देयं॰ पश्चिमत उत्तराभिमुखस्य दक्षिणत्वाद्दक्षिणाभिमुखस्योत्तरत्वान्मोक्षि
कं वलनं पश्चिमबिन्दोर्विपरीतं देयं॰ सूर्यस्य तु पश्चिमभागे स्पर्शात् पश्चिमबिन्दोः स्पार्शिकं वलनं व्यस्तं देयं॰ पूर्वभागे मोक्ष इति मोक्षिकवलनं
पूर्वबिन्दोर्यथाशं देयमिति॥ ५॥ ॥अथ द्वितीयवृत्ते स्पार्शिकमोक्षिकविक्षेपयोर्दानमाह वलनाग्रान्मध्ये सूत्रे यत्र संस्पृशेत्॥ तत्सम
सेनतोद्दयौ विक्षेपौ ग्रासमोक्षिकाविति॥ प्रथमवृत्ते यत्र स्पार्शिकवलनाग्रं यत्तु मोक्षिकवलनाग्रं ज्ञातं॥ तस्मात्॰ यत्॰ प्रत्येकं सूत्रं रेखामित्य
र्थः॥ मध्यं॰ तन्मध्यबिन्दुकेंद्ररूपं प्रतिनयेत्॥ तत्॰ रेखात्मकं सूत्रं॰ समासे॰ समासाख्यद्वितीयवृत्तपरिधौ॰ यत्र यस्मिन् प्रदेशे संस्पृशे
त्॥ स्पर्शं कुर्यात्॥ ततः तत्प्रदेशादवधिरूपात् समासवृत्ते तदर्धज्यावत् यथादिशौ स्पार्शिकमोक्षिकविक्षेपौ यथायोग्यं देयौ॰ अत्रोपपत्तिः॥ वलनाग्र
सूत्रमानैक्यखंडवृत्ते यत्र लग्नं तत्र क्रांतिवृत्तप्राच्यपरा ततः सूर्यचंद्रस्य विक्षेपांतरेण मध्या समासवृत्ते वलनाग्रसूत्रं विक्षेपरेखा ग्राहक बि
ंबकेंद्रज्ञानार्थं परं सूर्यग्रहणे तु चंद्रग्रहणे चंद्रस्य विक्षेपवृत्तस्थत्वात्तदानीं तद्वलनाग्रादगत वलनाग्ररेखा मानैक्यखंडवृत्ते यत्र ल
ग्ना तत्र क्रांतिवृत्तानुसृतप्राच्यपरा विक्षेपमंडले तत्स्थाने छाद्यचंद्राच्छादकः सूर्यो विक्षेपांतरेण विक्षेपदिग्विपरीतदिशि भवतीति वल
नाग्रसूत्रात् तन्मानवृत्ते द्व्यावत्सरोध्यस्तो देय इति सिद्धं॰ अत एव विपरीताः शशांकस्य स्पष्टो क्तं॥ ६॥ अथ ग्रासवृत्ते स्पर्शमोक्ष
स्थानज्ञानमाह विक्षेपाग्रात् पुनः सूत्रं मध्यबिंदुं प्रवेशयेत्॥ तद्ग्राह्यबिंबसंस्पर्शाद्ग्रासमोक्षौ विनिर्दिशेदिति॰ विक्षेपाग्रं समासवृत्ते य
त्र लग्नं तस्मात्॰ सूत्रं॰ रेखामित्यर्थः॥ अत्र रेखासरलाना यातीति शंक्या प्रथमतो वधिद्वयांतः सूत्रं धृत्वा तदनुसारेण रेखा कार्येति सूत्र
नार्थसप्तोक्तिः सूर्य॰ सूर्यक्रमौ॰ पुनः द्वितीयवारं॰ पूर्ववत् नाग्रारेखाग्राः मध्यकेंद्रावधिकाः कृताः तथैव विक्षेपाग्राद्रेखामित्यर्थः तत्
मध्यरूपकेंद्रं बिंदुं प्रतिगणकः प्रवेशयेत्॥ प्रविष्टं कुर्यादित्यर्थः॥ तद्रेखाग्राह्यबिंबवृत्तपरिधौ संयोगात्॥ ग्रासमोक्षौ॰ स्पर्शमोक्षौ॰ ग
णकः विनिर्दिशेत्॥ कथयेत्॥ स्पार्शिकरेखाग्रस्तं ग्राह्यवृत्ते यत्र लग्नं तत्र स्पर्शः॥ मोक्षिकरेखाग्रस्तं ग्राह्यवृत्ते यत्र लग्नं तत्र मोक्ष इ
त्यर्थः॥ अत्रोपपत्तिः॥ मानैक्यखंडवृत्ते यत्र ग्राहकबिंबकेंद्रं तत्स्थाद्ग्राहकाद्ग्रहं वृत्तं ग्राहकवृत्ते ग्राह्यवृत्ते यत्र लग्नं तत्र स्पर्शमोक्षौ भवतः॥ तत्र
रेखाकरणकाघवाद्ग्राहककेंद्राद्ग्राहककेंद्रं यावत्तस्यं मानैक्यखंडमितं ग्राह्यवृत्ते यत्र लग्नं तत्र परिधौ स्पर्शमोक्षौ स्पष्टव्यासार्द्धयोगात्॥ ७॥

285
1918

सू॰ टी॰

४४

अथ ग्रहणे विक्षेपस्य दिग्व्यवस्थां मध्यग्रहण ज्ञानार्थं मध्यकालिकवलनदानं च श्लोकाभ्यामाह॥ निस्त्योर्कस्य विक्षेपाः परिलेखे यथादि
शः॥ विपरीताः शशांकस्य तद्वशादथ मध्यमं॥ ८॥ वलनं प्राङ्मुखं देयं तद्विक्षेपैकतां यदि॥ भेदे पश्चान्मुखं देयमिंदो र्भानो र्विपर्ययादिति॥ अ
र्कस्य ग्रहणे॰ चंद्रविक्षेपाः परिलेखे॰ ग्रहणभेददर्शनप्रकारे॰ यथादिशः॰ दिशः॰ निस्सृताः॥ सितं॰ ज्ञेयाः॥ चंद्रस्य ग्रहणे॰ चंद्रविक्षेपाः विपरी
ताः दक्षिणाश्चेदुत्तराउत्तराश्चेद्दक्षिणाः॥ तदनुरोधेनैवस्पार्शिकमौक्षिकविक्षेपौ देयौ न यथागतदिशाविति ज्ञेयं। यथानंतरं तद्वशात॥ म
ध्यग्रहणकालिकविक्षेपदिशः सकाशात॥ सूर्यग्रहणे मध्यग्रहणकालिकस्य स्पष्टविक्षेपदिक्क्रान्त्या चंद्रग्रहणे मध्यकालिकविक्षेपदिग्विप
रीतदिक्क्रान्त्यादित्यर्थः॥ यदि॰ यहीत्यर्थः॥ तद्विक्षेपैकता॰ तत॰ वलने॰ विक्षेपो॰ मध्यग्रहणकालिकविक्षेपः॥ अनयोरेकतः तैक्यं दिक्
संबंधेनेति बोध्यः॥ एकदिक्त्वमित्यर्थः॥ अत्र चंद्रविक्षेपदिग्यथास्थितैव न विपरीता दिग्भिन्नत्वे यं॰ प्राङ्मुखं॰ पूर्वचिह्नासंमुखं॰ वलनाश्रित
सूत्रे र्धज्यावन्मध्यग्रहणकालिकचंद्रस्य वलनं पश्चिमचिह्नसंमुखं देयं॰ सूर्यग्रहणे विशेषमाह भानोरिति॰ सूर्यग्रहणे सूर्यस्य वलनं॰ वि
पर्ययात॥ उक्तवैपरीत्यात॥ तद्दिग्भिन्नत्वे पश्चिमचिह्नसंमुखं भिन्नदिक्त्वे पूर्वचिह्नसंमुखं देयं [illegible] ग्रहणे विशेषमाह भो [illegible] इत्यर्थः॥ फलि
तार्थस्तु चंद्रग्रहणे मध्यकालवलनदिक्कालविक्षेपयथागतदिशोर्दक्षिणत्वे उत्तरचिह्नाद्वलनाश्रितसूत्रे र्धज्यावन्मध्यवलनं पूर्वचिह्ना
भिमुखं देयं॰ तयोरुत्तरत्वे दक्षिणचिह्नात्पूर्वाभिमुखं वलनं देयं॰ यदि दक्षिणवलनं उत्तरविक्षेपस्तदा दक्षिणदिक्चिह्नादर्धज्यावत्पश्चिम
चिह्नाभिमुखं वलनं देयं॰ यद्युत्तरं वलनं दक्षिणविक्षेपस्तदा वलनाश्रितसूत्रे उत्तरचिह्नात्पश्चिमचिह्नाभिमुखं वलनमर्धज्यावद्देयं॰ सूर्यग्र
हणे तु तयोर्दक्षिणत्वे वलनाश्रितसूत्रे दक्षिणचिह्नात्पश्चिमचिह्नाभिमुखं वलनं देयं॰ उत्तरत्वे उत्तरचिह्नात्पश्चिमाभिमुखं देयं॥ यदि दक्षि
णं वलनं उत्तरविक्षेपस्तदोत्तरचिह्नात्पूर्वाभिमुखं यद्युत्तरं वलनं दक्षिणविक्षेपस्तदा दक्षिणचिह्नात्पूर्वाभिमुखं देयमिति॰ भास्कराचा
र्यैस्तु न दुक्तफलितं लाघवेन दक्षिणोत्तरवलनं क्रमेण सव्यापसव्यं देयमित्युक्तं॥ अत्रोपपत्तिः॥ प्रथमश्लोकोपपत्तिः॥ स्पार्शिकमौक्षिकश
रादात्मेपन्नावुक्ताः ग्राह्यबिंबकेंद्राद्विक्षेपांतरेण ग्राहकबिंबकेंद्रं भवति॰ शरस्य केंद्राभिमुखत्वेन केंद्रात्केंद्राभिमुखत्वाच्छरदानार्थं केंद्रंव
ज्ञानं वलनाश्रितसूत्रे आवश्यकमतो वलनांतरेण स्वदिग्भ्यः क्रांतिवृत्तदिशोऽसत्वात् उत्तरदक्षिणदिग्भ्यो मध्यवलनांतरेण क्रांतिवृत्त
याम्योत्तररूपकं देयं॥ दक्षिणोत्तरतरत्नि। पूर्वपश्चिमानुरोधेन तज्ज्ञानं युक्तमेव यद्यपि चंद्रग्रहणे शरस्य विपरीतदिक्त्वात्तदुत्तरदिग्ग्रहणेन
सूर्यचंद्रयोर्मध्यवलनदानमेकदिक्त्वे पश्चिमचिह्नाभिमुखं भिन्नदिक्त्वे पूर्वाभिमुखं भिन्नत्वेऽपि त्यपरं तथापि सूर्यचंद्रयोर्ग्रहणभेदाद्देको
कोमंदबुद्धीनां भ्रमसंभवस्तद्वारणार्थं यथागितोक्तिः कृता॰ सततेत्रेऽस्य नियोगान हैता ह्यु॥ ९॥ अथ मध्यग्रहणं श्लोकाभ्यां परिले

४४

रवेदर्शयति॰ वलनाग्रात्पुनः सूत्रं मध्यबिंदुं प्रवेशयेत॥ मध्यसूत्रेण विक्षेपं वलनाभिमुखं नयेत॥ १०॥ विक्षेपाग्रे लिखेद्वृत्तं ग्राहकार्धेन ते
न यत॥ ग्राह्यवृत्तं समाक्रांतं तद्ग्रस्तं तमसा भवेदिति॰ वलनाग्रात॥ मध्यकालिकवलनाग्रात्पूर्वश्लोकोक्तात॥ सूत्रं॰ रेखां॰ मध्यबिंदुं रेख
मध्यचिह्नं प्रति॰ पुनः वारंवारं॰ पूर्वं स्पार्शिकमौक्षिकवलनाग्राभ्यां सूत्ररचनार्थं वेत्यर्थः॥ प्रवेशयेत॥ गणकः प्रविष्टं कुर्यात॰ मध्य
सूत्रेणानेन मध्यकालिकविक्षेपं मध्यवलनाग्राभिमुखं नयेत॥ मध्यवृत्तबिंदोरित्यर्थः सिद्धं॥ तथा च वृत्तमध्यान्मध्यवलनाग्रसूत्रेवि
क्षेपांगुलानि गणयित्वा तदग्रे चिह्नं कुर्यादित्यर्थः॥ अस्माद्विक्षेपाग्रात॰ ग्राहकबिंबमानार्धेन॰ वृत्तं॰ गणको लिखेत॰ तेन वृत्तेन॰ यत्। यन्मितं।
ग्राह्यवृत्तं समाक्रांतं॰ आप्तं॰ तत॰ ग्राह्यवृत्तविभागरूपः तमसा॰ अंधकाररूपेण छादकेन ग्रस्तं॰ आच्छादितं॰ स्यात॰। तन्मितं विभागं म
ध्यादिनालिप्तं कुर्यादित्यर्थः। अत्रोपपत्तिः॥ वृत्तमध्यसूत्रं केंद्राभिमुखं तत्र ग्राह्यकेंद्राच्छरांतरेण ग्राहककेंद्रं तस्माद्ग्राहकार्धेन वृत्तं
ग्राहकबिंबवृत्तं तेन ग्राह्यवृत्ते यावदाक्रांतं तावन्मध्यकाले ग्रस्तं मिलितद्वागस्य कृष्णत्वेनाकाशे दर्शनात्तमसा ग्रस्तमित्युक्तं॥ ११॥ ननु पूर्व
कपाले ग्रहणयोः संभवे सर्वमुक्तमुपपन्नं॰ पश्चिमकपाले ग्रहणसंभवे परिलेखोक्तं वैपरीत्यं न भवति॰ यथाहि॰ यस्यां दिशि परिलेखे स्पर्शो
मोक्षो वा परकपाले तस्य पश्चिमाभिमुखत्वेन दर्शनेऽदिग्वैपरीत्यं प्रत्यक्षमित्यत आह छेद्यकेलिखत भ्रमौ कलके वा विपश्चिता॥ विपर्ययो
दिशां कार्यः पूर्वापरकपालयोरिति॰ भ्रमौ॰ फलके॰ काष्ठपट्टिकायामित्यर्थः॥ वा॰ विकल्पे॰ भूमौ लिखितस्येतस्त्ततो नयनासंभवात्फलके
युक्तिः॥ छेद्यकं प्रागुक्तं लिखिता गणकेन॰ विपश्चिता॰ तत्त्वज्ञेन दिशां॰ पूर्वादिदिशां॰ पूर्वापरकपालयोः विपर्ययः॥ व्यत्यासः कार्यः॥ य
था पूर्वकपाले सव्यक्रमेण पूर्वादिलिखनं तथा परकपाले सव्यक्रमेण पूर्वादिलिखनेन कार्यं॰ किंतु पश्चिमस्थाने पूर्वा पूर्वस्थाने पश्चिमा॰ उ
त्तरपश्चिमदिग्भागक्रमेणोत्तरदक्षिणलेख इत्यर्थः॥ तेन पश्चिमकपाले ग्रहणसंभवेऽपि परिलेखोक्तं॥ संवदत्येवेति भावः॥ अत्रोपपत्तिः॥
दिग्वैपरीत्यं भवतीति पूर्वमेव वैपरीत्येन दिशां लेखने परिलेखो यथास्थितो भवतीति युक्तं भास्कराचार्यैस्तु नैतदुक्तं॰ परिलेखेनामुकस्यादि
ग्रपमुक्तं भवतीति ज्ञानस्य वचनकत्वेन तस्य तथा बाधात॥ न हि यथाकाशे तथादर्शनमतो भूमौ फलके वाकाशादीनां वास्तवानामभावात॥ अ
तएव किंचिन्न्यूनं दृश्यं न दृष्टांतत्वमिति ध्येयं॥ १२॥ अथामादृश्यग्रहणमाह स्वच्छत्वाद्द्वादशांशोऽपि ग्रस्तश्चंद्रस्य दृश्यते॥ लिप्तात्रयमपि ग्र
स्तं तीक्ष्णत्वान्न विवस्वत इति॰ चंद्रबिंबस्य द्वादशांशः॥ ग्रस्त आच्छादितः॥ अपि शब्दाद्राछादनेन तेजोहीनत्वाद्दृश्यतासंभावनायामित्यर्थः
न दृश्यते॰ हेतुमाह स्वच्छत्वादिति॰ तदतिरिक्तसंपूर्णदृश्यभागस्य स्वच्छत्वात॥ ज्योत्स्नावत्त्वात॥ तथा च तत्पौत्स्नाधिक्येन ग्रस्तो व्यस्तो

283/1918

तः स्वाकारेण दृश्यते शोक्लावल्ले न दूरत याभासते॥ सर्वस्यापि ग्रासपर्यंत ग्रस्तमपि न दृश्यते॥ अत्र हेतुमाह तीक्ष्णत्वादिति॰ सूर्यस्य तेजस्वे
स्फुले कनयवमपि ग्रासार्ह त्वाद्वे स्यर्थः॥ रवेरूपसिद्धेन तु॰ ग्रस्तेशांशो कस्यकलाद्वयं चेत्कलाद्वयं भानुमतो न लक्ष्यं॥ तत्किंचिद्दृनं त्रुट्यास्त
काले लक्ष्यं वलमौकर गुंफ्रहीनावि सुक्रमत उदयास्तकाले उक्तम रक्षयं रक्षपमिति ध्येयं॥ १३॥ अथेष्टग्रासपरिलेखार्थं ग्राहमार्गज्ञानं श्लोक
त्रयेणाह॥ स्व संज्ञिता स्पर्शः कार्या विक्षेपाग्रेषु बिंदवः॥ तत्र प्राग्वदयोर्मध्ये तथामौक्तिकमध्ययोः॥ १४॥ लिखेन्मत्स्यौ तयोर्मध्यान्मुखपुच्छ
विनिःसृतं॥ प्रसार्यसूत्र द्वितयं तयोर्यत्र युतिर्भवेत्॥ १५॥ तन्मस्त्रेण विलिखेच्चापं बिंदुत्रयस्पृशा॥ स पंथा ग्राहकस्योक्तो येनासौ संप्रय
स्यतीति॰ विक्षेपाग्रेषु॰ स्पार्शिकमौक्तिकमध्यविक्षेपाणां पूर्वं स्वस्थाने स्पर्शमोक्षमध्यग्रहणज्ञानार्थं दत्तानामग्निमभागेषु॰ स्वसंस
पासंकेतिताः बिंदवः स्पर्शः कार्याः॥ स्पर्शाग्राग्रे स्पर्शोपचिह्नांकितोबिंदुर्मोक्षशराग्रे मोक्षचिह्नांकितो बिंदुर्मध्यचिह्नांकितो बिंदुरिति त्रयो
बिंदवो गणकेन स्थाप्याः॥ तमउपस्थितबिंदुत्रयमध्ये॰ प्राग्वद्धयोः स्पर्शमध्यबिंदुमध्ये तराले॰ मौक्तिकमध्ययोस्तत्संज्ञयोबिंद्वो
स्तथा॥ अंतराले॰ मत्स्ये द्वौ मत्स्यौ लिखेदित्यंतरद्वयेगणकोमत्स्यौ लिखेत्॥ तयोः॥ मत्स्ययोर्मध्यात्॥ मुखपुच्छाभ्यां॰ विनिःसृतं निष्का
सितं प्रत्येकं सप्रमिति सूत्र द्वितयं॥ प्रसार्य॰ अये पि स्वमार्गे पतितः सापितयोः॥ स्व स्व मार्गप्रसारितसूत्रयोः॥ तत्र॰ प्रदेशे युतिर्योगस्यात्तत्
प्रदेशोद्देशं प्रकल्प्य॥ स्वेन बिंदुत्रयस्पर्शाः प्रकल्पितकेंद्रबिंदुत्रयात्मतमविंदुतत्सूत्रेण॰ व्यासार्धरूपेणेत्यर्थः॥ चापं॰ स्पृशैकदेशरूप
धनुर्बिंदुत्रयस्पृष्टं लिखेत्॥ गणकः कुर्यादित्यर्थः॥ सः चापात्मको वृत्तैकदेशः॥ ग्राहकस्य॰ छादकस्य॰ पंथाः॥ मार्गः॥ येन मार्गेणासौ ग्राह
कः॥ संप्रयास्यति॰ ग्राह्यबिंबछादनार्थं गमिष्यति॰ परिलेखस्य ग्रहणकालपूर्वं कालावरंभावित्वात्॥ अत्रोपपत्तिरिष्टेक्रिमध्यग्राकृपश्या
दितिभिमश्याधिकारांतर्गतश्लोकोपपत्तिः प्राक्प्रतिपादिता॥ १६॥ अथेष्टग्रासपरिलेखं श्लोकत्रयेणाह ग्रास्यग्राहकयोगार्धात्प्रोह्येष्ट
ग्रासमागतं॥ अवशिष्टांगुलस्याशलाकां मध्यबिंदुतः॥ १७॥ तया मार्गोन्मुखीं दद्याद्ग्रास्तः प्राग्रहाश्रितां॥ विमुंचतो मोक्षदिशिग्राका
धानमेवसा॥ १८॥ स्पर्शे प्रवर्तता वृत्तग्राहकार्धेन संलिखेत्॥ तेन ग्रास्यापशाक्रांतेतत्तमोतस्तमादिशेदिति॥ मानैक्यखंडादिष्टक
लिकाभीष्टग्रासं॰ आगतं॰ चंद्रग्रहणाधिकारोक्तप्रकारावगतं॰ त्यक्त्वा॰ अवशिष्टान्यान्यंगुलानितत्प्रमाणां शलाकां॰ यष्टिं॰ मध्यबिंदुतः
स्वतनप्रमधारें दुबिंदोः सकाशात्॰ तयोः॥ स्पर्शमोक्षविक्षेपाग्रयोः॥ मार्गोन्मुखीं॥ स्व बद्धमार्गचापरेखाभिमुखीं॥ मार्गरेखासक्तां दद्या
त्॥ कथमित्यतआह ग्रस्यतइति मध्यग्रसतः॥ प्राक्पूर्वकाले॰ ग्राहाश्रितां॰ ग्रहः स्पर्शस्तच्छरायसंबंधिमार्गचापरेखासक्तां शलाकां
विमुंचतः॥ मुच्यमानां तगंताभीष्टग्रासस्य शलाकां॥ मोक्षदिशि॰ मोक्षविक्षेपाग्रसंबंधिमार्गचापरेखायां सक्तां दद्यात्॥ सा॰ शलाका॰ ४९

1918

ग्राहकाधानं ग्राहकमार्गचापरेखा॰ यत्र॰ यस्मिन्भागे॰ स्पृशेत्॰ सलग्नास्यास्यात्॥ ततः तत्स्थानात्॥ एवकारस्तदतिरिक्तव्यवच्छेदार्थः॥ ग्रा
हकमानार्धेन व्यासार्धेन वृत्तं॰ संलिखेत्॰ सम्यक्प्रकारेण कुर्यात्॥ तेन वृत्तेन॰ ग्रास्यात्॥ ग्राह्यवृत्तात्॥ यत्॥ यन्मितमेकदेशरूपं वृत्तं॥ आ
क्रांतं॰ व्याप्तं॰ तत्॰ तन्मितग्रास्यवृत्तांशं तमोग्रस्तं॰ छादकछादितमभीष्टकाले॰ आदिशेत्॥ कथयेत्॥ अत्रोपपत्तिः॥ इष्टग्रासोनमानैक्य
खंडं कर्णः॥ स तु ग्राह्यग्राहककेंद्रांतररूपः॥ अतो यथा स्वकेंद्रात्सर्वत्रात्ग्राहकमार्गरेखायां यत्र लग्नस्तत्राभीष्टसमये ग्राहककेंद्रं॰ तस्माद्ग्राह
कवृत्तेन ग्रास्यवृत्तं यदाक्रांतं तत्काले ग्रास इति सुगमं॥ १९॥ अथश्लोकाभ्यां निमीलनपरिलेखमाह मानांतरार्धेन मितां शलाकां॰ ग्रासदिङ्मु
खीं॥ निमीलनाख्यं दद्यात्सो मार्गं यत्र संस्पृशेत्॥ २०॥ ॥ ततो ग्राहकखंडेन प्राग्वन्मंडलमालिखेत्॥ तद्ग्राह्यमंडलं युतिर्यत्र तत्र निमीलन
मिति॥ ग्राह्यग्राहकबिंबमानयोरंतरस्यार्धेन परिमितां शलाकां॰ निमीलनसंज्ञां॰ ग्रासदिङ्मुखीं॰ स्पार्शिकशराग्रविभागाभिमुखीं॰
मध्यबिंदोः सकाशाद्दद्यात्॥ सा निमीलनसंज्ञाशलाकां॰ निमीलनसंज्ञां॰ ग्रासदिङ्मुखीं॰ तन्मार्गं स्पार्शिकग्राहकमार्गचापरेखाका
रत्॥ यस्मिन्प्रदेशे संलग्ना तेस्यां॥ तत्स्थानात्॥ ग्राहकमानार्धेन॰ प्राग्वत्॥ मध्याभीष्टग्रासज्ञानार्थं यथा तद्वृत्तं कृतं तथेत्यर्थः॥ वृत्तं कुर्यास्व
त्॥ तद्ग्राह्यमंडलयुतिः॥ लिखितवृत्तग्राह्यवृत्तयोः संयोगः॥ यत्र यस्यां दिशि॰ तत्र॰ तस्यां दिशि निमीलनं ग्राह्यबिंबे निमज्जनं स्यात्॥
अत्रोपपत्तिः॥ संमीलनकाले ग्राह्यग्राहककेंद्रांतरमानार्धांतरमितं कर्णः॥ अन्यथा तदनुपपत्तेः॥ सा ग्राह्यकेंद्रात्स्पर्शमार्गे यत्र लग्नस्तत्र ग्रा
हककेंद्रं तस्माद्ग्राहकवृत्तं ग्राह्यमंडलं यत्र स्पृशति तत्र निमीलनं स्पष्टं॥ २१॥ अथोन्मीलनपरिलेखमाह एवमुन्मीलने मोक्षदिङ्मुखीं सं
प्रसारयेत्॥ विलिखेन्मंडलं प्राग्वदुन्मीलनमथोक्तवदिति॥ उन्मीलने॰ उन्मीलनज्ञानार्थमित्यर्थः॥ एवं बिंबमानांतरार्धमितां शला
कां॰ मोक्षदिङ्मुखीं॰ मौक्तिकशराग्रविभागाभिमुखीं॰ मध्यबिंदोः सकाशात्॥ संप्रसारयेद्दद्यादित्यर्थः॥ प्राग्वत्॥ संमीलनार्थं दत्तकाल
स्पार्शिकमार्गे योगस्थाना ग्राहकार्धेन वृत्तं॥ कृतं तथेत्यर्थः॥ मौक्तिकमार्गदत्तशलाकायोगस्थाना ग्राहकवृत्तं कुर्यात्॥ अथानंतरं॰ उक्त
वतः ग्राहकग्राह्यवृत्तयोगो यस्यां दिशि तस्यां दिशीत्यर्थः उन्मीलनं॰ ग्राह्यबिंबस्योन्मज्जनं स्यात्॥ अत्रोपपत्तिः॥ उन्मीलनेपि ग्राह्यग्रा
हककेंद्रांतरमानार्धांतरमितं कर्णः॥ परमपरमोक्षदिशीति युक्तिस्तुल्या॥ २२॥ अथ ग्रहणे चंद्रस्य वर्णानाह अर्धादूने स धूम्रं स्यात्
कृष्णमर्धाधिकं भवेत्॥ विमुंचतः कृष्णताम्रं कपिलं सकले ग्रह इति॰ अर्धादर्धबिंबात्॥ ऊने न्यूने ग्रस्ते सति॰ धूम्रं ग्रासीयबिंबं धूम्रवर्णं स्या
त्॥ अर्धाधिके ग्रस्ते बिंबं कृष्णं स्यात्॥ विमुंचतः॥ एतदनंतरं ग्रस्तमधिकमपि भुक्त्युन्मुखमिति मोक्षारंभोन्मुखस्य बिंबस्य॰ पादोनबिं
बाधिकग्रस्तस्य संपूर्णस्येत्यर्थः॥ कृष्णताम्रं श्यामारक्तमिश्रवर्णः॥ संपूर्णग्रहणे॰ कपिलं॰ पिंगगवर्णं बिंबं स्यात्॥ अत्रभाय

सू०टी०
४६

त्तओभा वनया चंद्राछादकत्वादेते वर्णाः संभवंति॥ सूर्यस्य तु चंद्रो जलगोलरूप आछादकः सर शीत दिवसेस्मदृश्या र्धे सदा कृष्णएवे
ति॥ कृष्ण एव सर्वस्य ग्रस्तांशाः सर्वदाः॥ अत एवाविकृतत्वाद्ग्रहवतावर्णा नोक्तः॥२३॥ अथो नकछेद्यकस्य गोप्यत्वमाह रहस्यमेतदेवानां नदेयं
यस्य कस्यचित॥ सुपरीक्षितशिष्याय देयं वत्सरवासिने इति॥ एतत॥ ग्रहणछेद्यकं॥ देवानां॥ गोप्यं वस्तु॥ यस्य कस्यचित्॥ यस्मै कस्मैचि
दपरीक्षिताय न देयं॥ कस्मैचिद्देयमित्यर्थागतं विवृणोति॥ सुपरीक्षितशिष्यायेति। सुपरीक्षितमित्यत्र हेतुगर्भं विशेषणमाह। वत्सर वा
सिने इति॥ वर्षपर्यंतं तत्संगत्या तेस्य तत्तत्याज्ञानं भवत्येवेति भावः॥२४॥ अथास्मिन् ग्रंथस्यास्य संगतित्वनिराशार्थमधिकारसमा
प्तिं फक्किकयाह इति छेद्यकाध्याय इति॥ ग्रहणभेदज्ञापकपरिलेखप्रतिपादनं परिपूर्तिं समाप्तमित्यर्थः॥ इत्थं दशभेदं ग्रहगणितमित्यु
क्त्या गणितनिर्वाभावाद्ग्रहगणाधिकारान्तेगतं॥ नाधिकारांतरमतएवाधिकारः स्तुपेक्ष्याध्याय इत्युक्तं॥ ॥ रंगनाथेन रचिते सूर्यसि
द्धांतटिप्पणे॥ छेद्यकं ग्रहणान्तस्त्य पूर्णं गूढप्रकाशके॥५॥ ॥ इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गू
ढार्थप्रकाशके छेद्यकाधिकारः संपूर्णः॥ ॥ अथ युत्याभासग्रहणनिरूपणेन संस्थलत्वप्यारब्धो ग्रहयुत्यधिकारो व्याख्यायेत॥ ॥तत्र
युतिभेदानाह तारा ग्रहाणामन्योन्यं स्यातां युद्धसमागमौ समागमः॥ शशांकेनस्तं पूर्णस्तमनं स्मृतेति॥ तारा ग्रहाणां भौमादिपंचग्रहाणां॥ परस्पर
योगे युद्धसमागमौ वक्ष्यमाणलक्षणविनौ स्तः॥ चंद्रेण सह पंचतारान्यतमस्य योगः समागमसंज्ञः॥ सूर्येण सह पंचताराणामन्यतमस्य
दृश्यत्वयोगस्त दस्तमनं॥ पूर्णसंगततं॥ ननु समागमे॥ युत्यभावे नागपरतेस्यकोले स्वतात॥ १॥ अथ युतेर्गतैष्यत्वं सार्धश्लोकेनाह शीघ्रमंदा
धिके नीतः संयोगो भविता न्यथा॥ द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्ययात्॥ २॥ प्राग्यायिन्यधिके नीतो वक्रिण्येष्यः समागमागम इति॥ यदा
ग्रहयोर्योगो भिन्नमितस्तयोर्ग्रहयोर्मध्ये यः शीघ्रगतिर्ग्रहस्तस्मिन्॥ मंदाधिके॥ मंदगतिग्रहादधिके सति तयोः संयोगो युतिसंज्ञो गतः पूर्व
जात इत्यर्थः॥ अन्यथा मंदगतिग्रहे शीघ्रगतिग्रहादधिके सती त्यर्थः॥ तयोर्योगो भविता॥ एष्यः॥ एवमुक्तं गतैष्यत्वं॥ द्वयोर्ग्रहयोः प्राग्यायिनोः
पूर्वगतिकयोर्भवति वक्रिणोः॥ वक्रगतिग्रहयोः॥ विपर्ययात्॥ उक्तवैपरीत्यात्॥ तु काराद्भवेत्योगो भवति शीघ्रगतिग्रहे मंदगतिग्रहादधिके
एष्यः संयोगः॥ मंदगतिग्रहे शीघ्रगतिग्रहादधिके गतः संयोग इत्यर्थः॥ अथैकस्य वक्रत्वे आह प्राग्यायिनीति॥ द्वयोर्मध्ये एकस्मिन्वक्रि
णि सति॥ तदा वक्रगतिग्रहात् पूर्वगतिग्रहेधिके सति गतो योगः यदा तु पूर्वगतिग्रहाद्वक्रगतिग्रहेधिके सति समागमो योग एष्यः स्यात्॥ अ
त्रोपपत्तिः पूर्वगत्योर्ग्रहयोर्मध्ये शीघ्रस्याधिकत्वेग्रे योगासंभवात्पूर्वं योगो जातः॥ मंदगस्याधिकत्वे शीघ्रगस्य न्यूनत्वाद्ग्रे योगो भविष्यति॥ व
क्रिणोः शीघ्रगस्याधिकत्वेग्रेनन्तरं तेन योगसंभवाद्ग्रे योगो मंदगस्याधिकत्वे शीघ्रगस्योत्तरोत्तरं न्यूनत्वसंभवेनाग्रे योगासंभवाद्गतो यो
४६

गः॥ अथ वक्रगतिग्रहात्पूर्वगतिग्रहेधिके उत्तरोत्तरं योगासंभवाद्गतो योगः॥ पूर्वगतिग्रहाद्वक्रगतिग्रहेधिके वक्रगतिग्रहस्य न्यूनत्वेनाग्रे
योगसंभवादेष्यः संयोग इति॥ ॥ अथ युतिकाले तुल्यग्रहयोरानयनं युतिकालस्य गतैष्यदिनाद्यानयनं च सार्धश्लोकत्रयेणाह ग्रहा
तरकलाः स्वस्वभुक्तिलिप्ता समाहताः॥ भुक्त्यंतरेण विभजेदनुलोमविलोमयोः॥ ३॥ द्वयोर्वक्रिण्यथैकस्मिन्भुक्तियोगेन भाजयेत्॥ लब्धं
लिप्तादिकं शोध्यं गते देयं भविष्यति॥ ४॥ विपर्ययाद्वक्रगत्योरेकस्मिंस्तु धनव्ययौ॥ समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ॥ ५॥ विवरं तद्वदु
धृत्य दिनादिफलमिष्यते इति॥ युतिसंबंधिनोर्ग्रहयोरभीष्टैककालिकयोरंतरस्य कलाः पृथक् स्वस्वगतिकलाभिर्गुणिताः॥ कर्मार्हयोर्ग्रह
योरनुलोमविलोमयोः॥ मार्गगयोर्वक्रगत्योर्वेत्यर्थः॥ स्फुटगत्यंतरेण॥ गणकः॥ भजेत्। विशेषमाह वक्रिणीति॥ अथानंतरं॥ द्वयोर्मध्ये
एकस्मिन्वक्रिणि सति॥ तयोर्गतियोगेन भजेत्॥ फलं कलादिकं स्वस्वगते योगे सति ग्रहयोर्मार्गयोः शोध्यं॥ भविष्यति॥ एष्ये योगे स
ति॥ तयोर्देयं॥ योज्यं॥ द्वयोर्वक्रगत्योः स्वस्वफलं॥ विपर्ययादुक्तवैपरीत्यात्कार्यं॥ गते योगे योज्यं॥ एष्ये योगे हीनमित्यर्थः॥ द्वयोर्मध्ये एक
स्मिंस्तु काराद्वक्रिणि सति॥ तयोर्ग्रहयोर्वक्रमार्गगयोः स्वस्वकलात्मकफलं कौ॥ धनव्ययौ॥ युतहीनौ कार्यौ॥ यथा हि॥ गते योगे मार्गगग्रहे स्वफलं
हीनं वक्रिणि ग्रहे योज्यं॥ एष्ये योगे वक्रग्रहे शोध्यं॥ मार्गगग्रहे योज्यमिति॥ एवं कृते॥ तौ॥ युतिसंबंधिनौ॥ ग्रहौ॥ भगणसंस्थितौ॥ भगणे॥
राश्यधिष्ठितचक्रे संस्थितिर्ययोस्तौ॥ राश्याद्यात्मकौ॥ समलिप्तौ॥ समकलौ स्तः॥ लिप्तापदस्य भगण॥ वयवोपलक्षणत्वेन समौ स्त इत्यर्थः॥
अथ युतिकालज्ञानमाह विवरमिति॥ अभीष्टकालिकयोर्युतिसंबंधिनोर्ग्रहयोरंतरं कलात्मकं॥ तद्वत् समकालोपयुक्तफलज्ञानार्थं य
थागतिगुणितमंतरं॥ गतियोगेन॥ गत्यंतरेण वा भक्तं तथेत्यर्थः॥ तेन हरेण भक्त्वा फलं दिनादिकं गतैष्ययुतिवशादभीष्टकालात्पूर्वे ष्य
मुच्यते॥ तत्समयेन युतिकाले तौ ग्रहौ समौ स्त इत्यर्थः॥ अत्रोपपत्तिः॥ गत्यंतरेण गतिकलास्तदा ग्रहांतरकलाभिः का इति फले गतयुतौ
ग्रहयोः शोध्ये॥ एष्ययुतौ योज्ये॥ द्वयोर्वक्रत्वे गत्यंतरभक्तफले गतयुतौ ग्रहयोर्योज्ये॥ एष्ययुतौ शोध्ये॥ वक्रग्रहस्योत्तरोत्तरं न्यूनत्वात्॥
अथैकोवक्रीत दा तयोरंतरं प्रत्यहं गतियोगेनोपचितमतो गतियोगहरेणागतफलं गतयोगे मार्गगग्रहे हीनं॥ पूर्वं तस्य न्यूनत्वात्॥ वक्रग्रहे यो
ज्यं॥ पूर्वं तस्याधिकत्वात्॥ एष्ययोगे मार्गगग्रहे योज्यं॥ उत्तरोत्तरमधिकत्वात्॥ वक्रग्रहे शोध्यं॥ तस्याग्रे न्यूनतात्। गतियोगेन गत्यंतरे
णवा दिनमेकं लभ्यते वदंतरकलाभिः किमित्यनुपातेन गतैष्यदिनाद्यं॥ ६॥ अथ दृक्कर्मार्थमुपकरणानि साध्यानीत्याह कृत्वा दिनक्ष
पामानं तथा विक्षेपलिप्तिकाः॥ नतोन्नतं साधयित्वा स्वकाद्ग्रहवशात्तयोरिति। तयोः समयोर्ग्रहयोः॥ दिनक्षपामानं प्रत्येकं दिनमानं
रात्रिमानं प्रसाध्य। विक्षेपकलाः। तथा प्रसाध्येत्यर्थः। अत्र भगवता विक्षेपकलाः प्रसाध्यत्वस्य दिनरात्रिमाने प्रसाध्येत्येतदनंतरमु

1918

सू॰टी॰
४७

कोदिनरात्रिमानं स्पष्टक्रांतिजचरेण न साध्यं किंतु समग्रहीयद्वारा संस्कृतकेवलक्रांतिजचरेण साध्यमिति सूचितं॥ समग्र
योः प्रत्येकं नतकालमुन्नतकालं प्रसाध्य अत्र मुख्यार्थं कंतयेत्येवेति॰ एतदर्थमेव दिनरात्रिमानं प्रसाध्येति पूर्वमुक्तं॰ समनंतरो
क्तं दृक्कर्म कार्यमिति वाक्यशेषः॥ ननु नतोन्नतं॥ कथं साध्यं॰ ग्रहोदयास्तानां तदवधिकालमानज्ञानाभावात्। नहि ग्रहस्य दिनरात्रि
गतकालज्ञानं विना केवलदिनरात्रिमानाभ्यां तत्सिद्धिरत आह स्वकाद्युग्नवशादिति॰ यस्मिन्काले समौ ग्रहौ जातौ तात्कालिक
लग्नं पूर्वोक्तप्रकारावगतं तद्ग्रहणात्। तद्ग्रहणादित्यर्थः॥ स्वकात्। समग्रहात्। प्रत्येकमुन्नतनतकाले प्रसाध्येइत्यर्थः। एतदुक्तं भवति
युतिकालिकलग्नमधिकसंज्ञं प्रकल्प्य स्वमग्रहे न्यूनसंज्ञं प्रकल्प्य भोग्यास्तननकस्याधयुक्तासूनधिकस्य च संपिंड्यांतरलग्नासु
नेवं स्यात्कालसाधनमिति त्रिप्रश्नाधिकारोक्त्या ग्रहस्य दिनगतं रात्रिगतं प्रसाध्य॰ दिने दिनगतशेषयो रात्रौ रात्रिगतशेषयोर्यद
ल्पं तदुन्नतं॥ तेनोनं दिनार्धं रात्र्यर्धं वा ग्रहस्य नतं॥ दिनक्षपामानं नतोन्नतमित्येकवचनेन समग्रहयोरभिन्नं दिनमानं रात्रिमानमुन्न
तमुन्नतं चेति सूचना दृश्योदयलग्नलग्नाभ्यामंतरकालः॥ प्रत्येकं भिन्नः साध्यः न वा स्पष्टक्रांतिजचरेण दिनरात्रिमाने प्रत्येकं॰
पर्दमुदयलग्नस्येवास्तेदृरिति स्फुटीकृतं॥ अत्रोपपत्तिः॥ तात्कालिकार्कलग्नाभ्यां यथा सूर्यस्योदयगतकालस्तथा तात्कालिकग्रहलग्ना
भ्यां ग्रहोदयगतकालः सिद्ध इति॥ यद्यपि सूर्यस्य क्रांतिवृत्तस्थत्वात्सूर्यस्य युक्तः कालः॥ ग्रहस्य तु क्रांतिवृत्तस्थत्वानियमादुक्तरीत्या गणि
कालस्य क्रांतिवृत्तस्थत्वात्सूर्यस्य युक्तः कालः॥ ग्रहस्य तु क्रांतिवृत्तस्थत्वाद्ग्रहचिह्नायत्वेपि ग्रहबिंबीयत्वाभावाद्युक्तत्वमत एव वक्ष्य
माणदृक्कर्मसंस्कृतग्रहाहानीतकालो ग्रहबिंबीयस्तथापि वक्ष्यमाणदृक्कर्मार्थं ग्रहचिह्नीयस्येवापेक्षितत्वान्नक्षतिः॥ ७ ॥ अथाक्षदृ
क्कर्म तत्संस्कारस्य ग्रहस्य श्लोकाभ्यामाह विषुवच्छायया भ्यस्ताद्विक्षेपाद्द्वादशोद्धृतात्॥ फलं स्वनतनाडीघ्नं स्वदिनार्धविभाजितं॥ ८ ॥ लब्धं
प्राच्यमृणं सौम्याद्विक्षेपात्पश्चिमे धनं॰ दक्षिणे प्राक्कपाले स्वं पश्चिमे तु तथा क्षयमिति॥ अक्षभया गुणितात्॥ ग्रहविक्षेपो दानीतात्। द्वादश
भक्तात्। लब्धं ततः स्वनतनाडीघ्नं॰ विक्षेपसंबंधिग्रहस्य नतघटीभिर्गुणितं॥ तस्य च दिनार्धेन भक्तं॰ रात्रौ रात्र्यर्धेनेत्यर्थः सिद्धं॥ अ
त्र समग्रहयोः पूर्वोक्तप्रकारेण दिनमानं तयोरभिन्नत्वात्स्वताद्वा उभयथा नानावस्थकेपि युतिव्यतिरिक्तदृग्ग्रहाणां प्रयोजनतया साधने
वैयधिकरण्यात् स्वार्थस्वपदं भगवतादत्तं॥ वस्तुतस्तु दृग्ग्रहयोस्तुल्यत्वे भगवता ग्रयुते॰ रुक्तत्वात्तात्कालिकयोः स्पष्टयोरतुल्य
त्वेन दृक्कर्मसाधनार्थं नतदिनमानयोस्तयोर्भिन्नत्वेन स्वपदं युक्तं॰ न तु स्पष्टक्रांतिजचरोत्पन्नदिनमानयोर्भेदान्नतभेदाच्च स्वमिति

293
1918

तं॥ तत्साधनस्यैव वैयधिकरण्येन प्रसक्तेरिति ध्येयं॰ उक्तरीत्योत्तराद्विक्षेपात्लब्धं तत्कालात्मकं॥ प्राच्यां॰ प्राक्कपाले ग्रहस्य हीनं॰ पश्चिम
कपाले योज्यं॰ दक्षिणे॰ तथा॰ विक्षेपे तु प्रागुत्तरात्स्वस्वं फलं प्राक्कपाले योज्यं पश्चिमकपाले हीनं कार्यं॥ ९॥ अथायनदृक्कर्माह सत्रिभग्रह
जक्रांतिभागघ्नाः क्षेपलिप्तिकाः॥ विकलाः स्वमृणं क्रांतिक्षेपयोर्भिन्नतुल्ययोरिति॥ विक्षेपकलाः पूर्वसाधिताः॥ राशित्रययुतग्रहोत्पन्नै
क्रांत्यंशैर्गुणिताः विकला भवंति॥ ता अक्षदृक्कर्मसंस्कृतग्रहे विकलास्थाने॰ क्रांतिक्षेपयोः॥ सत्रिभग्रहस्य क्रांतिः॥ ग्रहस्य विक्षेपः॥ अनयोः
भिन्नतुल्ययोः भिन्नैकदिशयोः सतोः क्रमेण स्वमृणं कार्याः॥ अत्रोपपत्तिः॥ विक्षेपवृत्तस्थग्रहबिंबोपरि ध्रुवप्रोतसूत्रवृत्तं स्पष्टक्रां
तिवृत्ते यत्र स्थाने लगति तस्य ग्रहचिह्नस्यांतरे याः क्रांतिवृत्ते कलास्ता आयनकलाः॥ तदानयनार्थं क्षेत्रं ग्रहशरः कदंबाभिमुखः
कर्णः॥ तत्संबद्ध्रुवात्रवृत्तप्रदेशः ध्रुवप्रोथेसूत्रवृत्तसंपातयोरंतरे ध्रुवात्रवृत्ते भुजः॥ ध्रुवप्रोतवृत्ते स्पष्टशरो ग्रहबिंबवृत्तसंपातां
तरं कोटिरतस्त्रिज्याकर्णे यनवलनज्याभुजस्तदा शरकर्णे कस्त्यनुपातेन ध्रुवात्रवृत्ते ध्रुज्याप्रमाणेन भुजकलाः॥ ननु ग्रहचिह्नसद
संपातांतरे क्रांतिवृत्ते भुजकलाः॥ क्रांतिवृत्तस्य तिर्यक्त्वेन तादृशक्रांतिवृत्तप्रदेशस्य तिर्यक्त्वाद्भुजत्वासंभवात्। आयनवलनज्याभु
ज॥ त्रिज्याकर्णः यष्टिः कोटिस्तद्दृग्गोत्तरपदरूपेति क्षेत्रं गोले प्रत्यक्षमतोनुपातेन क्षतिः॥ तत्र भगवतालोकानुकंपया गणितसुखार्थं ध्रु
वात्रवृत्तस्थभुजकलाः क्रांतिवृत्तस्था अंगीकृताः स्वल्पांतरादतो यनवलनज्याद्वाराकाराभिगुण्याः त्रिज्यया भाज्येति प्राप्ते भगवता यन
वलनस्य सत्रिभग्रहक्रांतिभागत्वेनांगीकारात् इङ्गा अष्टपंचाशता गुणनीया॰ ज्या भवति॰ यतः परमाश्चतुर्विंशत्यंशा अष्टपंचाशताता गु
णिताः पंचोनापरमक्रांतिज्या जाताः एवं शरगुणा त्रिज्याभक्ता यनकलास्तत्र विकलात्मकफलार्थं षष्टिगुणा इति सत्रिभग्रहक्रांतिभागा
गुणितो ग्रहविक्षेपोष्टपंचाशत्षष्टिघातेन विंशत्यनेन पंचत्रिंशच्छतेन गुण्य त्रिज्यया भक्त इति सिद्धमात्रापि लाघवाद्गुणस्य त्रिज्यामि
तत्वेन स्वल्पांतरादंगीकारात् गुणहरयोर्नाशात्स्पष्टपन्नं॥ सत्रिभेत्यादि विकलात्मकं तं॥ भास्कराचार्यैस्त्वायने वलनमस्फुटं ज्यागुणात्संगुण्य हि
गुणभाजितं तत्पूर्णपूर्णधृतिभिर्ग्रहाश्रितात्सभोदय दायनाः कला इति सूक्ष्ममस्माद्युक्तं॰ अनयोपपत्तिस्तु मकरादौ उत्तरायणे दक्षि
णाध्रुवाद्दक्षिणाकदंबोधः उत्तरध्रुवादुत्तरकदंबऊर्ध्वं॰ तत्र शरो यदोत्तरस्तदा ग्रहबिंबस्योत्तरकदंबोन्मुखत्वेनोत्तरध्रुवादुन्नत
त्वात्क्रांतिवृत्तस्थग्रहचिह्नात्क्रांतिवृत्तध्रुवप्रोतसूत्रवृत्तसंपात आयनग्रहचिह्नरूपः क्रांतिवृत्ते पश्चाद्भवत्यत आयनविकलाः स्प
ष्टग्रहे ऋणं कृताः श्वेदायनस्य ग्रहभोगो ज्ञातस्यात्॥ एवं दक्षिणशरे ग्रहबिंबस्य दक्षिणस्य कदंबोन्मुखत्वेन ध्रुवान्नतत्वात्क्रांतिवृ
त्ते ग्रहचिह्नादायनग्रहचिह्नमग्रे एव भवतीति धनमायनविकलाः॥ कर्कादिदक्षिणायने तु दक्षिणध्रुवाद्दक्षिणकदंबऊर्ध्वं॰ उत्तर

म०टी०
४८

ध्रुवाउत्तरकदंबोधस्तत्र यदि ग्रहशरो दक्षिणस्तदा ग्रहबिंबस्य दक्षिणध्रुवाभ्युदयत्वात्तत्क्रांतिवृत्ते ग्रहचिह्नादायनग्रहचिह्नमग्रे क्रांति
वृत्ते भवतीत्यायनं धनमिति गोलस्थित्यायनशरदिग्भेदे ऋणमयनशरदिग्भेदे धनमिति सिद्धं॥ तत्र यनदिशः सत्रिभ ग्रहगोलदिक्तु
ल्यत्वात्सत्रिभग्रहक्रांतिग्रहशरयोरेकदिक्त्वे ऋणं। भिन्नदिक्त्वे धनमित्युपपन्नं। अथाक्षदृक्कर्मोपपत्तिः॥ भूगर्भक्षितिजयाम्योत्तरवृत्तसं
पातरूपसमप्रोतवलयवृत्तेन ग्रहबिंबसक्तेन क्रांतिमंडलस्य ग्रहासन्नो यत्र संपातस्तत्राक्षदृक्कलासंस्कृतो ग्रहस्तयोरंतरे क्रांतिवृत्तप्रदेशे आक्षदृ
क्कलाः॥ ताः क्षितिजस्थग्रहबिंबोपरमांतरत्वात्परमाः॥ याम्योत्तरवृत्तस्थे ग्रहे पनग्रहचिह्ने वाक्षदृक्कलासंस्कृतग्रहचिह्नं भवतीति तदभावः॥ अतः
क्षितिजस्थे ग्रहबिंबे वलयवृत्तेन याम्योत्तरक्षितिजसंपातप्रोतक्षितिजवृत्ताभिन्नेन तत्र ग्रहबिंबसक्तं ध्रुवप्रोतवलयवृत्तक्रांतिवृत्तसंपातो यनग्र
हचिह्नरूपः क्षितिजे क्रांतिवृत्तप्रदेशादूर्ध्वमधोवा याभिः कलाभिरंतरितस्ता आक्षदृक्कलाः॥ आसां तत्त्वार्थं तदंतरप्रदेशीय ध्रुवप्रोतवृत्तखं
डप्रदेशास्तात्कालिकाः ... साधिताः। तथाहि। ध्रुवदयं बोलयहविंबगतवलयवृत्ते विषुवद्वृत्तग्रहबिंबांतरे स्फुटा क्रांतिः॥ विषुवद्वृत्तक्रांति
वृत्तसंस्थायनग्रहचिह्नांतरेण भाग क्रांतिरयनग्रहस्य। अयनग्रहचिह्नग्रहबिंबांतरे स्फुटशरः। द्वयोः क्रांत्योरेकदिक्त्वे स्फुटक्रांतिरधिकाः। तत्रो
त्तरगोले यनग्रहचिह्नं क्षितिजादधः स्वध्रुवप्रोतवृत्ते क्रांत्योरंतराकलाभिर्भवति॥ यतो यनग्रहचिह्नध्रुवप्रोतवृत्तस्थो मंडलक्षितिजांतररूप
चराग्रहबिंबीयचरस्याधिकत्वेन मध्यमचरसंबद्धक्षितिजवृत्तप्रदेशाद् ध्रुवाभिमुखं स्वतंत्रग्रहबिंबीयचरसंबद्धध्रुवप्रोतवृत्तप्रदेशो यत्र
ऊर्ध्वं तत्क्षितिजांतराले चरांतरस्य सत्वेन स्वल्पत्वाच्चरांतराभ्यां कोटिभुजाभ्यामयत्नचतुरस्रत्वे त्र्यस्यत ध्रुवप्रोतवृत्तद्वयमध्ये स्फुटं दर्शनं।
एवं दक्षिणगोले यनग्रहचिह्नं स्वध्रुवप्रोतवृत्ते क्षितिजादूर्ध्वं क्रांत्योरंतराकभिरिति। क्रांत्योर्भिन्नदिक्त्वे तु क्षितिजादयनग्रहचिह्नं स्वध्रुवप्रोतवृ
त्ते क्रांत्योरंतरयोगतुल्याकभिरधऊर्ध्वं। मध्यमक्रांतिध्रुवप्रोतवृत्ते उन्मंडलात्स्फुटक्रांतिचरतुल्यांतरेण दक्षिणोत्तरगोलेयोरधऊर्ध्वमयन ४८
ग्रहचिह्नस्य सत्वात्। क्षितितावदंतरेणोद्वृत्तसत्वात्ताभिर्भास्कराचार्यैः स्फुटास्फुटक्रांतिजयोश्चरार्धयोः समान्यदिक्त्वे तरयोगजासवः॥ पलो ध्रु
वारव्याभनभाः। सदानि ति सूक्ष्ममाक्षदृग्कज्ञानमुक्तं। भगवता तु एतौ त्तरीत्या स्फुटास्फुटक्रांतिसंस्कारोत्पन्नस्फुटशररूपक्रांतिरवंडस्यस्वल्पां
तरेण यथागतशरतुल्यस्य चरमाक्षदृग्कस्य इत्यंगीकृत्य द्वादशकोटौ पलभाभुजस्तदा विक्षेपरूपक्रांतिकोटौ कः इत्यनुपाताद्विक्षेपज्याफलं ध
नुषो स्यागाः स्वल्पांतरेण भुजाचरज्ययोरभेदेन नतेनांगीकारात् असवआक्षासवएताएवकलाः। ध्नताः स्वल्पांतरत्वात्॥ क्षितिजातिरिक्तस्थग्र
हबिंबेत्वेताः कलाः अभीष्टनतकालपरिणताः भवंतीति विषुवच्छायेत्यादि स्वद्युदलार्धविभाजितमित्युक्तं॥ अत्र ग्रहे आयनं दृक्कर्मसंस्कार्यं त्
स्यादिनरात्रिमानादि तंसाधयितव्याक्षदृक्कर्मक्रियते तदाकिंचित्सूक्ष्ममिति। सत्रिभग्रहे जे त्यादि श्लोकः सप्तमो यत्तु स्तकेत न्त्रलक्षस्वतः सिद्धं॥

295
1918

नतानुपाते स्वपरार्थं प्रयोगशंकानवकाशाश्च समप्रहयोरायनदृक्कर्मसंस्कारेण भिन्नत्वसंभवात्तयोर्दिनमाननतयोरपि भिन्नत्वसिद्धेरित्यव
धेयं धनर्णोपपत्तिस्तु समप्रोतवलयवृत्ते ग्रहबिंबोपरिगं यत्र क्रांतिवृत्ते लगति सराश्यादि भोगे भवति आक्षदृक्कर्मसंस्कृत इति प्रागुक्तं। तत्र पूर्वकपा
ले तस्मात् दृहादायनग्रहचिह्नं क्रांतिवृत्ते उत्तरशरे ग्रिमभागे भवति दक्षिणशरे पश्चाद्भवतीति क्रमेणर्णधनमुक्तं। पश्चिमकपाले तूत्तरशरे प
श्चाद्दक्षिणशरे ग्रिमभागे इति क्रमेणायनग्रहे धनर्णदृक्कर्मद्वयं संस्कृतो ग्रहः सिद्धो भवतीत्युपपन्नं सर्वं॥ १०॥ अथ प्रसंगाद्दृक्कर्मसंस्कारस्थला
न्याह नक्षत्रग्रहयोगे युग्रहास्तोदयसाधने। शृंगोन्नतौ तु चंद्रस्य दृक्कर्मादाविदं स्मृतमिति। अत्र निमित्तसप्तमी। ग्रहनक्षत्राणां बहुत्वाद्बहुवचनं।
नक्षत्रग्रहयोर्युगर्थं। नक्षत्रग्रहयोः। इदं। द्वयं। दृक्कर्म। स्मृतं। प्रागुक्तं। आदौ। प्रथमं कार्यं। ताभ्यामनंतरं क्रिया कार्येत्यर्थः। अत्र नक्षत्रध्रुवकाणामा
यनदृक्कर्मसंस्कृतानामेवोक्तत्वादायनं दृक्कर्मन कार्यमिति ध्येयं। ग्रहाणामस्तोदयौ। नित्यास्तोदयौ। सूर्यसान्निध्यजनितास्तोदयौ च। ग्रहाणामुप
लक्षणत्वान्नक्षत्राणामपि तयोः साधननिमित्तं। ग्रहस्य नक्षत्रस्य वादेयं॥ अत्राक्षदृक्कर्मार्थं केवलः शरः साध्यः। न तु दिनमानरात्रिमानन तो न्न
ते साध्ये। क्षितिजसंबंधेन दृग्रहरूपोदयास्तलग्नस्यावश्यकत्वेन क्षितिजातिरिक्तनतपरिणामस्य व्यर्थत्वात्। युतौ तु समप्रोतवलयवृत्ते यु
गपदार्थनार्थं तत्परिणामस्यावश्यकत्वात्॥ शृंगोन्नतिनिमित्तं चंद्रस्य तु कारः समुच्चयार्थक एवकारश्च परः। अत्रापि श्लोकद्वयीद्विकमाक्षदृक्कर्मसं
स्कार्यमिति ध्येयं॥ ११॥ अथ दृक्कर्मसंस्कृतग्रहयोर्युतिकालं तात्कालिकतनहिक्षेपाभ्यां ग्रहयोर्याम्योत्तरांतरं चाह। तात्कालिकपुनः कार्यौ वि
क्षेपौ च तयोस्ततः। दिक्तुल्ये त्वंतरं भेदे योगः शिष्टं ग्रहांतरमिति। पुनः द्वितीयवारं। तादृशग्रहाभ्यां शीघ्रमंदाधिके तौ। तत इत्यादिना युते गतैष्य
त्वं ज्ञात्वा यदंतरकलारत्यादिना दृक्कर्मसंस्कृतौ समौ स्वयुतिसमये भवतः॥ विवरं तद्भुक्त्या दिनाद्यसमस्पष्टग्रहकालाद् दृक्कर्मसंस्कृतसमग्र
हकालो युत्याख्यो द्युयः॥ तस्मिन्काले साधितौ ग्रहौ स्फुटसमौ तात्कालिकौ मध्यस्पष्टादिक्रियया कार्यौ। तयोः। साधितग्रहयोः। विक्षेपौ च। स
मुच्चये। कार्यौ। एतौ ग्रहौ दृक्कर्मसंस्कृतौ समौ भवत इति प्रतीतिः। नो चेत्तस्माद्दकरीत्या मुहुः कारणं स्थिरं कृत्वा प्रतीतिर्द्रष्टव्याः। ततः॥ स्वयुति
समये ग्रहयोर्विक्षेपसाधनानंतरं। दिक्तुल्ये॥ एकदिक्त्वे। तु कारादिक्षेपयोः अंतरं। कार्यं। भेदे। भिन्नदिक्त्वे विषयोर्योगः॥ शिष्टं संस्कारो
त्पन्नं ग्रहांतरं। युतिसंबंधिनोर्ग्रहबिंबकेंद्रयोरंतरालं याम्योत्तरं भवति। अत्रोपपत्तिः॥ दृक्कर्मसंस्कृतग्रहयोः पूर्वापरांतराभावः समप्रोत
वलयवृत्ते। इतिनयोः समत्वं। विक्षेपाग्रे ग्रहबिंबकेंद्रत्वादेकदिक्त्वे विक्षेपयोरंतरं ग्रहबिंबकेंद्रयोर्याम्योत्तरमंतरं समप्रोतवलयवृत्ते। भिन्नदि
क्त्वात्र योर्योगएव ग्रहबिंबकेंद्रयोर्याम्योत्तरमंतरं भवति। भास्कराचार्यैस्त्वं वलर्ध्वे ग्रहयुतिदिने शालितौ तौ समौ स्तस्ताभ्यां सूर्यग्रहणवदिसं
स्कृतौ स्व स्वनत्या। नौ। न स्पष्टौ तदनुविशिरवौदृर्ध्ववलसंविधयो दिसाम्ययाविपुतिरनयोः संयुतिभिन्नदिक्त्वे इत्यनेन सरक्षमुक्तं। भगवता कृपा

शुक्रान्तरुपेक्षितं स्वल्पांतरत्वात्॥१२॥ अथ पंचताराणां बिंबमानकलानयनं श्लोकाभ्यामाह कुजार्किज्ञामरेज्यानां त्रिंशदर्द्धार्द्धवर्धिताः॥ वि
ष्कंभाश्चंद्रकक्षायां भृगोः षष्टिरुदाहृता॥१३॥ [illegible] त्रिचतुःकर्णयुत्याप्तास्ते द्विघ्नास्त्रिज्ययाहताः॥ स्फुटाः स्वकर्णास्तिथ्या
प्ता भवेयुर्मानलिप्तिकाः इति॰ त्रिंशत्॥ अर्द्धार्द्धवर्धिताः॥ त्रिंशत्साऽर्द्धपंचदशान्तरर्धसार्धसप्त॰ तेरुत्तरोत्तरं युक्तस्त्रिंशत्॥ क्रमेण भौमशनी बुध
बृहस्पतीनां॰ चंद्रकक्षायां॰ चंद्रकक्षागोले चंद्रकक्षाप्रमाणेन न स्वकक्षाप्रमाणेनेत्यर्थः॥ विष्कंभाः बिंबव्यासाः योजनात्मका उक्ताः॥ भौमस्य त्रिंशत्
शनेः सार्धसप्तत्रिंशत्॥ बुधस्य पंचचत्वारिंशत्॥ गुरोः सार्धद्विपंचाशत्। अनेन क्रमेण शुक्रस्य षष्टिः॥ भृगोः षष्टिरित्यनेनार्द्धेत्यस्य प्रत्ये
कमर्धयुक्ता इत्यर्थो निरस्तः स्वाभिमतार्थो व्यक्तीकृतश्च॰ ते॰ उक्ताविष्कंभाः॥ द्विगुणाः त्रिज्यया गुणिताः। त्रिचतुःकर्णयुत्याप्ताः॥ तृतीयकर्म
णि चतुर्थकर्मणि च यौ कर्णौ॰ मंदकर्णशीघ्रकर्णौ॰ तयोर्योगेन भक्ता इति॰ सांप्रदायिकाव्याख्यानं॥ न व्यस्तः तृतीयकर्मणि कर्णानुपातानुक्ते
स्तृतीयकर्णस्य मंदकर्णस्याप्रसिद्धेरूपप्रतिविरोधाच्च एवं व्याख्यानुपेक्ष्य त्रिशब्देन त्रिज्या॰ चतु॰ कर्णश्चतुर्थकर्मणि शीघ्रकर्णस्तयोर्योगे
न भक्ता इत्यर्थं कुर्वंति॰ स्पष्टाः स्वकर्णैः स्वबिंबव्यासाः। भवंति॰ पंचदशभक्ताः बिंबमानकलाः भवेयुः॥ अत्रोपपत्तिः॥ स्वस्वकक्षायां स्थि
ताः पंचताराग्रहाः॰ दूरत्वाल्लोकैश्चंद्रकक्षास्थिता इव दृश्यंते ततस्तेषां व्यस्तबिंबव्यासयोजनेनि स्वयं ज्ञानानि यथा सर्वबिंबव्यासयोजनान्युक्ता
नि चंद्रग्रहणाधिकारे रवेः स्वभगणाभ्यां त्रैराशिकेनाचंद्रकक्षायां साधितानि तथा स्वभगणानुसारेणोक्तप्रकारेण चंद्रकक्षायां साधितानि। त
था च शाकल्यसंहितायां अंतरुन्नतकक्षाश्च बनप्रांते स्थिता इव॰ दूरत्वाच्चंद्रकक्षायां दृश्यते सकला ग्रहाः अर्द्धार्द्धवर्द्धितास्त्रिंशद्विष्कंभाः शा
स्त्र दृष्टत इति॥ एतानि त्रिज्यातुल्यशीघ्रकर्णे उक्तानि॥ अतः शीघ्रकर्णेऽधिके न्यूनं बिंबं ग्रहस्योच्चासन्नत्वादल्पे तु नीचासन्नत्वादधिकं बिंब ५९
मिति त्रिज्यायोक्तानि बिंबानि तदेव शीघ्रकर्णेन कानीति व्यस्तानुपातेन युक्तमपि भगवतोपलक्ष्या त्रिज्यातोऽधिकन्यूनकर्णयोः क्रमेण
व्यस्तानुपातागताधिकं न्यूनं च बिंबं दृष्टमतः कर्णएव त्रिज्याशीघ्रकर्णयोगार्द्धमितः क्रमेण न्यूनाधिको गृहीतः॥ अत्र छेदं लंबं च परिवर्त्य
हरस्योत्पादिना द्विघ्नास्त्रिज्यागुणिताविष्कंभास्ते त्रिज्याशीघ्रकर्णयोगभक्ता इत्युपपन्नं॥ त्रिचतुःकर्णयोगार्द्धं स्फुटकर्णस्य मत्तके॰ त्रिज्या
घ्नाः स्फुटकर्णाप्ता विष्कंभास्ते स्फुटाः स्युः तांस्तिथ्याकल्प्या के च॰ अत एव बिंबस्य शार्ङ्गी चोच्चमंडलस्थेन शीघ्रकर्णस्यैव भगर्भाद्विबेसंबं
धान्मंदकर्णसंबंधस्तयुक्ताः न हि केचित्के मंदकर्णाद्दी शीघ्रकर्णार्द्ध ग्रहाबिंबमस्तीति प्रतिपादितं॥ येन मंदशीघ्रकर्णयोर्योगार्द्धं कर्णः स्पष्ट
न्नः। शीघ्रफलानयने तथा गीकारात्तस्य॥ भास्कराचार्यैस्तु व्यक्तीकृतः सच रणा कृतव त्रिभागयुक्तादयोऽनवच सप्तिलवेषु च च॰ स्युर्म
ध्यमास्तनुकलाः क्षितिजादिकानां त्रिज्याभ्रकर्णविवरेण पृथग्विनिघ्नाः॥ त्रिघ्नात्रिजात्य फलमौर्विकमाविभक्तालब्धेन युक्तरहिताः क्र

297
1918

मशः॥ पृथक्स्थाः ऊनाधिके त्रिभगुणात् श्रवणे स्फुटाः स्युरित्युपलब्धोक्तं॰ भास्करानुवर्तिनस्तु त्रिचतुःकर्णयुत्याप्ता इत्यस्य त्रिज्याशीघ्र
कर्णयोर्योगार्द्धेन भक्ता इत्यर्थं वदंति॥१४॥ अथ युतिसंबंधिनौ ग्रहौ युतिसमये दर्शनीयाविल्याह छायाभूमौ विपर्यस्ते स्वच्छायाग्रे तु दर्शये
त्। ग्रहः स्वदर्पणान्तस्थः शंकुग्रे संप्रदृश्यते इति॰ छायाभूमौ॰ छायादानार्थं योग्या या अंजलवत्समीकृता या पृथिव्याः॰ विपर्यस्ते॰ वैपरीत्येन
दत्तेः स्वच्छायायाग्रे॰ ग्रहछायाग्रस्थाने॰ तु कारोऽन्ययोगव्यवच्छेदार्थश्च कारपरः॥ स्वदर्पणांतस्थः॥ स्वस्य योर्दर्पण आदर्शस्तत्र स्थापितस्तन्म
ध्यस्थितो ग्रहः॥ ग्रहप्रतिबिंबस्यात्। ततो गणकः शिष्याय दर्शयेत्॥ एतदुक्तं भवति॰। समभूमौ दिक्साधनं कृत्वा दिक्संपातस्थानाद्युति
कालिकछायांगुलानि पूर्वापरस्वभाङ्गविपरीतदिशि भुजांतरेण ग्रहाधिष्ठितपूर्वापरकपालदिशि दत्वा तत्रादर्शः स्थाप्यस्तत्र प्रतिबिंबे
ग्रहस्य दिक्संपातस्थो गणकः शिष्याय दर्शयेदिति। अत्रोपपत्तिः॥ ग्रहबिंबादवलंबसूत्रं महाशंकुरूपं यत्र भूमौ पतति तत्र ग्रहबिंबप्र
तिबिंबो भवति॰ तत्स्थानं तु स्वमध्याद्ग्रहबिंबपर्यंतं नतांशा आकाशे तथा भूमौ दिक्संपातस्थानान्महाशंकुकोटौ दृग्ज्याभुजस्तदा द्वादशांगुल
शंकुकोटौ को भुज इत्यनुपातानित छायामितांतरेण ग्रहाधिष्ठितकपाले भवति। यथा दिक्संपातस्थद्वादशांगुलशंकोः छायाग्रहाधिष्ठित
कपालादन्यकपाले भवति॰ तथा ग्रहबिंबस्थानस्थद्वादशांगुलशंकोः छायादिक्संपाते भवति॰ अतो दिक्संपातस्थानाच्छायाग्रहाधिष्ठित
कपाले दत्तातदग्रे ग्रहप्रतिबिंबस्थानं ज्ञातं भवतीत्युपपन्नं छायाभूमावित्यादि स्वदर्पणांतःस्थ इत्यंतं॰ अथ ग्रहाधिष्ठितकपालान्यकपाले छा
यासद्भावनियमात् ग्रहाधिष्ठितकपाले कथं छायादानेयुक्तं व्याघातादिति मंदाशंका स्वसारात् शंक्वग्रे इति॰ दिक्संपातस्थापितशंकोरग्रेमस्त
के॰ आकाशे॰ ग्रहः। दृश्यते गणकेन विशेषः॥१५॥ ननु कथं दृश्यते इत्यतः प्रकृतग्रहयोर्युतिसंबंधिनोर्दर्शनप्रकारं सार्द्धश्लोकाभ्यामाह पंचह
स्तोच्छ्रितौ शंकू यथादिग्भ्रमसंस्थितौ ग्रहांतरेण विक्षिप्तावधो हस्तनिखातकौ॥१६॥ छायाकर्णौ ततो दद्याच्छायाग्राच्छंकुमूर्द्धगौ छायाक
र्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत्॥१७॥ स्वशंकुमूर्धगौ व्योम्नि ग्रहौ दिक्तुल्यतामितौ इति॥ ग्रहयुतिसंबंधिनोर्ग्रहयोरायनदृक्कर्मश्लो
कद्वयोक्तकालाक्षदृक्कलाभ्यां संस्कृतयोस्तुल्यत्वे तयोरंतरेणासन्ने वोदयलग्ने स्तः। यद्वा युतयोर्ग्रहयोरायनाक्षदृक्कलासंस्कृतयोस्तुल्यत्वे स्वल्पा
न्तरेणासन्ने वास्तलग्ने भवतः॥ यस्मिन्काले ग्रहौ द्रष्टुमभिमतौ तात्कालिकलग्नाद्गोलीयउदयास्तलग्ने क्रमेण न्यूनाधिके यदि भवतस्तौ ग्र
हौ सांनिध्यजनितास्तभावे दर्शनयोः। यौ लक्षपंचहस्तोच्छ्रितौ॰ चतुर्विंशत्यंगुलौ स्तः एवं पंचहस्तप्रमाणदीर्घौ॰ शंकूः काष्ठघटितस
रलदंडौ॰ यथादिग्भ्रमसंस्थितौ॰ युतिकाले ग्रहयोर्दशांदिग्भ्रमणं॰ ग्रहौ प्रवहभ्रमेण पूर्वकपाले पश्चिमकपाले वा तत्र संस्थितौ॰ सा
धिष्ठितस्थानात् ग्रहाधिष्ठितकपालदिशि स्थाप्यौ न ग्रहानधिष्ठितकपालदिशि॰ ग्रहांतरेण॰ दिक्तुल्यत्वं लंबरंभे दे योगे इत्यादिना ज्ञात

सू॰ टी॰
५०

याम्योत्तरग्रहांतरेण कालात्मकेन॰ स्थितौ॰ याम्योत्तरांतरितौ स्थाप्यौ॰ अत्र सोऽन्तमित्यादिनाग्रहविंबसंगुलात्मकौ कृत्वादिलुरन्यैतं लर
मित्यादिनायहांतरं शायंअधः॥ भूमेरंतः हस्तनिखातगौः हस्तवेधः प्रमाणायागर्तातत्रस्थितौ॰ भूम्यां शंकोर्हस्तमात्रं रोपयित्वा भूमेरूर्ध्वं शं
कुचतुर्हस्तप्रमाणदीर्घौ स्थाप्यावित्यर्थः॥ ततः शंकुमूलाभ्यां प्रत्येकं छायाग्रं॰ ग्रहानधिष्ठितकपालदिशितस्मात्प्रत्येकमित्यर्थः॥ छायाकर्णौ
स्वकीयौ शंकुमूर्धगौ॰ निजशंक्वग्ररूपमस्तकप्राप्तिगौ गणकोऽयपात् एतदुक्तं भवति॰ युतिसमये लग्नं कृत्वा तात्कालिकोदयलग्नेष्टलग्नाभ्यां
पूर्वंतर कालग्रहोर्नाक्षत कालः॥ साधनः॥ एवं ग्रहयोर्युतिसमयेस्वदिनगतात् त्रिप्रश्नाधिकारोक्तविधिना स्पष्टकोण्या छाया साध्याः
ततो योग्रहो दक्षिणोत्तरयोर्मध्ये यद्दिशि तच्छायादिक्षु शंकोर्मूलाद्गृहानधिष्ठितकपालदिशि पूर्वापरसूत्राद्भुजांतरेण भुजदिशि देयाः
परमानीतछायाग्रं हस्तांगुलशंकोरिति चतुर्हस्तशंकुप्रमाणेन प्रसाध्यैरेखातन्मितासमभूमौ शंकुमूलाच्छायाग्रं रेखाग्रे छायाग्रज्ञापकं चिह्नं
कार्यं॰ सन्नकीलादिना सूत्रबन्धा शंक्वग्रसक्तं प्रसार्यमिति॰ छायाग्रं कर्णस्य मूलरूपमग्रं॰ तयोः संपाते संस्थितस्य छायाग्रस्थानकतु
गतोऽपविष्टशिष्यस्य गणकः॥ ग्रहौ॰ आकाशे॰ स्वशंकुमूर्धगौ॰ निजशंक्वग्ररूपमस्तकसमसूत्रस्थितौ॰ दृक्तुल्यतो॰ दृष्टिगोचरतो॥ इतो॰
प्रासौः प्रदर्शयेत् संदर्शयेत्॥ अत्रोपपत्तिः॥ उज्वलयादर्शनार्थं पंचहस्तप्रमाणो शंकूकृतौ॰ करहस्तस्य भूमिगुप्तत्वं शंकुदृढत्वार्थं कृतं ब
हि॰ पुरुषप्रमाणोच्चतुर्भता॰ हस्तावशिष्टो॰ शंकोः पुरुषपर्यायेण॰ भिधानात्॥ शंकुस्तस्यग्रतविंबसक्तत्वा यथादिग्भ्रमसंस्थित
विस्तुल्यत्वं॰ शंक्वग्रसमसूत्रेण ग्रहविंबमस्थानमिषमावृहोतरेणयाम्योत्तरांतरितौ स्थापितौ॰ अत्रयपविस्वस्वस्पष्टकोण्या छायाप्रसा
ध्या ततः कर्णाग्रं प्रसाध्यो कदिक्छायापलभासंस्कारेण स्वस्वभुजं प्रसाध्य ताभ्यां दिक्तुल्यत्वे तंतरं भेदे योगः॥ शीघ्रग्रहांतरमित्युक्तरीत्या
ग्रहांतरं शंकोरंतरं युक्तं तथापि भगवता स्वल्पांतरेण गणितात्रमापतोदार्थमाकाशस्थितद्रष्टांतरमेव धृतं॥ शंकोः छायाग्रा छाया
कर्णसूत्रं ग्रहविंबद्रष्टव्यमेवेति दिक्॥ ॥ अथश्लोकाभ्यां पंचतारकाणां प्राकृतयुतौ युद्धसमागमावाह उल्लेखं तारकास्पर्शाद्भे
भेदः प्रकीर्त्यते॥ युद्धमंशुविमर्दाख्यमंशुयोगेपरस्परं॥१८॥ अंशादूनेपसव्याख्यं युद्धमेकोऽत्रचेदणुः॥ समागमोंऽशादधिके भवतः
श्चेद्बलान्वितौ॥ भौमादिपंचतारकाणां मध्ये द्वयोर्युतौ तारकास्पर्शात्॥ विंबनेम्योः स्पर्शमात्रात् उल्लेखसंज्ञं तु युद्धं वदंति युतिभे
दज्ञाः॥ इदं तु द्वयोर्मिथ्यस्वतुल्यायाम्योत्तरांतरे मंडलभेदे भेदः भेदसंज्ञो युद्धांतरभेदो युद्धभेदस्तत्वज्ञैः कथ्यते॥ अयं भेदो मा
नैक्यखंडाद्द्वयोर्याम्योत्तरांतरे॰ अत्र भास्कराचार्यैस्तमानेक्यार्धं युद्धविवरेऽल्पे भवेद्भेदयोगः॥ कार्यस्सूर्यग्रहणवदखिलं लंब
नाद्यं स्फुटार्थं॰ कल्प्यो भस्थः शुद्धांशुस्तदुपरिगतो लंबनादिप्रसिध्यैकिंत्वकोदेवलग्नं ग्रहयुतिसमये कल्पितार्कात्प्रसाध्यं॥ ५०

प्यनलंबनेनग्रहयुतिसमयः संस्कृतः प्रस्फुटः॥ स्वालेवदौ तौ दृष्टियोग्यौ ग्रहयुतिसमये कार्यमेवं तदेव॰ याम्योदक्छघ्नतरविवरं भेदयोगे
सवाणां तपःस्पर्शादिवतिन्वयतः॥ ग्रीनगुप्तशंशशा॰ मंशांतोव्रजुरपिविदाधः स्थितः स्यातदेव्यास्यशेषमानोपरिदिशितदापारिलेख्यवगम्य इति
विशेषाभिमितः॥ भगवतानुत्तक्षाविवक्षोशकाशोद्दूरतो विविक्तदर्शनासंभवात् तदर्थं भयासाद्युपेक्षितमिति ध्येयं युताबन्योन्यं किरणयोगे सति
अंशुविमर्दाख्यं॰ किरणसंघट्टनसंज्ञं युद्धं स्यात्॥ द्वयोर्याम्योत्तरांतरे॰ अंशात्॥ षष्टिकलात्मकैकभागात्॥ ऊने॰ अनधिके सति॰ अपसव्यसंज्ञं यु
द्धं भवति॰ अत्र विशेषमाह एक इति॥ अत्रापसव्ययुद्धे॰ एकः द्वयोरन्यतरः अणुः अणुविंबश्चेत्स्यात्तदापसव्यं युद्धं व्यक्तं स्यादन्यथाव्यक्तं युद्धं स्या
त्॥ नयोश्चतुर्णां फलं॰ अपसव्ये विग्रहे भूयात्॥ यामंरश्मिसंकुले कर्वनेमात्सपीडास्याद्रश्मिनुधनस्य परतिभागर्वीयोक्तं ज्ञेयं॰ युद्धभेदानुक्त्वा
समागममाहसमागम इति॥ द्वयोर्याम्योत्तरांतरे॥ षष्टिकलात्मकैकभागात्॰ अभ्यधिके सति॰ समागमो योगो भवति॰ अत्रापि विशेषमाह भवत इति
युतिविषयकौ ग्रहौ॰ बलान्वितौ॰ बलेन॰ स्थानादिबलविज्ञं॥ ग्रयथार्थकेनापि नस्यता॰ प्रश्नत्रयेषथवाथस्मिन्स्थो॰ स्यस्पस्य बलं स्थूलमिति॥
अत्यसिद्धांतवचनात् स्थूलमंडलतया अन्वितौ॰ युक्तौ॰ स्थूलविंबौ समावित्यर्थः चेत्तस्तदा समागमस्तयोर्व्यक्तः स्यादन्यथाव्यक्तः समागमः॥ द्वा
वमपिमयूखयुक्तौ विपुलौ स्वौ समागमे भवतः॥ तत्रान्योन्यं प्रीतिर्विपरीतावात्मपक्षघ्नौ युद्धं समागमोवापव्यक्तौ तुलक्षणे भवतः॥ भुवि भूभृ
तामपि तथाफलमव्यक्तं विनिर्दिष्टमित्युक्तं॥ भेदोल्लेखांशुसंमर्दा अपसव्यस्तथापरः॥ तत्ताधागोभवेदेषामेकांशकसमापना इति कारपौक्त
श्च सर्वं निरवद्यं॥१९॥ अथ युद्धे पराजितस्य ग्रहस्य लक्षणमाह॥ अपसव्ये जितो युद्धे पिहितोऽणुरदीप्तिमान्॥ रूक्षो विवर्णो विध्वस्तो वि
जितो दक्षिणाश्रित इति॥ द्वयोर्मध्ये अनादितरेण विस्तं हतः स विजितः॥ पराजितो ज्ञेयः॥ हरतस्य लक्षणमात् अपसव्ये इति अपसव्ययुद्धे यो
जितः जयलक्षणो विवर्जितः एतेनोल्लेखादिन्नयेसंज्ञापकलं न पराजितस्य फलमिति सूचितं॥ पिहित आच्छादितो व्यक्त इति यावत्॥ अणु
रितरग्रहविंबादल्पविंबः॥ अदीप्तिमान् प्रभारहितः रूक्षः अस्निग्धः॥ विवर्णः वर्णेन॰ स्ववर्णेन स्वाभाविकेन रहित इत्यर्थः दक्षिणाश्रित इत
रग्रहापेक्षयादक्षिणदिशि स्थितः श्यामो वापसव्यपगतरश्मिमंडलो वा रूक्षो वान्यपगतरश्मि वान्यग्रो वा॥ आक्रांतो विनिपतितः हतापसव्यो
विज्ञेयोहत इति सग्रहोयतर्गतिभार्गवीयोक्तः॥२०॥ अथश्लोकार्धेन जयिनोग्रहस्य लक्षणमाह उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येपि यो ब
ली॥ इति॰ इतरग्रहापेक्षयोत्तरदिक्स्थः दीप्तिमान्॥ प्रभाः युक्तः स्थूलः इतरग्रहविंबापेक्षया पृथुविंबः॥ जयी॰ जययुक्तः स्यात्॰ अथोत्तर
दक्षिणदिक्स्थत्वक्रमेण जयपराजयौ नास्तीत्याह याम्ये इति॰ दक्षिणदिशि॰ योग्रहो बली॰ दीप्तिमान् पृथुविंबो भवति स जयी॰ अत्राशब्द
उत्तरदिशासमुच्चयार्थकः॥ तथा च जयपराजयलक्षणयोर्दिग्दानमनुपयुक्तमिति भावः॥ २१॥ अथ युद्धविशेषमाह आसन्नावप्युभौ दीप्तौ भ

291
1918

सू॰ टी॰ यत्नश्चेत्समागमः॥ स्वल्पौ ह्यावपि विध्वस्तौ भवेतां कूटविग्रहाविति॰ उभौ॰ द्वौ॰ आसन्नौ॰ एकभागांतर्गतांतरितौ॰ अपि ग्रहौ पुष्टलक्षणाक्रांतौ॰ दी
५१ प्तौ॰ प्रभायुक्तौ॰ चेत्स्यातां तदा बलान्वितावति समागमलक्षणेन केचित्सद्भावात्समायोगे स्वयुद्धं ह्यावपि ग्रहौ॰ स्वल्पौ॰ सूक्ष्मबिंबौ॰ विध्वस्तौ॰ ह्यावपि प
राजयलक्षणाक्रांतौ स्यातां तदा॰ क्रमेण कूटविग्रहसंज्ञकौ युद्धभेदौ स्यातां॥ २२॥ अथोत्सर्गतः शुक्रस्य जयलक्षणाक्रांतत्वमस्तीति वदन्समागमः शा
शांकेने निषाकृ प्रतिज्ञानसमागमे उक्तप्रकारमतिदिशति। उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी शशांकेनैवमेतेषां कुर्यात्संयोगसानमिति॰ इत
रग्रहापेक्षयोत्तरदिक्स्थो दक्षिणदिक्स्थो वा॰ उभयदिक्षीत्यर्थः॥ शुक्रः प्रायशः। उत्सर्गतः॥ जयलक्षणाक्रांतत्वेन जयी॰ कदाचित्पराजयलक्षण
क्रांतो भवतीति तात्पर्यार्थः॥ एतेषां॰ भौमादितारा्णां॰ चंद्रेण सह संयोगः सा धनं॰ युतिसाधनं॰ एवमुक्तरीत्या॰ कगणकः। कुर्यात्। अत्र विशेषार्थ
कमवनत्यास्फुटोक्षेपो विक्षेपः। शीतगो युता त्रित्यर्द्धं कचित्स्फुट्टके दृश्यते न सर्वत्रेति क्षिप्तमतोपेक्षितं॰ अधिकारस्यापूर्णश्लोकस्यापत्तेश्च॰
एतदुक्त्यान्ययोगेन शशिसंस्कारनिषेधस्य सिद्धेस्तस्य युक्तत्वमिति। तदनुक्तौ सूर्यग्रहणोक्तरीत्या सारणेपन सर्वत्र तद्द्विशोपोक्तिरर्थसिद्धेति ध्ये
यं॥ २३॥ ननु एषां ग्रहाणां दूरांतरेण सदोर्ध्वाधरांतरस्य सत्त्वात्परस्परं योगासंभवेन कथं युतिः संगतेत्यत आह भावाभावाय लोकानां कल्पनेयं
प्रदर्शिता॥ स्वमार्गगाः प्रयांत्येते दूरमन्योन्यमाश्रिता इति॰ एते॰ ग्रहाः स्वमार्गगाः स्वस्वकक्षास्थाः। अन्योन्यमाश्रिताः। युतिकाले ऊर्ध्वाधरांतराभावे
न संयुक्ताः संतः प्रयांति गच्छंति॰ इति दूरं॰ दूरांतरेण दर्शनात्। इयं ग्रहयुतिः। कल्पनात्मका॰ अवास्तवा॰ प्रदर्शिता॰ पूर्वोक्तग्रंथेन कथिता॰ नन्वव
स्तुभूता किमर्थमुक्तेत्यत आह प्रयोजनमाह भावाभावायेति॰ लोकानां भूतस्थप्राणिनां॰ भावः। शुभफलं॰ अभावः। अशुभफलं॰ तस्मै॰ शुभाशुभ
फलादेशार्था वस्तुभूतापि युतिरुक्तेति भावः॥ २४॥ अथाग्रिमग्रंथस्यासंगतित्वनिरासार्थमधिकारसमाप्तिं फक्किकया हरतीति ग्रहयुत्यधि
कार इति॥ स्पष्टं॥ ॥ रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे॥ ग्रहयुत्यधिकारोयं पूर्णो गूढप्रकाशके॥ २५॥ ६॥ इति श्रीसकलगणकसा
र्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके ग्रहयुत्यधिकारः संपूर्णः॥ ॥ अथ प्रसंगादारब्धो नक्षत्रग्रहयुत्यधि
कारो व्याख्यायते॥ ॥ तत्र प्रथमं नक्षत्राणां ध्रुवकस्थानमाह प्रोच्यंते लिप्ताभागानां स्वभोगोथ दशाहतः भवंत्यतीधिष्ण्यानां भोगलिप्ता युता प्रवाशति
भागामश्विन्यादिनक्षत्राणामुत्तराषाढाभिजिच्छ्रवणधनिष्ठावर्जितानां॥ लिप्तिकाः। भोगसंज्ञाः। कलाः प्रोच्यंते। समनंतरमेव॰ कथ्यंते॰ अथानं
तरं॰ स्वभोगः स्वाभिष्टनक्षत्रभोगः कलात्मको वक्ष्यमाणः दशभिर्गुणिताः कार्याः। तत्र स्वाभीष्टनक्षत्रगतनक्षत्राणामश्विन्यादीनां भोगलिप्ताः
भभोगोष्टशतीति लिप्तास्त्वुक्ताष्टशतकलाप्रत्येकं युतः। अश्विन्यादिगणितनक्षत्रसंख्यागुणितकलाष्टशतं युतमित्यर्थः॥ ध्रुवाः नक्षत्राणां भवं
ति॰ ॥१॥ ॥ अथ प्रतिज्ञातान्नक्षत्रभोगलिप्ता उत्तराषाढाभिजिच्छ्रवणधनिष्ठाव्यतिरिक्तानां तेषां च ध्रुवकान्नक्षत्रद्वारा श्राष्टश्लोकैराह अष्टार्ण ५१

301
1918

वाः स्त्यकृताः पंचवह्निर्नगेषवः अष्टार्थाः अध्ययोदशाग्ना अंगागा मनवस्तथा॥ २॥ कृतेषवो युगरसाः शून्यबाणा विषद्रसाः। खवेदाः सागर
नगागजागाः सागरर्तवः॥ ३॥ मनवोरथसावेदा वैश्वमाप्यार्धभोगगं॥ आप्यस्यैवाभिजित्प्रांते वैश्वांते श्रवणस्थिति॥ ४॥ त्रिचतुःपादयोः संधौ
श्रविष्ठा श्रवणस्य तु॥ स्वभोगतो वियन्नागाः षट्कृतिर्यमलाश्विनः॥ ५॥ रंध्राद्रयः क्रमादेषां विक्षेपाः स्वादपक्रमात्॥ दिङ्मासविषयाः सौम्ये याम्ये
पंचदिशो नव॥ ६॥ सौम्ये रसाः खं याम्येगाः सौम्ये खार्काः त्रयोदश। दक्षिणे रुद्रयमकाः सप्तत्रिंशदथोत्तरे॥ ७॥ याम्ये ध्यर्द्धत्रिकहुतानवसार्द्ध
शरेषवः॥ उत्तरस्यां तथा षष्टिस्त्रिंशत्षड्विंशदेव हि॥ ८॥ दक्षिणे त्वर्धभागस्तु चतुर्विंशतिरुत्तरे॥ भागाः षड्विंशतिः खं च दास्रादीनां यथाक्रम
मिति॥ अश्विन्यादिनक्षत्राणां क्रमाद्भोगा॥ एते॰ तत्राश्विन्या अष्टचत्वारिंशत्कला भरण्याश्चत्वारिंशत्। कृत्तिकायाः कलापंचषष्टिः॥ रोहिण्याः
सप्तपंचाशत्कलाः मृगशिरसोष्टपंचाशता आर्द्रायाश्चत्वारः अत्राध्ययइत्यत्र गोध्ययोगो ग्रहा इति वा पाठस्त्वयुक्तः शाकल्यसंहिताविरोधात्॥
एतेन सौरोक्तरुद्रभस्यांशाम्रद्रयोगाध्यपः कलाः इति नामदोक्तं दशकालोनपंचदशभागा मिथुने सर्वजनाभिमतध्रुवको दशकलायुतत्रयोदश॥
भागाः पर्वताभिमतध्रुवकश्च निरस्तः पुनर्वसोरष्टसप्ततिः। पुष्यस्य षट्सप्ततिः। आश्लेषायाश्चतुर्दश। तथेति छंदःपूरणार्थं मघायाश्चतुःपंचा
शत्। पूर्वाफाल्गुन्याश्चतुःषष्टिः उत्तराफाल्गुन्याः पंचाशत्॥ हस्तस्य षष्टिः चित्रायाश्चत्वारिंशत्॥ स्वात्याश्चतुःसप्ततिः विशाखायाः अष्टसप्ततिः
अनुराधायाः चतुःषष्टिः॥ ज्येष्ठायाश्चतुर्दश। अनंतरं मूलस्य षट् पूर्वाषाढायाश्चत्वारः उत्तराषाढायाः ध्रुवकमाह वैश्वमिति॰ उत्तराषाढा योगतार
नक्षत्रं॰ आप्यार्धभोगगं॰ आप्यस्य॰ पूर्वाषाढानक्षत्रस्यार्द्धभोगः॥ धनुराशेर्विंशतिभागास्तत्र स्थितं ज्ञेयं॥ अष्टौ राशयो विंशतिभागा उत्तराषाढा
याः ध्रुव इत्यर्थः॥ एतेन पूर्वाषाढायोगताराया सकाशादुत्तराषाढयोगतारा विंशतिकलोनसप्तभागांतरिताः तेन पूर्वाषाढाध्रुवकोष्टराशय
श्चतुर्दशभागाः॥ विंशतिकलोनसप्तभागे युत उत्तराषाढायाश्चत्वारिंशत्कलाधिकोक्तध्रुव इति पर्वतोक्तमपास्तं॰ ब्रह्मसिद्धांतविरोधात्॥
अभिजित्ध्रुवकमाह आप्यस्येति पूर्वाषाढाया अवसाने धनुराशेर्विंशतिकलोनसप्तविंशतिभागेः अभिजिद्योगतारा ज्ञेयाः चत्वारिंशत्कला
धिकषड्विंशतिभागाधिका अष्टौ राशयोभिजितो ध्रुव इत्यर्थः॥ एवकारोन्ययोगव्यवच्छेदार्थः॥ तेन संहितासंमतं श्रवणं पंचदशांशस्थानं
विंशतिविकलायुतत्रयोदशकलायुतचतुर्दशभागाधिकं नवराशयो निरस्तं॰ श्रवणस्य ध्रुवकमाह॥ वैश्वांते इति॰ उत्तराषाढाया अवसाने
श्रवणयोगतारायाः स्थानं ज्ञेयं॰ नवराशयो दशभागाः श्रवणध्रुवक इत्यर्थः॥ धनिष्ठाया ध्रुवकमाह। त्रिचतुःपादयोरिति श्रवणस्य तृतीये च
तुर्थचरणयोः क्रमेण णांतादिसंधौ मकरराशेर्विंशतिभागे श्रविष्ठाः। धनिष्ठा ज्ञेयाः नव राशयो विंशतिभागा धनिष्ठाः ध्रुव इत्यर्थः॥ तुकारात्से
द्धांतगतधनिष्ठास्थानं कुंभस्य विंशतिकलोनसप्तभागा निरस्तं॰ शततारायाः भोगमाह स्वभोग इति॰ धनिष्ठाध्रुभोगात्कुंभस्य विंशतिकलोने

सप्तभागावधेरित्यर्थः॥ शततारायाअशीतिर्भोगः॥ अतः प्राग्ध्रुवा इति। ज्ञापनार्थं स्वभोगत इत्युक्तं। शततारायाः स्थानं शततारकाध्रुवइति
पर्यवसन्नं॰ अवशिष्टनक्षत्राणां भोगानाह पूर्वेति॰ पूर्वाभाद्रपदायाः षष्टिः शतकलाभोगः॥ उत्तराभाद्रपदायाः द्वाविंशतिः। रेवत्याएकोनाशीतिः॥
अथ ध्रुवकानयनं यथाः अश्विन्याः भोगः ४८ दशगुणितः ४८० अतीतनक्षत्राभावाद्योगयोजनाभावः अतोश्विन्याः कलात्मको ध्रुवः ४८० राश्यादि
स्त०।८ भरण्याः भोगः ४० दशाहताः ४०० अतीतनक्षत्रस्यैकत्वाद्दृष्टशतयुतो भरण्याः परिभाषया राश्याद्यो ध्रुवः ०।२० एवमार्द्राभोगः दशाहतः
४० अतीतनक्षत्राणां पंचतया पंचगुणिताष्टशतेन ४००० चतुः सहस्रात्मकेन युतः कलाद्यो ध्रुवः ४०४० राश्यादयस्तु २।७।२० एवं पूर्वाषाढायाः
दशगुणितो भोगः ४० एकोनविंशतिगुणिताष्टशतेन १५२०० युतः परिभाषया राश्याद्यो ध्रुवः ८।१४ शततारायाः दशगुणितो भोगः ८०० त्रयो
विंशतिगुणिताष्टशतेन १८४०० युतस्त्रयोविंशतिगुणिताष्टशतरूपो १९२०० जातो ध्रुवो राश्यादिः १०।२० पूर्वाभाद्रपदाद्दशगुणितो भोगः ३६०
चतुर्विंशतिगुणिताष्टशतेन १९२०० युतो १९५६० जातो ध्रुवो राश्यादिः १०।२६ उत्तराषाढाभिजिच्छ्रवणधनिष्ठानां स्वभोगस्थानात्पश्चात्स्थि
तत्वेनोक्तरीत्यासंभवाभिन्नरीत्या ध्रुवकाउक्ताः॥ स्वादिस्थानाद्योगताराय देतरंकलाभिः स्थिता स्ताला घवाद्दादशाद्यवर्तिताः भोगसंज्ञाउक्ताः। तथा च
ब्रह्मसिद्धांते अष्टाविंशतिरर्धेनगजाग्नि पर्वईरवेपवःश्रितर्क्षाः सत्रिभागा द्विरसांत्यं काश्च षट्कृते॥ १॥ नवन्नानवसूर्याश्च वेदेद्वाः शरबाणभूः
खात्यष्टिः खधृतिर्गोत्रितिथि तिर्विश्वाश्विनस्तथा॥ २॥ वेदाहृतिर्गोद्ध्व क्वाब्धिहता युगार्थदृकस्वोत्कृतिस्तंत्रा हीना खरसहस्राः २६६।४० खद
स्तिधृक २८०३ स्वगोश्विनः स्वदंताः षट्शता गौलगुणाग्नयः मेषादन्याद्रिमध्यांशाः षडंशोनाः खषड्गुणा इति॰ अथ नक्षत्राणां विक्षेपभागा
नाह एषामिति। उक्तध्रुवकसंबंधिनां॥ आश्विन्यादिनक्षत्राणां॥ यथाक्रमं॰ क्रमादित्यर्थः स्वात्स्वकीयादपक्रमाक्रांत्यग्रात्। क्रांतिवृत्तस्थध्रुवकस्था
नादित्यर्थः। विक्षेपाः विक्षेपभागा दक्षिणाउत्तरा वा भवंति॰ तत्रोत्तरदिश्यश्विन्यादित्रयाणां दिग्मासविषयाः क्रमेण दश द्वादश पंचेत्यर्थः॥ दक्षि
णा दिशि रोहिण्यादित्रयाणां पंच दशान्न च उत्तरस्यां पुनर्वसोः षड्भागाः पुष्यस्य खं॰ विक्षेपाभावः अत्र पंचमाक्षरस्य गुरुत्वेन छंदोभंगआर्ष
त्वान्न दोषाः। दक्षिणस्यामाश्लेषायाः सप्त उत्तरस्यां॰ मघादित्रयाणां शून्य द्वादश त्रयोदशाः दक्षिणस्यां हस्तचित्रयोरेकादश द्वौ॰ अनंतरं स्वा
त्या उत्तरदिशि सप्तत्रिंशत् दक्षिणस्यां विशाखादीनां षण्मासार्द्धेकः त्रयं चत्वारः नव सार्द्धपंचक्रमेण उत्तरदिशि। तथा विक्षेपभागाः अ
भिजितः षष्टिः श्रवणस्यत्रिंशत्। धनिष्ठायाः षट्त्रिंशत्। एवकारोन्यूनाधिकव्यवच्छेदार्थः। वकारः पूरणार्थं दक्षिणस्यां॰ तुकारस्तथा॰ अर्ध
भागाः शततारायाः तुकारस्तथा॰ उत्तरस्यां पूर्वाभाद्रपदायाश्चतुर्विंशतिः। तस्यामेव दिशि भागाः विक्षेपभागाः उत्तरभाद्रपदायाः षट्त्रिंशति
रेवत्याः विक्षेपाभावः। चकारः पूरणार्थः॥ ९॥ ॥ अथास्त्यगेलुब्धकवह्निब्रह्महृदयताराणां ध्रुवकविक्षेपास्तदुपपत्तिश्च श्लोकत्रयेणाह॥ ५२

303
1918

अशीतिभागेयाम्यायामगस्त्योमिथुनांतगः। विंशोचमिथुनस्यांशेमृगव्याधोव्यवस्थितः॥ १०॥ विक्षेपोदक्षिणभागैःखार्णवैःस्वादपक्रमा
त्॥ हुतभुग्ब्रह्महृदयौवृषेद्वाविंशतिभागगौ॥ ११॥ अष्टाभिस्त्रिंशताचैवविक्षिप्तावुत्तरेणतौ॥ गोलंबध्वापरीक्षेतविक्षेपंध्रुवकंस्फुटं॥ भिति॰ स्व
कीयात्क्रांतिविभागस्थानात्॥ दक्षिणस्यामशीत्यंशे स्ताराराक्योगस्त्योमिथुनांतगः कर्कादिभागेस्थितः। अगस्त्यनक्षत्रस्यराशित्रयंध्रुवकः द
क्षिणविक्षेपोशीतिरित्यर्थः॥ मृगव्याधोलुब्धकोमिथुनराशेर्विंशतितमेभागेस्थितःचकारःसमुच्चये॰ लुब्धकनक्षत्रराशिद्वयंविंशतिभागाः
ध्रुवकइत्यर्थः॥ दक्षिणस्यांचत्वारिंशताभागैःपरिमितस्तस्यस्वक्रांतिवृत्तस्थानाद्विक्षेपः। वृषराशौवह्निब्रह्महृदयौ॰ द्वाविंशतिभागस्थितौ॰
वह्निब्रह्महृदयनक्षत्रयोःद्वाविंशतिभागाधिकैकराशिर्ध्रुवकः। तौ॰ वह्निब्रह्महृदयौ॰ अष्टाभिस्त्रिंशता॰ चकारः क्रमार्थे॰ एवकारान्न्यूनाधि
कव्यवच्छेदः। उत्तरेणउत्तरस्यामित्यर्थः। विक्षिप्तौ॰ विक्षेपवंतौ॰ वह्नेर्विक्षेपोष्टभागउत्तरः ब्रह्महृदयस्योत्तरोविक्षेपस्त्रिंशदित्यर्थः। नन्वेते
ध्रुवाविक्षेपाश्चकालक्रमेणनियताअनियतावेत्यतआहगोलमिति॰ गोलं॰ वक्ष्यमाणं॰ बध्वा॰ वंशशलाकादिभिर्निबध्य॰ स्फुटंविक्षेपं॰ क्रांति
संस्कारयोग्यं॰ ध्रुवाभिमुखं॰ ध्रुवकं॰ स्फुटं॰ आयनदृक्कर्मसंस्कृतंपरीक्षेत। स्वस्वकालेदृग्गोचरसिद्धमंगीकुरुत॰ तथाचक्रांतिसंस्कारयोग्य
विक्षेपायनसंस्कृतध्रुवकयोरयनांशवशाद्दस्थिरत्वादपिमयेदानींतसमयानुरोधनलाघवार्थमायनदृक्कर्मसंस्कृताध्रुवाः क्रांतिसंस्कार
योग्याविक्षेपा (उसंस्कृ) श्चनियताउक्ताः॥ कालांतरेगोलयंत्रेनेधसिद्धाःक्षेपाःनैतेइतिभावः॥ गोलयंत्रेणवेधस्तुगोलबंधोक्तविधिना
गोलयंत्रंकार्यं॰ तत्रखगोलस्योपरिभगोलमाधारवृत्तस्योपरिविषुवद्वृत्तं॰ तत्रयथोक्तं क्रांतिवृत्तं॰ भगणांशांकितंतत्वध्राध्रुवयष्टिकौ
लग्नयो॰ ओतमन्योवलंभवेधवलं यंतच्चभगणांशांकितं॰ कार्यंततस्तद्गोलयंत्रंसम्यग्ध्रुवाभिमुखयष्टिकंजलसमक्षितिजवलयं च
यथाभवति। तथास्थिरंकृत्वा राशौगोलमध्यस्थितिगतपादृष्ट्यारेवतीतारांविलोक्यक्रांतिवृत्तेमीनांतादक्षकलांतरितप्रश्चाद्भागेरेवतीता
रायांनिवेश्यमध्यगतयैवदृष्ट्याश्विन्यादेर्नक्षत्रस्ययोगताशंविलोक्यतस्याउपरितद्वेधवलयंनिवेश्यं॰ एवंकृतेसति॰ वेधवलयस्यक्रांति
वृत्तस्यवयःसंपातः समीनांतात्यग्रतोयावद्भिरंशैस्तावतस्तस्यनक्षत्रध्रुवांशाः ज्ञेयाः वेधवलयेतस्यैवसंपातस्ययोगतारायाश्चयावतोंतरेंशा
स्तावतस्तस्यविक्षेपांशाः दक्षिणाउत्तरावाववाधकदंवप्रोतवेधवलयेनवेधतुसदास्थिराध्रुवकाआयनदृक्कर्मसंस्कृताःपरंतुकदंबतार
योरभावादशाक्यमिति यथोक्तवेधेनैवायनदृक्कर्मसंस्कृताः ध्रुवाः शराश्च ध्रुवाभिमुखाः॥ स्फुटाः सिद्धाः भवंतीतिदिक्॥ १२॥ ॥ अ
थरोहिणीशकटभेदमाह वृषेसप्तदशेभागेयस्ययाम्योशकद्वयात्॥ विक्षेपोभ्यधिकोभिंद्याद्रोहिण्याः शकटंतुसइति॥ वृषराशौसप्तदशेंशे॥ यस्यग्रहस्यभा
गद्वयाद्धिकोविक्षेपोदक्षिणःसग्रहोरोहिण्याःशकटं॰ शकटाकारसंनिवेशंभिंद्यात्। तन्मध्यगतोभवेदित्यर्थः॥ तुकाराद्गृहविक्षेपोरोहिणीविक्षेपा

ग्र० टी०

५२

दन्त्य इति विशेषार्थकः॥ विक्षेपस्य दक्षिणस्य रोहिण्या विक्षेपादधिकत्वे शकटाद्बहिर्दक्षिणभागे ग्रहस्य स्थितत्वेन तद्भेदकत्वाभावात्। अत्र शाकल्यादिम
नक्षत्रस्य ध्रुवकराशिः सप्तदशांशाः। दक्षिणशरो भागद्वयमिति वेदितव्यम्। स्पष्टा युक्तिः॥१३॥ अथ ग्रहयोगसाधनार्थं ग्रहयोगसाधनरीत्यतिदे
शमाह एवं पुनर्नक्षत्राणां पुर्योः कर्म पूर्ववत्॥ ग्रहमेलकवत् केषयद् भुक्त्यादिनानि चेति। एवं वत्। धूम्रिको ग्रहणार्थं यथा दिनमानराशिमाने भ
स्पष्टकर्मार्थं कृते तथा दिनमानराशिमाने भानां नक्षत्रध्रुवकानां आसन्नदृक्कर्मार्थं गणकः कुर्यात्॥ तदनन्तरं पूर्ववत् नक्षत्राणि स्पष्टोदयास्तौ साधयित्वा भी
ष्टकालेदिनगतशेषाभ्यां नतकालादिपूर्वकाः पापाभ्यासादि सादिनेत्यर्थः। दृक्कर्म कुर्यात्। अत्र नक्षत्रध्रुवकपर्वतेनायनदृक्कर्माप्युदाहरणे कृतं। तदेवु
क्तं। तस्य ध्रुवत्वेऽस्वतः सिद्धत्वात्। तदनन्तरं शेषं नक्षत्रग्रहयुतिसाधनं ग्रहध्रुवतुल्यतारूपं ग्रहमेलकवत्॥ ग्रहयोगसाधनरीत्या ग्रहान्तरकला
कृत्वा दिनाद्यर्थं नक्षत्रयुत्यन्तरकलाः स्वस्वभुक्तिलिप्तासमाहृता॥ भुक्त्यन्तरेण विभजेदिति तु केनेत्यत्र कालिका गतिर्ग्राह्येत्यत आह ग्रहभुक्त्येति।
केवलया ग्रहगत्या प्रहस्यफलं ग्रहध्रुवान्तररूपं ग्रहे संस्कार्यं ध्रुवसमो ग्रहो भवति नक्षत्रस्य पूर्वगत्यभावाद्ध्रुवो यथास्थित इत्यर्थः॥ ननु तथापि ग्रह
नक्षत्रयुतिकालसाधने भुक्त्यन्तरासंभवात् कथं कार्यमिति। मन्दाशंकेऽसत आह दिनानीति। अभीष्टसमयाद्विवरमित्यादिना केवलया ग्रहगत्या ग्र
हनक्षत्रयुतिदिनानि साध्यानि वा समुच्चये नक्षत्राणां गत्यभावात्॥ १४॥ अथाभीष्टकालाद्ग्रहनक्षत्रयुतिकालस्य गतैष्यत्वसंभमार्थमु
नराहत्यो हीने ग्रहे योगो ध्रुवकादधिके गतः। विपर्ययाद्वक्रगते ग्रहे शेषः समागम इति। नक्षत्रध्रुवाद्युत्काल ग्रहे आयनदृक्कर्मसंस्कृतग्र
हे इति विवेकार्थः॥ न्यूने सति योगो नक्षत्रग्रहयोगः स्वाभीष्टसमयाद्भावी अधिके सति पूर्वं जातः वक्रगते ग्रहे विपर्ययो ज्ञेयः॥ उक्तवैपरीत्यात् समाग
म इति विवेकार्थः॥ नक्षत्रग्रहयोगो शेषः हीने ग्रहे गतो अधिके ग्रहे एष्यो योगः॥ अत्रोपपत्तिः॥ नक्षत्रस्य गत्यभावेन स्थिरत्वात् ग्रहगमनेनैव योगसंभवादिति स्फु
टम्॥ नक्षत्रग्रहयोगो शेषः हीने ग्रहे गतो अधिके ग्रहे एष्यो योगः॥ अत्रोपपत्तिः॥ नक्षत्रस्य गत्यभावे नसदा स्थिरत्वात् ग्रहगमनेनैव योगसंभवादिति स्फु
गमतरा॥ १५॥ अथाश्विन्यादिनक्षत्रस्य बहुतारात्मकत्वात् कस्यास्तारायाः एते ध्रुवकाः स्युस्तस्य योगतारायाः ध्रुवकादयस्तत्र मनसि धृत्वाश्विन्यादिनक्ष
त्राणां योगताराविवस्तु प्रथमं षण्णां नक्षत्राणां योगतारामाह फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढयोर्द्वयोः॥ विशाखाश्विनिसौम्यानां योगतारोत्तरा
स्मृतेति। एषामुक्तनक्षत्राणां प्रत्येकं स्वतारासु योत्तरदिक्स्था तारा सा योगतारा गोलतत्त्वज्ञैरुक्ता॥ १६॥ अथान्ययोरनयो राह पश्चिमो
त्तरताराया द्वितीयापश्चिमे स्थिता॥ हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमेति। हस्तनक्षत्रं पञ्चतारात्मकं हस्तपञ्चाङ्गुलिसंनिवेशाकारं॥
तत्र नैर्ऋत्यदिगाश्रितपश्चिमावस्थिततारायाउत्तरदिगवस्थिततारायाः द्वितीयाः पूर्वोक्तातिरिक्ता पश्चिमे वायव्याश्रिते स्थिताः सा हस्तस्य यो
गतारा हेयाः उत्तरतारा सन्ना पश्चिमाश्रिता तारा हस्तस्य योगतारेति फलितार्थः॥ धनिष्ठायाः योगतारामाह श्रविष्ठायाइति धनिष्ठायास्ता
रासु या पश्चिमदिक्स्था सा तस्याः योगतारा च समुच्चये॥ १७॥ अथान्येषामेषामाह ज्येष्ठाश्रवणमैत्राणां बार्हस्पत्यस्य मध्यमा॥ भरण्याग्ने ५२

यपित्र्याणां रेवत्याश्चैव दक्षिणेति। ज्येष्ठाश्रवणानुराधानां पुष्यस्य च प्रत्येकं तारात्मकत्वान्मध्यमतारा योगतारा स्यात्। भरणीकृत्ति
कामघानां रेवत्याश्च समुच्चये प्रत्येकं स्वतारासु या दक्षिणदिक्स्था सा योगतारा॥ १८॥ अथान्येषामेषामवशिष्टानां चाह रोहिण्यादित्यमूला
नां प्राचीसार्पस्य चैव हि॥ यथाप्रत्यवशेषाणां स्थूला स्यात् योगतारकेति। रोहिणीपुनर्वसुमूलानामाश्लेषायाश्च प्रत्येकं स्वतारासु पूर्वदिक्स्था सै
व योगतारेत्येवावधार्यः। प्रत्यवशेषाणां अवशिष्टनक्षत्राणां मार्द्राचित्रास्वात्यभिजिच्छततारास्वतारासु यथा प्रत्यं तं स्थूलामहतितारा
सा योगतारा स्यात्॥ १९॥ अथ ब्रह्मसंज्ञकनक्षत्रस्थानमाह पूर्वस्यां ब्रह्महृदयाद्वांशकैः पञ्चभिः स्थिताः। प्रजापतिर्वृषान्ते सौम्येऽष्टत्रिंशदं
शकैरिति। ब्रह्महृदयस्थानात् पूर्वभागे पञ्चभिरंशैः प्रजापतिस्तारात्मको ब्रह्मा कान्तिवृत्ते स्थितः। कुत्रेत्यत आह। वृषान्त इति। वृषान्तनिकटे एक
राशिः सप्तविंशत्यंशाः ब्रह्मध्रुवक इत्यर्थः॥ अस्य विक्षेपमाह सौम्येति। ब्रह्मोत्तरस्यामष्टत्रिंशदंशैः स्थितः॥ अष्टत्रिंशद्भागा अस्य विक्षेप इ
त्यर्थः॥ २०॥ अथापांवत्सापयोस्तारयोरवस्थानमाह अपांवत्सस्तु चित्राया उत्तरेंऽशकैः पञ्चभिः। रहत्किंचिदतो भागैरापः षड्भिः स्तथोत्तर इति
चित्रायाः सकाशादपांवत्ससंज्ञकस्तारात्मकः पञ्चभिर्भागैरुत्तरस्यां स्थितः॥ प्रथमतुकारश्चित्राध्रुवतुल्यध्रुवकार्थकः। द्वितीयतुकारश्चित्रा
विक्षेपस्य दक्षिणभागत्वात् मकतारपांवत्सविक्षेप उत्तरस्मिन् भाग इति स्फुटार्थकः॥ अतः अपांवत्सात्। किंचिदन्यान्तरेण बृहत् स्थूलतारात्म
कः। आपसंज्ञकः। तथा अपांवत्सात् षड्भिरंशैरुत्तरस्यां स्थितः चित्राध्रुवएकएवापस्य ध्रुवको विक्षेप उत्तरो नवांशा इत्यर्थः॥ २१॥ अथास्मिन्
ग्रंथस्यासंगतित्वनिरासार्थमधिकारसमाप्तिं फक्किकया हइतिनक्षत्रग्रहयुत्यधिकार इति स्पष्टं॥ ॥ रंगनाथेन विरचिते सूर्यसिद्धान्तटिप्प
णे॥ ग्रहर्क्षयुत्यधिकारोऽयं पूर्णो गूढप्रकाशके॥ ७॥ इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्र
काशके नक्षत्रग्रहयुत्यधिकारः पूर्णः॥ ॥ अथोदयास्ताधिकारो व्याख्यायते॥ ॥ ननु सूर्येणास्तमनं सहेति॥ प्रागुक्तो ग्रहयुत्यधिकारोऽन
न्तरं नक्षत्रग्रहयुत्यधिकाराभ्यामेवोदयास्ताधिकारो निरूपणीय इत्यतो न तत्संगतिप्रदर्शनार्थमादौ तदधिकारं प्रति जानाति अथोदयास्तम
ययोः परिज्ञानं प्रकीर्त्यते॥ दिवाकराक्रान्तमूर्तीनामल्पतेजसामिति॥ अथ नक्षत्रग्रहयुत्यधिकारानन्तरं सूर्यकिरणाभिभूतमूर्तिबिंब
येषां तेषां चन्द्रादिपञ्चग्रहाणां नक्षत्राणां च अतएवाल्पतेजसां॥ स्थूलप्रभावतां उदयास्तमययोः॥ अग्रिमकाले सूर्यादधिकासंन्निहितत्वसंभा
वनया क्रमेणोदयास्तयोः॥ सूर्यान्निष्क्रान्तस्य यस्मिन्काले यदंतरेण प्रथमदर्शनं संभावितं स उदयः सूर्यादूरस्थितस्य यस्मिन्काले यदं
तरेण प्रथमादर्शनं संभावितं सो (ऽस्तः) स्तः॥ अनेन नित्योदयास्तव्यवच्छेदः॥ तयोरित्यर्थः॥ परिज्ञाने सूक्ष्मज्ञाने प्रकारः प्रकीर्त्यते
अतिसूक्ष्मत्वेन मयोच्यत इत्यर्थः॥ तथा च ग्रहयुत्युद्देशोऽस्तमनयुतिरूपमपि तस्य पूर्वमेव सूर्यासमत्वएव संभवात्तद्विलक्षणतया ग्रहयुतिप्रसं

305/1918

जेनोक्तं॰ नक्षत्रग्रहयुतिरुक्ता ग्रहयुतिवदितिनदनंतरं मुक्ताः अतः प्रतिबंधकजन्मासाप गमेवरूपवक्र्यत्वस्यावसरसंगतित्वात्तत्संगत्यानक्षत्रग्र
हयुत्यधिकारानंतरं प्रागुदितमस्तमनंतत्संगापुदयश्चप्रतिपाद्यतेइतिभावः॥ १॥ तत्रप्रथमंपंचतारापश्चिमास्तपूर्वोदयावाह सूर्याद्भ्यधि
काः पश्चादस्तंजीवकुजार्कजाः॥ न्यूनाः प्रागुदयंयांतिशुक्रज्ञौवक्रिणौतथेति॥ वक्रगतौशुक्रबुधौ॰ तथा॰ सूर्याधिकौपश्चिमास्तंगच्छतः॥ सूर्याद
ल्पौपूर्वोदयंप्राप्नुतः॥ शेषंस्पष्टं॥ २॥ अथचंद्रबुधशुक्राणांपूर्वास्तपश्चिमोदयावाह ऊनाविवस्वतः प्राच्यामस्तंचंद्रज्ञभार्गवाः व्रजंत्यभ्यधिकाः
पश्चादुदयंशीघ्रयायिनइति॰ शीघ्रयायिनः॥ सूर्यगत्यधिकगतयइत्यर्थः एतेनबुधशुक्रावक्रगत्यन्यगतीसूर्यादल्पौपूर्वास्तमधिकौचपश्चि
मोदयंनप्राप्नुतइत्युक्तं। शेषंस्पष्टं॥ अत्रोपपत्तिः॥ शीघ्रगतितोल्पगतिग्रहोर्काद्दूनश्चेत्प्राच्यांदर्शनयोग्योभवतुमर्हति यतः सूर्यास्याधिकत्वेन
वक्रगतित्वातेनरोत्तरमधिकविप्रकर्षाप्रवहवशेनार्कस्यपूर्वमुदयादधिकस्यानंतरमुदयन्निपमाग्रहबिंबस्यप्राक्क्षितिजसंलग्नताकाला
नंतरंयावत्सूर्यस्यतावत्कालस्तावत्पर्यंतंप्रकर्षेदर्शनंसंभवात्॥ एवंयदाल्पगतिः सूर्यादधिकस्तदाप्रवहवशेनार्कस्यपूर्वमुदयादने
तरमुदितग्रहस्यदर्शनासंभवात्प्रवहवशेनार्कोन्यूनार्कस्यास्तसंभवादनंतरमधिकग्रहस्यास्तसंभवात्सूर्यास्तानंतरंपश्चिमभागेग्रहदर्शनसंभवेप्य
धिकगतिसूर्यस्यप्रच्छिन्नत्वेनोत्तरोत्तरमधिकसंनिकर्षात्पश्चिमस्यामदर्शनंसंभवत्येव॰ तेनभौमगुरुशनिनः॥ वक्रत्वेन्यूनगतित्वाद्बुधशु
क्रौचेति भर्थात्ग्रहगतिसूर्यादूनस्तदोत्तरोत्तरमधिकसंनिकर्षात्सूर्यसन्निधौदर्शनंयाति॰ यदासूर्यादधिकस्तदोत्तरोत्तरमधिकवि
प्रकर्षात्पश्चिमस्यामुदयः॥ तेनतौप्राच्यांबुधशुक्रावस्तमुपगतौमुक्तौ॥ ३॥ अथाभीष्टदिनेआसन्नेसूर्योदयास्तकौसूर्यदृग्ग्रहौतत्कालज्ञानार्थमा
द्यांविद्यादस्तसूर्यास्तकालिकौपश्चात्स्वाच्यामुदयकालिकौ॥ दिवार्कग्रहौकुर्याद्दृग्कर्मग्रहस्यतितिपश्चात्॥ पश्चिमास्तोदयसाधने॥ अभी
ष्टदिनेआसन्नेसूर्यग्रहौ॰ सूर्यास्तकालिकौकुर्यात्॥ गणकः॥ पूर्वास्तोदयसाधने सूर्योदयकालिकौकुर्यात्॥ दिनेअभीष्टकालेकुर्यात्। चरा
शेषिकत्यार्थकः॥ अनंतरं॰ ग्रहस्यदृक्कर्मः आयनाक्षदृक्कर्मद्वयंकुर्यात्॥ तुकारआक्षदृक्कर्मणोपूर्वं पूर्वोक्तमितिविशेषार्थकः॥ अत्रोपप
त्तिः॥ पश्चादस्तोदयसाधने पश्चिमस्यांतद्दर्शनमितिसूर्यास्तकालिकौसूर्यग्रहावीष्टकालोत्रासाधनार्थं सूक्ष्मौ पूर्वोदयास्तसाधने पू
र्वदिशितदर्शनमितिसूर्योदयकालिकौसूर्यग्रहाविष्टकालांशसाधनार्थंसूक्ष्मावन्यकालेतुकिंचित्स्थूलावपिकृतौ दृक्कर्मसंस्कृतग्रहस्य
सूर्यवत्क्षितिजसंलग्नताबोध्यत्वाद्दृक्कर्मसंस्कृतोग्रहः॥ कार्यइति॥ ४॥ अथेष्टकालांशानयनमाह ततोलग्नांतरप्राणाः कलांशाः षष्टिभा
जिताः॥ प्रतीच्यांषड्युतयोस्तद्दलग्नांतरासवइति तेनस्ताभ्यां॰ सूर्यदृग्ग्रहाभ्यां॰ लग्नांतरप्राणाः भोग्यासन्नकस्याधेस्युक्तप्रकारेण॰।
अंतरकालासवः षष्टिभक्ताइष्टाः कालांशाः भवंति। प्रागुदयास्तसाधने प्रतीच्यां॰ पश्चिमोदयास्तसाधने॰ षड्युतयोः। षड्राशियुक्तयोः॥ ५८

सूर्यदृग्ग्रहयोः लग्नांतरासवः। अंतरासवः तद्दत्। षष्टिभक्ताइष्टकालांशाः भवंतीत्यर्थः॥ अत्रोपपत्तिः॥ दृग्ग्रहसूर्याभ्यामंतरकालोग्रहस्यस
र्योदयकालेदिनगतंपूर्वोदयास्तनिमित्तमुपयुक्तं॰ एवंपश्चिमोदयास्तनिमित्तंसूर्यदृग्ग्रहाभ्यामस्तकालासुभिरंतरकालः सूर्यास्तकालेग्रहस्य
दिनशेषकालउपयुक्तस्तत्रास्तकालानामनुतेरूपासुभिः साधनायसषड्भौ सूर्यदृग्ग्रहौकृतौ॰ सकालोस्वात्मकः। अहोरात्रासुभिश्चक्रकला
तुल्याभिश्चकांशाः लभ्यंतेनतदेष्टासुभिः केइत्यनुपातेअनुपातेप्रमाणफलयोः फलापवर्तेतेनहरस्थानेषष्टिरतोस्वात्मकांतरकालः षष्टि
भक्तइष्टकालांशाइत्युपपन्नमुक्तं॰ अत्रेदमवधेयं॰ सूर्योदयकालिकाभ्यामर्कोदग्रहाभ्यामानीतेनदिनगतेनपूर्वंवाल्यो दृग्ग्रहः॥ सूर्यास्ता
कालिकाभ्यांसषड्भाभ्यामर्कदृग्ग्रहाभ्यामानीतेनदिनशेषणाग्रेवाल्यःसषड्भौ दृग्ग्रहः॥ क्रमेणग्रहोदयास्तकालेप्राक्पश्चिमदृग्ग्रहौभवतस्ता
भ्यांसूर्यसषड्सूर्याभ्यांचक्रमेणपूर्ववरीत्यांतरकालोग्रहस्यसूर्योदयास्तकालेक्रमेणदिनगतशेषौनाक्षत्रौषष्टिभक्तौकालांशाविशेषसूक्ष्मौ॰
अथेष्टकालिभ्यामानीतकालेनपूर्वंचालिताभ्यांप्राक्पश्चिमदृग्ग्रहाभ्यांसूर्यसषड्सूर्याभ्यांवानीतकालोनाक्षत्रोपिसूक्ष्मासन्नः॥ सूर्योद
यास्तसंबंधाभावात्॥ तदुत्पन्नाः कालांशाः अपितथा॰ अथसूर्योदयास्तकालिकाभ्यामानीतैकवारकालोत्कालांशाःस्थूलाः इष्टकालिकाभ्यामा
नीतैकवारकालात्कालांशा अतिस्थूलाः उभयत्रकालस्यसावनत्वात्॥ नहिसावनषष्टिघटीभिश्चक्रपरिपूर्तिर्येनसूक्ष्माःसिध्यंतीति। अ
थयेः कालांशोरूद्योस्तौवाभवतितान्विवक्षुः प्रथमंगुरुशनीभौमानांकालांशानाह॥ एकादशामरेज्यस्यतिथिसंख्याकेजस्यच॥ अस्तांशा
भूमिपुत्रस्यदशसप्ताधिकास्तइति तत्तदिष्टकालांशावगमानंतरं अस्तांशाः अस्तोपरंशौभवंतितेंशाः। अस्तोपलक्षणादुदयांशाः ज्ञेयाः। अम
रेज्यस्य गुरोरेकादशकालांशाः॥ शनेः पंचदशसंख्याकालांशानां॰ समुच्चये॰ भौमस्यसप्ताधिकादशसप्तदशकालांशाइत्यर्थः॥ ६॥ अथ
शुक्रस्याहपश्चादस्तमयोष्टाभिरुदयः प्राङ्महेत्तथा। प्रागस्तमुदयःपश्चादल्पत्वाद्दशभिर्भृगोरिति॥ शुक्रस्यमहत्तया॰ वक्रत्वेननीचासन्न
त्वात्स्थूलबिंबत्वात्पश्चिमस्यास्तः॥ अष्टाभिः कालांशैः॥ प्राच्यामुदयश्चतैः नाधिकैः। प्राच्यांशुक्रस्यान्यत्वादणुबिंबत्वाद्दशभिः काला
शैः अस्तंगणकः कुर्यात्॥ नाल्पैः पश्चिमस्यामुदयस्तस्याणुबिंबस्यदशभिः कालांशैः देवसेयः॥ ७॥ अथबुधस्याहएवंबुधोद्वादशभि
श्चतुर्दशभिरंशकैः॥ वक्रीशीघ्रगतिश्चार्कात्करोत्यस्तमयोदयाविति वक्रीशीघ्रगतिश्चसमुच्चयेः बुधः॥ सूर्यात्। द्वादशभिश्चतुर्दशभि
श्चकालांशैः अस्तोदयौ॥ एवंशुक्ररीत्या॰ करोति॰ पश्चादस्तं॰ प्रागुदयंचद्वादशभिः कालांशैर्महाबिंबतया बुधः करोति प्रागस्तंपश्चादुदयंच
चतुर्दशभिः कालांशैरणुबिंबत्वाद्बुधः करोतीत्यर्थः॥ ८॥ अथप्रोक्तेष्टकालांशाभ्यामस्तस्योदयस्यगतैष्यत्वज्ञानमाह एभ्योधिकैः कालभागै

30/1918

स॰टी॰ ५५

दृशान्यूनैरदर्शनाः भवंति लोके खचरा भानुभाग्रस्तमर्त्यदृश इति॰ तेभ्यः एकादशभ्यो मरेभ्यस्येति श्लोकत्रयोक्तेभ्यः अधिकैरिष्टकालांशैर्दृश्याः दर्शी
नयोग्याः अभीष्टकाले ग्रहाः भवंति॥ तथा चास्तसाधनं दृश्यत्वे अस्तएष्य॰ उदयसाधने दृश्यत्वे उदयो गत इति भावः॥ अल्पेष्टकालांशैः ग्रहाः
लोके भूलोके अदर्शनाः॥ नवि द्यते दर्शनं दृष्टिगोचरता येषां ते॰ अदृश्या अभीष्टकाले भवंति॰ ननु दृश्याः कुतो भवंतीत्यत आह भानुभाग्रस्त
मूर्तय इति मर्त्यास्त्वत्वेन सूर्यकिरणदीप्त्याग्रस्ता अभिभूताः सूर्यकिरणैः प्रतिहता लोकनयनविषयाः मूर्तिः॥ बिंबस्वरूपं येषां ते इत्यर्थः
तथा चास्तसाधने अदृश्यत्वे अस्तं गतः॥ उदयसाधने अदृश्यत्वे उदय एष्य इति भावः॥ अतएवोक्तेभ्य ऊनाभ्यधिका यदीष्टाः रवेरुदयो
गम्यगतस्तदा स्यात्। अतो यथा चास्तमयो गम्य इति भास्कराचार्योक्तं संगच्छते अत्रोपपत्तिः॥ उक्तकालांशात् अल्पेष्टकालांशे यत्काले ग्र
हो साधितो तत्काल एव ग्रहस्यास्तोदयो वा चक्रतः॥ उक्तकालांशानां सूर्यसांनिध्यजनितादर्शनहेतुत्वप्रतिपादनात्॥ तथा चेष्ट
कालांशा उक्तेभ्यो न्यूनास्तदा ग्रहस्यास्तंगतत्वमेव त्वुदयसाधने इष्टकालांशा उक्तेभ्यो न्यूनास्तदेष्टकालादग्रे ग्रहस्योदयः। यदीष्टकालांशा उक्ते
भ्योधिकास्तदेष्टकालात् पूर्वं ग्रहस्योदयः। पूर्वं जातः। एवमस्तसाधने इष्टकालांशा अधिकाः तदा दृश्यो ग्रहास्तः। यदीष्टकालांशाः न्यू
नास्तदेष्टकालात् पूर्वं ग्रहास्ते जात इत्युपपन्नमुक्तं॥ ९॥ अथोदयास्तयोर्गतैष्यदिनाद्यानयनमाह तत्कालांशांतरकलाभुक्त्यंतरविभाजिताः
दिनादिरित्यकलं लब्धं भुक्तियोगेन वक्रिण इति। उक्तेष्टकालांशयोरंतरस्य कलाः॥ सूर्यग्रहयोर्गत्योः कलात्मकांतरेण भक्ताः। दिनादिकमु
दयास्तयोः फलं उदयास्तयोर्गतैष्यदिनाद्यं भवतीत्यर्थः॥ वक्रगतिग्रहस्य विशेषमाह लब्धमिति॰ वक्रिणः। वक्रग्रहस्य उक्तयोगेन सूर्य
ग्रहयोः कलात्मकगतियोगेन भक्ताः फलं गतैष्यदिनाद्यं ज्ञेयं॰ अत्रोपपत्तिः। सूर्यग्रहयोर्गत्यंतरकलाभिरेकं दिनं तदेष्टप्रोक्तकालांशयोरं ५५
तरकलाभिः किमित्यनुपातेनोदयास्तयोरभीष्टकालागतैष्यदिनाद्यवगमः वक्रग्रहे तु सूर्यग्रहयोर्गतियोगेन प्रत्यहमंतरवृद्धेर्गतियोगा
नुपात उपपन्न इत्युक्तं॥ १०॥ अथ ग्रहगतिकालयोः क्रांतिवृत्तस्थत्वात्कालांशांतरस्याहोरात्रवृत्तस्थत्वाच्चानुपातः प्रमाणेष्ययोर्वैजात्ये न
युक्त इति मनसि धृत्वा न चोरेकजातित्वसंपादनार्थं ग्रहगत्योर्विशेषाज्जातीयत्वं बदभसारेण नुपातस्तु युक्त एवेत्याह लग्नस्तत्त्वं हृते भुक्ति अष्ट
दशाशातो द्युतिस्यातां वालगती ताभ्यां दिनादिगतगम्ययोरिति॰ भुक्ती॰ रविग्रहयोर्गती कलात्मके॰ लग्नस्वासहृते॰ कालसाधनार्थं ग्रहस्य योरा
शयुदयो यदीतस्तेनास्वात्मकोदयेन गुणिते॰ अष्टादशशतेन भक्ताः फले॰ सूर्यग्रहयोः कालांशात्मकालगती स्यातां॰ ताभ्यां॰ गतीभ्यां॰ गतग
म्ययोरुदयास्तयोर्दिनादि पूर्वोक्तप्रकारेण यथास्थितगतीभ्यां॰ स्थूलत्वापत्तेः। अत्रोपपत्तिः॥ एकराशिकलाभिरात्र्युदयासवस्तदागतिकला

भिः केत्यनुपातेन होरात्रवृत्ते गत्यसवः कलासमा इत्युपपन्नमुक्तं॥ ११॥ अथ नक्षत्राणां सूर्यसान्निध्यवशादस्तोदयज्ञानार्थं कालांशानिवृत्कः
प्रथमं मेषामाह स्वात्यगस्त्यमृगव्याधचित्राज्येष्ठापुनर्वसुः॥ अभिजिद्ब्रह्महृदयं त्रयोदशभिरंशकैरिति॥ मृगव्याधो लुब्धकः॥ त्रयोद
शभिः कालांशैर्दृश्यादृश्याणि नक्षत्राणि भवंति॥ शेषं स्पष्टं॥ १२॥ अथान्येषामेषामाह हस्तश्रवणफाल्गुन्यः श्रविष्ठारोहिणीमघाः। च
तुर्दशांशकैर्दृश्या विशाखाश्विनिदैवतमिति॰ फाल्गुनी॰ पूर्वोत्तराफाल्गुनीद्वयं॰ अश्विनी दैवतं॰ अश्विनीकुमारौ देवते॥ स्वामिनस्य त्य
श्विनीनक्षत्रं दृश्याः उपलक्षणार्थं त्वात्अविलिंगपरिणामश्च यथायोग्यं बोध्यः॥ शेषं स्पष्टं॥ १३॥ अथान्येषामेषामाह कृत्तिकामैत्रमू
लानि सार्परौद्रर्क्षमेव च॥ दृश्यंते पंचदशभिराषाढाद्वितयं तथेति॰ कृत्तिकानुराधा मूलनक्षत्राणि पंचदशभिः कालांशैः। दृश्यंते। उपलक्षणा
र्थं दृश्यंते न पितृदेवकारोन्यूनाधिकमवलेशार्थः॥ आश्लेषाः आर्द्राः समुच्चये॰ आषाढाद्वितयं तथा॰ पंचदशकालांशैर्दृश्यंते इत्यर्थः॥ १४॥ ॥
अथान्येषामविशिष्टानां चमाह भरणीतिष्यसौम्यानि सौक्ष्म्यात्त्रिः सप्तकांशकैः। शेषाणि सप्तदशभिर्दृश्यादृश्याणि भानित्विति॥ तिष्य॰ पु
ष्य॰ सोमदैवतं॰ मृगशिरो नक्षत्रं॰ एतानि नक्षत्राणि सौक्ष्म्यात्। अणुबिंबत्वात्। त्रिसप्तकांशकैः। एकविंशतिकालांशैः। दृश्यादृश्याणि।
उदितान्यस्तंगतानि च भवंतीत्यर्थः। शेषाणि पूर्वाधिकारोक्तनक्षत्रेषूक्तातिरिक्तानि॰ शततारा पूर्वोत्तराभाद्रपदा रेवती संज्ञानि॰ वह्निग्र
स्थापवंत्सापसंज्ञानि च॥ सप्तदशभिः कालांशैः दृश्यादृश्याणि भवंति। तुकारो दृश्यादृश्याणि स्यन्त्र समुच्चयार्थकः॥ १५॥ अथ दिनाद्यानयना
र्थं भीष्टच्छायाप्रमाणज्ञानीयकरणमाह अष्टादशशताभ्यास्ता दृश्यांशाः स्वोदयासुभिः॥ विभज्य लब्धाः क्षेत्रांशास्तैर्दृश्यादृश्यतावेति दृ
श्यांशाः कालांशाः अष्टादशगुणिताः॥ तान्स्वोदयासुभिर्ग्रहास्युदयासुभिर्भक्ता लब्धाः। क्षेत्रांशाः। क्रांतिवृत्तस्थांशाः तैरंशैर्दृश्यादृश्यता
उदयास्तौ॰ प्रकारांतरेणोक्तरीत्या ज्ञेयौः कालांशाभ्यां क्षेत्रांशावानीय तदेतरकला यथास्थितगत्योरंतरेण॰ योगेन वा भक्ताः फलमुदयास्तयो
र्गतैष्यदिनादि पूर्वोक्तलभवा स्यादित्यर्थः॥ अत्रोपपत्तिः॥ राश्युदयासुभिरेकराशिकलास्तदा कालांशकलातुल्यासुभिः का इति क्रांति
वृत्ते कलास्ताः षष्टिभक्ता अंशा इति पूर्वमेव छायास्थाने कलांशा एव धृताः लाघवादित्युक्तमुपपन्नं॥ १६॥ ननु ग्रहाणामनुकदिनयस्तोसक
कदिनयुदय इत्युक्तं॥ तथा नक्षत्राणां नोक्तं॰ गत्यभावाद्वियोगभोगासंभवेन गतैष्यदिनाद्यानयनासंभवश्चेत्यत आह॥ प्रागेषामुदयः
पश्चादस्तो दृक्कर्मपूर्ववत्॥ गतैष्यदिवसप्राप्तिर्भानुभुक्त्या सदैव हीति॰ एषां नक्षत्राणां प्राच्यामुदयः प्रतीच्यामस्तः गत्यभावादन्यगति
प्रवत्॥ एषां नक्षत्राणां दृक्कर्मः आक्षदृक्कर्म॰ पूर्ववत्॥ पूर्वप्रकारेण कार्यं॰ परंतु श्लोकपूर्वार्द्धेकमिति ध्येयं॰ सदा॰ नित्यं॰ एवकारात्कदाचि

307
1918

सू॰ टी॰
५६

रव्यन्यथानेत्यर्थः॥हि॰निश्चयेनरविगत्या॰गतेष्वपिदिवसावेलक्ष्यौस्यात॰नक्षत्रगत्यसंभवात॥१७॥ ॥योगेग्रहगतिवत॥१७॥ ॥अथकति
पयानांनक्षत्राणांसर्वसांनिध्यवशात्स्वीयाक्तीत्याह॥अभिजिद्ब्रह्महृदयंस्वातीवैष्णववासवाः॥अहिर्बुध्न्यमुदक्स्थत्वान्नलुप्यंतेऽर्करश्मिभिः॥इतिअ
भिजिद्ब्रह्महृदयं॥अनेनैकदेशस्यब्रह्मणोपिग्रहणं॥स्वातीश्रवणधनिष्ठाः॥अहिर्बुध्न्यमुत्तराभाद्रपदाः॥एतानिनक्षत्राणिउत्तरदिक्स्थत्वात॥उत्त
रविक्षेपाधिक्यादित्यर्थः॥सर्वदारवेः॥नःलुप्यंते॥अस्तंनयांतीत्यर्थः॥अत्रोपपत्तिः॥यस्योदयार्कादधिकोस्तभानुःप्रजायतेसौम्यशरातिदैर्घ्या
त॥तिग्मांशुसांनिध्यवशेननास्तीमित्यस्यतस्याःसमयःकथंचिदिति भास्कराचार्योक्ताःपरमिदमप्युक्तासभायां॥अन्यथापूर्वाभाद्रपदायाअपि
नथालापनेरितिदिक॥१८॥अथाग्रिमग्रंथासंगतितन्निरासार्थमधिकारस्यमासिप्रक्रियाकथाउदयास्ताधिकारइति॰नक्षत्रग्रहयो
स्तादयनिरूपणात्साधारण्येनोदयास्ताधिकारइत्युक्तं॥ ॥रंगनाथेनविरचितेसूर्यसिद्धांतटिप्पणे॥उदयास्ताधिकारोपूर्णोगूढप्रकाशके॥
८॥ ॥इतिश्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचितेगूढार्थप्रकाशकेउदयास्ताधिकारःपूर्णः॥ ॥अथभो
मादीनामस्पमानिध्योदयास्तासन्नेरीत्यासकलविवदर्शनंशृंगोन्नत्वेननभवति॥किंतुविंवैकदेशात्एवशृंगोन्नतेनदृश्यतेइतिभौमादिविसदृशंचंद्रस्य
तुलरत्वात्शंकायाःपूर्वाधिकारेसमुपस्थितेस्तदुत्तरंभूतशृंगोन्नमनाधिकारोवश्यमुपस्थितआरब्धोव्याख्यायते॥ ॥शृंगोन्नते हृदयकाला
पूर्वकालेस्तकालानंतरकालेचासन्नेरुक्तिपप्रमरिवेसेपुरुषोनाहसूर्वाधिकारेचंद्रस्यकालांशानुक्त्यातदुदयास्तानुक्तेश्चप्रथममुपस्थितचंद्रोद
यास्तयोःसाधनमतिदिशति॥उदयास्तविधिःप्राग्वत्कर्तव्यःशीतगोरभिभागेद्वादशाभिःपश्चादृश्यःप्राच्यामदृश्यतामिति॰चंद्रस्यअपिशब्दः
पूर्वाधिकारोक्तेग्रहनक्षत्रैःसमुच्चयार्थकः॥उदयास्तविधिः॥उदयास्तयोःसाधनप्रकारः॥प्राग्वत॥पूर्वाधिकारोक्तरीत्यागणकेनकार्यःननुका
लांशानांपूर्वमनुक्तेःकथंतत्सिद्धिरतआहभागैरिति॰द्वादशभिरंशैश्चंद्रःपश्चिमस्यांदृश्यः॥उदितोभवति॰प्राच्यां॰अदृश्यतां॰अस्तंप्राप्नो
ति॥अत्रपश्चात्प्रागितिपुनरक्तमपिचरवेर्बुधशुक्रयोःसाहचर्येणचंद्रोदयास्तविमुक्त्यात्साहचर्येणचंद्रस्यपश्चिमास्तपूर्वोदयोवर्तेते
तिनिरुक्तस्यनिमंत्रबुद्धेभ्रमस्यवारणायेतिध्येयं॥१॥ अथोदयास्तप्रसंगेनसूत्रयोश्चंद्रनित्यास्तोदययोःसाधनंविवक्षुःप्रथमंश्लोकत्र
येनेदोर्नित्यास्तसाधनमाहरवीद्वोःषड्भयुतयोःप्राग्वल्लग्नांतरासवः॥एकराशौरवीद्वोश्चकार्याविवरलिप्तिकाः॥२॥तन्नाडिकाहतेभुक्तरवी
द्वोःषष्टिभाजितेतत्फलान्वितयोर्भूयःकर्तव्याविवरासवः॥३॥एवंयावत्स्थिरीभूतारवींद्वोरंतरासवः॥तैःप्राणैरस्तमेतीदुःशुक्लेर्कास्तमयात्स
दिति॥शुक्लेशुक्लपक्षाभीष्टदिनेसूर्यास्तकालेस्पष्टौसूर्यचंद्रौसाध्यौचंद्रस्यदृक्कर्मद्वयंसंस्कार्यं॰तत्राक्षदृक्कर्मश्लोकपूर्वार्द्धोक्तमेव॥त
योः॥सूर्यचंद्रयोःषड्भाधियुक्तयोः॥लग्नांतरासवः॥अंतरकालासवः॥प्राग्वत॥भोग्यासन्नकस्येत्यादिनासाध्याः॥तौसषड्भार्कचंद्रावेकराशौ व

3 ll
1918

भिन्नराशौचेत्स्वस्त्यदासषड्भयोस्तयोः॥सूर्यचंद्रयोःअंतरकलाःकार्याः॥चकारोविषयव्यवस्थार्थकः॥तयोःअस्तकलयोःघटिकाभिःअसवःषष्ट्या
धिकशतत्रयेणभाज्याः॥घटिकाःकालादुदयाद्गुणिताएकराशिकलाभिर्भक्ताअसवस्तेषष्ट्याधिकशतत्रयेणभाज्याः॥घटिकाःआभिःसूर्यद्वार्गती
कलात्मकेगुण्येषष्टिभक्तेःतत्फलान्वितयोः॥स्वस्वफलयुक्तयोःसषड्भसूर्यचंद्रयोः॥भूयःपुनःविवरासवःअंतरप्राणाः॥पूर्वरीत्याकर्तव्याः॥एवं॰नहु
घटिकाभिःसूर्यास्तकालिकेसषड्भसूर्यदृक्कर्मसंस्कृतचंद्रोग्रचाल्यंतयोर्विवरासवइति॰यावत॥स्थिरीभूताअभिन्नास्तावत्साध्याः॥तैरभिन्नैर
सुभिःसूर्यास्तादनंतरंचंद्रोस्तंप्राप्नोति॥अत्रोपपत्तिः॥सूर्यास्तकालेसषड्भार्कोलग्नंदृक्कर्मसंस्कृतश्चंद्रः॥षड्भयुतश्चंद्रास्तकालेलग्नंपरंतुसूर्यास्त
कालिकंनस्वास्तकालिकं॥पश्चिमदृग्ग्रहःसूर्यास्तकालिकइतितत्त्वं॰तदंतरासवःसावनाश्चंद्रस्यसूक्ष्मादिनशेषाः॥परंतुपरिभाषयानाक्षत्रज्ञान
संभवात्साध्याःसाध्याइति॥चंद्रःस्वाभिधात्यःस्वास्तकालेसषड्भोलग्नं॰अस्मात्सूर्यास्तकालिकसषड्भसूर्याच्चांतरासवोनाक्षत्राःसूक्ष्माअपि
भगवतेकरीतिप्रदर्शनार्थंभिन्नकालिकाभ्यांरवीचंद्राभ्यांकथंसूक्ष्मसमयसिद्धिरितिमंदाशंकापनोदार्थंचसषड्भःसूर्योपिसाधितश्चंद्रास्त
काले॰ताभ्यामंतरासवोनाक्षत्राअपिसूर्यास्तकालिकलग्नाग्रहादसूक्ष्माइत्यसकृत्सूक्ष्मास्त्युपपन्नो॰वस्तुतस्तुसावनाभ्युपगमेरवींद्वोःष
ड्भयुतयोःप्राग्वल्लग्नांतरासवः॥तैःप्राणैरस्तमेतीदुःशुक्लेर्कास्तमनात्परमित्येकएवसूर्यसिद्धांतेश्लोकः॥श्लोकमध्येएकराशौ॥विस्तादिरवीद्वो
रंतरासवइत्यंतंश्लोकेकेनचिन्मंदमतिनासमयोसकृदेवसाध्याइतिशिष्यधीवृद्धिरंगोक्तंसकृद्बुद्धिमन्येनायुक्तमपियुक्तियुक्तंमत्वानिक्षिप्तं॰
कथंमन्यथाभगवतःसर्वज्ञस्यशुद्धिसावनघटीज्ञानानंतरमसकृत्साधनोक्तिःसंगच्छते॥किंच॰एकराशौरवींद्वोश्चकार्याविवरलिप्तिकाइ
त्यर्धस्यत्रिप्रश्नाधिकारेभोग्यासन्नकस्येत्यादिश्लोकाग्रेईक्षितत्वेनात्रानपेक्षितत्वं॰प्राग्वल्लग्नांतरासवइत्यनेनैवानतसिद्धेरिति॥अथना
क्षत्राभ्युपगमेतुचंद्रस्यसावनघटीभिश्चालनेस्वास्तकालिकसिद्ध्यर्थमावश्यकं॥नतुसूर्यस्य॰प्रयोजनाभावात॥नहिचंद्रास्तकालसाधितसषड्
सूर्यःसूर्यास्तकालिकेलग्नंयेनसूर्यचालनंयुक्तं॰अपिचएकस्यचंद्रस्यचालनेनपुनरेकवारेणैवसूक्ष्मनाक्षत्रकालिकासिद्धौद्वयोश्चालनोक्तौ
नाक्षत्रस्यासकृत्क्रियानयनमततंगौरवंसर्वंतेनकथमुक्तं॰असकृत्साधनेनसूक्ष्मनाक्षत्रसिद्धौयुक्त्यभावश्च॰अतएवज्ञातुंयदाभिमता
ग्रहस्यतत्कालखेटोदयलग्नलग्ने॰साध्योनयोरंतरनाडिकायास्ताःसावनास्युर्द्युगताग्रहस्येतिभास्कराचार्योक्तंसंगच्छतेइतितत्त्वं॥२॥
अथोदयास्तसाधनमाहभगणार्द्धंरवेर्दत्ताकार्यास्तद्विवरासवः॥तैःप्राणैःकृष्णपक्षेतुशीतांशुरुदयंव्रजेदिति॰कृष्णपक्षे॰भगणार्द्धंषड्राशीन
सूर्यस्यदत्त्वासंयोज्य॰तुकाराच्चंद्रस्यादत्त्वेत्यर्थः॥तद्विवरासवःतयोः॥दृक्कर्मसंस्कृतचंद्रसषड्सूर्ययोरंतरासवः॥प्रागुक्तप्रकारेणसाध्याः
तैःसाधितैरसुभिःचंद्रःसूर्यास्तानंतरं॥उदयंगच्छेत॥अत्रोपपत्तिः॥सूर्यास्तकालेसषड्भार्कस्यलग्नत्वात्सूर्येषड्भानियोजनं॰उदयसाधना

र्थं प्राग्ग्रहस्यापेक्षितत्वाच्चंद्रोदक्कर्मसंस्कृतोयथास्थितोनपङ्गशिस्तुक्तः॥ तद्विवरास्मभिचंद्रस्यसूर्यास्तानंतरमुदयःसावनेः॥तच्चालितचंद्रात्स
र्यास्तकालिकस्पष्टार्काच्चविवरासवोनाक्षत्राः इति॰ शृंगोन्नतिसाधनार्थं दृश्यकालेसूर्यचंद्रौसाध्याविति ज्ञापनार्थं चंद्रस्यनित्योदयास्तावुक्तावि
त्यर्थं ग्रहनक्षत्रादीनां प्रयोजनाभावादनुक्तौ चंद्रोपलक्षणादुक्तौ वा तत्र शुक्लकृष्णपक्षाविवेकोनेतिध्येयं॥२॥ अथ प्रकृतं विवक्षुः प्रथमंत
दुपयुक्तं भुजकोटिकर्णात्मकं क्षेत्रं श्लोकत्रयेणाह॥ अर्केन्द्वोः क्रांतिविश्लेषो दिक्साम्ये युतिरन्यथा॥ तज्ज्येन्दुरर्काद्यत्रासौ विज्ञेया दक्षिणोत्तरा
॥४॥ मध्याह्नेंदुप्रभाकर्णसंगुणा यदि सोत्तरा॥ तदार्कघ्नाक्षजीवायां शोध्या योज्या च दक्षिणा॥५॥ शेषं लंबज्यया भक्तं लब्धो बाहुः स्व
दिङ्मुखः॥ कोटिः शंकुस्तयोर्वर्गयुतेर्मूलं श्रुतिर्भवेदिति॥ सूर्यचंद्रयोः स्पष्टक्रांत्योर्दिगैक्ये अंतरं॥ अन्यथा॰ दिग्भेदे योगः॥ अत्र क्रांति श
ब्दः॥ क्रांतिज्यापरो ज्ञेयः॥ उपपत्तिविरोधात्॥ तज्ज्या॰ सा वासौ ज्या च॥ संस्कारसिद्धक्रांतिज्येत्यर्थः॥ अर्काच्चंद्रो यत्र यस्यां दिशि तद्दि
क्का दक्षिणोत्तरा वासौ ज्या ज्ञेया॰ एकदिशि रविक्रांतितश्चंद्रक्रांतेरधिकत्वे सूर्याच्चंद्रस्य क्रांतिदिक्॥ स्वल्पत्वेन ज्याक्रांतिदिक्॥ ऊनत्वे अर्कक्रांति
दिग्विपरीतदिक्॥ स्वल्पत्वेन क्रांतिभिन्नदिक्॥ भिन्नदिशि चंद्रक्रांतिदिग्ज्या ज्ञेयेत्यर्थः॥ सा ज्या॰ मध्याह्नेंदुप्रभाकर्णसंगुणा यत्काले चंद्रः शृं
गोन्नत्यर्थं साधितस्तत्काले मध्याह्नच्छायाकर्णं वच्छायाकर्णं चंद्रस्य साध्यः॥ सत्वसांशाच्चंद्रस्पष्टक्रांत्योरुत्तरदिशि वियोगो दक्षिणदिशि यो
गस्तद्भूनतवत्संशज्यया भक्ताद्द्वादशगुणितत्रिज्येति॰ उपपत्त्युररीधेन तु क्रांत्योरुत्तरदिशि वियोगो दक्षिणदिशि योगस्तद्भूनतवत्यं मध्या
ह्नः पदं तत्कालपरं॥ यत्काले चंद्रस्तत्काले चंद्रस्य युगतुंदिनशेषं वा प्रसाध्य त्रिप्रश्नाधिकारविधिना शंकुप्रसाध्यच्छायाकर्णः साध्यः॥ अ
हः अहोरात्रस्य मध्यं सूर्यास्तात्कालिकचंद्रस्यच्छायाकर्णो वा॥ अयमेव भगवदभिप्रेतः॥ कथमन्यथा चंद्रस्य शृंगोन्नतौ दृक्कर्म दृक्संस्का ६९
रः शृंगोन्नतौ शशांकस्येति प्रागुक्तः संगच्छेतदिनार्धातिरिक्तच्छायासाधनार्थमेव दृक्कर्मणोरुपयोगात् अन्यत्र शृंगोन्नतिगणिते तदुपयोगाभावा
त्॥ स्पष्टक्रांत्येव च्छायाकर्णसिद्धेः अत्र विश्लोकपूर्वार्धोक्तमेवाक्षदृक्कर्म संस्कार्यं॥ तेन च्छायाकर्णेन गुणिते इत्यर्थः॥ सा तादृशी ज्या॰ यदु
त्तरा तदा द्वादशगुणितायामक्षज्यायां॰ शोध्या॰ अंतरिता॰ तेन द्वादशगुणिताक्षज्याधिका तादृशी ज्या तदापि विपरीतशोधनेन क्षतिः॥ य
दि दक्षिणा तदा तस्यामेव युक्ता कार्या॰ वा व्यवस्थार्थकः॥ शेषं संस्कारजं॥ स्वदेशलंबज्यया भक्तं॰ फलं भुजः॥ प्राप्तः स्वदिङ्मुखः स्व
शादेनसंस्कारः॥ तस्य दिक्॥ तस्या मुखं अग्रं यस्यासौ॰ संस्कारदिगित्यर्थः॥ भुजस्य कोटिकर्णसापेक्षितत्वात् कोटिरिति॰ शंकुर्द्वा
दशांगुलाः कोटिः॥ तयोर्भुजकोट्योर्वर्गयोर्योगात् मूलं कर्णः स्यात्॥ अत्रोपपत्तिः॥ स्वाग्रास्वशंकुतलयोः समभिन्नदिक्त्वे योगांतरं भवति॥

313
1918

दिशि चंद्रदोः फलस्य ज्यांशयोर्विचरमन्यादिशोस्ततयोगः स्पष्टो भुजो भवति चंद्रभुजांशाद्यर्कदोः भुजे भुजे रविभुजाद्विपरीतदिक् इति सूक्ष्मभुज
साधनं भास्कराचार्येण स्फुटं शिरोमणावुक्तं तदुपपत्तिस्तत्टीकायां व्यक्ता॰ अनयारीत्याभुजसाधनार्थं क्रांतिज्ययोरग्रे साध्ये लंबज्याको
टौ त्रिज्याकर्णस्तदा क्रांतिज्याकोटौ कः कर्ण इत्यनुपातेन तत्स्वरूपं तु प्रत्येकं सूर्यचंद्रयोः॥ सूर्यक्रांतिज्या त्रिज्यागुणा लंबज्याभक्ता सूर्यक्रां
तिज्याग्रं॰ चंद्रस्पष्टक्रांतिज्या त्रिज्यागुणा लंबज्याभक्ता॥ च॰ क्रांतिज्या॰ त्रि॰ अनयोः स्वस्वशंकुतलसंस्कार्ये तत्र शृंगोन्नत (लं १) त्यर्थं सूर्ये
ण भगवता सूर्यास्तात्कालिकगणितस्यैवाभ्यु (लं १) पगमात्तत्र सूर्यशंकोरभावात्तच्छंकुतलाभावाच्च सूर्याग्रमेव सूर्यभुजः सिद्धः॥ चंद्रस्य
तु तदा शंकोः सद्भावाच्छंकुतलमुत्पद्यते तत्तु लंबज्याकोटावक्षज्या भुजस्तदा शंकुकोटौ को भुज इत्यनुपातेन तात्कालिकचंद्रोन्नतनतका
लसाधितत्रिप्रश्नाधिकारोक्तचंद्रमहाशंकुगुणिताक्षज्या लंबज्याभक्तेति दक्षिणमेव शंकुतलस्वरूपं॥ (अक्षज्या॰ चं॰ शं १) इदं चंद्रदक्षि
णाग्राया योज्यं चंद्रस्य दक्षिणो भुजः॥ चंद्रोत्तराग्राया पातितं चंद्रस्योत्तरो भुजः॥ चंद्रोत्तराग्रया हीनमिदं॰ (लं १) चंद्रस्य दक्षिणो भुजः॥ (चक्रां॰
ज्यात्रि॰ अक्षज्या॰) (चं शं लं १) (सा चक्रांज्या॰ त्रि १ अक्षज्या॰ च॰ शं लं १) उत्तरो भुजः॥ चक्रांज्या॰ त्रि १ अक्षज्या॰ चं॰ शं १ लं॰ अयं चंद्रभुजः सूर्याग्रये
कदिक्त्वेनरितोभिन्नदिशोर्युक्तः स्पष्टः शृंगोन्नत्युपयुक्तो भुजः यथा सूर्यस्य॥ दक्षिणगोले॰ सूक्रांज्या॰ त्रि १ चक्रांज्या॰ त्रि १ अक्षज्या॰ चं शं १
सूक्रांज्या॰ त्रि १ चक्रांज्या॰ त्रि १ अक्षज्या॰ चं शं १ इदं भुजद्वयं स्पष्टो भुजो भवति चंद्रभुजांशाद्युक्ते दक्षिणं॰ सूर्यभुजस्य न्यूनत्वे न शोध्य
त्वात्॥ सूर्यभुजस्याधिकत्वे तु॰॥ (सूक्रांज्या॰ त्रि १ चक्रांज्या॰ त्रि १) (अक्षज्या॰ चं शं लं १) (सूक्रांज्या॰ त्रि १ चक्रांज्या॰ त्रि १ अक्षज्या॰ चं शं लं १)
इदं भुजद्वयमुत्तरं॰ र् दोः भुजे भुजे रविभुजाद्विपरीतदिक् इत्युक्तेः योगेन तरो भु (लं १) जः॥ (सूक्रांज्या॰ त्रि १ चक्रांज्या॰ त्रि १ अक्षज्या॰
च॰ शं लं १) सूर्ये उत्तरगोलेपि सूक्रांज्या॰ त्रि १ अक्षज्या॰ च॰ शं लं १) (सूक्रांज्या॰ त्रि १ चक्रांज्या॰ (त्रि १ अक्षज्या॰ च शं लं १) इदं भुजद्वयं दक्षिणं॰ अंतरे
अंतरे तु सूर्यभुजस्य न्यूनत्वे उत्तरभुजः (लं १) (सूक्रांज्या॰ त्रि १ चक्रांज्या॰ त्रि॰ अक्षज्या॰ लं १) (च॰ शं १) सूर्यभुजस्याधि
कत्वे तु (सूक्रांज्या॰ त्रि १) (त्रि चक्रांज्या॰ त्रि १ अक्षज्या॰ चं शं लं १) दक्षिणो भुजः ह्दोः भुजे भुजे इत्युक्तत्वात्॥ अत्र नवसुपक्षे षु
प्रथमपक्षे सूर्यचंद्रक्रांतिज्ययोरेकदिशि योरंतरं त्रिज्या गुणितं॰ तत्सूर्यक्रांतिसंबद्धं चेत् नोक्षज्येंदुशंकुघातो लंबज्याभक्तः इति॰ चं
द्रक्रांतिसंबद्धं चेत्तेन युतस्तद्घातो लंबज्याभक्त इति सिद्धं॥ तथा शेषाणामादक्षिणत्वेनैकदिशि योगार्थं चंद्रस्य॥ दक्षिणत्वं सूर्यरीत्या उत्तरत्वं
भिन्नदिशि वियोगार्थं कल्पितं॥ युक्तं चैतत्॥ सूर्यक्रांत्यधिकत्वे सूर्याच्चंद्रस्योत्तरत्वात्॥ शृंगोन्नतौ चंद्रस्यैव प्राधान्याच्च॰ द्वितीयपक्षे क्रां

ति ज्ययोभिन्नदिशायोर्योगेन तावद्येन तदूनं कृत्वा लंबज्यया भजेदित्यत्रापि योगस्यार्धंतरार्धमुत्तरदिक्कं चंद्रक्रांतेरुत्तरत्वेन दक्षिणस्थ
सूर्यचंद्रस्य कनरामुत्तरत्वाच्च॰। तृतीयपक्षे क्रांतिज्ययोरेकदिशायोरंतरे सूर्यसंबंधे एवतावद्येन तद्धऊन इति। वियोगार्थमंतरस्योत्तरदि
क्कं। द्वयोर्दक्षिणगोलस्थत्वेप्यधिकस्य सूर्यस्योनत्वं चंद्रस्योत्तरत्वात्। चतुर्थपक्षे भिन्नदिशायोः क्रांतिज्ययोर्योगे तावद्येन तद्धऊन इति वियोगा
र्थं योगस्योत्तरदिक्कस्थत्वात्। पंचपक्षे पुचतुर्थपक्षोक्तं॰ तुल्यत्वात्। षष्ठपक्षे क्रांतिज्ययोभिन्नदिशयोर्योगो दक्षिणस्तद्धियोगा
र्थं। चंद्रस्य दक्षिणगोलस्थत्वात्॥ सप्तमपक्षे क्रांतिज्ययोरेकदिशायोरंतरं सूर्यसंबद्धं तदा तद्धधेयो ज्याभित्यंतरं दक्षिणद्वयोरुत्तरगो
लस्थत्वेपि चंद्रस्य न्यूनत्वेनाक्रांदक्षिणस्थत्वात्। पंचपक्षे पुचतुर्थपक्षोक्तं॰ तुल्यत्वात्॰ षष्ठपक्षे क्रांतिज्ययोभिन्नदिशायोर्योगो दक्षिण
स्तद्धियोगार्थं॰ चंद्रस्य दक्षिणगोलस्थत्वात्॰ सप्तमपक्षे क्रांतिज्ययोरेकदिशायोरंतरं सूर्यसंबद्धं तदा तद्धधेयो ज्याभित्यंतरं दक्षिणद्व
योरुत्तरगोलस्थत्वेपि चंद्रस्य न्यूनत्वेनाक्रांदक्षिणस्थत्वात्। अधिकेत्वेत तरं तद्धधेहीनमिति। अष्टपक्षे क्रांतिज्ययोरेकदिशायोरेकतरे
चंद्रसंबद्धे उत्तरे तद्धऊनः। चंद्रस्याधिकत्वेनोत्तरस्थत्वात्। अष्टपक्षे पुसमदिशायोः क्रांतिज्ययोरंतरं सूर्यसंबद्धं तद्धधेयो ज्यमिति॥ द
क्षिणं॰ चंद्रस्य न्यूनत्वेन दक्षिणस्थत्वादित्युपपन्नं दक्षिण श्लोको कंभत्र केन चिक्रांतिशब्देन चापात्मकक्रांतिर्गृहीतात्तत्संस्कारः। स्फुट
स्तस्य ज्या कोटिरिति। व्याख्यातं॥ तदुपपत्ति विरुद्धं। न हि भुजसाधने चापात्मकक्रांतीप्रयोजकत्वेनोपपन्ने॰ येन व्याख्यो क्ता युक्ताः नवा
क्रांतिज्यायोग वियोगाभ्यां चापात्मकक्रांतियोगवियोगयोर्ज्ये तुल्ये येनोक्तं संगतं स्यात्। अन्यथास्ताशक्रांत्यंशसंस्काराज्ञाज्यां विनापि
क्रांतिज्याख्यज्ययोः। संस्कारेण नतांशज्यायाः साधनापत्तेरिति दिक्। अथायं भुजस्त्रिज्यावृत्ते इति लाघवात्तात्कालिके चंद्रछायाक
र्णमिति वृत्तेसाधिता साधितस्त्रिज्या वृत्ते यं भुजस्तदा चंद्रछायाकर्णवृत्ते क इत्यनुपातेन क्रांतिज्ययोः संस्कारमितमा॰ घे खंडे चंद्रछा
याकर्णगुणमिति सिद्धं॰ त्रिज्यामितहरवेगुणस्य रानीं तन त्रिज्यामितहरस्य तुल्यत्वेन द्वयोर्नाशाच्च॰ अथापरखंडं चंद्रशंकुघ्नज्या
घातात्मकं॰ चंद्रछायाकर्णगुणं त्रिज्याभक्तं कार्यं॰ तत्र त्रिज्या द्वादशाघातस्य चंद्रशंकुभक्तस्य छायाकर्णत्वात् कुत्रिज्यामितयोर्गु
णहरयोः प्रत्येकं नाशाद्रक्षज्या द्वादशागुणे त्यपरं खंडं सिद्धं॰ द्वयोरेकदिशियोगो भिन्नदिश्यंतरमिति संस्काराल्लंबज्याभक्तो भुजः
संस्कारादिक् सिद्धः। शंकुः कोटिरिति चंद्रछायाकर्णवृत्ते भुजसाधनात्तद्वृत्ते कोटिरपि साध्या सा तु नियता द्वादशाः नियतकोट्यर्थमे
व भुजश्च चंद्रछायाकर्णवृत्ते साधितः। सूर्योदयास्तयोः सूर्यशंकोरभावात्सूर्यशंकुसंस्काराभावः। तदितरकाले चक्रक्रियया न निर्वाहः

कोटिभुजयोर्वर्गयोगान्मूलं कर्ण इत्युपपन्नं माध्या द्वे त्यादि श्लोकद्वयोक्तं॥ ६॥ अथ शृंगोन्नयनमाह सूर्योनशीतगोर्लिप्ताः शुक्लं नवशतो
द्धृतं॥ चंद्रबिंबांगुलाभ्यस्तं हृतं द्वादशभिः स्फुटमिति॰ सूर्योनितचंद्रस्य कलाः नवशतभक्ताः फलं शुक्लं। तत्र। चंद्रग्रहणाधिकारोक्तप्रका
रावगतं चंद्रबिंबांगुलैर्गुणितं द्वादशभिर्भक्तं फलं स्फुटं शुक्लं कुर्यात्। अत्रोपपत्तिः। दर्शांते सूर्यचंद्रयोरंतराभावादस्मद्दृश्यार्धे चंद्रगोले
सूर्यकिरणप्रतिफलत्वाभावाच्छौक्ल्याभावः॥ ततो यथा यथार्काच्चंद्रः पूर्वतोंतरितस्तथा। तथा चंद्रगोलास्मद्दृश्यार्धे चंद्रपश्चिमभागक
मेण शौक्ल्यवृद्धिः॥ एवं षड्राश्यंतरेण पौर्णिमास्यंते चंद्रगोलास्मद्दृश्यार्धे संपूर्णश्वेतं भवति। अतः षड्राशिकलाभिः स्वस्वास्तदिग्भिर्द्वाद
शांगुलव्यासं बिंबं श्वेतं तदेष्टेन सूर्योनचंद्रकलागणेन किमित्यनुपातेप्रमाणफलयोः फलापवर्तनेन प्रमाणस्थाने नवशतमतः सूर्यो
नचंद्रस्य कलाः नवशतभक्ताः शौक्ल्यमिदं द्वादशांगुलव्यासप्रमाणेन सिद्धमतो द्वादशांगुलप्रमाणेनेदं तदाभिमतचंद्रबिंबांगुलव्यास
प्रमाणेन किमित्यनुपातेनोक्तमुपपन्नं॥ अनेन प्रकारेण चिनांतरे चंद्रगोलास्मद्दृश्यार्धे श्वेतं भवतीति सिद्धः भास्कराचार्यैस्तु कक्षाच
तुर्थस्तरणेरिहेंदुः कर्णांतरेतिर्यगिनोपतोस्मात्। पादोनषड्राश्यंतरेणतोर लंन्दर्शयंदलमस्य शुक्लमिति शृंगोन्नतिवासनायामु
क्तं॰ शृंगोन्नत्यधिकारेप्येवं चंद्रस्य योजनमयश्रवणेन विघ्नोप्यकेंदुदोर्गुणइनश्रवणेन भक्ताः॥ तत्क्रमुकेन सहितः स्वलुशुक्लपक्षे द्वष्णेमु
नाविरहितः। नाशाभद्विधयइति तभिप्रेतश्चेत्यानयनोपयुक्तश्चेद्वापि साधितइत्यलं॥ ७॥ अथश्लोकचतुष्टयेन शृंगोन्नतिपरिलेखमा
ह। दत्वार्कसंज्ञितं बिंदुं ततो बाहुः स्वदिङ्मुखं॥ ततः पश्चान्मुखी कोटी किरणेको ध्यग्रमध्यगं॥ ८॥ कोटिकर्णयुताबिंदोर्बिंबं तात्कालिकं
लिखेत्॥ कर्णसूत्रेण दिक्सिद्धिं प्रथमं परिकल्पयेत्॥ ९॥ शुक्लं कर्णेन तद्बिंबयोगादंतर्मुखं नयेत्॥ शुक्लाग्रयाम्योत्तरयोर्मध्ये मत्स्यौ प्र
साधयेत्॥ १०॥ तन्मध्यसूत्रसंयोगाद्बिंदुं त्रिस्पृक्लिखेद्धनुः॥ प्राग्बिंबं यादृग्वेत्स्यात्तादृक्तत्र दिने शशी॥ ११॥ समभूभावभीष्टस्थाने दि
क्साधनं कृत्वा पूर्वापरादक्षिणोत्तरा च रेखा कार्या॥ तत्र दिक्संपाते॰ अर्कसंज्ञितं। अर्कसंज्ञासंजातास्येति न्येतादृशमर्कसंज्ञं॰ बिंदुं॰ चि
ह्नं॰ दत्वा॰ कृत्वेत्यर्थः। ततः बिंदोः सकाशात् भुजं पूर्वसाधितं॰ स्वदिङ्मुखं॰ स्वदिशा॰ दक्षिणोत्तरान्यतरा॰ तदभिमुखं दत्वा॰ भुजांगुलानि
गणयित्वा चिह्नं कृत्वा॰ ततो भुजाग्रचिह्नात्॰ पश्चान्मुखी॰ पश्चमदिक्समसूत्राभिमुखाग्रो॰ कोटिं॰ द्वादशांगुलात्मिकां दत्वा॰ कर्ण॰ पू
र्वसाधितं कोध्यग्रमध्यगं॰ कोट्यग्रचिह्नं॰ मध्यं॰ सूर्यसंज्ञकचिह्नं॰ तयोर्गतं स्पृष्टं॰ तदंतराले कर्णांगुलानि दत्वेत्यर्थः॥ कोटिकर्णरेखा
संयोगे मध्यं प्रकल्प्य तात्कालिकं तत्पश्चात्सोदयकालिकं चंद्रस्य साधितं मंडलं लिखेत्। तत्र लिखितचंद्रबिंबे॰ कर्णसूत्रेण कर्णरेखाया॰

सू०टी०
५५

प्रथममादौ॰ दिक्प्रसिद्ध्यै॰ दिशां निष्पत्तिं॰ परिकल्पयेत् कुर्यात्॰ चंद्रमंडलं कर्णरेखायां यत्र लग्नं तत्र चंद्रवृत्ते पूर्वापरा कर्णरेखा स्वमार्गेणाग्रि॰
मार्थं चंद्रवृत्तपरिधौ यत्र कर्णरेखापरभागे लग्ना तत्र पश्चिमा॰ तस्याः पूर्वरेखाद् दक्षिणोत्तरा चंद्रवृत्ते यत्र लग्ना तत्र दक्षिणोत्तरेति फलितार्थः
शुक्लं सर्वं साधितं॰ कर्णवत् कर्णरेखामार्गेण॰ तद्दिं बवेत्तात्। चंद्ररेखा चंद्रमंडलपरिधौ॰ संपाताद् पूर्वात्॥ अंतर्मुखं॰ चंद्रवृत्ते केंद्राभिमुखं॰ नयेत्॥
शुक्लाग्रचिह्नं कुर्यात्। चंद्रकांतःकर्णरेखायां पश्चिमचिह्नात् शुक्लांगुलमितगणितमिता चिह्नं कुर्यादित्यर्थः॥ शुक्लाग्रयाम्योत्तरयोः। चंद्रवृत्तोपरि
तत्र शुक्लाग्राच्चिह्नं यत्र तत्र चंद्रवृत्तपरिधौ दक्षिणोत्तरयोश्चिह्नं कृत्वा योरित्यर्थः॥ मध्ये अंतराले॰ मत्स्यौ॰ प्रत्येकं साधयेत्। शुक्लाग्रदक्षिणचिह्नाभ्यां
मत्स्यः शुक्लाग्रोत्तरचिह्नाभ्यां मत्स्यश्चेति द्वौ कुरीलाम मत्स्यौ कुर्यादित्यर्थः॥ तन्मध्यसूत्रसंयोगात्। तयोर्मत्स्ययोर्मध्यसूत्रं मुखपुच्छसूत्रं ग
भिन्नसंबंधे कृते यत्र चंद्रमंडलांतस्तत्र शिरोबिंदुः॰ शुक्लाग्रस्य पश्चिमतो पूर्वभागे संयोगः। पूर्वतः पश्चिमभागे संयोगः। स्वस्वमार्गेण प्रसारित
योर्मत्स्ययोः संपातस्तस्मात् स्थानात्। बिंदुश्चिह्नं च। शुक्लाग्रबिंदुर्याम्योत्तरयोश्चिह्न॰ बिंदुरिति बिंदुत्रितयस्पर्शिधनुर्वृत्ते कदेशात्मकं लिखेत्॥
सूत्रसंपातशुक्लाग्रबिंदुर्याम्योत्तरयोर्बिंदुत्रयालांगुलाद्यास्तो ऽनसंपातस्थानाद् बिंदुत्रयस्पर्शसंपरिध्येकदेशात्मकं चंद्रमंडलांतर्भाव्यं कुर्या
दित्यर्थः॥ प्राकृतवर्णकाले॰ लिखितं चंद्रबिंबं याद्दृक्। लिखितचापकेंद्रे नयाद् शं पश्चिमभागे भवति ताद्दृशः एवकारस्तद्भिन्ननिरासार्थकः॥ तस्मि
न्दिने शृंगोन्नतिगणिताध्यायी भूतसंध्यासमये। चंद्र आकाशस्थो भवति॰ अत्रोपपत्तिः॥ भुजस्तु सूर्याचंद्रौ यावतांतरेण तद्रूपः इति। सूर्यस्थानं प्र
कल्प्यतस्माद् याधादिग्भुजो रेयस्तस्मात् शुक्लपक्षे पश्चिमदिक्स्थस्य चंद्रस्य शृंगोन्नतिर्भवति॰ सूर्यचंद्रयोरूर्ध्वाधरांतरं कोटिर्दत्ता। सूर्यचंद्र
योरंतरं तिर्यक् कर्ण इति कोट्यग्रं सूर्यबिंदुतरालेऽकर्णो दत्तः॥ कर्णदानं कोटेः सरलत्वसिध्यर्थं॰ तत्र कोटिकर्णयोगे चंद्रावस्थानात् चंद्रवृत्तं तन्मध्य
तेन लिखितं॰ कर्णमार्गेण शुक्लदर्शनाच्चंद्रबिंबे कर्णसूत्रं॥ वृत्तद्वारा दक्षिणोत्तरा च शुक्लपक्षे चंद्रपश्चिमभागे कोऽभिमुखत्वेन ऽत्रो कृत्वा तत्पश्चिम
स्थानात्कर्णरेखायां चंद्रवृत्तांतः॰ प्रवेशतं। तन्मत्रं चंद्रमंडले याम्योत्तरचिह्नावधिकं वृत्तैकदेशात्मकं धनुः शुक्लाग्रबिंदुस्पृष्टं चंद्राकृतिदर्शनार्थं
कार्यं॥ अतो बिंदुत्रयस्पृक्त्वस्य केंद्रज्ञानार्थं प्राग्युक्तरीत्या बिंदुत्रये योमत्स्यौ प्रसाध्य तन्तत्र युतिः केंद्रमस्माच्चापं तथैव भवतीति चंद्राकृतिः
प्रत्यक्षा॥ ११॥ ननु यदर्थमयमुद्योगस्तस्याः शृंगोन्नतेर्ज्ञानं नोक्तमत आह कोट्यादिक् साधनाति यत्कृतसूत्रांते शृंगमुन्नतं॥ दर्शयेदुत्तरांतां को
टिं कृत्वा चंद्रस्य साकृतिरिति॰ को द्योः कोटिरेखाया॰ चंद्रवृत्ते कर्णरेखावत् कृतसाधनात् परिलेखे शुक्लधनुषः कोटिमग्रभागात्मकामुन्नतामुच्चो
कृत्वा॰ दृष्ट्वा॰ तिर्यक्सूत्रांते॰ दक्षिणोत्तररेखायाः॥ अंते॰ अवसाने॰ उन्नतमुच्चं शृंगं॰ दर्शयेत्। सा॰ परिलेखसिद्धा॰ आकृतिः स्वरूपं॰ चंद्रस्य॰ आका
शस्थचंद्रस्य भवति॰ परिलेखसिद्धरूपमाकाशस्थचंद्रप्रत्यक्षमित्यर्थः। अत्रोपपत्तिः॥ यथा चंद्रवृत्ते कर्णरेखायाश्चंद्रदिशस्तथा कोटिरेख

या चंद्रवृत्ते सूर्यदिशास्तयोरंतरं भुजश्चंद्रवृत्तपरिणतः॥ अथ चंद्रदक्षिणोत्तरयोर्धनुःको द्योः स्वलग्नत्वात् सूर्यदक्षिणोत्तराभ्यां कोटिरूपं शृंगो
न्नतेन्नतो भवतस्तत्र भुजदिक् शृंगं नतं तदितरदिक् शृंगमुन्नतं॥ अत एव भास्कराचार्यैरुक्तं स्पष्टं तुंगशृंगं वलनान्यदिक्स्थमिति॥ १२॥ ननु स
र्योन चंद्रस्य षड्भाधिकत्वे ऽङ्क प्रकारेण चंद्रबिंबाभ्यधिकं शुक्लमायातिन तत्कथं युक्तं यो पातादिस्वतस्तदुत्तरं विशेषं चाह कृष्णे षड्युतं स्र्यविशो
ध्येंदोस्त्यासितं। दत्वा तु मं भुजं तत्र पश्चिमं मंडलं विधीयिति॰ कृष्णपक्षे॰ षड्राशिभिः सहितमर्कं चंद्राद्विशोध्य॰ तथा लिप्तान वशात् भक्त्वा इति पू
र्वप्रकारेण। असितं श्यामममानेयं॰ तथा च पूर्वोक्तं॰ शुक्लानयनं शुक्लपक्षएव चंद्रशौ क्लास्य शुद्धिज्ञानार्थं॰ कृष्णपक्षे तु शौक्ल्य ह्रासा न्कृष्णतारेहे॥
कृष्णानयनं युक्तं न शुक्लानयनमतएव दर्शांतमासस्य शुक्ल कृष्णौ द्वौ पक्षाविति भावः॥ अथ कृष्णपरिलेखार्थं पूर्वोक्ते विशेषमाह द्याद्दिति॰ तत्र
कृष्णपरिलेखविषये॰ वामं॰ विपरीतं भुजं॰ प्रागुक्तं॰ दद्यात्॥ अर्कविस्त्राउत्तरं भुजं दक्षिणतो दक्षिणं भुजमुत्तरतो गणकोदद्यात्। चंद्रस्य मंडलं प
श्चिमं दर्शयेत्। यथा शुक्लपक्षे चंद्रमंडलस्य पश्चिमभागे शौक्ल्यं तथा कृष्णपक्षे चंद्रमंडलस्य पश्चिमभागे कृष्णाभिवृद्धिं दर्शयेदित्यर्थः॥ अत्रोप
पत्तिः॥ कृष्णपक्षारंभे सूर्यचंद्रयोः षड्भांतरं॰ ततः षड्भाशिपर्यंतं कृष्णाभिवृद्धिरतः षड्भाशियुतस्यार्केण वर्जितचंद्रात्स्वप्रकारेण कृष्णानयनं युक्तं
अथ शुक्लशृंगं यत्र नतं तत्र कृष्णशृंगमुन्नतं॰ यत्रोन्नतं। तत्र नतमतः कृष्णपरिलेखार्थं भुजो विपरीतो देयः॥ यद्यपि कृष्णपश्चिमभागादेवाभि
वृद्धिमतः। कर्णरेखायां चंद्रबिंबांतः। पश्चिमस्थानादेयं॰ ततः प्राग्वत् कृष्णशृंगोन्नतिरिति॥ १३॥ अथाग्रिमग्रंथस्यासंगतित्वनिरासार्थमधि
कारसमाप्तिं फक्किकया दर्शयति। शृंगोन्नत्यधिकार इति॰ चंद्रार्कदर्शयोः शृंगोन्नतिविषयत्वेनोक्तत्वाद् ग्रामे वातभावः॥ नस्वतंत्राधिकारत्वमन्य
थाग्रेतर् पाताधिकारेतदुक्तत्वापत्तेः। एतेन चंद्रार्कदर्शपौर्णिमास्यधिकारत्वं पर्वतोक्तं निरस्तं॰ तत्स ज्ञाप्रमाणाभावादन्यमावास्याधिकार
स्यैतैवक्तव्यत्वापत्तेरिति ध्येयं॥ ॥रंगनाथेन विरचिते सूर्यसिद्धांतटिप्पणे॥ शृंगोन्नत्यधिकोऽयं पूर्णो गूढप्रकाशके॥ ९॥ ॥इति श्री
सकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके शृंगोन्नत्यधिकारः पूर्णः॥ ॥ अथ पाताध्यायो व्याख्यायते
तत्र भेदद्वयात्मकपातस्य संभवं विवक्षुः प्रथमं वैधृतसंज्ञपातस्य संभवमाह एकायनगतौ स्यातां सूर्याचंद्रमसौ यदा॥ तद्युतौ मंडले क्रांत्योस्तुल्य
त्वे वैधृताभिधः इति॥ सूर्याचंद्रौ॰ सू॰ न्ययदि तिस्युक्तप्रयोगः॥ एकायनगतौ॰ अभिन्नदक्षिणोत्तरान्यतरायनस्थौ भवतस्तत्र यदा यस्मिन्का
ले॰ तद्युतौ॰ सूर्यचंद्रयोर्भायोर्योगः॥ मंडले॰ द्वादशराशिमिते सति तदा तयोः क्रांत्योः समत्वे॰ महापातरूपे वैधृतसंज्ञः॥ पातो भवति॥ १॥
अथ व्यतीपातसंज्ञपातस्य संभवमाह विपरीतायनगतौ चंद्रार्कौ क्रांतिलिप्तिकाः॥ समास्तदा व्यतीपातो भगणार्धे तयोर्युताविति॥ चंद्रार्कौ॰
विपरीतायनगतौ॰ भिन्नायनस्थौ भवतस्तत्र यदा तयोः सूर्यचंद्रयोर्भायोर्योगे॰ भगणार्धे॰ राशिषट्के सति॰ तयोः क्रांतिकलास्तुल्याः भवंति॰ त

ग्र॰टी॰
६९

तानस्मिन्काले व्यतीपातसंज्ञकः पातो भवति। अत्रोपपत्तिः॥ समक्रांतिकालो महापातकलः॥ नच स्पष्टक्रांत्योरिति वैलक्षण्येणोपचयाप
चयोर्विपनाभावाच्च समकालेतुल्यस्थितिमध्यमक्रांत्योः समत्वकाला सूर्यमपरत्रवाशारवशेन शारसंस्कृतक्रांतिसमत्वं भवतीति निमित्त
वस्तुभूतकालज्ञानार्थं प्रथमेन शरसंस्कृतकालस्य मध्यमक्रांतितुल्यस्य ज्ञानमावश्यकं। ननु सूर्यचंद्रयोः क्रांतिसमत्वं भुजतुल्यत्वे संभवति।
भुजोभयत्वात्। भुजसमत्वं तु सूर्यचंद्रयोः षड्राशिमितयोगे द्वादशराशिमितयोगे वा। षड्राशिमितांतरे तराभावे वा कुतएवमिति चेच्छृणु।
तत्रांतराभावे ह्ययोस्तुल्यत्वेन भुजसाम्याद्विवादाभावः। एवं षड्राशंतरेपि तयोर्विषमपदस्थयोः समपदस्थयोर्वा क्रमेण परगते व्ययोस्तुल्ययो
र्भुजत्वमित्यविवादः। षड्राशिद्वादशराशियोगतुल्ययोर्विषमसमपरस्थत्वाक्रमेण तुल्यगतैष्यत्वेन भुजतुल्यत्वं। रविगोलायनसंधिस्थ
योस्तु क्रांतिपरमत्वात्ते इति तत्राप्यंतरे तरयोगयोः षड्द्वादशराशिरूपायथायोग्यं सताक्रांतिसाम्यं जातमेव॥ अतएकायनस्थयोर्भिन्न
गोलस्थयोर्द्वादशराशियोगे एकगोलायनस्थयोरंतराभावे क्रांतिसाम्यं एवभिन्नायनस्थयोरेकगोलस्थयोः षड्राशियोगे। गोलभेदस्थ
योः षड्राश्यंतरे क्रांतिसाम्यमिति युक्तिस्त्युपलक्षणादंतरेद्रष्टव्या। … ननु … मंडले भगणार्धे … क्रमेण गोलभेदैक्य
योरंतरमिरसार्थयोगेन तत्रापि क्रांतिसाम्यत्वे नानिवार्यत्वात्। अत्रैकायनगताविति विपरीतायनगताविति च स्वरूपोक्तिरावश्यके ति
अयं च स्पष्टतः सूर्यचंद्रयोर्द्वादशमिते योगांतरे वा वैधृताख्यं क्रांतिसाम्यं। षड्राशिमितेतयोर्योगांतरे वा व्यतीपाताख्यं क्रांतिसाम्यमि
ति नात्स्यैक्यिरतएवाग्रे भास्करे … युक्तं युक्तमिति तत्वं॥ २॥ ननु क्रांत्योः साम्ये कथं पातो भवतीत्यत आह। तुल्यं भुजालसंपर्काल
योस्तु प्रवहाहतः। तद्रक्रोधभवो वह्निर्लोकाभावाय जायते इति तयोः सूर्यचंद्रयोस्तस्मात्क्रांतिसाम्यकालिकयोः तुल्यां भुजालसंपर्का ६९
त्। समकिरणानां जालसमूहः। तस्मात्यथा अभिमुखयोः संपर्कात्। एकीभावापन्नात्। तद्रक्रोधभवः। सूर्यचंद्रयोरन्योन्याभिमुखयोः दृक्क्रो
धः। बिंबकेंद्रयोर्दृष्टयोः। क्रोधः परस्पराभिमुख्येन दृष्टाधिक्यं तदुत्पन्नोग्निः। प्रवहाहतः प्रवहो वायुः प्रज्वलितिः। लोकाभावाय
जनानामशुभफलाय जायते॥ ३॥ अथायं वह्निर्व्यतीपाताख्यो वैधृताख्यो वेत्यत आह विनाशयति पातोस्मिन् लोकानामसकृद्यतः। अ
तोपातः प्रसिद्धो यं संज्ञाभेदेन वैधृतिरिति। अस्मिन्क्रांतिसाम्यकाले। प्रसिद्धः। दृष्टलोकस्वरूपः पातः॥ वह्निः यतः कारणात्। असकृ
त्। स्वसंभवे नवारंवारं। लोकानां विनाशयति। नाशं करोति। अतः कारणायदंतवह्निर्व्यतीपातसंज्ञः। अयमेवाग्निः। संज्ञाभेदेन। नामांत
रेण वैधृतिसंज्ञः तयावो भयच पाताख्यो वह्निर्भवतीति भावः॥ ४॥ अथतत्स्वरूपमाह स कृष्णो दारुणवपुर्लोहिताक्षो महोदरः॥ सर्वा

319
1918

निष्टकरो रौद्रो भूयो भूयः प्रजायते इति। सः। क्रांतिसाम्यकालोत्पन्न उभयसंज्ञकः पाताख्योग्निः पुरुषः। कृष्णः श्यामः। दारुणवपुः क्रूरशरी
रः। लोहिताक्ष आरक्तनेत्रः। महोदरः पृथूदरः। अतएव सर्वानिष्टकरः। सर्वलोकानामशुभकारकः रौद्रः क्षयकारकः। भूयो भूयः अनेकवारं। प्र
जायते। प्रत्येकं क्रांतिसाम्यकाले उत्पन्नो भवतीत्यर्थः॥ ५॥ अथ स्पष्टपातकालज्ञानं विवक्षुः प्रथमं तात्कालयोः सायनांशयोः क्रांतिसाध्ये
त्याह भास्करेंदोर्भचक्रांतश्चक्रार्धावधिसंस्थयोः। दृक्तुल्यसाधितांशादियुक्तयोः स्वावपक्रमाविति। सूर्यचंद्रयोः दृक्तुल्यसाधितांशा
दियुक्तयोः प्राक्चक्रचलितं हीने छायार्को कारणागतेइत्यादिना दृग्गोचरीभूतं साधितमंशादिकं तेन संस्कृतयोरित्यर्थः। तेन पूर्वसा
धारणोक्तिरविस्पष्टीकृता। क्रांत्यो। सायनोत्पन्नत्वात्। भचक्रांतः भचक्रं द्वादशराश्यः तन्मध्ये संस्थयोः स्थितयोः मेषादिराशिषट्क
योरित्यर्थः चक्रार्धावधिसंस्थयोः चक्रार्धं राशिषट्कं तदवधितदंतः संस्थितयोः मेषादिगोराशिषट्कयोरित्यर्थः। स्वौ। स्वकीयौ। अपक्रमौ
साध्यौ सूर्यस्य क्रांतिः साध्या। चंद्रस्य विक्षेपसंस्कृता क्रांतिः साध्येत्यर्थः॥ ६॥ अथ साधितक्रांतिभ्यां स्वकालात् स्पष्टपातकालस्य गतैष्य
त्वं विवेचयन् श्लोकाभ्यामाह। अयोजपदगस्येंदोः क्रांतिर्विक्षेपसंस्कृता॥ यदि स्यादधिका भानोः क्रांतेः पातो गतस्तदा॥ ७॥ ऊना चेत्स्यात्तदा
भावी वामं युग्मपदस्य च। पदान्यत्वं विधोः क्रांतिर्विक्षेपाच्चेद्विशुध्यतीति। अथ सूर्यचंद्रयोः क्रांतिसाधनानंतरं। चंद्रस्य विषमपदस्थस्य विक्षे
पसंस्कृताक्रांतिः स्पष्टक्रांतिरित्यर्थः यदि। यर्हि। सूर्यस्य विषमसमान्यतरपदस्थस्य साधितक्रांते। सकाशादधिका स्यात्तदा तर्हि पा
तः स्पष्टक्रांतिसाम्यात्मकः। गतः साधितक्रांतिकालात्पूर्वकाले जात इत्यर्थः॥ चेद्यर्हि सूर्यक्रांतेर्विषमपदस्थचंद्रस्पष्टक्रांतिः न्यूना भवति
तदा तर्हि। स्पष्टक्रांतिसाम्यरूपपातः भावी। साधितक्रांतिकालादुत्तरकाले भवतीत्यर्थः॥ ननु विषमपदे चंद्रो न भवति तदागतैष्यत्वज्ञानं क
थं स्यात्तत्राह वाममिति। युग्मपदस्य। समपदस्थचंद्रस्येत्यर्थः। चकारात्स्पष्टक्रांतिः सूर्यक्रांतेः सकाशादधिका ना वा स्यात्तर्हीत्यर्थः॥
वामं उक्तगतैष्यक्रमेण विपरीतं। एवमेष्यगतं पातस्य भवतीत्यर्थः। अथ चंद्रस्य विशेषमाह पदान्यत्वमिति। चंद्रस्य स्पष्टक्रांतिक्रिया
यां चेद्यर्हि। चंद्रस्य विक्षेपासंस्कृतकेवलक्रांतिः विक्षेपाद्विशोधिकात्। विशुध्यति। हीना भवति। क्रांतिवर्जितविक्षेपरूपा स्पष्टक्रांति
र्यदि स्यात्तदेत्यर्थः। पदान्यत्वं। राश्यादिचंद्राधिष्ठितपदाभिन्नपदस्थत्वं चंद्रस्य ज्ञेयं। सायनराश्यादिना समपदस्थस्य चंद्रस्य विष
मपदस्थत्वं। राश्यादिना विषमपदस्थस्य चंद्रस्य समपदस्थत्वं। तत्पदसंबंधात्स्पष्टक्रांतिर्ज्ञेयेत्यर्थः। अत्रोपपत्तिः। विषमपदे क्रांति
रुपचिता। समपदेपचिता। तः सूर्यक्रांतिविषमपदस्थेंदुक्रांतिरधिकादग्रे … अधिकत्वाद्द्विक्रांत्युपचयस्यात्यत्वाच्चन्यून
यार्द्विक्रांत्या चंद्रक्रांतेः समत्वमस्मिन्काले न भवत्यतः पूर्वकाले चंद्रक्रांतेन्यूनत्वाद्विक्रांत्युपचयस्यात्यत्वाच्च क्रांतिसाम्यं जातमित्यनु

सि० टी०
६३

मितं। एवं समपदस्थेंदु क्रांतिः सूर्यक्रांतेर्न्यूनाऽनंतराग्रेऽधिकतरा न्यूनत्वान्न तत्साम्याभावः। पूर्वं त्वधिकत्वान्न तत्समत्वं जातमिति ज्ञातं॥ परा तु सूर्यक्रां
तेर्विषमपदस्थेंदुक्रांतिरूनाऽनंतराग्रेऽधिकतेनानंतरं क्रांतिसाम्यं भवति॥ पूर्वं तन्न्यूनत्वेन तदभावात्॥ एवं सूर्यक्रांतेः समपदस्थेंदुक्रांतिरधिका तदा
ग्रे न्यूनत्वेन तत्साम्यं भवति। अत एव न तुल्यत्वे वर्तमान इति॥ अत्र चंद्रस्य विक्षेपवृत्तं विषुववृत्ते लग्नं यत्र तत्र स्पष्टक्रांतेरभावाद्गोलसं
धिः। तस्मात्रिभांतरे विक्षेपवृत्ते गमनसंधिः। स्पष्टक्रांतिस्तदंतराले उपचितापचितायनसंधिस्थक्रांत्यधिकाः। यदा चंद्रक्रांतिर्मध्यमा
त्रिभांतरे क्वचिद्राशादेर्भूपातदांतरालो धनेन स्पष्टक्रांतिमध्यमक्रांतिसंबद्धपदभिन्नपदसंबद्धा भवति। अतः परान्यत्वे विधोः क्रांति
र्विक्षेपात्रेहिस्पुष्यतीति सम्यगुक्तं। भास्कराचार्यैः कर्के च मकरे वायनांशाः कस्य गोलसंधिः स्यात्। एवं भिन्नपदे पुनः संधिर्न्यय
नभागेभ्य। अयनांशोनितपाता हेतुः कोटिज्या लघुज्या कोटयो॥ तेगुणस्त्वैरभ्यधिकगुणा ते भक्ते फले सूर्यैः॥ अयनांशोनितपातमृगकर्क्या
दिस्थितेहि परधामैः॥ कोटिफलयुत वियोगैर्वा कुफलं भक्तमा सांशैः। मेषादिस्थे गोलायनसंधी भास्करस्थानौ। तौ चंद्रस्य स्यातां तुलादि
षट्कस्थिते तु संयुक्तौ। गोलायनसंध्यंते पदं विभोरत्र धीमता ज्ञेयं रविगोलवदस्पष्टा स्पष्टा क्रांतिः। स्वगोलदिक्राशिनइति यदज्ञा
नं॥ अनेनैव प्रकारेण चंद्रस्य स्पष्टक्रांतेः पदं क्षेपं। विक्षेपवृत्तसंबद्धत्वात्। नसाधारणपदज्ञानेन। स्पष्टक्रांतेः क्रांतिवृत्तसंबंधाभावा
त्। अन्यथा पदज्ञानासंभवापत्तेः। एतदंगीकारे पदान्यत्वमित्या यथार्थमपि भगवता तद्धेतुत्वा पदं ज्ञापितमन्यथा तदनुक्तया
पत्ते रितिदिक्॥ ८॥ अथ गतैष्यकालानयनं विवक्षुः प्रथमं स्पष्टक्रांतिसाम्यानयनप्रकारं श्लोकत्रयेणाह। क्रांत्योर्ज्ये त्रिज्याभ्यस्ते
परक्रांतिज्ययोद्धृते। तच्चापांतरमर्द्धं वा योज्यं भाविनि शीतगौ॥ ९॥ शोध्यं चंद्राद्गते पाते तत्सूर्यगतिताडितं। चंद्रभुक्त्या हृतं भानौ लिप्ता
दि शशिवत्फलं॥ १०॥ तद्वच्छशांकपातस्य फलं देयं विपर्ययात्। कर्मैतदसकृत्तावद्यावत्क्रांतिसमे तयोरिति॥ सूर्यचंद्रयोः साधित
काले ये क्रांती तज्ज्ये त्रिज्यया गुणिते॥ परक्रांतिज्यया परमापक्रमज्यां तुरसरंध्रगुणेंदवइति पूर्वोक्तपरमक्रांतिज्ययेत्यर्थः भक्ते। तयोः फ
लयोर्धनुषी। कार्ये। चंद्रस्य परमक्रांतिज्याधिकं फलं तदोक्तप्रकारेण धनुषासंभवात्रिज्यया नवत्यंशास्तदेष्टज्यया केत्यनुपातेन धनुः
कार्यं। मध्ये चात्रिज्यातो यदधिकं तदुत्क्रमधनुषा युक्ताः नवतिः पंचाशच्छतकलाधनुः स्यादिति। ध्येयं तयोरंतरं। अर्द्धं। अंतरार्द्धं। वाति
कल्पार्थकः। अथवा विषमपदस्थार्थकः। सा तु यदांतरमल्पं तदांतरं यदा तु बहुतरं तदांतरार्द्धं ग्राह्यमिति। भाविनि। भविष्यत्साम्ये
चंद्रे गतपातके। तत्कालात्मकं युक्तं कार्यं। गते पाते सति। चंद्राद्धीनं कार्यं। चंद्रस्यात्। सूर्यसानमाहतदिति। चंद्रसंबंधिसंस्कृत
फलं। स्पष्टसूर्यगत्या गुणितं। स्पष्टचंद्रगत्या भक्तं। फलं कलादिकं चंद्रवत्। चंद्रयुतहीनक्रमेण सूर्ययुतहीनं कार्यं। सूर्यस्या ६३

321/1918

त॥ चंद्रपातसाधनमाह तद्वदिति। चंद्रपातस्य फलं। कलादिकं। तद्वत्। चंद्रफलं पातगत्या गुणितं। स्पष्टचंद्रगत्या भक्तं। विपर्ययात्। व्यस्ता
सात्। देयं संस्कार्यं। चंद्रयुतहीनक्रमेण चंद्रपाते हीनयुतं कार्यं चंद्रपातस्यात्। उक्तक्रियातिदेशमाह कर्मेति। एतत्। उक्तं कर्म। गणितक्रिया
रूपं। असकृत्। अनेकवारं कार्यं। साधितसूर्यात् सूर्यक्रांतिप्रसाध्य साधितचंद्रपाताभ्यां चंद्रस्पष्टक्रांतिं। प्रसाध्य ताभ्यां क्रांतिभ्यां क्रांत्योर्ज्ये इत्या
दिना चापांतरं तदर्द्धं वा तत्क्रांतिभ्यामवगतगतैष्यपातलक्षणवशादिति हिय चंद्रे हीनयुतं तृतीय चंद्रस्यात्॥ आद्यसूर्यचंद्रगतिभ्यामवग
तसूर्यपातफलं द्वितीयसूर्यपातयोः यथोक्तं संस्कृतं तृतीयसूर्यपातौ। एभ्यः सूर्यचंद्रपातेभ्यः सूर्यचंद्रक्रांतिभ्यां साधिताभ्यां चापांतरं तदर्द्धं
वा तृतीयचंद्रे तत्क्रांत्यवगतगतैष्यपातवशात्संस्कृतं चतुर्थचंद्रस्यात्॥ आद्यसूर्यचंद्रगत्यवगतस्वफलसंस्कृतौ तृतीयसूर्यपातौ चतुर्थसू
र्यपातौ स्तः। एवमेभ्यः पंचमाश्चंद्रसूर्यपाता उत्तरोत्तरं साध्याः। पुनः पुनरंतरं मुहुः साध्या इत्यर्थः॥ अवधिमाह तावदिति। यावद्यदव
ध्यनयोः सूर्यचंद्रयोः क्रांती। स्पष्टक्रांती तुल्ये स्तस्तावत्तदवधिक्रिया कार्येत्यर्थः॥ अत्रोपपत्तिः। मध्यमक्रांतिसाम्यरूपपातकालिकस्पष्टक्रां
तिभ्यां स्पष्टक्रांतिसाम्यरूपवस्तुभूतपातकालो गतैष्यत्वेन ज्ञातोऽपि विशेषतस्तत्कालज्ञानार्थं सूर्यचंद्रयोः क्रांतिसमे स्पष्टे उपपन्ने कार्ये त
न्मध्यपातकालात्तदैष्यपातवशाद्भीष्टकाले चंद्रसूर्यपाता न्प्रसाध्य तयोः क्रांतिसाम्ये। एवं साधितक्रांत्योर्यदैवदैवात्तत्साम्यं तदैव स्पष्टपा
तः। अथापि यमात्स्वधनं पूर्वास्मिन्काले चंद्रसाधनार्थं चंद्रस्पष्टांशाः हीना यो ज्याश्चेति त्रिज्या भागा उक्तप्रकारानीता एवेष्टाः कल्पिताः तथा
हि। सूर्यक्रांतिज्यातः परक्रांतिज्यया न्यूनया चतुर्विंशतिमितया त्रिज्यातुल्या दोर्ज्या तदेष्टक्रांतिज्यया केत्यभीष्टदोर्ज्या याश्चापं सायनसूर्य
भुजत्वं। एवं चंद्रस्पष्टक्रांतिज्यातश्चापं सायनसूर्यभुजान्न्यूनमधिकं भवति। क्रांतिसमत्वभावात्। यद्यपि न्यूनचतुर्विंशत्यंशाधिकस्पष्ट
क्रांतेरुत्क्रमीत्याभुजज्यायास्त्रिज्याधिकत्वेन चापानकारणमनोऽस्य तथापि। त्रिज्याधिकस्य क्रमचापलिप्ताः॥ खखाब्धिबाणा धनुरुत्क्रमात्
स्यादिति सिद्धांतशिरोमणयुक्तवैपरीत्येन त्रिज्यातो यदधिकं तदुत्क्रमचापयुक्ता नवतिः पंचाशच्छतकलाइत्येनेन चापोत्पत्तौ न स्वरतिः॥ एते
न चापसंभवशंकया साधारणविंशत्यंशानां ज्या परमक्रांतिज्येति स्वायनसंधिस्थस्पष्टक्रांतिज्या चेति च निरस्तं। ग्रंथे तयोः परमक्रांति
ज्यानुक्तेः। स्पष्टक्रांतिसाम्यानंतरमुत्क्रमीत्याक्रमीनरतिकारणानुपपत्तेश्च। क्रांत्योस्तत्त्व्यत्वे विहरभेदात्तच्चापांतरस्फुटावेनक्रियाकुरना
संभवान्॥ न ह्यसकृत्कर्मणि स्वाभीष्टसिध्यनंतरं कर्मांतरं संभवति॥ अप्रसिद्धेः। स्वरूपव्याघाताच्च। तच्चापयोरंतरमिष्टांशाश्चंद्रस्य ग
तैष्यपातवशाद्धीनयुता अभीष्टचंद्रो भवति। न हि ते शाः वक्रत्वे वक्रपरिवर्ते रभीष्टसिद्धिरतोऽल्पपरिवर्तैरभीष्टसिध्यर्थं तदर्द्धं मिष्टां
शा इति। अथैतेर्चंद्रस्पष्टांशा इत्येभ्यश्चंद्रगतिप्रमाणेनैते तदा सूर्यपातगतिभ्यां केत्यनुपातेन तयोश्चंद्रकालिकत्वसिद्ध्यर्थमिष्टांशाः
एते सूर्यस्य संस्कृताश्चंद्रवदभीष्टो भवति। एभ्यः सूर्यचंद्रयोः स्पष्टक्रांती साध्ये। तयोरसमत्वे उत्तरीत्या चंद्रस्पष्टांशा एतत्साधितचं

म॰टी॰
६२

इ संस्कार्यः। न प्रथमं चंद्रः तत्क्रांतिज्ञत्वाभावात्। अन्यथा समक्रांत्यनंतरमपि तयोरिष्टांशाभावे प्रथमचंद्रसूर्यपातानां तु स्थूलत्वेन तेषामपि
क्रांतनक्रांत्यो द्वितीयपरिवर्तक्रांतिसमत्वेन क्रमांतरसंभवाभिज्ञया कुंडनत्वानुपपत्तेः। अव्यवहितपूर्वग्रहयोजनेत्वं स्वकर्मणा एव सिद्धः क
र्मांतरासंभवात्। सूर्यपातयोरिष्टांशात्पूर्वं चंद्रसूर्यस्पष्टगतिभ्याम् एव स्वल्पांतरत्वात्। अव्यवहितपूर्वकाले स्पष्टगत्यज्ञानात्॥ एवम
त्र कुतकरणेन क्रांत्योः साम्यमुत्तरोत्तरपरिवर्तांतरे भवत्येवेत्युपपन्नं। क्रांत्योर्व्येद इत्यादिश्लोकत्रयं॥ ११॥ अथ क्रांतिसाम्यं पात इति स्व
रूपकथनपूर्वकं कालज्ञानार्थं साधितक्रांतिसाम्यसंबंधिचंद्रासन्नार्धरात्रासातकालस्य गतगम्यत्वमाह क्रांत्योः समत्वे पातोऽथ प्रक्षिप्तांशो
निते विधौ॥ हीनेऽर्धरात्रिकात् स्यातो भावी तात्कालिके इति च सूर्यचंद्रयोः स्पष्टक्रांत्योः साम्ये स्पष्टपातः स्यात्॥ अथानंतरं॥ स्पष्टपातसंबंधि
साधितचंद्रः पूर्वानुसंधाननापातत्वो यदि न्यूनो भवति॥ तदासन्नार्धरात्रकाले स्पष्टचंद्रो मध्यस्पष्टाधिकारोक्तप्रकारेण साध्यः। तु स्मा
दर्धरात्रिकालिकाच्चंद्रात्। प्रक्षिप्तांशोनिते। क्रांतिचापांतरेण तदर्धेन वा युतोनिते चंद्रे॥ स्पष्टक्रांतिसाम्यसंबंधसाधितचंद्रे न्यूने स
ति॥ तदर्धरात्रकालासातकालो गतः। तात्कालिके॰ क्रांतिसाम्यकालिकसाधितचंद्रे अर्धरात्रकालिकचंद्रादधिके सति तदर्धरात्रका
लासातकाल एष्य इत्यर्थः। अत्रोपपत्तिः। यद्यपि स्पष्टक्रांतिसाम्यसंबद्धचंद्रमध्यक्रांतिसाम्यकालिकचंद्राभ्यां वक्ष्यमाणप्रकारेण
पातकालस्य मध्यक्रांतिसाम्यकालादृतैष्यत्वादिज्ञानं भवतीति निकरार्धरात्रिकचंद्रात्तत्साधनं पुनस्तद्गतैष्यकथनं च गौरवं॥
अर्धरात्रिकस्पष्टचंद्रसाधनमपि पाधिक्यात्तथापि॥ चंद्रगतेरतिमहत्त्वेन प्रतिक्षणं गते बह्वंतरेणान्यादृत्वात् बहुकालांतरे बहु
कालांतरितस्पष्टगत्यानीतपश्चात्मकस्यातिस्थूलत्वादासन्नकाले स्वल्पांतरत्वात् आसन्नार्धरात्रिकः स्पष्टचंद्रो ग्रंथोत्तरः सस्पष्ट
गतिकोऽवश्यमपेक्षितो तस्माच्चंद्रात् स्पष्टक्रांतिसाम्यसंबंधचंद्रस्य न्यूनाधिकत्वे क्रमेण तदर्धरात्रात्स्पष्टपातो गतैष्य इति स
म्यगुक्तं॰ अत एव समीपतिथ्यंतसमीपत्वालवविधोस्तत्कालजत्वेव युज्यते इति भास्कराचार्योक्तं संगच्छते॥ १२॥ अथ स्पष्टपा ६२
तकालज्ञानमाह स्थिरीकृतार्धरात्रेद्वोर्द्वयोर्विवरलिप्तिकाः। षष्टिघ्नाश्चंद्रभुक्त्याप्ताः पातकालस्य नाडिका इति॰ स्थिरीकृतार्द्धरात्रें
द्वोः स्पष्टक्रांतिसाम्यसंबद्धसाधितासकृत्क्रियानियतचंद्रः। तदासन्नार्द्धरात्रिकस्पष्टचंद्रस्तयोरुभयोः। अत्र द्वयोरिति। पूर्वप
दार्थव्यक्तीकरणाय अन्यथैकवचनप्रमदाद्याकुलतापत्तेः। अंतरकलाः षष्ट्या गुणिताः। अर्धरात्रिकचंद्रस्पष्टकलात्मकगत्या
भक्ताः फलं॰ पातकालस्य॰ अर्धरात्राद्गतैष्यस्पष्टक्रांतिसाम्यस्य घटिकाः भवंति अर्धरात्राद्गतैष्यक्रमेण फलघटीभिः पूर्वमुत्त
रत्र स्पष्टक्रांतिसाम्यरूपपातस्यादित्यर्थः। अत्रोपपत्तिः॥ चंद्रस्पष्टगत्या षष्टिसावनघटिकास्तदास्वाभीष्टार्धरात्रकालिकक्रां

325
1918

तिसाम्यकालिकस्पष्टचंद्रयोरंतरकलाभिः का इत्युपपन्नमुक्तं॰ साधितसूर्यस्य प्राथमीकचंद्रगतिग्रहणेन स्थूलत्वादर्धरात्रिकस्पष्ट
स्पर्शादुक्तरीत्या पातकालानयनं स्थूलं नोक्तमिति ध्येयं॥ १३॥ अथ पातकालस्थित्यर्धानयनमाह हरवीदुमानयोगार्द्धं षष्ट्या संगुण्य भाजये
त्। तयोर्भुक्त्यंतरेणाप्तं स्थित्यर्द्धं नाडिकादितदिति॰ सूर्यचंद्रयोश्चंद्रग्रहणा स्पष्टाधिकारोक्तप्रकारेण ये बिंबमानकले स्वस्वगतिके तो सन्नि
तयोरैक्यस्यार्द्धं षष्ट्या गुणयित्वा॰ सूर्यचंद्रयोः कलात्मकस्पष्टगत्योरंतरेण भजेत्। यल्लब्धं तद्घटिकादिकं स्थित्यर्द्धं॰ पातकालात्पूर्वमप
रत्र च स्थित्यर्द्धकालपर्यंतं पातस्यावस्थानमित्यर्थः। अत्रोपपत्तिः। सूर्यचंद्रबिंबकेंद्रयोरेकधुरात्रवृत्तस्थत्वे विषुवद्वृत्तादुभयतस्तुल्यां
तरत्वे वा पातमध्यं॰ केंद्रक्रांतिसाम्यात्। विषुवद्वृत्तात् क्रांतिसूत्रस्थो मंडलपरिधिप्रदेशो यत्र आसन्नः स बिंबपृष्ठप्रांतः। दूरस्थबिंबाग्र
प्रांतः याम्योत्तरगमनेन पातस्योक्तेः तत्र शीघ्रबिंबाग्रप्रांतमंदपृष्ठबिंबप्रांतयोस्तथात्वे पातारंभः॥ सूर्यबिंबाग्रप्रांतचंद्रबिंबपृष्ठप्रां
तयोस्तथात्वे पातांतो तत्रायंतकालाभ्यां क्रमेण पूर्वोत्तरकालयोश्चंद्रार्कबिंबांतर्भतप्रदेशानां केषामप्युक्तरूपस्थितित्वाभावेन सूर्यचंद्र
योस्तथात्वाभावात् ताभावइत्यादि कल्पारंभांतकालपर्यंतं सूर्यचंद्रयोस्तथात्वात् तास्थितिः॥ पातमध्यकाले क्रांत्यंतराभावः। पाताद्यंत
कालयोर्मानैक्यार्द्धतुल्यं क्रांत्यंतरं॰ तेन तत्तुल्यांतरस्यापचयकाल उपचयकालश्चाद्यंतस्थित्यर्धं॰ तत्र तत्कालानयनं सूर्यचंद्रगत्यं
तरेण षष्टिघटिकास्तदा मानैक्यखंडकलाभिः का इत्यनुपातेनोक्तमुपपन्नं यद्यपि प्रमाणेच्छयोः सम जातित्वाभावादनुपातो संगतः
क्रांते दक्षिणोत्तरांतरस्यापचयापचययोः सूर्यचंद्रगत्यंतरस्य पूर्वापरांतरस्योपचयाभ्यामतिविलक्षणत्वात्। तथापि गणितलाघवा
र्थं भगवत्ता स्वल्पांतरत्वेनानुपातो लोकानुकंपयांगीकृत इत्यदोषः। भास्कराचार्यैस्तु मानैक्यार्धगुणितं स्पष्टघटाभिर्विभक्तमाद्येन ल
ब्धघटीभिर्मध्यादिभिः प्रागग्रतश्च पातांत इति युक्तमुक्तं। केचित्तु षष्टिघटिकाभिर्ग्रहान्नचाल्य क्रांतिः स्पष्टा साध्या प्रत्येकं तयोरं
तरयोगो वा गत्यंतरमिति भास्कराभिमतमाहुः॥ १४॥ अथ पातस्यादिमध्यांतकालानाह पातकालः स्फुटो मध्यः सोपि स्थित्यर्द्धव
र्जितः। तस्य संभवकालस्यात् तत्संयुक्तोंत्यसंज्ञित इति॰ स्थिरीकृतार्धरात्रेत्यादिना स्पष्टः पातकालः अथ क्रांतिसाम्यस्य काल
आनीतो मध्यसंज्ञो ज्ञेयः सः। मध्यकालः आनीतास्थित्यर्धेन हीनः तस्य॰ पातस्य॰ संभवकालः। अपिः समुच्चये॰ तत्संयुक्तः स्थि
त्यर्धयुक्तो मध्यकालः। अंत्यसंज्ञितः। पातो भवति। पातस्यांतकालो भवतीत्यर्थः। अत्रोपपत्तिश्चंद्रग्रहणस्पर्शमोक्षवत्स्पष्टा स्व
रूपं तु प्रागुक्तीकृतं॥ १५॥ अथैतज्ज्ञानस्य प्रयोजनं किमित्यतः पातस्थितिकालो मंगलकृत्ये निषिद्ध इत्याह आद्यंतकालयोर्म
ध्यः कालो ज्ञेयोऽतिदारुणः प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हित इति॰ पातस्यारंभसमाप्तिसमययोरंतरालवर्ती समयः। अत्यंतक

सू॰ टी॰

६२

छिनः। सर्वेषु मंगलकृत्येषु निंदितः त्रेयः अत्र हेतुगर्भं विशेषमाह प्रज्वलज्ज्वलनाकार इति॰ देदीप्यमानाग्निस्वरूपः। तथा च तत्र क
र्मंगलकृत्यं भस्मावशेषं स्यादिति भावः॥१६॥ ननु पातस्य क्रांतिसाम्यत्वेन सूक्ष्मकालरूपत्वात् गतमध्यकाल एव सूक्ष्मः शुभक
र्मसु निंदितो न पातस्थित्यात्मकस्थूलकालः। क्रांतिसाम्याभावादित्यत आह एकायनगतं यावदर्केंदुमंडलांतरं। संभवस्तावदेवास्य
सर्वकर्मविनाशकृदिति॰ सूर्यचंद्रयोः मंडलांतरं॰ प्रत्येकं बिंबैकदेशरूपं। यावद्धत्कालपर्यंतं॰ एकायनगतं। तुल्यमार्गस्थितं भव
ति। तावत्कालपर्यंतं एवकारो न्यूनाधिकव्यवच्छेदार्थकः। अस्य पातस्य॰ सकलशुभकर्मणामाचरितानां नाशकारी॰ संभवः। उत्प
त्तिः स्थितिरिति यावत्। क्रांतिसाम्यमात्रं स्थितिरलक्ष्यत्वात्। तथा च विषुववृत्तादुभयत एकतो वा चंद्रार्कबिंबैकदेशयोः कयोर
पि तुल्यांतरेण यावदवस्थानं केंद्रावस्थानाभावेऽपि बिंबसंबद्धत्वात्तत्स्थितिः॥ अत एव तावत्समत्वसंभवक्रांत्योर्बिंबसंभवे यावत्
माने क्याधीशनं साम्यात्त्विबैकदेशजक्रांत्योरिति भास्कराचार्योक्तं युक्ततरमिति भावः॥१७॥ नन्वयं केवलं मंगलनाशको न शुभका
रक इत्यत आह। स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः। प्राप्यते सुमहच्छ्रेयस्तत्कालज्ञातस्तथैव तु॰ व्रतं स्वाभिमतदेवताराधनं॰ आदि
पदाद्देवांतरं। इत्यादि पुण्यक्रियाभिस्तत्काल कृताभिः। सुतरामुत्कृष्टं कल्याणं॰ मनुष्यैः लभ्यते॰ तस्य पातस्य॰ स्थित्यादि कालज्ञाना
त्। तथा समुच्चये॰ तेन महच्छ्रेयः प्राप्यत इत्यर्थः॥१८॥ अथ पातविशेषमाह रवीन्द्वोस्तुल्यता क्रांत्योर्विषुवत्संनिधौ यदा॥ द्वि
र्भवेद्धि तदा पातः स्यादभावो विपर्ययादिति॰ यदा यस्मिन्काले विषुवन्निकटे क्रांत्यभावासन्ने। अत्र चंद्रस्य स्पष्टक्रांत्यभावासन्न
त्वं ध्येयं॰ सूर्यचंद्रयोः क्रांत्योः समता भवति॰ तदा॰ तस्मिन्तदासन्नकाले स्थूलरूपे क्रांत्यभावादुभयत्र॰ द्विः वैधृतव्यतिपातभेदद्व
यात्मकः। पातः द्विः प्रत्येकं द्विधा॰ वारद्वयं भवेत्। विपर्ययादुक्तव्यत्यासात्। चंद्रायणसंधिनिकटे तयोः क्रांत्योस्तुल्यत्वे इत्यर्थः। अ
त्रातुल्यत्वं सूर्यक्रांतितश्चंद्रस्पष्टक्रांतेर्न्यूनत्वमेवनाधिकत्वमिति ध्येयं॰ अभावः। क्रांतिसाम्यरूपपातस्य तस्मिन्स्थूलकाले कि
चिन्निमित्तेनुत्पत्तिः स्यात्। एतेनसायनसंधावपि दोः क्रांतिस्तत्काल भास्करक्रांते॰ ननु नावता वक्रांत्योः साम्यं तत्तयोर्नास्तीति
भास्कराचार्योक्तं संगच्छते। तत्साधनं तु प्रथमागतचापांतरादिष्टांशाश्चंद्रयुताहीना इति प्रत्येकमसकृत्क्रियया द्विधा पातात्का
लस्य ज्ञेयं अत्रोपपत्तिः। व्यतीपाते विषुववृत्तादुभयतस्तुल्यांतरेण सूर्यचंद्रयोरवस्थितिकालेपि तावत्त्वं। क्रांतिसाम्यादेवं
वैधृतेप्येकाहोरात्रवृत्तस्थत्वकाले पातत्वं। एवमेव वियोगव्यतीपातवैधृतयोरप्येकाहोरात्रवृत्तस्थत्वे विषुववृत्ताद्दक्षिणो
त्तरगमनं भवत्यस्मादन्यप्रदेशे वा विक्षेपवृत्ते भ्रमतश्चंद्रस्य क्रांतिर्न्यूनैवसंभवत्यतः। स्वायनसंधिस्थचंद्रकालिकसूर्यक्रांतिः ६३

325
1918

स्वायनसंधिस्थचंद्रस्य स्पष्टक्रांतेरधिकात एव चंद्रक्रांतेर्न्यूनत्वेनाधिकसूर्येष्टक्रांत्या समता तुल्यत्वं तुः सूर्यस्य चंद्राल्पगमनत्वात्क्रांत्य
यनयस्याग्निचंद्रक्रांत्यपचयात्त्वसंभवात्॥ सूर्यक्रांत्युपचये तु सुतरां तदसंभवः। एवं तत्र सस्सूर्यक्रांतिन्यूनात दापचयाधिक्याच्चं
द्रस्य एष्टक्रांतिस्त समता उत्तरपूर्वकाले संभवति॰ सूर्यक्रांत्युपचये तु सुतरां॰ तथा च द्वितीयरविगोलसंध्यासंने चंद्रपाते स्वायनसं
ध्यासंने सूर्येऽपि तदसंभवः। क्रियंतिचिद्दिनानीति यावत्तावदुक्तमन्यत्र तत्संभवनाभवतीति गोलयुक्त्या फलितं। अथासंभवलक्षणे
पि क्रांत्यंतरस्यामाने स्पष्टखंडादल्पत्वे एकायनगतं यावदर्केंदुमंडलांतरमिति पूर्वोक्तेन पातसंभवः। तत्रापात मध्यं तस्मिन्नेव काले॰
स्थित्यर्द्धं तु रवींदुमानयोगार्द्धमित्युक्तरीत्या मानयोगार्द्धमिति स्थाने क्रांत्यंतरमाने स्पष्टखंडयोरंतरं ग्रहीत्वा साध्यमिति ध्येयं॥१९
अथ शुभकार्यमात्रपातस्य निषिद्धत्वोक्तिप्रसंगात्सं योगांतरगं व्यतीपातस्येव ज्ञानमाह शशांकार्कयुते लिप्ताभभोगेन विभाजिता लु
ब्धसप्तदशांतोन्यो व्यतीपातस्तृतीयक इति॰ अयनांशासंस्कृतयोश्चंद्रसूर्ययोर्योगस्य राश्यादेः सकलाभ्यष्टशतेन भक्ताः। फलं सप्तद
शांतः। सप्तदशमध्ये॰ षोडशानंतरं सप्तदशपर्यंतमित्यर्थः॥ तदापि॰ व्यतीपातः अन्यः एतदधिकारपूर्वोक्तातिरिक्तः। तृतीय एव
तृतीयकः। सूर्यचंद्रयोगांतराभ्यां व्यतीपातद्वैविध्यात्॥ एवमुपलक्षणादुक्तरीत्या फलं षड्विंशत्यनंतरं सप्तविंशतिस्तदा तृतीयो वै
धृतिः। तत्संज्ञपातस्यापि योगांतराभ्यां द्वैविध्यादिति॰। अत्रोपपत्तिः। विष्कंभादिर्व्यतीपातः सप्तदशमो योग इति॰॥२०॥ अथ प्रसं
गादेतत्तुल्यनिषिद्धे गंडांतभसंधी विवक्षुस्तयोः स्वरूपज्ञानमाह। सार्पेंद्रपौष्णधिष्ण्यानामंत्याः पादाश्च संधयः। तदग्रभेषु
प्रथमपादो गंडांतनाम कीर्त्यत इति। आश्लेषाज्येष्ठारेवतीनक्षत्राणां। अंत्याश्चतुर्थाश्चरणाः। नक्षत्रसंधयो भवंति। तदग्रभेषु॰
तेषां॰ आश्लेषाज्येष्ठारेवतीनक्षत्राणां॰ अग्रिमनक्षत्रेषु॰ मघामूलाश्विनी॰ नक्षत्रेष्वित्यर्थः। प्रथमचरणो गंडांतनाम प्रसिद्ध
मुच्यते॰ यद्यप्याश्लेषाज्येष्ठारेवतीनक्षत्राणामंतिमं घटिकाद्वयं। मघामूलाश्विनीनक्षत्राणामादिमं घटिकाद्वयमिति चत्वारो
न्तरघटिकाः गंडांतं॰ एतदतिरिक्ता नक्षत्रसंधिः। पूर्वनक्षत्रांतर्घटिकोत्तरनक्षत्रादिमघटिकेत्यंतरालघटिकाद्वयं चंद्रमंडलसंब
न्धेन घटिका सार्धद्वयमिति संहिताविरुद्धं तथापि सूर्योक्तस्य स्वतः प्रामाण्यं न क्षतिः। अथर्वैकवाक्यतार्थं पादशब्दः कर नेत्रादि
वद्द्विसंख्यावाचकः। घटिका इत्यध्याहारश्च तथा च द्विसंख्यामिता अंत्यंतघटिकाः। नक्षत्रसंधयः। प्रथमद्विघटिकामितः का
लो गंडांतमित्यर्थः। अत्रापि गंडांतत्वाद्संधिकप्रनमयुक्तं गंडांतस्यतदंतरालरूपत्वात्तथापि तत्कालस्य निषिद्धत्वोक्तिः तात्पर्याद्वि

भागवयेनोक्तावपि तदंतरालकालेऽप्युत्तरोत्तरकालस्यातिनिषिद्धत्वसूचनान्नक्षतिः॥२१॥ ॥अथैतदधिकारोक्तानां तुल्यनि
षिद्धत्वमाह व्यतीपातत्रयं घोरं गंडांतत्रितयं तथा॥ तद्वत्संधित्रितयं सर्वकर्मसु वर्जयेदिति॥ व्यतीपातानां त्रयं॰ योगात्मको क्रांति
साम्यरूपौ द्वौ व्यतीपातौ विषुवत्संनिधौ क्रांतिसाम्यांतरेण व्यतीपातोत्पत्तौ तयोरेव भेदः। न पृथक् पंचांगांतर्गतयोगांतर्गतव्यतीपातश्चेति त्र
यं स्पष्टं। उपलक्षणादेतत्त्रयमपि योगवियोगात्मकौ क्रांतिसाम्यरूपौ द्वौ वैधृतिसंज्ञौ॰ विषुवत्संनिधौ क्रांतिसाम्यांतरेण वैध
तिसंज्ञस्तत्तयोरंतर्गतः। न पृथक् पंचांगांतर्गतयोगांतर्गतवैधृतियोगश्चेति स्पष्टं त्रयं॰ केचित्तु व्यतीपातवैधृतिसंज्ञं व्यतीपात
द्वयं संज्ञाभेदेन वैधृतिरिति पूर्वमुक्तेः। पंचांगांतर्गतयोगांतर्गतव्यतीपातश्चेति व्यतीपातत्रयमिति यथाश्रुतमाहुः। घोरं दुष्टं गं
डांतत्रयं यथा घोरं नक्षत्रसंधित्रयं एवतत् पूर्वोक्तं घोरं अतः कारणात्सर्वमांगल्यकर्मसु शुभेच्छुरेतदुक्तं जह्यादित्यर्थः॥
२२॥ अथार्कांशपुरुषः शिष्टावशिष्टं स्ववाक्यमुपसंहरति इत्येतत्परमं पुण्यं ज्योतिषां चरितं हितं। रहस्यं महदाख्यातं कि
मन्यच्छ्रोतुमिच्छसीति॥ हे मय तुभ्यं इति एवं एतत् शृणुष्वैकमनाइत्यादि सर्वकर्मसु वर्जयेदित्यंतं ज्योतिषां ग्रहनक्षत्रादी
नां॰ चरितं॰ महात्म्यं॰ गणितादिज्ञानमिति यावत् हितं॰ इहलोके कीर्तिकरं॰ परमं पुण्यं॰ परत्र लोके उत्कृष्टधर्म्यं॰ अत एव महद्रहस्यं॰ अति
गोप्यं॰ आख्यातं॰ मया॰ कथितं॰ अथ स्तोकं पुनस्त्वय प्रतिपादितमेतस्य मनसि निश्चितार्थं नागतमिति तदधरोष्ठस्फुरणदर्शनादनुमितं
चास्ति मत्संकाशेन स्वांशं कोह्याटनाशकार्येतत्सप्रतीक्षावसाने मया पुनस्त्यापि वक्तव्यमित्याशयेनाह किमिति॥ अतःपरं॰ त्वं॰ अन्यतः उ
क्तातिरिक्तं किं॰ कतरत् श्रोतुं॰ ज्ञातुं॰ इच्छसि॰ तथा च मयापि तुभ्यं पूर्वमुक्तं तत्र यद्यत्तव संशयस्तत्र तन्मम संकोचमुपेक्ष्य मां प्रति प्रश्नस्त्वया
कार्यस्तव समाधानं करिष्यामीति भावः॥२३॥ ॥अथास्मिन् ग्रंथस्य प्रतिपादिताधिकारासंगतित्वपरिहारायारब्धाधिकारसमाप्तिं फ
क्किकयाह इति सूर्यसिद्धांते पाताधिकार इति॰ स्पष्टं॰ दशभेदं ग्रहगणितमिति दशाधिकारात्मकग्रंथपूर्वार्धे पाताधिकारसमाप्त्या समा
प्तमिति तु पाताधिकारांतश्लोकेनेत्येतत्परमं पुण्यमित्यादिश्लोकेनैव सूचितं॥ ॥रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे॥ पाताधिका
रः पूर्णोयं तद्गूढार्थप्रकाशके॥ १० ॥ ॥ सूर्यसिद्धांतगूढार्थप्रकाशकमिदं दलं॥ रंगनाथकृतं दृष्ट्वा लभेतां गणकविरचिते गू
ढार्थप्रकाशके पूर्वखंडं परिसमाप्तिगमत्॥ ॥ ग्रंथसंख्या पंचसहस्र॥ ५५०० ॥ ॥ ७ ॥ श्रीः ॥
७ ॥ ७ ॥ ७ ॥ श्रीः ॥ श्रीराम ॥ जयतु ॥

327
1918

॥इतिगूढार्थप्रकाशिकापूर्वखंडःसमाप्तः॥

329
1918

॥अथगूढार्थप्रकाशिकाउत्तरखंडप्रारंभः॥

ग्र० प्र० श्रीगणेशाय नमः॥ ॥महादेवं वक्रतुंडं वाणीं सर्वं प्रणम्य च॥ कृष्णं गुरुं रंगनाथो व्याख्यात्युत्तरखंडकं॥१॥ अथ मुनीन्प्रति मुनिः सूर्यां उ० खं
शपुरुषवचनमनूद्यानंतरं तं मयासुरेण सूर्यांशपुरुषः पृष्ट इत्याह॥ ॥अथार्कांशसमुद्भूतं प्रणिपत्य कृतांजलिः॥ भक्त्या परमयाभ्यर्च्य पप्र
१ च्छेदं मयासुर इति॥ अथ सूर्यांशपुरुषवचनश्रवणानंतरं मयासुरः मयनामा श्रोता दैत्यः कृतांजलिः॥ विततहस्ताग्रांजलिपुटः अर्कांशसमु
द्भूतं सूर्यांशोत्पन्नं पुरुषं स्वाध्यापकं गुरुं परमया उत्कृष्टया भक्त्या आराध्यतेनेतानुरूपया अभ्यर्च्य संपूज्य प्रणिपत्य नमस्कृत्य समुच्च
यार्थश्चकारोनुसंधेयः॥ इदं वक्ष्यमाणं पप्रच्छ पृष्टवान्॥१॥ अथ किं पप्रच्छेत्यतस्तत्प्रश्नानुवादे प्रथमं तत्कृतं भूप्रश्नमाह॥ भगवन्किं प्रमा
णा भूः किमाकारा किमाश्रया॥ किं विभागा कथं चात्र सप्त पातालभूमय इति॥ हे भगवन् भूर्भूमिः किंप्रमाणा किंपरिमाणं यस्याः सा॥ किमाका
रा कथमाकारः स्वरूपं यस्याः सा॥ किमाश्रया क आश्रयो यस्याः सा॥ किंविभागा कथं विभागा विभक्ता शाला यस्याः सा॥ अत्र भूम्यां पातालभूमयः पाता
लविभागरूपा आश्रयाः सप्तसंख्याकाः कथं तिष्ठंतीति च समुच्चयार्थः॥ किमाकारेत्यादौ प्रत्येकमन्वेति॥ अयमभिप्रायः योजनानि शतान्य
ष्टावित्यादिनावगतभूमानं पंचाशत्कोटिविस्तीर्णेति सर्वजनावगतभूमानाभिन्नमिति तत्र उक्ते भूमाने संशयात्तत्किं प्रमाणेति प्रश्नः॥ अन्य
धा पूर्वं भूमानकथनात्प्रश्नवैयर्थ्यापत्तेः॥ उक्तश्चलतापत्तेश्च। एवं लंबज्याघ्न इत्यादिना स्वपृष्ठपरि ध्वंतरसंभवात्सर्वजनावगतादर्शाकार
त्वात्सायां भूमौ तदसंभवेन भवदभिमतत्वाकारस्तदतिरिक्त इति किमाकारेति प्रश्नः॥ एवं तेन देशांतराभ्यस्तेत्यादिना ग्रहाणां भूम्यभितो भ्रमणस्
वनादाधारे शेषादौ तेषामभितो भ्रमणासंभवे नाधारे संशयात् किमाश्रयेति प्रश्नः॥ निराधारायाअवस्थानासंभवात्॥ एतेन सर्वजनावगत
भूस्वरूपातिरिक्तभूस्वरूपेणोत्तरादप्रभावविप्रसंगात् उक्तो संगतावितिः॥२॥ अथ किमाश्रयेति प्रश्नकारणे भूम्यभितो ग्रहभ्रमणे सूर्यस्यो १
पलक्षणत्वेन प्रश्नमाह॥ अहोरात्रव्यवस्थां च विदधाति कथं रविः॥ कथं पर्येति वसुधां भुवनानि विभावयन्निति॥ सूर्यः अहोरात्रव्यवस्थां
दिनरात्र्योर्विवेकं कथं केन प्रकारेण विदधाति करोति॥ अयं भावः आदर्शाकारभूम्या मध्ये मेरुस्तदभितो भूम्युपरि प्रदक्षिणतया सूर्य
भ्रमणेन स्वदृश्यविभागे सूर्ये दिने॥ स्वादृश्यविभागे रात्रिरिति सर्वजनावगता॥ भवदभिप्रेतं सूर्यभ्रमणं भिन्नं तर्हि तन्मते सूर्यो दिनं रा
त्रिं च व्यवधायकाव्यवधायको विना कथं करोति॥ अन्ये ग्रहा अपि कथं स्वदिनं रात्रिं च कुर्वंतीति सूर्योपलक्षणत्वादिति॥ अथ भूम्याः भि
तोभ्रमणांगीकारे भूरेव व्यवधायके स्यहोरात्रव्यवस्था युक्तैवेत्यतः प्रश्नांतरमाह॥ कथमिति॥ सूर्यः भुवनानि वक्ष्यमाणस्वरूपाणि
विभावयन् प्रकाशयन् वसुधां पृथ्वीं कथं केन प्रकारेण पर्येति प्रदक्षिणतया भ्रमति॥ भूमेर्निराधारावस्थानासंभवेन सा

धारणत्वेन भूम्यभितो ग्रहभ्रमणमाधारे बाधितमिति भावः॥३॥ अथ दिव्यं तदहरुच्यते त्वत्र सुरासुराणामन्योन्यमहोरात्रं विपर्यया
दित्यत्रोक्तमेण प्रश्नमाह॥ ॥देवासुराणामन्योन्यमहोरात्रं विपर्ययात्॥ किमर्थं तत्कथं वा स्याद्भानोर्भगणपूरणादिति॥ ॥पूर्वार्धव्या
ख्यानं॥ किमर्थं कोभिप्रायो यस्य तदित्यहोरात्रविशेषणं॥ देवासुरयोर्दिनं रात्रिश्चाभिन्नाः कथं नोक्ता व्यत्यासे नियामकाभावादिति भावः
तद्देवासुरयोरहोरात्रं सूर्यस्य द्वादशराशिभोगादित्यर्थः॥ कथं कुतः वाकारः समुच्चये भवति उभयत्र नियामकाभावादुभयत्र मम सं
देहः दिनरात्र्योः सूर्यदर्शनादर्शननियामकत्वाद्यत्र सूर्यं षण्मासावधि देवाः पश्यंति तत्रासुराः न पश्यंति॥ यत्र देवाः षण्मासावधि
न पश्यंति तत्रासुराः पश्यंतीत्यहं भगवता बोधनीय इति भावः॥४॥ अथ प्रश्नांतरे पूर्वोक्तश्लोकद्वयस्य तात्पर्यं प्रश्नं चाह॥ ॥
पित्र्यं मासेन भवति नाडीषष्ट्या तु मानुषं॥ तदेव किल सर्वत्र न भवेत्केन हेतुनेति॥ पितॄणामिदं महोरात्रं मासेन दर्शावधिकचांद्रमासे
न केन हेतुना स्यस्य प्रत्यक्षं समत्वात्तत् केन प्रकारेण न भवतीत्यर्थः॥ ननु पयादिव्यं तदहरुच्यत इत्युक्तं तथा पूर्वोक्तं पित्र्यमानुषा
होरात्रयोरनुक्तेः प्रश्नावसंगतापितिवाच्यं॥ दिव्यं तदहरुच्यत इत्यनेनैव पूर्वोक्तसावनाहोरात्रत्वेन प्रत्यक्षत्वात्परिशेषान्मासस्यैव
पित्र्यहोरात्रत्वसिद्धेः॥ ननु तथापि प्रत्यक्षसिद्धमानुषाहोरात्रे प्रश्नोनुपपन्न एवेत्यत स्तात्पर्यं प्रश्नमाह॥ तदेवेति॥ तन्मानुषाहोरात्रं
एवकास्तदन्यनिरासार्थकः॥ सर्वत्र सर्वलोके किल निश्चयेन केन प्रकारेण न स्यात्॥ पितृदेवदैत्यानामप्रत्यक्षमहोरात्रं कथमंगी
कृतं॥ कथं च मानुषाहोरात्रं प्रत्यक्षसिद्धं तेषामपि नोक्तमित्यर्थः॥ ॥अथाहर्गणादवगते दिनमासवर्षेश्वरेषु तत्प्रसंगात्होरेश्व
रप्रश्नं॥ पश्चाद्भूजं तो निजवादित्यत्र प्रश्नद्वयं चाह॥ दिनाब्दमासहोराणामधिपा न समाः कुतः॥ कथं पर्येति भगणः सग्रहो
यं किमाश्रयः इति॥ दिनवर्षमासहोराणां स्वामिनः स्वामिन्नाः कुतः कस्मान्न भवति॥ यथा दिनाधिपत्वं सूर्यादीनां क्रमेणात्तथा प्रथमादि
नमासवर्षक्रमेण सूर्यादीनां क्रमेण मासवर्षाधिपत्वं युक्तं आनयने युक्त्यप्रतिपादनादिति भावः॥ यद्यपि पूर्वं होरेश्वरानयनं नो
क्तमिति तत्प्रश्नो संगतस्तथापि लोके प्रसिद्धत्वात् होरेश्वरस्त्वयाकिमर्थं नोक्त इति तावत्प्रश्नतावत्स्यर्थमिति ध्येयं भगणः नक्षत्र
समूहः सग्रहः ग्रहसहितः कथं केन प्रकारेण पर्येति भ्रमति नक्षत्राणि ग्रहाश्च केन प्रयुक्ताः संतो भूम्यभितो भ्रमंतीत्यर्थः॥ अथै
षामंतरिक्षावस्थाने पि प्रश्नमाह॥ अयमिति॥ सग्रहो भगणो दृश्यमानः किमाश्रयः क आधारो यस्येति विनाधारमंतरिक्षावस्था
नेन संभवतीत्यर्थः॥६॥ ननु कक्षा एव आधाराः इदं तत्रैव वक्ष्यमार्गगा इत्युक्तेरित्यतः कक्षाणां प्रश्नं चतुष्टयमाह॥ भूमेरुपर्युपर्यु

सू० पु०

२

भाः किमुत्सेधाः किमंतराः ग्रहर्क्षकक्षाः किंमात्राः किमात्मकाः केन क्रमेण तारा इति॥ ॥भूमेः सकाशात् ऊर्ध्व उच्चाः ग्रहर्क्षकक्षाः ग्रहनक्षत्राणाम
कक्षामार्गाः किमुत्सेधाः कियानुत्सेधः उच्चता यासां ताः भूमेः सकाशात् ग्रहनक्षत्रमार्गकक्षाः कियदंतरेण सतीत्यर्थः किमंतराः किंपदंतरा
लं यासां ताः उत्तरोत्तरमुच्चाः अपि च परस्परं तासां कियदंतरालमित्यर्थः॥ किंमात्राः किमात्मकाः किंस्वरूपाः किंप्रमाणा वा ताः ग्रहनक्षत्र
कक्षाः केन क्रमेणाधिष्ठिताः संति सूर्यकक्षा उत्तरं कः इत्यादिक्रमेण शात इत्यर्थः॥ ७ ॥अथानुभवप्रश्नं तत्र संगात्सूर्यकिरणप्रचारप्र
श्नं च पर्वोक्तमनागी मन्महत्यं वाह॥ श्रीष्मोताप्रकरो भानुर्हेमंते तथाविधः॥ कियती तत्करप्राप्तिर्यानानि कति किं चते रिति॥ ॥ग्री
ष्मे ग्रीष्मर्तौ यथा तीक्ष्णकिरणः उष्णकिरणः तथा प्रसिद्धः तादृशो हेमंततौ न भवतीति किं॥ सूर्यकिरणानां प्राप्तिः गगनपद्धतिः कियती
कियत्प्रमाणा मामानि नाक्षत्रसावनचांद्रसौरादीनि पूर्वोक्तानि कति कियंति॥ उपक्रमएव संक्षेपेण मानान्युक्तानीति॥ तत्तत्त्वं सम्य
क् ज्ञातुमिच्छामीत्यर्थः॥ तैः मानैः किं प्रयोजनं च समुच्चयार्थः प्रत्येकमन्वेति॥ ८ ॥ अथ स्वप्रश्नमुपसंहरति॥ एतं मे संशयं छिंधि भगवन्
भूतभावन अन्यो न त्वामृते छेत्ता विद्यते सर्वदर्शिवानिति॥ ॥हे भगवन् षड्गुणैश्वर्यसंपन्न सर्वबोधकेति तात्पर्यार्थः॥ भूतभावन
भूतस्य अतीतकालस्य भावना विचारो यस्य भूतस्योपलक्षणा वर्तमानभविष्ययोरपि कालयोरिति सिद्धोर्थः॥ त्वं मे मम एतं उक्तं सं
शयं आत्यभिप्रायेणैकवचनं तेन मत्कृतान् प्रश्नानित्यर्थः॥ छिंधि छेदयानन्वहमिहानीमेतदुत्तरं वक्तुं न शक्नोम्यन्यस्मात्त्वं सं
शयात् दूरीकुर्वित्यत आह॥ अन्य इति॥ त्वामृते विना अन्यः सर्वदर्शिवान् सर्वद्रष्टा सर्वज्ञ इत्यर्थः॥ छेत्ता संशयापमोदकः न विद्यते २
नास्ति॥ तथा चैतावत्कालपर्यंतं यथोक्तं तथा न्यदपि रूप यावक्तव्यमिति भावः॥ ९ ॥ अथ मुनीन्प्रति मुनिर्मैत्रेयः कृतप्रश्नानुवादं
कृत्वा सूर्यांशपुरुषो मयाकरं प्रति पुनर्वदति स्मेत्याह॥ ॥इति भक्त्योदितं श्रुत्वा मयोक्तं वाक्यमस्य हि॥ रहस्यं परमं ध्यायं स्त
तः प्राह पुनः सतामिति॥ सः सूर्यांशः पुरुष इति पूर्वोक्तं भक्त्या आराध्य शानेन उदितं उत्पन्नं॥ मयेन कथितं वचनं श्रुत्वा आकर्ण्य
पुनर्द्वितीयवारं॥ ततः पूर्वोक्तानंतरं तं मयासुरं मपरं द्वितीयं अध्यायं अध्याय ग्रंथं ग्रंथस्योत्तरखंडमित्यर्थः॥ अस्य ग्रंथ
पूर्वखंडस्य हि भिन्नत्वेन रहस्यं गोप्यत्वे न तत्त्वभूतं प्राह प्रकर्षेणावददित्यर्थः॥ १० ॥ अथ सूर्यांशपुरुषवचनानुवादे सूर्यांश
पुरुषो मयासुरं प्रति मदुक्तं सावधानतया श्रोतव्यमित्याह॥ शृणुष्वैकमना भूत्वा गुह्यमध्यात्मसंज्ञितं॥ प्रवक्ष्याम्यतिभक्तानां ना
देयं विद्यते मम इति॥ यतः कारणात् अतिभक्तानां अत्यंतमद्भजनकारकाणां भवादृशां मम सूर्यांशपुरुषस्य अदातव्यं वस्तु न वि

331
1918

द्यते॥ अतः कारणात् अहं त्वां प्रति गुह्यं गोप्यं अध्यात्मसंज्ञितं अध्यात्मज्ञानसंज्ञं प्रवक्ष्यामि कथयिष्यामि त्वं एकमनाः एक
स्मिन्मदुक्ते मनो विद्यते यस्य सोऽभूत्वा शृणुष्व श्रोत्रद्वारा मनःसंयोगेन प्रत्यक्षं कुर्वित्यर्थः॥ ११ ॥ गुह्यं वक्ष्यामि यदुक्तं तदाह॥ वा
सुदेवः परं ब्रह्म तन्मूर्तिः पुरुषः परः॥ अव्यक्तो निर्गुणः शांतः पंचविंशात्परोऽव्यय इति॥ ॥वसत्यस्मिन् जगत्समस्तमसौ वा जगति
समस्ते वसतीति॥ वसतेरुणिः वासुः देवनाद्द्योतनाद्देवः वासुश्चासौ देवश्चेति वासुदेवः॥ तथोक्तं सर्वत्रासौ समस्तं च वसत्यत्रेति वै
यतः॥ अतो सौ वासुदेवाख्यो विद्वद्भिः परिगीयत इति॥ ननु वसुदेवस्यापत्यमिति॥ विग्रहस्तस्य जगत्कारणेनानिरूपणावसरे
अनुपयोगात्॥ अस्मिन्पक्षे पुनरुपादानं कार्यस्याधारतया कार्यं वा उपादानस्यानुस्यूततया वास्त उपयुक्त एव॥ तथा चोक्तं श्रुतौ
ईशावास्यमिदं सर्वमित्यादि॥ भागवते च॥ अजानि च यन्मयं तदविमुच्य नियंतृ भवेदिति॥ जीवानामपि ब्रह्मात्मकतया तद्द्वा
रणाय परमिति सर्वोत्तममित्यर्थकं॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति स्मृ
तेः तन्मूर्तिः तस्य वासुदेवस्य मूर्तिः संज्ञा॥ इदं विशेषणं वक्ष्यमाणस्य संकर्षणस्य चिन्मूर्तिरिति पाठस्तु प्रामादिकः॥ वासुदेवः सं
कर्षण इत्यस्मात् वासुदेवात् संकर्षण इत्यस्यार्थस्य विवक्षितस्याप्रतीतेः॥ अव्यक्त इत्यतींद्रिय इत्यर्थः॥ तथा च श्रुतिः॥ न तं विदा
थ य इमा जजानान्यद्युष्माकमंतरं बभूव॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति न संदृशे तिष्ठति रूपमस्य न चक्षु
षा पश्यति कश्चनैनमिति॥ अव्यक्तत्वे हेतुर्निर्गुण इति॥ शांतः षड्‌र्मिरहितत्वात्॥ पंचविंशात्परः योऽद्भुतो विकृतयः सप्त प्रकृ
तिविकृतयो मूलप्रकृतिश्चेति चतुर्विंशति तत्त्वानि पंचविंशस्तु जीवस्तस्मात्परः श्रेष्ठ इत्यर्थः॥ पंचविंशात्मक इति पाठे जगदा
त्मक इति॥ १२ ॥ शुद्धस्य ब्रह्मणो जगत्कारणत्वासंभवादाह॥ प्रकृत्यंतर्गतो देवो बहिरंतश्च सर्वगः॥ संकर्षणोऽपः सृष्ट्वादौ ता
सु बीजमवासृजत्॥ ॥जगदुपादानत्वादेतानि सर्वाणि विशेषणानि संकर्षणस्य वासुदेवांशस्यापि वासुदेवात्मकतया ध्य
वसानेन बोध्यानि॥ वासुदेवांशात्मकः संकर्षणः प्रथमं जलानि निर्माय तासु अप्सु बीजं शक्तिविशेषं अवसृजत् चिक्षेप॥ १३
ततः किमत आह॥ तदंडमभवद्धैमं सर्वत्र तमसा वृतं॥ तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातन इति॥ तत् तच्छक्तिमिलितं ज
लं हैमं सुवर्णगोलाकारं सर्वत्र बहिरंतश्चांधकारेण वृतं। अभवत्॥ अंधकारसहिताकाशे सुवर्णाद्भुमजनीत्यर्थः॥ तत्र सुव
र्णांडे आदौ अनिरुद्धः सनातनः नित्यः वासुदेवांशसंकर्षणांशरूपत्वात् व्यक्तीभूतः अभिव्यक्तः न तूत्पन्नः स कार्यवाशम्भु

सू० सू०
२

पगमात्। यथाति स्वभ्यसौत्नभ्यक्तं नत्वस्त्वमौ॥१४॥ ॥अथाग्निधांतराणि श्लोकत्रयेणार्थमाह॥हिरण्यगर्भो भगवानेषः छं
छंदसि पठ्यते॥आदित्यो ह्यादिभूतत्वात्प्रसूत्या सूर्य उच्यते इति॥एषः संकर्षणांशो निरूप्यते वेदेस्य हिरण्यगर्भ इति प्रसि
द्धमभिधांतरमित्यर्थः॥हि मि श्रवेन आदित्यः प्रथममभिव्यक्तकालो ह्युच्यते प्रसूत्या अस्माज्जगतोभिव्यक्तत्वायमनिरुद्धः
सूर्य उच्यते॥ हिरण्य० सौरति श्रुतिः॥१५॥अस्य स्वरूपं संस्थितिं चाह॥परंज्योतिस्तमः पारे सूर्योयं सवितेति च॥पर्येति भुवनान्ये
षभावयन्भूतभावन इति॥अयमनिरुद्धः॥सूर्यनामकः सवितेति नाम्ना च समुच्चये प्रसिद्धः तमः पारे अंधकारस्य विरामे परमुत्कृष्ट
ज्योतिः तेजोरूपं अंधकारनाशकमिति तात्पर्यार्थः॥ (सूर्यनामकः सवितेति) आदि० पारे इति श्रुतिः॥एषः सविता भूतभावनः प्राण्युत्प
त्तिस्थितिसंहारकारकः भुवनानि वक्ष्यमाणानि भावयन्प्रकाशयन्पर्येति स्वर्णांडमध्ये सदा भ्रमति॥१६॥अथ परंज्योतिरिति पादं
विवरणरूपमन्यदेव तत्स्वरूपं श्लोकाभ्यामाह॥प्रकाशात्मा तमोहंता महानित्येष विश्रुतः॥ऋचोस्य मंडलं सामान्युस्रा मूर्तिर्यजूंषि च॥
१७॥त्रयीमयोयं भगवान्कालात्मा कालकृद्विभुः॥सर्वात्मा सर्वगः सूक्ष्मः सर्वमस्मिन्प्रतिष्ठितमिति॥प्रकाशरूपोंधकारनाशको लएव
एषः॥अनिरुद्धाख्यः सर्वो महान्महत्तत्वमिति एवं विश्रुतः वेदपुराणादौ निरुक्तः अस्यानिरुद्धस्य सूर्यस्य ऋचः ऋग्वेदमंत्राः मंडलं सामा
नि सामवेदमंत्राः उस्राः किरणाः यजूंषि यजुर्वेदमंत्राः मूर्तिः स्वरूपं च समुच्चये॥अतएवायमनिरुद्धो भगवान्षड्गुणैश्वर्यसंपन्नः त्रयी
मयः वेदत्रयात्मकः॥कालरूपः कालस्य कारणं॥विभुः जगदुत्पत्तिस्थितिनाशाय समर्थः अतएव सर्वात्मा जगत्स्वरूपः सर्वगः सर्वत्रस्थि २
तः व्यापकः सूक्ष्मः अव्यापकमूर्तिधारी अस्मिन्ननिरुद्धे सर्वं जगत्प्रतिष्ठितं अवस्थितं। एतेन व्यापकाव्यापकत्वयोरविरोधः॥१८॥
अथ पर्येति भुवनानीत्येतत्पादं विवृणोति॥रथे विश्वमये चक्रं कृत्वा संवत्सरात्मकं॥छंदांस्यश्वाः सप्तयुक्ताः पर्यटत्येष सर्वदा॥वर्षचक्रं वि
श्वमयं सप्त छंदांसि० गायत्र्युष्णिगनुष्टुब्बृहती पंक्तिस्त्रिष्टुब्जगत्यः अश्वाः युक्ताः संयोजिताः कृताः॥छंदांस्यश्वास्तत्र युक्ते ति पाठे सप्ता
श्वा रथे नियोज्येत्यर्थः॥सर्वदा नित्यमेषोनिरुद्धनामा पर्यटति भ्रमति॥१९॥अथास्य स्वरूपं ब्रह्मणउत्पत्तिं चाह॥त्रिपादमृतं गुह्यं पा
दोयं प्रकटो भवत्॥सोहंकारं जगत्सृष्ट्यै ब्रह्माणमसृजद्विभुरिति॥अस्य परात्मनस्त्रिपादं चरणत्रयं अमृतं दिवि ज्ञेयं॥अतएव गुह्यमगम्य
मिदं॥पादश्चतुर्थचरणः॥अयं स्थावरजंगमात्मकजगद्रूपः प्रकटः प्रत्यक्षो भवत्॥त्रिपादस्यामृतं दिवीति॥ कलिरपि क्रियत्वामेनिरुद्धनामा
प्रभुः उत्पत्तिसमर्थः॥अहंकारं अहंकारतत्वं रूपं ब्रह्माणं पुरुषं जगत्सृष्ट्यै जगत्सर्जनार्थमिति असृजदुत्पादयामास॥२०॥अथोत्पा

333
1918

दितब्रह्मपुरुषं जगत्सर्जनार्थं नियुज्य स्वयं भ्रमन्नवतिष्ठते इत्याह॥तस्मै वेदान्वरान्दत्वा सर्वलोकपितामहं॥प्रतिष्ठाप्यांडमध्येयं स्वयं प
र्येति भावयञ्जिति॥अथ ब्रह्मोत्पादनानंतरं स्वयमनिरुद्धनामा तस्मै उत्पादितब्रह्मपुरुषाय वरानुत्कृष्टान्वेदान्दत्वा वेदोक्तमार्गेण सृष्टिसर्ज
नार्थं सर्वलोकानां पितामहरूपं तं ब्रह्माणं स्वर्णांडमध्ये प्रतिष्ठाप्य नियोज्यया द्यनुसंधेय। भावयन्प्रकाशयन्सन्पर्येति भ्रमति॥२१॥अथ ज
गत्सृष्टौ ब्रह्मायं चंद्रसूर्यावुत्पादयामासेत्याह॥अथ स्वस्य मनश्चक्रे अहंकारमूर्तिभृत्॥मनसश्चंद्रमा जज्ञे सूर्योक्ष्णोस्तेजसां नि
धिरिति॥२२॥अथ अधिकारमाप्त्यनंतरं अहंकारतत्वमूर्तिधारकः ब्रह्मा स्वस्य मनः अंतःकरणं चक्रे करोति स्म॥ब्रह्मणोहं सृष्टिं क
रोमीति इच्छा जातेत्यर्थः॥अनंतरं तस्य मनसः सकाशात् चंद्रमा जज्ञे इत्यर्थः॥चंद्रो भवत्विति मनसा चंद्रो जात इत्यर्थः॥अक्ष्णोः नेत्राभ्यां
तेजसां निधिः अंधकारहर्ता सूर्यः उत्पन्नः चक्षुरिंद्रियस्य तैजसत्वात्॥२२॥अथ महाभूतोत्पत्तिमाह॥मनसः खं ततो वायुरग्निरापो ध
राक्रमात्॥गुणैकवृध्या पंचैव महाभूतानि जज्ञिरे इति॥अथ आकाशो भवत्विति इच्छया मनसः खं आकाशं ततआकाशात् क्रमात् यथोत्तरं
वायुरग्निर्जलं पृथिवी॥आकाशाद्वायुः वायुरग्निरग्नेरापो अद्भ्यः पृथिवीति गुणैकवृध्या गुणस्यैकोपचयेन महाभूतानि पंचसंख्याकानि एककारा
न्यूनाधिक्यवर्जितानि जज्ञिरे उत्पन्नानि शब्दगुणसहितमाकाशं शब्दस्पर्शगुणद्वयसहितो वायुः॥शब्दस्पर्शरूपात्मकगुणत्रयसमेतोग्निः
शब्दस्पर्शरूपरसात्मकगुणचतुष्टयसमवेतं जलं॥शब्दस्पर्शरूपरसगंधात्मकगुणपंचकसमवेता पृथ्वीति स्फुटार्थः॥२३॥अथ सूर्य
चंद्रयोः स्वरूपं वदन्पंचताराणामुत्पत्तिमाह॥अग्नीषोमौ भास्करेंदु ततस्त्वंगारकादयः॥तेजोभूखांबुवातेभ्यः क्रमशः पंच जज्ञिरे इति॥सू
र्यचंद्रौ यथा गुरितोत्पत्ति। अग्नीषोमौ। सूर्योग्निस्वरूपस्तेजोगोलकत्वात्सुप्त्वात्॥ चंद्रस्तु सोमः स्वरूपः मनसः सोमवाच्यत्वात् जलगोलकरू
पः॥अग्नीषोमाविति प्रयोगः छांदसिकः॥ततोनंतरं अंगारकादयो भौमादयः पंच ताराग्रहाः तेजोभूखांबुवातेभ्यः क्रमादुत्पन्नाः तु कारात् उक्त
भूतस्य भागाधिक्यमन्यभूतानां भागसाम्यमित्यर्थः॥मंगलस्तेजस उत्पन्नः अतएवायमंगारकेइत्युक्तो बुधो भूमितः बृहस्पतिराकाशात्
शुक्रो जलात्॥शनिर्वायोः॥२४॥अथ राशीन्नक्षत्राणि चाह॥पुनर्द्वादशधात्मानं विभजन्राशिसंज्ञकं॥नक्षत्ररूपिणं भूयः सप्तविंशात्मकं
वशीति॥पुनः अनंतरं आत्मानं द्वादशधा द्वादशस्थाने पुराशिसंज्ञकं विभजन्मनःकल्पितं वृत्तं द्वादशविभागं राशिवृत्तमकरोदित्यर्थः॥
भूयो द्वितीयवारं आत्मानं नक्षत्ररूपिणं सप्तविंशात्मकं विभजन् मनःकल्पितं तदेव वृत्तं सप्तविंशभागं चाकरोदित्यर्थः॥(भूयो द्वितीयवा)
र् नु न्यूनाधिकविभागाकल्पनं कृताः॥उक्तसंख्यायां नियामकाभावादित्यत आह॥वशीति। स्वाधीनं यस्य वशं यस्येति वशी स्वतंत्रेच्छस्यनि

म० स०
२

पगमात्। यथातिलेभ्यस्तैलमभ्यज्यतेनतूत्पन्नं॥ १४॥ ॥अथाभिधांतराणिश्लोकस्कृत्वानार्थमाह॥ हिरण्यगर्भोभगवानेषः छं
छंदसिपठ्यते॥ आदित्योह्यादिभूतत्वात्प्रसूत्यासूर्यउच्यतेइति॥ एषः संकर्षणांशोनिरूप्यतेवेदेस्यहिरण्यगर्भइतिप्रसि
द्धमभिधांतरमित्यर्थः॥ हिमिश्रयेन आदित्यः प्रथममभिव्यक्तकालत्वादुच्यतेप्रसूत्या अस्माजगतोभिव्यक्तेतयायमनिरुद्धः
सूर्यउच्यते॥ हिरण्य० सीदितिश्रुतिः॥ १५॥ अस्यस्वरूपंसस्थितिंचाह॥ परंज्योतिःस्तमःपारेसूर्योयंसवितेतिच॥ पर्येतिभुवनान्ये
षभवसभूतभावनइति॥ अयमनिरुद्धः॥ सूर्यनामकः सवितेतिनाम्नाचसमुच्चयेप्रसिद्धः तमःपारेधंधकारस्यविरामेपरमुत्कृष्टं
ज्योतिःतेजोरूपंधंधकारनाशकमितितात्पर्यार्थः॥ (सूर्यनामकः सवितेति) आदि० पारेइतिश्रुतिः॥ एषःसविताभूतभावनःप्राण्युत्प
त्तिस्थितिसंहारकारकः भुवनानिवक्ष्यमाणानिभवनप्रकाशनपर्येतिस्कवर्णौउदयोस्तदाभ्रमति॥ १६॥ अथपरंज्योतिरितिपादं
विवरणस्यनारंभेनतत्स्वरूपंश्लोकाभ्यामाह॥ प्रकाशात्मातमोहंतामहानितिपरिश्रुतः॥ ऋचोस्यमंडलंसामान्युस्नामूर्तिर्यजूंषिच॥
१७॥ त्रयीमयोयंभगवान्कालात्माकालकृद्विभुः॥ सर्वात्मासर्वगः सूक्ष्मः सर्वमस्मिन्प्रतिष्ठितमिति॥ प्रकाशरूपोंधकारनाशकोलएव
एषः॥ अनिरुद्धाख्यः सर्वोमहान्महत्तत्वमितिएवंविश्रुतः वेदपुराणादौनिरुक्तः अस्यानिरुद्धसूर्यस्यऋचः ऋग्वेदमंत्राः मंडलंसामा
निसामवेदमंत्राः उस्राःकिरणाः यजूंषियजुर्वेदमंत्राः मूर्तिःस्वरूपंचसमुच्चये॥ अतएवायमनिरुद्धोभगवान्षड्गुणैश्वर्यसंपन्नःत्रयी
मयःवेदत्रयात्मकः॥ कालरूपःकालस्यकारणं॥ विभुःजगदुत्पत्तिस्थितिनाशायसमर्थः अतएवसर्वात्माजगत्स्वरूपः॥ सर्वगःसर्वत्रस्थि
तःव्यापकःसूक्ष्मःअव्यापकमूर्तिधारीअस्मिन्ननिरुद्धेसर्वंजगत्प्रतिष्ठितंअवस्थितं। एतेनव्यापकाव्यापकत्वयोरविरोधः॥ १८॥
अथपर्येतिभुवनान्येषेत्यपार्धं विवृणोति॥ रथेकचक्रेसंस्थितःकृत्वासंवत्सरात्मकं॥ छंदांस्यश्वाःसप्तयुक्ताःपर्यटत्येषसर्वदा॥ वर्षचक्रेणि
योजयसप्तछंदांसि० नामभूस्त्रिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यः अश्वाःयुक्ताः संयोजिताःकृताः॥ छंदांस्यश्वास्त्रयुक्तेतिपादेसप्ता
श्वाभूरथेभियोज्येत्यर्थः॥ सर्वदानिरयएवोनिरुद्धनामापर्यटतिभ्रमति॥ १९॥ अथास्यस्वरूपंब्रह्मणउत्पत्तिंचाह॥ त्रिपादममृतंगुह्यंपा
दोयंप्रकटोभवत्॥ सोहंकारंजगत्सृष्ट्यैब्रह्माणमसृजद्विभुरिति॥ अस्यपरात्मनस्त्रिपादंचरणत्रयंमृतंदिविदेवं॥ अतएवगुह्यमगम्य
मिदं॥ पादश्चतुर्थचरणः॥ अयंस्थावरजंगमात्मकजगद्रूपःप्रकटःप्रत्यक्षोभवत्॥ त्रिपादूर्ध्वइति॥ कलिरपिकियत्कालमेनिरुद्धनामा
प्रभुःउत्पत्तिसमर्थः॥ अहंकारंअहंकारतत्वरूपंब्रह्माणंपुरुषंजगत्सृष्टैजगत्सर्जननिमित्तंअसृजदुत्पादयामास॥ २०॥ अथोत्प

२

333
1918

दितब्रह्मपुरुषंजगत्सर्जनार्थंनियुज्यस्वयंब्रह्मननवतिष्ठतेइत्याह॥ तस्मैवेदान्वरान्दत्वासर्वलोकपितामहं॥ प्रतिष्ठाप्यांडमध्येयस्वयंप
र्येतिभावयन्निति॥ अथब्रह्मोत्पादनानंतरंस्वयमनुरुद्धनामातस्मैउत्पादितब्रह्मपुरुषायवरानुत्कृष्टान्वेदांदत्वावेदोक्तमार्गेणसृष्टिसर्ज
नार्थंसर्वलोकानांपितामहरूपंतंब्रह्माणंब्रह्मांडमध्येप्रतिष्ठाप्यनिधायपश्चादनुसंधेयभावयन्प्रकाशयन्सन्पर्येतिभ्रमति॥ २१॥ अथजा
तस्यपीठोब्रह्मायंचंद्रसूर्यायस्मत्वसृष्टोऽस्माद्यामासेत्याह॥ अथसृष्ट्यांमनश्चक्रेब्रह्माहंकारमूर्तिभृत्॥ मनसश्चंद्रमाजज्ञेसूर्योक्ष्णोस्तेजसांनि
धिरिति॥ २२॥ अथअधिकारमाप्यनंतरंअहंकारतत्वमूर्तिधारकःब्रह्मासृष्ट्यामनःअंतःकरणंचक्रेकरोतिस्म॥ ब्रह्मणोहं सृष्टिंक
रोमीतिचिंताजातेत्यर्थः॥ अनंतरंतस्यमनसःसकाशात्चंद्रमाजज्ञेइत्यर्थः॥ चंद्रोभवत्विदिमनस्तास्तचंद्रोजातइत्यर्थः॥ अक्ष्णोःनेत्राभ्यां
तेजसांनिधिराकारभूतःसूर्यःउत्पन्नःचक्षुरिंद्रियस्यतैजसत्वात्॥ २२॥ अथमहाभूतोत्पत्तिमाह॥ मनसःखंततोवायुःरग्निरापोध
राक्रमात्॥ गुणैकवृध्यापंचैवमहाभूतानिजज्ञिरेइति॥ अव्यआकाशोभवत्विच्छयामनसःखंआकाशंततआकाशात्क्रमात्यथोत्तरं
वायुरग्निर्जलंपृथिवी॥ आकाशाद्वायुर्वायुरग्निरग्नेरापोअपःपृथिवीतिगुणैकवृध्यागुणस्यैकोपचयेनमहाभूतानिपंचसंख्याकानिएरकारा
न्नतिरव्ययवकेरः॥ जज्ञिरेउत्पन्नानिशब्दगुणसहितमाकाशंशब्दस्पर्शगुणद्वयसहितोवायुः॥ शब्दस्पर्शरूपात्मकगुणत्रयसमेतोग्निः
शब्दस्पर्शरूपरसात्मकगुणचतुष्टयसमवेतंजलं॥ शब्दस्पर्शरूपरसगंधात्मकगुणपंचकसमवेतापृथ्वीतिस्फुटार्थः॥ २३॥ अथसूर्य
चंद्रयोःस्वरूपंवदन्पंचताराणामुत्पत्तिमाह॥ अग्नीषोमौभास्करेंदुततस्त्वंगारकादयः॥ तेजोभूखांबुवातेभ्यःक्रमशःपंचजज्ञिरेइति॥ सू
र्यचंद्रौप्रागुदितोत्पत्ती। अग्नीषोमौ। सूर्योग्निस्वरूपस्तेजोगोलकत्वाच्छुष्कत्वात्॥ चंद्रस्तुसोमःस्वरूपःमनसःसोमवाच्यत्वात्जलंगोलरू
पः। अग्नीषोमाविति प्रयोगःछांदसिकः॥ ततोनंतरंअंगारकादयोभौमादयःपंचताराग्रहाःतेजोभूखांबुवातेभ्यःक्रमादुत्पन्नाःतुकारात्उक्त
भूतस्यभागाधिक्यमन्यभूतानांभागसाम्यमित्यर्थः॥ मंगलस्तेजसउत्पन्नःअतएवायमंगारकइत्युक्तोबुधोभूमितःबृहस्पतिराकाशात्
शुक्रोजलात्॥ शनिर्वायोः॥ २४॥ अथराशीन्नक्षत्राणिचाह॥ पुनर्द्वादशधात्मानंविभजेद्राशिसंज्ञकं॥ नक्षत्ररूपिणंभूयःसप्तविंशात्मकं
वशीति॥ पुनःअनंतरंआत्मानंद्वादशधाद्वादशस्थानेषुराशिसंज्ञकंविभजन्मनःकल्पितंचक्रंद्वादशविभागंराशिवृत्तमकरोदित्यर्थः॥
भूयोद्वितीयवारंआत्मानंनक्षत्ररूपिणंसप्तविंशात्मकंविभजत्मनःकल्पितंतदेवचक्रंसप्तविंशभागंचाकरोदित्यर्थः॥ (भूयो द्वितीयवा)
रंनुन्यूनाधिकविभागाकथंनकृताः॥ उक्तसंख्यायांनियामकाभावादित्यतआह॥ वशीति। स्वइच्छाविषयवशंयस्येतिवशीस्वतंत्रेच्छस्यनि

स॰ म॰
४

योगानर्हत्वात॥ स्वेच्छयानंतसंख्याकाः विभागाः कृता इति भावः॥ सप्तविंशतिविभागव्यंजकानि नक्षत्राणि ताराात्मकानि निर्मितानीत्यर्थसिद्धं
॥२५॥ अथ चराचरं जगत्कथं रचितवानित्याह॥ ततश्चराचरं विश्वं निर्ममे देवपूर्वकं॥ ऊर्ध्वमध्याधरेभ्योथ स्रोतोभ्यः प्रकृतीः सृजन्॥ ततः स
कलग्रहसर्जनानंतरं ऊर्ध्वमध्याधरेभ्यः श्रेष्ठमध्याधमेभ्यः स्रोतोभ्यः व्यक्तीभ्यः प्रकृतीः सत्वरजस्तमोविभेदात्मकप्रकृतीः सृजन् विश्वसृजन्
देवपूर्वकं देवमनुष्यासुरादिकं विश्वं जगच्चराचरं चेतनाचेतनात्मकं निर्ममे कृतवान्॥२६॥ अथ रचितपदार्थानामवस्थानं कृतवानित्या
ह॥ गुणकर्मविभागेन सृष्ट्वा प्राग्वदनुक्रमात्॥ विभागं कल्पयामास यथास्वं वेददर्शनादिति॥ गुणाः सत्वरजस्तमोरूपाः कर्म पूर्वजन्मा
र्जितं सदसत्कर्म अनयोर्विभागेन न्यूनाधिकरणात्मकेन प्राग्वत्॥ चंद्रसूर्यादिग्रहोक्तसृष्टिरीत्या अनुक्रमात् सृष्ट्वा देवमनुष्यासुरभूमिपर्वता
दिकचराचरसर्जनं ब्रह्मा वेददर्शनात्॥ वेदोक्तप्रकारात् यथास्वं यथादेशं यथाकालं विभागमवस्थानं विभागं कल्पयामास कृतवान्॥२७॥
केषामित्यत आह॥ ग्रहनक्षत्रताराणां भूमेर्विश्वस्य वा विभुः॥ देवासुरमनुष्याणां सिद्धानां च यथाक्रममिति॥ विभुर्नियोजनसमर्थो ब्र
ह्मा ग्रहनक्षत्रताराणां पृथिव्याः त्रैलोक्यस्य वा कारः समुच्चये आकाशे अवस्थानं कृतवान्॥ तत्र ग्रहनक्षत्राणां यथाकालमनियमावस्था
नं पृथिव्याः नियतावस्थानं पृथिव्यां तु त्रैलोक्यस्य यथादेशमवस्थानं यथाक्रमं यथायोग्यं देवासुरमनुष्याणां सिद्धानां च समुच्च
ये अवस्थानं यथादिशं कृतवान्॥२८॥ ननु सर्वमाकाशस्य सत्वात्॥ ब्रह्मांडमध्यस्थेन ब्रह्मणा॥ ग्रहनक्षत्राणां भूमेश्चावस्थानं ब्रह्मांडब
हिराकाशे कृतमथवा ब्रह्मांडांतराकाशे कृतमित्यत आह॥ ब्रह्मांडमेतत्सुषिरं तत्रेदं भूर्भुवादिकं॥ कटाहद्वितयस्येव संपुटं गोलकाकृ
तीति॥ एतत्प्रागुक्तं ब्रह्मणाधिष्ठितं सुवर्णांडं सुषिरं अवकाशात्मकं तत्रावकाशे इदं जगत्॥ भूर्भुवादिकं भूर्भुवः स्वर्गात्मकं अवस्थितं ५
न बहिः ननु अंडस्य गोलाकारत्वेनांतरावकाशात्मकत्वमसंभवतीत्यत आह॥ कटाहद्वितयस्येति कटाहो अर्धगोलाकारं सावकाशं पात्रं तस्य
द्वितयं द्वयं समं तस्य एकवकाशे न्यूनाधिकत्वव्यवच्छेदकार्थः॥ संपुटं आभिमुख्येन मिलनेन गोलकाकृतिगोलाकारस्यात्॥ तथा च नक्षत्रैतिः
२९॥ अथ ब्रह्मांडांतः परिधिं वदंस्तदंतर्भग्रहादिकं आकाशे यथास्थानं परिभ्रमतीति श्लोकाभ्यामाह॥ ब्रह्मांडमध्ये परिधिर्व्योम
कक्षाभिधीयते॥ तन्मध्ये भ्रमणं भानामधोधः क्रमशस्तथेति॥ मंदामरेज्यभूपुत्रसूर्यशुक्रेंदुजेंदवः॥ परिभ्रमंत्यधोधस्थाः सिद्धवि
द्याधरा धना इति॥ ब्रह्मांडांतः परिधितुल्यवृत्तमानं व्योमकक्षा वक्ष्यमाणा काशकक्षा उच्यते॥ तन्मध्ये ब्रह्मांडमध्ये आकाशे भा
नां नक्षत्राणां सर्वेषां सर्वतस्तुल्ये॥ ऊर्ध्वांतरितानां भ्रमणं भवति॥ अथ तुल्याधोंतरेण अधः नक्षत्रेभ्यः शनिबृहस्पतिभौमार्क

335/1918

शुक्रबुधचंद्राः अधस्तात् परिभ्रमंति सिद्धाविद्याधरामेघाश्च अधस्थाः चंद्रादधः स्थिताः अधः अधः क्रमेणाकाशे स्थिताः एषां प्रवहवा
यावस्थानाभावाद्वृत्तेन न परिभ्रमः॥३१॥ अथ भूम्यवस्थानमाह॥ मध्ये समंतादंडस्य भूगोलो व्योम्नि तिष्ठति॥ विभ्राणः परमां शक्तिं ब्रह्मणो
धारणात्मिकामिति॥३२॥ अंडस्य ब्रह्मांडस्य समंतात् सर्वप्रदेशान्मध्ये मध्यस्थाने केंद्रस्थे आकाशे भूगोलस्तिष्ठति॥ ननु आकाशे निराधार
वस्तुनो वस्थानासंभवात् कथमवस्थितो भूमिगोल इत्यतो भूगोलविशेषणमाह॥ बिभ्राण इति ब्रह्मणः परमां शक्तिं धारणात्मिकां निराधा
रावस्थानरूपां बिभ्राणः धारयन् तथा च नक्षत्रैतिः॥ एवं नभः किमाकारा किमाश्रयेति प्रश्नद्वयमुत्तरितं॥३२॥ अथ कथं चात्र सप्तपाताल
भूमय इति प्रश्नस्योत्तरमाह॥ तदंतरपुटाः सप्त नागासुरसमाश्रयाः॥ दिव्यौषधिरसोपेताः रम्याः पातालभूमय इति॥ तत्र भूगोलस्य अं
तरपुटाः मध्यस्थपुटाः गुहारूपाः सप्त अतलवितलसुतलादिकाः पातालभूमयः पातालप्रदेशाः रम्याः मनोहराः संति॥ ननु भूगोल
मनुष्यादिकमस्ति तथा तत्रैकं संतीत्यतस्तद्विशेषणमाह॥ नागासुरसमाश्रया इति वासुकीप्रमुखादयः सर्पादैत्याः अनयोराश्रयभू
ताः॥ ननु तत्र सूर्यसंचाराभावात्तमोमयत्वेन तत्र स्थितलोकानां व्यवहारः कथं भवतीत्यतो द्वितीयं विशेषणमाह॥ दिव्यौषधिरसोपेता
इति दिव्या ओषधयः स्वप्रकाशास्ताः संसारसेर्युक्ताः॥ तथा च तासां प्रकाशेन व्यवहारो भवति तद्रसेन तल्लोकानां जीवनं च भवतीति भावः
३३॥ अथ भूगोलमुख्याद्दक्षिणोत्तरभूव्यासाधिकप्रमाणं मेरोस्वस्थानमाह॥ अनेकरत्ननिचयो जांबूनदमयो गिरिः भूगोलमध्यगो
मेरुरुभयत्र विनिर्गत इति॥ ॥ भूगोलमध्यगतः पर्वतो मेर्वाख्यः अनेकरत्ननिचयः अनेकानि नानाविधानि माणिक्यवज्रादिविलेपान्नि
चयः समूहो यत्रासौ जांबूनदमयः। जांबूनदं जंबूफलामलगलद्रसतः प्रवृत्ता जांबूनदी रसयुता मृदर्भूतसुवर्णं। जांबूनदं हि तदतः सुर
सिद्धसंगाः शश्वत्पिबंसमृतपानपराङ्मुखाइतिभास्कराचार्योक्तिश्च॥ सुवर्णं तन्मयः सुवर्णघटितः उभयत्र व्यासोत्तरतलभूपृष्ठप्रदेशाभ्यां वि
निर्गतः बहिः स्थितदंडाकारस्वर्गादिमध्ये भूगोलप्रोतोस्ति॥ अतएव भूभृदित्यर्थसंज्ञ इति तात्पर्यार्थः॥३४॥ अथ मेरोरूर्ध्वाधः प्रदेशयोः
देवादयो सुराश्च वसंतीत्याह॥ उपरिष्टात्स्थितास्तस्य सेंद्रा देवा महर्षयः अधस्तादसुरास्तद्वत् द्विषंतो न्योन्यमाश्रिता इति॥ तस्य प्रवेशके मे
रोः उपरिष्टात्॥ ऊर्ध्वभागे सेंद्राः इंद्रसहिता देवाः इंद्रादयः देवाः महर्षयः समुच्चयार्थो नुसंधेयः॥ स्थिताः अधस्तान्मेरोः अधः प्रदेशो
असुरा दैत्यास्तद्वदूर्ध्वभागे देवास्तद्वदित्यर्थः॥ आश्रिताः॥ आस्थिताः॥ ननु देवा असुराश्च एकत्र कथं न स्थिता इत्यत आह॥ द्विषंत इ
ति॥ अन्योन्यं परस्परं द्वेषं कुर्वंतः॥ तथा च देवासुरयोः परस्परं द्वेषसद्भावादेकदेशावस्थानासंभवेनोत्तमादेवास्तदूर्ध्वभागे स्थिता

स० म०

५

मर्षयश्चतदधः दैत्यास्तत्रैव स्थितास्तदधोभागे तन्निकृष्टदेवाः स्थिता इति भावः॥ २५॥ अथ भूगोले समुद्रावस्थानमाह॥ ततः समंता
त्परिधिः क्रमेणायं महार्णवः मेखलेव स्थितो भात्यादेवासुरविभागकृदिति॥ दंडाकारमेरोः सकाशमभितः अयं प्रत्यक्षः महार्णवः महा
समुद्रः क्रमेण निरंतरानुक्रमेण परिधिरूपः मध्यामेखलेव काञ्चीरूपः देवासुरविभागकृत् देवदैत्ययोर्भूमिगोलेन विभागयोः परिच्छेदे
त्याकारूपइत्यर्थः। स्थितः तेन समुद्रादुत्तरं भूगोलस्यार्धं जंबूद्वीपं देवानां समुद्राद्दक्षिणं समुद्रातिरिक्तं भूमिगोलं त्वर्द्धषट् समुद्रोभयात्म
कं दैत्यानामिति सिद्धं॥ मेरुदंडानुरूपभूगोलमध्ये परिधिरूपो लवणसमुद्रोस्ति॥ उत्तरगोलार्धं दक्षिणभूगोलांतर्गतसमुद्राश्चातप
रिधिस्वरूपमिति॥ मेखलाया ऊर्ध्वाधः स्थितत्वेन तात्पर्यार्थः॥ २६॥ अथ समुद्रोत्तरतटे परिधिरूपे जंबूद्वीपारंभे चतुर्थभागेषु च
त्वारि नगराणि संतीत्याह॥ समंतान्मेरुमध्यात्तुल्यभागेषु तोयधेः॥ द्वीपेषु दिक्षु पूर्वादि नगर्यो देवनिर्मिता इति॥ ॥ मेरुमध्यात्
दंडाकारमेरोर्मध्यप्रदेशात् भूगोलगर्भाकारादित्यर्थः॥ समंतात् अभितः भूगोलपृष्ठे तोयधेः परिधिरूपसमुद्रे तुल्यभागेषु समवि
भागेषु द्वीपेषु जंबूद्वीपारंभेषु दिक्षु चतुर्दिभागेषु चतुरिन पूर्वादि नगर्यः मेरोः पूर्वदक्षिणपश्चिमोत्तरदिक्क्रमेण चतुः पुर्यः देव
निर्मिताः देवैः कृताः संतीति तोयः समुद्रोत्तरतटे जंबूद्वीपस्यादिभागरूपे तुल्यांतरेण चत्वारि नगराणि भूगोलस्य कल्पितपूर्वादि दि
क्षु संतीति तात्पर्यार्थः॥ २७॥ अथासां नामानि द्वीपोस्थितस्य जंबूद्वीपादिभागस्थितत्वयोरव्यपरिभाषितक्रविभागे स्थित्यर्थं च श्लो
कत्रयेण विशदयति॥ भद्राश्वपादे पूर्वस्यां यमकोटीति विश्रुता। भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा॥ २८॥ याम्यायां भरते वर्षे
लंका तद्वन्महापुरी॥ पश्चिमे केतुमालाख्ये रोमकाख्या प्रकीर्तिता॥ २९॥ तस्यां सिद्धा महात्मानो नियसंति गतव्यथा इति॥ उदक्कुसि
द्धपुरी नाम कुरुवर्षे प्रकीर्तिता॥ ३०॥ भूगोले उभयत्र दंडाकारो मेरुर्यत्र निर्गतस्तल्लेखा नाभ्यां वृत्ताकारस्तत्रैणोर्ध्वाधरेण भूगोल
स्य खंडद्वयं पूर्वापरं तन्निर्यक् वृत्ताकारं सूत्रेणोर्ध्वाधोभ्यां खंडद्वयं तेन भूगोले चत्वाराकाराश्चत्वारो भूम्यंशास्तत्रोर्ध्वस्य पूर्वचरेभूम्यां
यः समुद्रपरिधिस्तत्स्य चतुर्थांशो भद्राश्वसंज्ञकवर्षे पूर्वस्मिन्नतोर्ध्वाधः शाकलसंधौ स्वर्णघटिताः प्रासादाः तोरणानि च यस्यां
नगरी सा पुरी यमकोटीति संज्ञया विश्रुता ख्याता॥ याम्यायां मध्योर्ध्वाधःशाकलद्वयसंधौ मेरुतस्तस्य दक्षिणतो भारतसंज्ञकवर्षे
लंकासंज्ञा महानगरी तद्वत्स्वर्णप्राकारतोरणा विश्रुतेत्यर्थः॥ पश्चिमे पश्चिमशाकलाधस्थशाकलसंधौ केतुमालसंज्ञे वर्षे रोम
कसंज्ञा नगरी उक्ता॥ उदक् ऊर्ध्वाधःशाकलद्वयसंधौ कुरुसंज्ञकवर्षे सिद्धपुरी नाम नगरी प्रोक्ता॥ अस्याः पुर्याः सिद्धपुरीत्वमन्वर्थ

मित्याह॥ तस्यामिति। तस्यां सिद्धपुर्यां सिद्धाः योगाभ्यासकाः अस्मदादिभ्यो महांतः उत्कृष्टाः आत्मीये चित्ते गतव्यथाः दुःखरहिता नि
रंतरा वसंति॥ ४०॥ अथोक्तानां चतुर्णां पुरीणां परस्परमंतरालमव्यवहितं मेरोः समंतरं चाह॥ भूवृत्तपादविवरास्ताश्चान्योन्यं प्र
तिष्ठिताः॥ ताभ्यश्चोत्तरगो मेरुस्तावानेव सुराश्रयइति॥ ताः उक्तनगर्यः अन्योन्यं परस्परं भूवृत्तपादविवराः भूगोलवृत्तपरिधि
चतुर्थांशांतरदिक्स्थः मेरुः सचोक्तः सुराश्रयः देवैरधिष्ठितः तावान्भूपरिधिचतुर्थांशांतरेण स्थितः एवकारो न्यूनाधिकव्यव
च्छेदार्थः॥ चकारः श्लोकपूर्वार्धेन समुच्चयार्थः॥ ४१॥ अथ तासां पुरीणां निरक्षत्वमस्तीत्याह॥ तासामुपरिगो याति विषुवस्थो दि
वाकरः॥ न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यत इति॥ तासां नगरीणां विषुवस्थः। यद्दिने समरात्रिंदिवं तद्दिने यन्मार्गेण भ्र
मति॥ विषुवद्वृत्तं तत्रस्थ इत्यर्थः सूर्यः उपरिगः सन् याति भ्रमति अतः कारणात्तासु नगरीषु विषुवच्छाया अक्षभा न भवति॥ त
न्नगरीणां विषुवद्वृत्ताभिन्नपूर्वापरवृत्तसद्भावात्॥ तत्रस्थसूर्ये मध्याह्ने छायाभावो पलंभात्॥ अत एव तेषु नगरेषु अक्ष
ध्रुवस्य अन्नतिरुन्नतानक्षांशरूपा नेष्यते नो गीक्रियते॥ अक्षांशाभावान्निरक्षत्वं रेखात्वं तेषां सिद्धमिति भावः॥ ४२॥ अथ मेरौ
उक्तनगरीषु च क्रमेण लंबांशाक्षांशाभावानुपपत्त्या विपारयिषुतयोः प्रथमं ध्रुवस्थितिमाह॥ मेरोरुभयतो मध्ये ध्रुवतारे न
भस्थिते॥ निरक्षदेशसंस्थानामुभये क्षितिजाश्रये इति॥ मेरोरुभयतः दक्षिणोत्तराग्रयोः आकाशस्थितध्रुवतारे दक्षिणोत्त
रक्रमेण मध्येआकाशमध्ये भवतः॥ निरक्षदेशसंस्थानां प्रागुक्तनगरस्थितमनुष्याणां उभयदक्षिणोत्तरे ध्रुवतारे क्षितिजाश्र
यतद्गर्भक्षितिजवृत्तस्थे भवत इत्यर्थः॥ ४३॥ अथानयोर्नेपक्षांशाभावलंबांशापरममाह॥ अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः
क्षितिजस्थयोः॥ नवतिर्लंबकांशास्तु मेरावक्षांशकास्तथा॥ तासु उक्तनगरीषु अतः उभये क्षितिजाश्रये इति कारणात्त॥
अक्षोच्छ्रयः ध्रुवोच्चं न॥ तथा च क्षितिजात् ध्रुवोच्चमक्षांशा इति तदभावात्तदभाव इति भावः॥ तु कारात्तन्नगरीषु ध्रुवयोः क्षितिजस्थ
योः नवतिर्लंबकांशास्तु मेरावक्षांशकास्तथा। संतोः लंबांशाः नवतिः शून्याक्षांशाः तन्नवते लंबांशत्वात्॥ खमध्यात् ध्रुवांतर
स्य लंबांशस्वरूपत्वात्। मेरौ अक्षांशाः तथा नवतिः ध्रुवस्य परमोच्चत्वात्॥ यथा निरक्षदेशेक्षांशाभावाल्लंबांशाः परमास्तथा
मेरावक्षांशपरमत्वाल्लंबांशाभाव इत्यर्थः सिद्धं॥ एतेन पुरांतरं चेदिदमुत्तरं स्यात्तदक्षविश्लेषलवैस्तदाकिं॥ चक्रांशाके रित्यनु
पातयुक्त्या प्रयुक्तं निरुक्तं॥ परिधेः प्रमाणमिति भास्कराचार्योक्तं॥ प्रथमप्रश्नस्योत्तरं स्पष्टमतः स्पष्टपरिधिसाधनं च कल्पि

337/1918

सू० प्र०
६

तेक्रमध्यस्थानानुरोधेनापचीयमानं मेरावभावात्मकं नानुपपन्नमिति व स्वचितं ॥४४॥ अथ होरांव्यवस्थांचेत्यादिप्रश्नोत्तरं विवक्षुर्देवासुरयो
र्दिनारंभं प्रथममाह ॥ मेषादौ देवभागस्थो देवानां याति दर्शनं ॥ असुराणां तुलादौ तु सूर्यस्तद्भागसंचरः इति ॥ जंबूद्वीपवलयसमुद्रसंधौ भूपरिधि
वृत्तं भूगोलमध्यवृत्तसमसूत्रेणाकाशे वृत्तं विषुववृत्तं तत्क्रांतिवृत्तं षड्भांतरेण स्थानद्वये लग्नं तत्र मेषतुलास्थानं प्रवहवायुर्विषुववृत्तमार्गे
भ्रमति मेषस्थानात्कर्कादिस्थानं विषुववृत्ताच्चतुर्विंशत्यंशांतरेणोत्तरतः मकरादिस्थानं विषुववृत्ताच्चतुर्विंशत्यंशांतरेण दक्षिणतः तत्
स्वस्थानं प्रवहवायुना भ्रमदेवं क्रांतिवृत्तप्रदेशाः स्वस्वस्थानप्रवहवायुना भ्रमंति ॥ तत्र मेषादौ देवभागस्थः जंबूद्वीपे देवासुरविभागरूपे दि
पूर्वोक्तः तत्संबंधाः मेषादिकन्यांतराशयः उत्तरगोलः ॥ तत्रस्थः सूर्यः मेषादौ मेषादिप्रदेशे देवानां मेरोरुत्तराग्रवर्तिनां दर्शनं चदर्शनानं
तरं प्रथमदर्शनं याति गच्छति प्राप्नोतीत्यर्थः ॥ विषुववृत्तस्य तत्क्षितिजत्वात् ॥ एवं दैत्यानां मेरोर्दक्षिणाग्रवर्तिनामित्यसुराणामित्युक्तेनैवो
क्तं । तद्भागसंचरः दैत्यभागस्थषड्राशिदक्षिणदिग्विभागस्थतुलादिमीनांतराशयो दक्षिणगोलस्तत्रसंचरः गमनं यस्य एतादृशः सूर्यः तुला
दिप्रदेशे तु काराददर्शनानंतरं प्रथमं दर्शनं प्राप्नोतीत्यर्थः ॥ तेषामपि विषुववृत्तक्षितिजत्वात् ॥४५॥ अथ प्रसंगाद्ग्रीष्मे तीव्रकर इत्याद्यर्धोक्त
प्रश्नस्योत्तरमाह ॥ अत्यासन्नतया ग्रीष्मे तेन तीक्ष्णाः करा रवेः । देवभागेऽसुराणां तु हेमंते मंदता यथेति ॥ तेन उत्तरदक्षिणगोलयोः सूर्यस्योत्त
रदक्षिणसंचाररूपकारणेनेत्यर्थः । देवभागे जंबूद्वीपे अत्यासन्नतया सूर्यस्यात्यंतनिकटस्थत्वेन ग्रीष्मे ग्रीष्मर्तौ ॥ सूर्यस्य तेजोगोलकस्य
किरणास्तीक्ष्णाः अत्युष्णाः । असुराणां देवभागे दैत्यस्य समन्यथा दैत्यानां भागे समुद्रादिदक्षिणप्रदेशे हेमंते हेमंतर्तौ तु कारात् । सूर्यस्यात्युष्णा
भागताः किरणाः सूर्यस्यात्यासन्नत्वात् । अन्यथा सूर्यस्य दूरस्थत्वेन मंदता किरणानां उष्णताभावः । देवभागे हेमंतर्तौ कराणां मंदता अत एव
तत्र शीताधिक्यं दैत्यभागे ग्रीष्मे कराणां मंदता शीताधिक्यं च ॥ तथा च देवभागे दक्षिणगोले सूर्यस्य दूरस्थत्वं ॥ उत्तरगोले निकटस्थत्वं ॥ मध्याह्ने न
तांशानां क्रमेणाधिकाल्पत्वादिति भावः ॥४६॥ अथ मेषादौ देवभागस्थ इत्युक्तं देवासुराहोरात्रकथनव्याजेन निदर्शयति ॥ देवासुरा विषुव ६
ति क्षितिजस्थं दिवाकरं ॥ पश्यंत्यन्योन्यमेतेषां वामसव्ये दिनक्षये इति ॥ विषुवति काले देवदैत्याः सूर्यं क्षितिजस्थं पश्यंति ॥ विषुववृत्तस्य
तयोः स्वस्थानाद्भूगोलमध्यस्थत्वेन क्षितिजत्वात् ॥ एतेषां देवदैत्यानां अन्योन्यं परस्परं ये वामसव्ये अपसव्यसव्ये ते न क्रमेण दिनक्षये
दिवसरात्री भवतः ॥ अयं भावः । देवानां मेरूत्तरभागः स्वकीयत्वात् सव्यं दैत्यानामपसव्यं स्वकीयत्वात् एवं दैत्यानां वामसव्यभागावुत्तरदक्षि
णगोलौ । देवानां क्रमेण दिनरात्री देवानां वामसव्यभागौ दक्षिणोत्तरगोलौ स्वदैत्यानां दिनरात्री ॥ अन्यथान्योन्यं वामसव्ये इत्यनयोः संगता

339/1918

[library stamp]

र्थानुपपत्तेः अत एव पूर्वं मेषादावित्याद्युक्तमिति ॥४७॥ अथ पूर्वश्लोकोर्धस्यैतेरो संदिग्धस्यावांकत्यादिनपूर्वापरार्धकथनस्थले तत्तदर्थं श्लोकाभ्यां
विवादयति ॥ मेषादावुदितः सूर्यस्त्रीन्राशीनुदगुत्तरं संचरन् प्रागहर्मध्यं पूरयेन्मेरुवासिनां ॥४८॥ कर्कादीन्संचरंस्तद्वदह्नः पश्चार्धमेव सः ॥ तुला
दीन्त्रीन्मृगादींश्च तद्वदेव सुरद्विषामिति ॥४९॥ मेषादौ विषुववृत्तस्य क्रांतिवृत्तभागे रवेः सत्वात् उदितः दर्शनतां प्राप्तः सूर्यः उत्तरं यथोत्तरं क्रमे
णेति यावत् त्रीन्राशीनुदक् उत्तरभागस्थान्मेषवृषमिथुनान् संचरन् गतिरामन्तस्मेरुस्थानां देवानां प्रागहर्मध्यं प्रथमं दिनस्यार्धं पूरयेत् पूर्णं करो
तीत्यर्थः । मिथुनांते सूर्ये मेरुस्थानां मध्याह्नं स्यादिति फलितोर्थः ॥ कर्कादीन्त्रीन्राशीन्कर्कसिंहकन्याः तद्वत्क्रमेणेत्यर्थः ॥ अतिक्रमन्सन्सः सू
र्यः दिवसस्य पश्चार्धमपरदिनं ॥ एवकारोन्ययोगव्यवच्छेदार्थः ॥ पूर्वोक्तन्यायेन सूर्ये मेरुस्थानां सर्वास्तो भवतीति फलितार्थः ॥ अथ दैत्यानामा
ह ॥ तुलादीनिसुरद्विषां मेरोर्दक्षिणभागवर्तिनां दैत्यानां तुलादीन्त्रीन्राशीन् तुलावृश्चिकधनुराख्यान् मृगादींस्त्रीन्राशीन् मकरकुंभमीना
न्तद्वत्क्रमेणातिक्रामन्सूर्यः चकारस्तस्मान्मृगादिक्रमेण पूर्वापरार्धं मित्यर्थकः ॥ एवकारः उक्तार्थनिश्चयव्यवच्छेदार्थः ॥ दिनं पूरयतीत्यर्थः । धनुरं
तेस्थे सूर्ये दैत्यानां मध्याह्नं मीनांते सूर्ये सर्वास्तो भवतीति फलितार्थः ॥४९॥ अथातो देवासुराणामिति प्रश्नस्योत्तरं सिद्धमित्याह ॥ अतो दिनक्ष
पे तेषामन्योन्यं हि विपर्ययात् ॥ अहोरात्रप्रमाणं च भानोर्भगणपूरणात् ॥ अतः उक्तकारणात् तेषां देवदैत्यानामन्योन्यपरस्परं ते । हि निश्चयेन
विपर्ययात् व्यत्यासात् दिनरात्री स्त इति फलितं ॥ एतत्फलितार्थस्तु पूर्वं बहुधोक्तः ॥ अथ तत्कथं वा स्याद्भानोर्भगणपूरणादिति प्रश्नस्योत्त
रं फलितमित्याह ॥ अहोरात्रप्रमाणमिति सूर्यस्य मेषादिद्वादशराशिभोगात् देवदैत्यानामहोरात्रमानं भवति ॥ चकारः पूर्वार्द्धेन समु
च्चयार्थः ॥ तेन तयोः पूर्वोक्तमेकं कारणमिति सूचितं ॥५०॥ अथ मेषादावुदित इत्यादिश्लोकद्वयस्य फलितार्थं तदुपपत्तिं चाह ॥ दिनक्षयार्धमे
तेषामयनांते विपर्ययात् ॥ उपर्यात्मानमन्योन्यं कल्पयंति सुरासुरा इति ॥ एतेषां देवदैत्यानां अयनांते अयनसंधौ विपर्ययात् व्यत्यासात् दिनक्ष
यार्धं रात्र्यर्धं च भवति ॥ येन देवानां मध्याह्नं रात्र्यर्धं तत्र दैत्यानां क्रमेण रात्र्यर्धं मध्याह्नं च ॥ यत्र दैत्यानां मध्याह्नं रात्र्यर्धं तत्र देवानां क्रमेण रात्र्य
र्धं मध्याह्नं इति फलितार्थः ॥ अत्र हेतुमाह । उपरीति ॥ देवदैत्याः मेरोरुत्तरदक्षिणाग्रवर्तिनः अन्योन्यमात्मानं स्वं उपरिभागे कल्पयंति
अंगीकुर्वंति ॥ (देवाश्च देवस्थानात्) वस्तुतो भूमेर्गोलकत्वेन सर्वत्र तुल्यत्वान्निरपेक्षोर्ध्वाधोभागयोरनुपपत्तेः ॥ तथा च देवदैत्यापेक्षयोर्ध्वस्त
दैत्यानधःस्थानंगीकुर्वंति ॥ दैत्याश्च देवस्थानापेक्षयोर्ध्वस्तं मन्यमानाः देवानधः कुर्वंतीति तात्पर्यार्थः ॥ एवं च देवदैत्ययोर्विपरीतावस्था
नाद्दिनरात्र्योर्वैपरीत्यं युक्तमेवेति भावः ॥५१॥ अथ दैत्यपाकभूधोरीतिमन्यत्रापि तद्दृष्टांतमिति दिशति ॥ अन्येपि समसूत्रस्था मन्यंते
धःपरस्परं ॥ भद्राश्वकेतुमालस्थौ स्वांतर्गतयमकोटिरोमकनगरविषेन्द्रौ विधायकौ ॥ स्यरामस्व्यासोत्तरस्थतांगीकारे तु स्थालंकासिद्ध

मू० ग्र०
६

नेकमध्यस्थानानुरोधेनापचीयमानं मेरावेभावात्मकंतानुपपन्नमितिचस्फुचितं॥४४॥अथहोरांशयवस्थोचेत्यादिप्रश्नोत्तरंविवक्षुर्देवासुरयो
र्दिनारंभंप्रथममाह॥मेषादौदेवभागस्थोदेवानांयातिदर्शनं॥असुराणांतुलादौतुसूर्यस्तद्भागसंचरः॥जंबूद्वीपवलयसमुद्रसंधौभूपरिधि
यत्नंभूगोलमध्यनत्समसूत्रेणाकाशेरचितंविषुवद्वृत्तं तत्क्रांतिवृत्तंषड्भांतरेणस्थानद्वयेलग्नंतत्रमेषतुलास्थानंप्रवहवायुर्विषुवद्वृत्तमार्गे
भ्रमतिमेषस्थानात्कर्कादिस्थानंविषुवद्वृत्ताच्चतुर्विंशत्यंशांतरेणउत्तरतःमकरादिस्थानंविषुवद्वृत्ताच्चतुर्विंशत्यंशांतरेणदक्षिणतःतत
स्वस्थानंप्रवहवायुनाभ्रमणएवंक्रांतिवृत्तप्रदेशाःस्वस्वस्थानंप्रवहवायुनाभ्रमंति॥तत्रमेषादौदेवभागस्थः जंबूद्वीपेदेवासुरविभागस्तत्रेद्वि
प्रवीक्तः तत्संबंधाः मेषादिकन्यांतराशयःउत्तरगोलः॥तत्रस्थःसूर्यःमेषादौमेषादिप्रदेशेदेवानांमेरावुत्तराग्रवर्तिनांदर्शनंचदर्शनानं
तरंप्रथमदर्शनंयातिगच्छतिप्राप्नोतीत्यर्थः॥विषुवद्वृत्तस्यतत्क्षितिजत्वात्॥एवंदैत्यानांमेरोर्दक्षिणाग्रवर्तिनांमित्यसुराणामित्युक्तेनैवो
क्तं।तद्भागसंचरःदैत्यभागस्थषड्राशिदक्षिणविग्रविभागस्थानतुलादिमीनांतराशयोदक्षिणगोलस्तत्रसंचरःगमनंयस्यएतादृशःसूर्यःतुला
दिप्रदेशेतुकाराददर्शनानंतरंप्रथमंदर्शनंप्राप्नोतीत्यर्थः॥तेषामपिविषुवद्वृत्तक्षितिजत्वात्॥४५॥अथप्रसंगाद्ग्रीष्मेतीव्रकरइत्याद्यर्धोक्त
प्रश्नस्योत्तरमाह॥अत्यासन्नतयाग्रीष्मेतेनतीक्ष्णाःकराःरवेः।देवभागेसुराणांतुहेमंतेमंदतान्यथेति॥तेनउत्तरदक्षिणगोलयोःसूर्यस्योत्त
रदक्षिणसंचाररूपकारणेनेत्यर्थः।देवभागेजंबूद्वीपेअत्यासन्नतयासूर्यस्यात्यंतनिकटस्थत्वेनग्रीष्मेग्रीष्मर्तौ॥सूर्यस्यतेजोगोलकस्य
किरणास्तीक्ष्णाःअत्युष्णाः।असुराणांदेवभागरूत्यस्यसमन्यथादैत्यानांभागेसमुद्रादिदक्षिणप्रदेशेहेमंतेहेमंतर्तौतुकारात्।सूर्यस्यात्युष्णा
नागताःकिरणाःसूर्यस्यात्यासन्नत्वात्।अन्यथासूर्यस्यदूरस्थत्वेनमंदताकिरणानांउष्णताभावः।देवभागेहेमंतर्तौकिरणामंदताअतएव
तत्रशीतातिशयंदैत्यभागेग्रीष्मेकिरणामंदताशीतातिशयश्च॥तथाचदेवभागेदक्षिणगोलेसूर्यस्यदूरस्थत्वं॥उत्तरगोलेनिकटस्थत्वं।मध्याह्ने ६
नांशानांक्रमेणाधिकाल्पत्वादितिभावः॥४६॥अथमेषादौदेवभागस्थइत्युक्तंदेवासुराहोरात्रिकथनव्याजेननिदर्शयति॥देवासुराविषुव
त्क्षितिजस्थंदिवाकरं॥पश्यंत्यन्योन्यमेतेषांमपसव्येदिनक्षयेइति॥विषुवतिकालेदेवदैत्याःसूर्यंक्षितिजस्थंपश्यंति॥विषुवद्वृत्तस्य
तयोःस्वस्थानाद्गोलमध्यस्थत्वेनक्षितिजत्वात्॥एतेषांदेवदैत्यानांअन्योन्यंपरस्परंयेवामसव्येअपसव्यसव्येतेनक्रमेणदिनक्षये
दिवसरात्रीभवतः।अयंभावः।देवानांमेरुरुत्तरभागःस्वकीयत्वात्सव्यदैत्यानामपसव्यःस्वकीयत्वात्एवंदैत्यानांवामसव्यभागावुत्तरदक्षि
णौगोलौ।देवानांक्रमेणदिनरात्रीदेवानांवामसव्यभागौदक्षिणोत्तरगोलौस्वेदैत्यानांदिनरात्रि।अन्यथान्योन्यंवामसव्येइत्यनयोःसंगता

337
1918

र्थानुपपत्तेः।अतएवपूर्वंमेषादावित्युक्तमिति॥४७॥अथपूर्वश्लोकोक्तोर्धस्यैतेरोसंदिग्धस्यशंकयादिनपूर्वापरार्धकथनस्थलेनतदर्थंश्लोकाभ्यां
विशदयति॥मेषादावुदितःसूर्यस्त्रीन्राशीनुदगुत्तरंसंचरन्प्रागहर्मध्यंपूरयेन्मेरुवासिनां॥४८॥कर्कादीन्संचरंस्तद्वदह्नःपश्चार्धमेवसः॥तुला
दीन्त्रीन्मृगादींश्चतद्वदेवसुरद्विषामिति॥४९॥मेषादौविषुवद्वृत्तस्थक्रांतिवृत्तभागेरेवत्यांतस्थेउदितःदर्शनंप्राप्तःसूर्यःउत्तरंयथोत्तरंक्रमे
णेतियावत्त्रीन्राशीन्मेषद्युउत्तरभागस्थानमेषवृषमिथुनान्संचरन्नतिक्रामन्सन्मेरुस्थानांदेवानांप्रागहर्मध्यंप्रथमंदिनस्यार्धंपूरयेत्पूर्णंकरो
तीत्यर्थः।मिथुनांतेसूर्येमेरुस्थानांमध्याह्नंस्यादितिफलितोर्थः॥कर्कादीन्त्रीन्राशीन्कर्कसिंहकन्याःतद्वत्क्रमेणेत्यर्थः॥अतिक्रमन्सन्सःसू
र्यःदिवसस्यपश्चार्धमपरार्धंएवकारोन्ययोगव्यवच्छेदार्थः॥पूरयेत्कन्यांतेसूर्येमेरुस्थानांसूर्यास्तोभवतीतिफलितार्थः॥अथदैत्यानामा
ह॥तुलादीनिसुरद्विषांमेरोर्दक्षिणभागवर्तिनांदैत्यानांतुलादीन्त्रीन्राशीन्तुलावृश्चिकधनुराख्यान्मृगादींस्त्रीन्राशीन्मकरकुंभमीना
न्तद्वत्क्रमेणातिक्रामन्सूर्यःचकारस्तुलान्मृगादिक्रमेणपूर्वापरार्धमित्यर्थकः॥एवकारःउक्तार्थेरीव्यवच्छेदार्थः॥दिनंपूरयतीत्यर्थः।धनुरं
तेसूर्येदैत्यानांमध्याह्नं॥मीनांतेसूर्येसूर्यास्तोभवतीतिफलितार्थः॥४९॥अथातोदेवासुराणामितिप्रश्नस्योत्तरंसिद्धमित्याह॥अतोदिनक्ष
येतेषांमन्योन्यंहिविपर्ययात्।अहोरात्रप्रमाणंचभानोर्भगणपूरणात्॥अतउक्तकारणादेषांदेवदैत्यानांअन्योन्यंपरस्परंहीतिनिश्चयेन
विपर्ययात्व्यत्यासात्दिनरात्रीस्तइतिफलितं॥एतत्फलितार्थस्तुपूर्वंबहुधोक्तः॥अथतत्कथंवास्याद्भानोर्भगणपूरणादितिप्रश्नस्याप्युत्त
रंफलितमित्याह॥अहोरात्रप्रमाणमितिसूर्यस्यमेषादिद्वादशराशिभोगात्देवदैत्यानामहोरात्रमानंभवति॥चकारःपूर्वोक्तेनसमु
च्चयार्थः॥तेनद्वयोःपूर्वोक्तमेकैकंकारणमितिबोध्यं॥५०॥अथमेषादावुदितइत्यादिश्लोकद्वयस्यफलितार्थंतदुपपत्तिंचाह॥दिनक्षयार्धमे
तेषामयनांतविपर्ययात्॥उपर्यात्मानमन्योन्यंकल्पयंत्यसुरासुराइति॥एतेषांदेवदैत्यानांअयनांतेअयनसंधौविपर्ययात्व्यत्यासात्दिनक्ष
यार्धरात्र्यर्धंचभवति॥यत्रदेवानांमध्याह्नरात्र्यर्धंतत्रदैत्यानांक्रमेणरात्र्यर्धंमध्याह्नंच॥यत्रदैत्यानांमध्याह्नरात्र्यर्धंतत्रदेवानांक्रमेणरात्र्य
र्धमध्याह्नेइतिफलितार्थः॥अत्रहेतुमाह।उपरीति॥देवदैत्याःमेरोरुत्तरदक्षिणाग्रवर्तिनःअन्योन्यमात्मानंस्वउपरिभागेकल्पयंति
अंगीकुर्वंति॥(दैत्याश्चदेवस्थानात्) वस्तुतोभूमेर्गोलकत्वेनसर्वत्रतुल्यत्वान्निरपेक्षोर्ध्वाधोभागयोरनुपपत्तेः॥तथाचदेवदैत्याःपरस्परापेक्षयोर्ध्वस्त
दैत्यानधःस्थानगीकुर्वंति॥दैत्याश्चदेवस्थानापेक्षयोर्ध्वस्थंमन्यमानाःदेवानधःकुर्वंतीतितात्पर्यार्थः॥एवंचदेवदैत्ययोर्विपरीतावस्था
नाद्दिनरात्र्योर्वैपरीत्यंयुक्तमेवेतिभावः॥५१॥अथदैत्यपारूपाधोरीतिमन्यत्रापितद्दृष्टांतमितिदिशति॥अन्येपिसमसूत्रस्थामन्यंते
धःपरस्परं॥भद्राश्वकेतुमालस्थौ॥स्वांतर्गतयमकोटिरोमकनगरविषेवेधौविधायकौ॥स्वस्वभ्यासांतरस्थत्वांगीकारेतु) स्थालंकासिद्ध

ग० प्र०
८

पुरस्थिता इति॥ अन्ये देवदैत्यभिन्नाः भूगोलस्थाः अपि शब्दो दैत्यैः॥ समुच्चयार्थकः॥ समसूत्रस्था इति॥ अत्र भद्राश्वकेतुमालकुरुवर्षौ स्वांतर्गतयं
मकोटिरोमकनगरविशेषविधायकौ॥ स्वस्थभूव्यासांतरस्थत्वाद्गोलाकारे तु यथाभूतं परस्परमधोमन्यंते॥ तुर्यचरणस्तु व्यक्त एव॥ ५१॥ यथोक्तं
कात्यनिकमेवेति रुदयन्नाह॥ सर्वत्रैवमहागोले स्वस्थानमुपरिस्थितं॥ मन्यंते खे यतो गोलस्तस्य क्वोर्ध्वं क्व वाप्यधः इति॥ भूगोलः सर्वत्र स्वच्छ
प्रदेशेतु मध्ये स्वस्थानं निजाधिष्ठितस्थानं ऊर्ध्वं स्थितं॥ तदधिष्ठिता मनुष्याः स्वाभिमानेनांगीकुर्युः॥ अतः कारणात् भूगोले सर्वेषां ऊर्ध्व
स्थाः अधःस्थाश्च न भवंत्येव॥ सममेखलतयोर्ध्वाधःस्थत्वमवश्यं तदितरत्वं॥ अन्यथा अधःस्थत्वेन पतनशंकया भूगोले मनुष्याद्यवस्थानानुप
पत्तेः॥ अत्र कारणमाह॥ खे इति यतः कारणात् खे ब्रह्मांडकाकाशमध्यभागे भूगोलोस्ति॥ तथा च ब्रह्मांडस्य भूगोलादभितस्तुल्यत्वात् भूगोले तत्
तयोर्ध्वाधोभागादिसंभव इति भावः॥ स्वाभिप्रायं स्पष्टयति॥ तस्येति भूगोलस्याकाशमध्यस्थस्य समंतादाकाशे कस्मिन् भागे ऊर्ध्वत्वं कस्मि
न्भागे वा समुच्चये अधःस्थत्वं अपि तु ऊर्ध्वत्वं न समुच्चयार्थकः॥ तथा च समंतादाकाशस्य तुल्यत्वेन भूमेरूर्ध्वाधोभागौ निर्वचनीकर्तुमश
क्यौ वास्यामूर्ध्वाधोलोकानियतास्युरिति॥ भूमेरूर्ध्वाधोभागसंभव इति भावः॥ ५२॥ नन्वियं भूः समादर्शाकारा प्रत्यक्षा कथं गोलाकारेत्यत
आह॥ अल्पकायतया लोकाः स्वस्थानात्सर्वतोमुखं॥ पश्यंति वृत्तामप्येतां चक्राकारां वसुंधरामिति॥ जनाः स्वाधिष्ठितप्रदेशात्सर्वतः सर्वदि
क्षु अभिमुखं वृत्तां गोलाकारां एतां प्रत्यक्षां पृथ्वीं चक्राकारां मंडलाकारां समां पश्यंति॥ एवकारार्थे पिशब्दः तेन भूमेर्वस्तुतो गोलाकारत्वेपि
तदाकारेणादर्शनं मुकुराकारतया दर्शनं च न विरुद्धं॥ अत्र हेतुमाह॥ अल्पकायतयेति॥ ह्रस्वशरीरवत्त्वेत्यर्थः॥ तथा च महती भूस्तत्स्थस्य
मनुष्यादि ह्रस्वस्याल्पदृष्टिप्रचाराद्गोलाकारतया न भासते किंतु सममंडलतयाभासते॥ गोलवृत्तशतांशस्य समत्वेन भानात् अन्यथा प्रथ
मज्यायाश्चापसमत्वानुपपत्तेरिति भावः॥ ५३॥ अथ निरक्षादिदेशेषु मेरुव्यतिरिक्तान्यदेशेषु दिनरात्र्योर्मानं विवक्षुर्मेरोरग्रभागयोर्नि
रक्षदेशेषु चक्रभ्रमणमाह॥ सव्यं भ्रमति देवानामपसव्यं सुरद्विषां॥ उपरिष्टाद्भगोलोयं व्यक्षे पश्चान्मुखः सदा॥ अयं प्रत्यक्षभगोलः नक्ष
त्राधिष्ठितमूर्तगोलः देवानां मेरोरुत्तराग्रवर्त्तिनां सव्यं पूर्वादिदिग्व्युत्क्रममार्गेण पूर्वोत्तरपश्चिमदक्षिणक्रमेणेत्यर्थः॥ नक्षत्राधिष्ठितगो
लो भ्रमति॥ निरक्षदेशेषु त्वात्मभिप्रायेणैकवचनं॥ उपरिष्टात् मस्तकोर्ध्वमध्ये भगोलः पश्चान्मुखः पश्चिमदिगभिमुखः सदा नित्यं परिभ्रम
ति॥ भगोलस्य ध्रुवमध्यस्थत्वेन भ्रमणात् तयोस्तत्र क्षितिजवृत्तस्थत्वात्॥ ५४॥ अथ निरक्षे दिनरात्र्योर्मानं कथयन्नन्यत्रापि ततो न्यूनाधिक
मानं भवतीत्याह॥ अतस्तत्र दिनं त्रिंशन्नाडिकं शर्वरी तथा हानिवृद्धी सदा वामं सुरासुरविभागयोरिति॥ अतः निरक्षे मस्तकोर्ध्वं भगोलो भ्र
मतीति कारणात्॥ तत्र निरक्षे देशे त्रिंशन्नाडिकं त्रिंशद्घटीमितं दिनं स्यात्॥ शर्वरी रात्रिः तथा त्रिंशद्घटीपरिमिता स्यात्॥ तत्र क्षितिजवृत्त ८

स्य ध्रुवद्वयसंलग्नतया गोलमध्यस्थत्वाद्दिनरात्र्योस्तुल्यत्वं युक्तमेवेति भावः॥ सुरासुरविभागयोः जंबूद्वीपसमुद्रादिदक्षिणदेशयोः सदा वि
षुवद्दिनातिरिक्तकाले क्षयवृद्धी दिनरात्र्योः प्रत्येकं वामं व्यस्तं यथा स्यात्तथा ज्ञेयं एतदुक्तं भवति॥ जंबूद्वीपे दिनह्रासे रात्रिवृद्धिः तदा दक्षिण
देशे दिनरात्र्योः क्रमेण वृद्धिहानी जंबूद्वीपे दिनवृद्धौ रात्रिहानिस्तदा दक्षिणदेशे दिनरात्र्योः क्रमेण हानिवृद्धी एवं दक्षिणदेशे हानिवृद्धी जंबूद्वी
पे वृद्धिहानी दिनरात्र्योर्यथायोग्यमिति॥ अत्रोपपत्तिस्तु क्षितिजवृत्तस्य ध्रुवसंबंधाभावेन गोलमध्यस्थत्वाभावाद्दिनरात्र्योः सदा विषुवद्दि
नव्यतिरिक्ते न तुल्यत्वं किंतु न्यूनाधिकत्वमहोरात्रस्य षष्टिघटिकात्मकत्वादिति॥ ५५॥ अथैतत् — कोत्तरार्द्धार्थं श्लोकाभ्यां विशदयति॥ मेषा
दौ तु सदा वृद्धिरुदगुत्तरतोधिका॥ देवांशे च क्षपाहानिर्विपरीतं तथासुरे॥ ५६॥ तुलादौ द्युनिशोर्वामं क्षयवृद्धी तयोरुभे॥ देशक्रांतिवशा
न्नित्यं तद्विज्ञानं पुरोदितमिति॥ मेषादौ षड्भे उदक् उत्तरगोले सूर्ये सति उत्तरतो यथोत्तरं सदा यावदुत्तरगोलः देवांशे जंबूद्वीपे अधिकं यथो
त्तरं नाडीएकावृद्धिर्निरक्षदेशीयदिने॥ तुकारो यथोत्तरं सूर्यस्योत्तरगमने यथोत्तरं दिनवृद्धिः परमोत्तरगमनाच्च रात्रिरावर्तते यथोत्तरं न्यू
नावृद्धिरित्यर्थः॥ क्षपाहानिः रात्रेरपचयः च समुच्चये॥ असुरे समुद्रादिदक्षिणभागे तथा दिनरात्र्योः क्षयवृद्धी विपरीतं व्यस्तं दिने हानिः रात्रौ
वृद्धिरित्यर्थः॥ तुलादिषड्भे दक्षिणगोले सूर्ये सति॥ तयोः जंबूद्वीपसमुद्रादिदक्षिणभागयोः दिनरात्र्योः उभे द्वे क्षयवृद्धी उपचयापचयौ वामं व्य
स्तं॥ अयमर्थः जंबूद्वीपे दिनरात्र्योरुत्तरगोलस्थवृद्धिक्षयक्रमेण क्षयवृद्धी स्तः॥ समुद्रादिदक्षिणभागे दिनरात्र्योर्वृद्धिक्षयौ स्त इति॥ ननु क्षय
वृध्योः किमस्मिं स्तत्त्वमित्यतः पूर्वं स्मारयति। देशक्रांतिवशादिति॥ तद्विज्ञानं तयोः क्षयवृध्योः ज्ञानं क्षयवृध्योः ज्ञाने संख्यामानं नित्यं प्रत्यहं
देशक्रांतिवशात्॥ देशः पलभा क्रांतिः सूर्यक्रांतिः एतदुभयानुरोधात्। पूर्वखंडस्पष्टाधिकारे क्रांतिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृ
ता त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः॥ तत्कार्मुकमित्यनेन दिनरात्र्योरर्धे उक्तेति द्विगुणे दिनरात्र्योर्मानेइत्यर्थः सिद्धं॥ अत्रोपपत्तिः
निरक्षदेशे ध्रुवद्वयसंलग्नं क्षितिजवृत्तं ततः उत्तरभागे स्वस्थानक्षितिजं स्वभूगोलमध्यस्थमुत्तरध्रुवादधो दक्षिणध्रुवाच्चोर्ध्वमित्यत उ
त्तरगोले निरक्षक्षितिजादधो दक्षिणगोले ऊर्ध्वमिति पंचदशघटिका निरक्षदेशे द्युदिनार्धं॥ क्षितिजांतरे उपचरेण गोलक्रमेण युतही
नं दिनार्द्धं रात्र्यर्द्धं च विपरीतं॥ एवं दक्षिणभागेपि स्वदेशक्षितिजमुत्तरध्रुवादुन्नतं दक्षिणध्रुवान्नतमिति॥ निरक्षक्षितिजादभीष्टक्षिति
जं गोलक्रमेणोर्ध्वमधश्चोत्तरभागाद्वस्तामिति॥ ५७॥ अथोक्तस्यावधिदेशं विवक्षुः प्रथमं तदुपयुक्तानि क्रांत्यंशयोजनान्याह॥
भूवृत्तक्रांतिभागघ्नं भगणांशविभाजितं॥ अवाप्तयोजनैरर्को व्यक्षाद्याम्याक्षपरिस्थित इति॥ भूवृत्तं भूपरिधियोजनमानं प्रागुक्तं॥
अभीष्टक्रांत्यंशैर्गुणितं द्वादशराशिभागैः षष्ट्यधिकशतत्रयमितैर्भक्तं लब्धयोजनैः कृत्वा सूर्यः उपरि आकाशे स्थितो वर्तमानो दक्षिण

गृ०प्र०
८

तउत्तरतो वा यातिगच्छति कांत्यभावे तु निरक्षदेशो पर्यंतं परिभ्रमति॥ अत्रोपपत्तिः॥ निरक्षदेशान्मेरोरुत्तरदक्षिणाग्राभिमुखं सूर्यः क्रांत्यंशैर्ग
च्छति॥ तद्योजनज्ञानं तु भगणांशैर्भवृत्तस्य निरक्षस्य स्वष्टभूपरिधियोजनानि तदा क्रांत्यंशैः का नीत्यनुपातेनैवोपपन्नं॥५८॥ अथ दिनमान
यनं गणितस्यावधिदेशज्ञानं श्लोकाभ्यामाह॥ परमाक्रमादेवं योजनानि विशोधयेत् भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः॥५९॥ अय
नांते विलोमेन देवासुरविभागयोः॥ नाडीषष्ट्या सकृदहर्निशाप्यस्मिन्सकृत्तथेति॥ परमक्रांतिभागाश्चतुर्विंशतिमितास्तएवं पूर्वोक्तरीत्या
योजनानि भूपरिधेः पूर्वोक्तस्य चतुर्थांशात्परिवर्जयेत्॥ अवशिष्टानि यानि यत्संख्यामितानि योजनानि भवंति तैर्योजनैर्देवासुरविभाग
योः निरक्षदेशादुत्तरदक्षिणप्रदेशयोर्यौ देशौ तयोरित्यर्थः॥ भवतीति अयने उत्तरदक्षिणायनसंधौ कर्कादिस्थले सूर्ये दक्षिणोत्तरा
यनसंधौ मकरादिस्थे सूर्ये विलोमेन व्यत्यासेन सकृदेकवारं नाडीषष्ट्या घटिषष्ट्या अहः दिनमानं भवति॥ अस्मिन्नेतादृशे देशे तस्मिन्नेवा
यनसंध्यासन्ने सकृदेकवारं तथा षष्टिघटीमिता विलोमेन रात्रिर्भवति॥ अपि शब्दो दिनेन समुच्चयार्थः॥ एतदुक्तं भवति॥ कर्कादिस्थे सू
र्ये निरक्षदेशादुत्तरयोजनांतरितदेशे॥ षष्टिघटीमितं दिनं भवति॥ निरक्षदेशाद्दक्षिणयोजनांतरितदेशे षष्टिघटीमिता रात्रिः॥ मक
रादिस्थे सूर्ये तादृशोत्तरभागे षष्टिघटीमिता रात्रिः दक्षिणभागे तादृशे षष्टिमितं दिनमिति॥ अत्रोपपत्तिः परमक्रांतियोजनानि भूवृत्त
चतुर्थांशयोजनेभ्यः हीनानि निरक्षदेशात्तन्मितयोजनांतरितो दक्षिणोत्तरदेशात् तस्मान्मेरोर्दक्षिणोत्तराग्रं क्रमेण परमक्रांतियोजनांतरितं
॥ अतस्तत्रलंबांशाश्चतुर्विंशतिः पलांशाश्च षट्षष्टिरिति॥ तद्देशे क्रांतिवृत्ताकारं क्षितिजमित्ययनांते पंचदशघटिमितमहोरात्र
वृत्तचतुर्भागखंडं निरक्षतद्देशक्षितिजयोरंतरालरूपं चरमतउक्तरीत्या दिनार्धं रात्र्यर्धं चोक्तरीत्या यथायोग्यं त्रिंशत्॥ तद्द्विगुणं षष्टि
घटीमितं तन्मानं गणितरीत्योपपन्नं॥ ॥युक्तं चैतत् अयनांताहोरात्रवृत्तस्यैकस्य क्षितिजप्रदेश एकत्रैव सल्लग्नत्वात्॥ द्विभासलग्न
त्वाभावात्सर्वदृश्यभ्रमितसूर्यपरिवर्तपूर्तिः॥ षष्टिघटीभिर्दर्शनमादर्शनं यथायोग्यं तद्गोलस्थित्या प्रत्यक्षमेव सिद्धं॥६१॥ अथोक्तदिनरा
त्रिमानगणितेतदवधिदेशपर्यंतं दक्षिणोत्तरभागयोर्नान्यत्रेत्याह॥ तदंतरे पि षष्ट्यं तेक्षयवृद्धी अहर्निशोः॥ परतो विपरीतोयं भगोलः
परिवर्तते इति॥ तदंतरे निरक्षदेशोक्तदेशयोरंतराले दक्षिणोत्तरविभागदेशेषु षष्टिघटीमध्ये क्षयवृद्धी अपचयोपचयावुक्त
रीत्या दिनरात्र्योर्यथायोग्यं भवतः॥ परतः अवधिदेशादग्रिमदेशे दक्षिणोत्तरे चैवदेवस्थानानिकटे अयं प्रत्यक्षः भगोलः नक्षत्राधि
ष्ठितो भगोलः विपरीतः॥ अवधिदेशांतर्गतदेशसंबंधिगणितेविरुद्धः परिवर्तते भ्रमति तत्रोक्तरीत्या दिनरात्र्योर्वृद्धिक्षयौ न भव
त इत्यर्थः॥ त्रिज्याधिकचरानयनानुपपत्तेश्चरस्वरूपासंभवाच्च॥६२॥ अथ विपरीतगोलस्थितिं श्लोकाभ्यां प्रदर्शयति॥ ऊनेभू ८

वृत्तपादे तु द्विज्यापक्रमयोजनैः॥ धनुर्मृगस्थः सविता देवभागे न दृश्यते॥ तथा चासुरभागे तु मिथुने कर्कटे स्थितः॥ नष्टच्छायामहीवृत्त
पाददर्शनमादिशेत्॥ द्विराशिज्यापापक्रांत्यंशास्तैर्योजनैः पूर्वागतैः परिधिचतुर्थांशे हीने कृते सति तु कारान्निरक्षदेशात्तद्योज
नांतमिते देशे देवभागे उत्तरस्थे भागे धनुर्मकरराशिस्थोर्कस्तद्देशवासिभिर्न दृश्यते॥ धनुर्मकरस्थेर्के तेषां रात्रिः सदास्त्वमित्यर्थः॥
असुरभागे निरक्षदेशाद्दक्षिणदेशे च समुच्चयार्थः॥ तुकारात्तद्योजनांतरितप्रदेशे मिथुने कर्के कर्कराशौ स्थितोर्कः॥ तथा तद्दे
शदेशवासिभिर्न दृश्यते॥ नष्टच्छायामहीवृत्तपादेभावं प्राप्ता याच्छाया भूच्छाया यत्र तादृशे भूपरिधिचतुर्थांशे सूर्यस्य दर्शनं सदो
क्तं स्यात् यत्र भूच्छायास्ति कारा शून्या स्ति तत्र दिनमित्यर्थः॥ तथा च निरक्षदेशात्तद्योजनांतरितोत्तरप्रदेशे कर्कमिथुनस्थोर्को दृश्यते॥
तद्योजनांतरितदक्षिणप्रदेशे धनुर्मकरस्थोर्को दृश्यत इति फलितार्थः॥ अतएव श्रीपतिना युक्तं चरसाः पलांशाकापवत्तत्र विषयेकदाच
न दृश्यते न मकरो न कार्मुकं कर्किं च कर्कि मिथुनौ सदोदितौ विति भास्कराचार्योक्तं संगच्छते॥६३॥ अथान्यत्रापि विपरीतस्थितिं श्लोकाभ्यां
दर्शयति एकज्यापक्रमानीतैर्योजनैः परिवर्जिते भूमिकक्षाचतुर्थांशे व्यक्षाच्छेषैस्तु योजनैः॥६४॥ धनुर्मृगालिकुंभेषु संस्थितोर्को
न दृश्यते॥ देवभागे सुराणां तु वृषाद्ये भचतुष्टये इति॥ ॥एकराशिज्यापाः क्रांत्यंशयोजनैर्भूपरिधिचतुर्थांशे हीने कृते सति निरक्षदे
शादवशिष्टयोजनैः तुकारादंतरिते देशे देवभागे उत्तरभागे धनुर्मकरवृश्चिककुंभराशिषु स्थितः सूर्यस्तद्देशवासिभिर्न दृश्यते॥ असु
राणां देत्यानां निरक्षदेशात्तद्योजनांतरितदक्षिणभागे वृषादिकराशिचतुष्टये स्थितोर्कस्तद्देशवासिभिर्न दृश्यते तु कारादुत्तरकारे वृषा
दिचतुष्टयस्थितोर्कस्तद्देशवासिभिर्न दृश्यते॥ वृश्चिकादिचतुष्टयस्थितोर्को दक्षिणभागे तद्देशवासिभिर्न दृश्यते इत्यर्थः॥ अतएव
यत्र साग्निगजवाजिसंमितास्तत्र वृश्चिकचतुष्टयं न च दृश्यते न वृषभाचतुष्टयं सर्वदा समुदितं च लक्ष्यते इति भास्कराचार्योक्तं च संगच्छ
ते॥६५॥ अथ भूम्यराशिक्रांत्यानीतयोजनेष्वेवगतमेवग्रभागयोरपिस्थितिवैलक्षण्यमाह॥ मेरौ मेषादिचक्रार्धे देवाः पश्यंति भा
स्करं॥ सकृदेवोदितं तद्वदसुराश्च तुलादिगमिति॥ ॥मेरवाबुत्तराग्रावस्थिता देवाः मेषादिचक्रार्धे मेषादिचक्रार्धे मेषादिराशिषट्के
अवस्थितमर्कं सकृदेकवारं चकारादनेकवारनिरासनिश्चयः उदितं अदर्शनानंतरं प्रथमदर्शनविषयिकं निरंतरं पश्यंति॥ असुराः मेरु
दक्षिणाग्रस्थादैत्याः चदैत्याः समुच्चयार्थः॥ तुलादिराशिषट्कस्थं रविं तद्वत्सकृदुदितं निरंतरं पश्यंति॥६६॥ अथ निरक्षदेशादयनसं
धौ द्विषड्योजनैः कृष्णमर्को भवति तदाह॥ भूमंडलात्पंचदशो भागे देवेतथासुरे। उपरिष्टाद्व्रजत्यर्कः सौम्ययाम्यायनांगत इति॥ देवे

345/1918

उत्तरभागे अथवा भास्करे दक्षिणभागे निरक्षदेशात् भूपरिधेः पंचदशभागे तत्कल्पयोजनांतरिते देशे क्रमेण सौम्ययाम्यायनांगतः उत्तरायणांत
दक्षिणायनांतस्थितोर्कः उपरिस्थात् ऊर्ध्वं व्रजति परिभ्रमति॥ यथा गोलसंधौ निरक्षदेशे तथात्रमार्गद्वयेइति फलितार्थः अत्रोपपत्तिः॥ अयनां
तस्थेर्कं परमक्रांतिश्चतुर्विंशत्संख्यास्तद्योजनानि॥ भूपरिधिं क्रांतिभागघ्नं भगणांशविभाजितमिति॥ अत्र चतुर्विंशतिनिघ्न गुणभगणांशमितह
तेगुणेनापवर्तितेहरस्थाने पंचदशेति॥ इंद्रोर्मंडलतश्चोर्ध्वं स्थितावास्ते पितरो रविं॥ उदितं कृष्णपक्षार्धे पश्यंत्यस्तं सितार्धके॥ भूमंडलात्सं च
दशे भागे इत्युक्तमुपपन्नं॥ अथ निरक्षदेशाद्भूपरिधिपंचदशभागपर्यंतं सूर्यस्य दक्षिणोत्तरतो गमनमुक्त्वा तच्छायागमनं प्रतिपादयति॥ त
दंतराले यो छाया याम्योदक् सर्वं स्यात्॥ मेरोरभिमुखं याति परतः स्वविभागयोरिति॥ निरक्षदेशात्पंचदशभागमध्यस्थिते दक्षिणोत्तरदे
शयोः छाया दक्षिणा उत्तराग्रा मध्याह्नछाया अपि कालिक छायाग्रं वा दक्षिणाग्रमुत्तराग्रं वा संभवति॥ एतदुक्तं भवति॥ निरक्षदेशात्पंचदशां
तरालस्थितदक्षिणदेशे सूर्यस्योत्तरत्वे छायाग्रं दक्षिणं॥ दक्षिणस्थत्वे छायाग्रमुत्तरमिति॥ परतः पंचदशभागांतरालदेशात् स्वविभागयोः॥
मेरोः अभिमुखमेवाग्रयोः संमुखं क्रमेण दक्षिणाग्रमुत्तराग्रं यथा स्यात्तथेत्यर्थः॥ छाया याति गच्छती भवतीत्यर्थः॥ अविशदेन पूर्वार्धोर्थेनस
मुच्चयार्थः॥ ६८॥ अथ कथं पर्येति भुवनानि विभावयन्निति प्रश्नोत्तरश्लोकमाह॥ भद्राश्वोपरिगः कुर्याद्भारते तूदयं रविः॥ रात्र्यर्धं के
तुमाले तु कुरावस्तमनं तदा॥ ६९॥ भारतादिषु वर्षेषु तद्वदेव परिभ्रमन्॥ मध्योदयार्धरात्र्यस्तकालान्कुर्यात्प्रदक्षिणमिति॥ ७०॥ भद्राश्व
वर्षोपरिगतः सूर्यः भारतवर्षे उदयं कुर्यात्॥ तत्काले भद्राश्ववर्षे मध्याह्नं कुर्यात्॥ तदा तस्मिन्काले केतुमालवर्षे अर्धरात्रं कुरौ कुरुवर्षे अस्त
मनं स्वास्तं कुर्यात्॥ तत्काल उक्तवर्षयोरंतराले दिनस्यगतं शेषं वा रात्रेश्च तद्यथायोग्यं कुर्यात्॥ अतिस्थूलदेशग्रहणे यथाश्रुतमिदं भाव्य
किंचित्सूक्ष्मदेशग्रहणे तु यमकोटिलंकारोमकसिद्धपुराणि तदंतर्गतानि तद्व्याख्यानि ज्ञेयानि॥ लंकापुरेर्कस्य यदोदयः स्यात्तदा दिनार्धं
यमकोटिपुर्यां॥ अधस्तु तः सिद्धपुरेस्तकालः स्याद्रोमके रात्रिदलं तदेवेति भास्कराचार्योक्तं॥ भूगोले उक्तनगराणां भूपरिधिचतुर्थांशांतरत्वा
त्संगच्छते॥ अथ भारतादिषु त्रिषु वर्षेषु तेषु भारतकेतुमालकुरुवर्षेषु तद्वत् भद्राश्ववर्षेण रंगवत्॥ एवकारात्तन्न्यूनाधिकव्यवच्छेदः॥ परिभ्रम
न् परिभ्रमेण स्वस्वाभितेमस्थानोपरिस्थितिं कुर्वन् सन् सूर्यः प्रदक्षिणं यथा स्यात्तथा सव्यक्रमेण स्वस्थानादिक्रमेणेति यावत्॥ उक्तचतुर्वर्षेषु म
ध्योदयार्धरात्र्यस्तकालान्मध्याह्नोदयार्धरात्र्यस्तसंज्ञान् कालान्कुर्यात्॥ एतदुक्तं भवति॥ भारतवर्षादिपरिगते केर्भारते केतुमालकुरु
भद्राश्ववर्षेषु क्रमेण मध्याह्नसूर्योदयार्धरात्रास्ताः स्युः॥ केतुमालवर्षोपरिगते र्के केतुमालकुरुभद्राश्वभारतवर्षेषु क्रमेण मध्याह्नसूर्योद
यार्धरात्रास्तान्॥ कुरुवर्षोपरिगते र्के कुरुभद्राश्वभारतकेतुमालवर्षेषु क्रमेण मध्याह्नसूर्योदयार्धरात्रास्ताः भवंतीति॥ ननु ग्रहाणां गतिसद्भा

34/1918

वात्सर्वदेशं याम्योत्तरयोर्ग्रहगमनं प्रतिक्षणं च विलक्षणं च भासतां परं तु नक्षत्राणां गत्यभावात्प्रतिक्षणं भ्रमेणैकत्रावस्थिताभावेपि प्रतिदे
शमेकरूपावस्थानकुतो नत्वं ध्रुवयोः परिभ्रमस्याप्यभावात्सदा सर्वत्रएकरूपावस्थानदर्शनान्नतत्संशयत आह॥ ॥ध्रुवोन्नतिर्भचक्रस्य
नतिर्मेरुं प्रयास्यतः॥ निरक्षाभिमुखं यातुर्विपरीते नतोन्नते इति॥ ॥मेरुं मेरोरुत्तराग्रं दक्षिणाग्रं वा तदभिमुखं प्रयास्यतः गच्छतः पुरुषस्य
ध्रुवोन्नतिः क्रमेणोत्तरदक्षिणयोर्ध्रुवयोरौच्च्यं भवति॥ भचक्रस्य नक्षत्राधिष्ठितगोलमध्यभागवृत्तस्य नतिः क्रमेण दक्षिणोत्तरयोर्नतत्वं भ
वति॥ निरक्षदेशाभिमुखं गच्छतः पुरुषस्य नतोन्नते पूर्वोक्ते व्यस्ते भवतः उत्तरभागस्थपुरुषस्य निरक्षाभिमुखं गच्छतः पूर्वस्थानापेक्षयोत्त
रध्रुवस्य नतत्वं पूर्वस्थानापेक्षया दक्षिणध्रुवस्य नतत्वं भचक्रस्योन्नतत्वमिति॥ ७१॥ अथ कुरुत एवमित्यर्थः॥ कथं पर्येति भगणः सग्रहो
यं किमाश्रय इति॥ प्रश्नस्योत्तरं भचक्रभ्रमणावस्थितिमाह॥ भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः॥ पर्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथा
क्रममिति॥ ॥भचक्रं नक्षत्राधिष्ठितमूर्तगोलरूपं ध्रुवयोर्दक्षिणोत्तरयोः अर्द्धं ब्रह्मणा निबद्धं नियतवायुगतिनागोलाकारेण प्रतिबद्धं॥
प्रवहानिलैः प्रवहवाय्वंशैः स्वस्वस्थानस्थैः आक्षिप्तं स्वस्वस्थाने भिघातं प्राप्तं सत्॥ अजस्रं निरंतरं पर्येति पश्चिमाभिमुखं भ्रमतीत्य
र्थः॥ ननु नक्षत्रचक्रं वायुना भ्रमति ग्रहास्तु योधःस्थाः संबंधाभावात्कथं भ्रमंतीत्यत आह॥ तन्नद्धा इति ग्रहाणां शन्यादीनां कक्षाः मार्गाः
वाय्वंशा वृत्तरूपाः भचक्रांतर्गताः कक्षास्थाः यथाक्रमं अधोधः तन्नद्धाः महाप्रवहवायुगोलस्थापितभचक्रे वायुसूत्रेण बद्धाः अतो भचक्रेण
भ्रमंति॥ तत्रस्थाः ग्रहा अपि भ्रमंतीति किंचित्रं॥ तथा च प्रवहवायुगोलमध्यस्थविषुवद्वृत्तपूर्वापरनिरक्षदेशे ध्रुवयोः क्षितिजस्थत्वात्॥
भचक्रस्य मस्तकोपरि भ्रमणाच्चमेरौ ग्राभिमुखं प्रयातुर्ध्रुवौच्च्यं भवति॥ तत्र आसन्नत्वात् भचक्रं नतं भवति तद्दूरत्वादिति सर्वं युक्तं॥ ७२
अथ पित्र्यं मासेन भवतीति प्रश्नयोरुत्तरमाह॥ सकृदुद्गतमब्दार्धं पश्यंत्यर्कं सुरासुराः॥ पितरः शशिगाः पक्षं स्वदिनं च नरा भुवीति॥ यथा
देवदैत्याः एकवारमुदितं सूर्यं सौरवर्षार्धपर्यंतं पश्यंति नराः भूमौ स्वदिनपर्यंतमर्कं पश्यंति पित्र्यं मासेन भवतीति नाउीषस्या तुमानुपमि
तिसर्वं युक्तं॥ अत एव विधूर्ध्वभागे पितरो वसंतः स्वाधःसुधादीधितिमामनंति॥ पश्यंति ते र्कं निजमस्तकोर्ध्वे दर्शो यतोस्माद्द्युदलं तदे
षां॥ भार्धांतरत्वाद्विधोरधःस्थतस्मान्निशीथः खलु पौर्णमास्यां कृष्णे रविः पक्षदलेभ्युदेति शुक्लेस्तमेत्यर्थत एव सिद्धमिति॥ भास्कराचार्येण
विस्तीर्योक्तं गच्छति॥ ७३॥ अथ प्रसंगादूर्ध्वस्थस्याल्पभगणान् अधःस्थस्याधिकभगणान् युक्त्या प्रतिपादनार्थं प्रथमं कक्षायाः ऊर्ध्वाधः
क्रमेण महदल्पत्वं तत्रस्थभागानां महत्त्वाल्पत्वं प्रदेशात्वं चाह॥ उपरिस्थस्य महती कक्षाल्पा अधःस्थितस्य च॥ महत्या कक्षया भागा महांतोल्पा
स्तथाल्पया इति॥ ऊर्ध्वस्थग्रहस्य कक्षा वायुवृत्तमार्गरूपा महती महत्परिधिप्रमाणा अधःस्थस्य ग्रहस्य कक्षा अल्पपरिधिप्रमाणा च निश्च[illegible]या

सू० प्र०

१०

र्थः॥ लघुकक्षाणां महत्कक्षांतर्गतत्वेन महत्कक्षाणां चांतर्गतलघुकक्षात्वेनोर्ध्वाधःस्थयोर्महदल्पपरिधिके कक्षे अन्यथोक्तस्वरूपानुपपत्तेः॥
एवं महती ह्यत्र परिधौ द्वादशराशिभागानां समत्वेनांशभागाः एकैकभागप्रदेशाः महत्याः कक्षायाः कलात्मिकाः महांतः बहुस्थलात्मिकाः लघुनि वृत्ते तदंक
नेतथा भागाः अल्पया कक्षया कृता अल्पाः अल्पस्थलात्मकाः क्रमेणैकैकभागप्रमाणमधिकाल्पेन समं चक्रांशाः पूर्वमनुपपत्तेरिति तात्पर्यार्थः॥
७४॥ अथोर्ध्वाधःक्रमेण ग्रहभगणभोगकालयोः महदल्पत्वमाह॥ कालेनाल्पेन भगणं भुंक्तेल्पभ्रमणाश्रितः॥ ग्रहः कालेन महता मंडले महति
भ्रमन् इति॥ अल्पभगणाश्रितः अल्पभ्रमणं परिधिमानं यस्याः सा अल्पभ्रमणा॥ अधःस्थकक्षास्थो ग्रहः अल्पेन समयेन भगणं द्वादशराशा
त्मकं भुंक्ते अतिक्रमते॥ महति मंडले ऊर्ध्वस्थकक्षायामित्यर्थः॥ भ्रमन्वशान्गच्छन् महता बहुना समयेन द्वादशराशीन् भुंक्ते वक्ष्यमाण
योजनगतेरभिमतत्वात्॥ ७५॥ अथानयोर्ध्वाधःक्रमेण ग्रहयोर्भगणा तुल्यकालेल्पा बहवो भवंतीति सोदाहरणमाह॥ स्वल्पयातु बहून्
भुंक्ते भगणान् शीतदीधितिः॥ महत्या कक्षया गच्छंस्ततः स्वल्पं शनैश्चरः॥ स्वल्पप्रमाणया कक्षया तु कारादतिक्राम चंद्रः बहुप्रमाणभगणा
न्बहुवारं द्वादशराशीनित्यर्थः॥ भुनक्ति॥ महत्प्रमाणया कक्षया गच्छन् शनिः ततश्चंद्राह्रस्वल्पं भगणं अल्पप्रमाणान्भगणान् अत्याभि
प्रायेणैकवचनं॥ अल्पवारं द्वादशराशीन् भुंक्ते॥ अतएव शनैश्चर इति॥ ७६॥ अथ दिनाब्दमासहोराणामधिपाः केन माः कृत इति प्रश्नो
त्तरं श्लोकाभ्यामाह॥ ॥ मंदादधःक्रमेण स्युः चतुर्था दिवसाधिपाः॥ वर्षाधिपतयस्तद्वत्तृतीयाश्च प्रकीर्त्तिताः॥ ७७॥ ऊर्ध्वक्रमेण शशि
नो मासानामधिपाः स्मृताः॥ होरेशाः सूर्यतनयादधोधःक्रमशस्तथेति॥ शनेः आकाशादधःकक्षाक्रमेण चतुर्थसंख्याकाः ग्रहाः दिना
धिपतयो वारेश्वराः भवंति॥ यथा शनिरविचंद्रभौमबुधगुरुशुक्रा इति तत्क्रमः॥ वर्षस्य यस्य यदधिकृतात्र यदि नाम तस्य स्वामिनः त
द्वत् मंदादधःक्रमेण तृतीयसंख्याकाः ग्रहाः उक्ताश्च समुच्चयार्थः॥ तत्क्रमश्च यथा शनिभौमशुक्रचंद्रगुरुसूर्यबुधा इति॥ चंद्रात्सकाशा
दूर्ध्वकक्षाक्रमेण ग्रहाः॥ मासानां त्रिंशद्दिनात्मकानां स्वामिनः कथिताः तत्क्रमश्च चंद्रबुधशुक्ररविभौमगुरुशनय इति॥ शनेः सकाशादधःक्रम
शः अधःक्रमेण होरेश्वराः होरेति लग्नं भवने स्वचार्धमिति पंचदशभागात्मकहोराणां दिवा द्वादश रात्रौ चतुर्विंशति होराणां भिन्नभिन्नस्वामिनः तथा
मासेश्वरवद्व्यवहिताः कथिताः यथा तत्क्रमः॥ शनिगुरुभौमरविशुक्रबुधचंद्रा इति मध्ये शनेः सर्वोर्ध्वस्थत्वात्॥ चंद्रस्य सर्वाधःस्थत्वात्ता
भ्यामधःऊर्ध्वक्रमः क्रमेणोक्तः अन्यग्रहस्य व्यवस्थिताभ्युपगमे विनिगमाविरहापत्तेः ननु शनेर्यावधित्वेन सृष्ट्यादौ दिनवर्षहोराणां स्वामि १०
त्वं न वा चंद्रस्याद्यावधित्वेन सृष्ट्यादौ मासेशत्वं पूर्वं खंडोक्तानीततदीयैर्विरोधापत्तेः॥ अत्रोपपत्तिः॥ होरारूपलग्नानां क्रांतिवृत्ते धःक्र
मेण मेषादीनां संभवादूर्ध्वकक्षातोधःक्रमेण होरेशत्वं युक्तं॥ एवमहोरात्रे चतुर्विंशतिहोराः सप्ततष्टास्त्रयो होरेशाः गताः चतुर्थो होरेशो द्वितीय

य दिनप्रारंभे एवं प्रथमे होरेशत्वात् द्वितीयदिनेशः॥ एवमुत्तरत्रापि॥ एवमेतद्वारक्रमेण सावनवर्षेष्वयोधारा इति पूर्ववर्षेशादग्रिमवर्षेशोधः
कक्षाक्रमेण तृतीयः उत्तरोत्तरं एवं सावनमासे द्वौ वारौ वारक्रमेण मासेश्वरस्याधिकाविति कक्षोर्ध्वक्रमेण वारक्रमेणैकांतरितत्वात् कक्षोर्ध्वक्रमेण
मैमासेश्वरा उत्तरोत्तरमित्युपपन्नं मंदादित्यादि श्लोकद्वयं॥ ७८॥ अथ ग्रहर्क्षकक्षाः किंमाना इति प्रश्नस्योत्तरं विवक्षुः प्रथमं नक्षत्राणां कक्षामान
माह॥ भवेद्भकक्षा तीक्ष्णांशोर्भ्रमणं षष्टिताडितं॥ सर्वोपरिष्टाद्भ्रमति योजनैस्तैर्भमंडलमिति॥ सूर्यस्य भ्रमणं कक्षापरिधिमानं योजनात्मकं खख
र्थं वक्ष्यमाणं वा इति वक्ष्यमाणं षष्ट्या गुणितं सत् नक्षत्राणां कक्षा नक्षत्राधिष्ठितगोलस्य मध्यवृत्तं स्यात्॥ तेन नक्षत्रकक्षामितैर्योजनैः भमंडलं न
क्षत्राधिष्ठितगोलमध्यवृत्तं सर्वोपरिष्टात् चंद्रादिसप्तग्रहेभ्य उपरि दूरं भ्रमति भगोलादभितः परिभ्रमति॥ अत्रोपपत्तिः॥ नक्षत्राणां गत्यभाव
स्थानैरप्यूर्ध्वं नक्षत्रमंडलं तत्र सूर्यगत्या सूर्यकक्षा तदा नक्षत्रमध्यभावे स्वेक कलमतिकल्पनमानुपातान्यथानुपपत्तिर्न या कल्प्योहरो रूप
मद्भारराशेरिति कल्प्यौ कोतौ फलं सफलरव्यं पक्षिततात्स्यानुपातो लाघवात्सूर्यगतिः षष्टिकलामितां च भगवता कृतामनक्षत्रे गतेरभावाच्चेति
षष्टिताडितमित्युपपन्नं॥ ७९॥ अथ ग्रहकक्षाणां मानज्ञानार्थं आकाशकक्षामानं कियत्तत्कर प्राप्तिरिति प्रश्नस्योत्तरमाह॥ कल्पोक्तचंद्रभग
णा गुणिताः शशिकक्षया॥ आकाशकक्षा सा ज्ञेया करव्याप्तिस्तथा रवेरिति॥ कल्पोक्ताः चंद्रभगणाः एतेन सहस्रगुणिताः कल्पे स्युर्भगणा इत्यस्यु
क्त्या युगचंद्रभगणाः सहस्रगुणिताः कल्पचंद्रभगणा इत्यर्थः॥ चंद्रकक्षया खत्रयाब्धिद्विदहना इति वक्ष्यमाणया गुणिताः सा तन्मिता आकाशक
क्षापरिधिरूपा ज्ञेया धीमतेति शेषः॥ ननु साकाशस्य दृश्यं परिधिरित्यत आह॥ करव्याप्तिरिति सूर्यस्य किरणप्रचारस्तथा आकाशकक्षापरि
मित इत्यर्थः॥ तथा च यद्देशावच्छेदेन सूर्यकिरणप्रचारस्तद्देशावच्छिन्नाकाशगोलस्य अस्यांडकग्रहांतर्गतस्य परिधिमानं संभवत्येवेति भावः
अत्रोपपत्तिः समनंतरमेव यद्भगणभक्ता स्वकक्षा तस्य कक्षा स्यादित्युक्ते भगणकक्षाघातः स्वकक्षा सिद्धा अतः चंद्रभगणकक्षयोः कल्पयो
र्घातः स्वकक्षातुल्य एवेति सिद्धं॥ ८०॥ अथ ग्रहाणां कक्षानयनं योजनगत्यानयनं चाह॥ सैव यत्कल्पभगणैर्भक्ता तद्भ्रमणं भवेत्॥ कुवासरैर्वि
भाज्याह्नः सर्वेषां प्राग्गतिः स्मृता इति॥ सार्क करव्याप्तिरूपा आकाशकक्षा यत्कल्पभगणैः यस्य कल्पभगणैः भक्ता फलं तस्य कक्षा भवेत्॥ एवका
रेण निश्चयार्थं स्वकक्षां कल्पादिसावनैर्भक्त्वा प्राप्तफलं सर्वेषां उक्तभगणसंबंधिनी ग्रहादीनां अह्नः दिवसस्य दिनसंबंधिनीत्यर्थः॥ प्राग्गति
रेव॥ कल्पे स्वकक्षामितयोजनानि ग्रहः क्रामतीति॥ कल्पे रविसावनदिनैः आकाशकक्षामितयोजनानि तदैकरविसावनदिनेन कानीत्य
नुपातेन पूर्वं गतियोजनात्मिका प्रत्यहं तुल्येत्युपपन्नं॥ अथ योजनात्मकगतेः कलात्मकगतिं स्वीयामाह॥ भुक्तियोजनजा संख्या वेदो
र्भ्रमणसंगुणा॥ स्वकक्षाप्तानु सा तस्य तिथ्याप्ता गतिलिप्तिका इति॥ ॥गतियोजनोत्पन्ना या संख्या सा संख्या चंद्रस्य भ्रमणसंगुणा कक्ष

यागुणिताः स्वकक्षया भक्ताः अभिमतग्रहस्य कक्षया भक्ताः फलरूपाणि लिप्ताः पंचदशभक्तानुकारात्फलं तस्याभिमतग्रहस्य गतिकलाः भवंति॥
अत्रोपपत्तिः कक्षायोजनैश्चक्रकलास्तदा गतियोजनैः का इत्यनुपातेन गतिकलाः तत्रापि चंद्रकक्षा पंचदशभक्ता चक्रकला इति चक्रकला स्वरू
पं धृतमिति सुपपन्नं॥८३॥ अथ किमुत्सेधा इति प्रश्नस्योत्तरमाह॥ कक्षा भूकर्णगुणिता महीमंडलभाजिता॥ तत्कर्णा भूमिकर्णोना ग्रहौच्च्यं स्वं
दलीकृता इति॥ ग्रहाणां योजनात्मिका कक्षा भूव्यासेन योजनानि शतान्यष्टौ भूकर्णो द्विगुणा निखिलं च भूव्यासेन षोडशशतेन गुणिता भू
परिधिना मद्वर्गतेन भक्ता फलं तस्याः कक्षायाः कर्णाः व्यासा भवंति॥ एते भूव्यासेन हीना अर्धिताः संतः संग्रहीत व्यासस्य वधि ग्रहौच्च्यं
ग्रहस्योच्चता भूमेः सकाशाद्भवति॥ अत्रोपपत्तिः भूपरिधिना भूव्यासस्तदा कक्षस्यो जनैः क इत्यनुपातेन कक्षाव्यासास्ते अर्धिताः कक्षा
व्यासार्धानि भूगर्भपक्षापरिधिप्रदेशांतरालस्य रूपं भूपृष्ठात्तदंतरज्ञानार्थं भूव्यासार्धेन हीनं भूपृष्ठात्कक्षौच्चं तत्र कक्षाव्यासाः भूव्यासोनाः अ
र्धिताः कृताः उभयथा समत्वात्॥ कक्षौच्च्यमेव ग्रहौच्च्यं ग्रहस्य तत्राधिष्ठितत्वादिति॥ एतेन सिद्धग्रहेभ्यः परस्परांतरज्ञानं सुगममिति॥ कि
मंतरा इति प्रश्नस्योत्तरं स्वतः सिद्धमेवेति दिक्॥८४॥ अथोर्ध्वक्रमेण सिद्धाः कक्षाः विवक्षुः प्रथमं चंद्रस्य कक्षां बुधशीघ्रोच्चकक्षां चाह॥ खत्र
याब्धिहिदहना ३२४००० कक्षा तु हीनरश्मिनः॥ तच्छीघ्रस्यार्करवाग्निशून्यतर्क्तव्यें दवस्तत इति॥ चंद्रस्य कक्षा सहस्रगुणिता सिद्धरामाः॥
३२४००० तु कारादागमप्रामाण्येनांगीकार्या अन्यथा अन्योन्याश्रयापत्तेः ततश्चंद्रादूर्ध्वं बुधशीघ्रोच्च [illegible] स्वकक्षा नव
खदंतवेदरिताः १०४३२०९ यद्यपि बुधशीघ्रोच्चं आकाशे न लक्ष्यं नेति तत्कक्षोक्तिरयुक्ता॥ तथापि बुधशीघ्रोच्चभगणानीतकक्षायाग
मनुरोधेन चंद्रादूर्ध्वगायां बुधोभ्रमतीष्टं सूर्यशुक्रकुजेंदवर इति क्रमोक्तेः अन्यथा भगणैक्यादेककक्षायां रविबुधशुक्राणामवस्थितौ मंड
लभंगापत्तेरिति सिद्धवनार्थता॥८५॥ अथ शुक्रशीघ्रोच्चस्य कक्षां सूर्यबुधशुक्राणामभिन्नां कक्षां चाह॥ शुक्रशीघ्रस्य सप्ताग्निरसाग्नि
रसषड्यमाः २६६४६३७ ततो कं बुधशुक्राणां खखरवार्थेकमार्गणवाइति ४३३१५००॥ ॥तदूर्ध्वं शुक्रशीघ्रोच्चकक्षा द्विभंग वेदषड्स ११
पक्षाः २६६४६३७ शुक्रवस्थानस्वनगार्थमुक्ताः ततस्तदूर्ध्वं सूर्यबुधशुक्राणां भगणैक्यादभिन्ना कक्षा खखखपंचभूवेदवाब्धयः ॥४३३१५००
यद्यपि बुधशुक्रयोः सूर्याधःस्थत्वात्केवलं सूर्यकक्षैव वक्तुमुचिता तथापि कक्ष्यैको भगणस्तदा कल्परविसावनदिनैः स्वकक्षा मित
योजनानि तदा हर्गणेन कानीत्यनुपातेन योजनैः क इत्यनुपातेन सूर्यबुधशुक्राणामभिन्नत्वसिध्यर्थं बुधशुक्रयोरप्युक्ता अन्यथा
समतानुपपत्तेरिति॥८६॥ अथ भौमस्य कक्षां चंद्रमंदोच्चस्य कक्षां चाह॥ कुजस्याप्यंकशून्यांचषड्दैकभुजंगमाः॥ चंद्रोच्चस्य क
ल्पाश्विवसुहिमांशुवह्नयः इति॥ भौमस्य अपि शब्दात्सूर्यादूर्ध्वं कक्षा अंकशून्यांचषड्दैकभुजंगाः ८१४६९०९ चंद्रमंदोच्चशानायो

क्ष॥८६॥ अथ गुरुराह्वोः कक्षे आह॥ कृतनंदमुनिपंचाद्रियुगं द्विविषयागुरोः॥ खभानोर्वेदतर्काष्टद्विशैलार्थखकुंजरा इति॥ बृहस्पतेर्भौ
मचंद्रोच्चादूर्ध्वं कक्षा वेदांगमुनिपंचखरामचंद्राः ५१३७५७६४ राहोः कक्षा वेदांगाष्टयमसप्तपंचाशीतिः ८०५७२८६४ इयम
दृश्यापि राहोर्गतयोजनज्ञानार्थमुक्ता॥ अत्रापि पातस्य वक्रत्वमुद्धव्येयं॥८७॥ अथ शनेः कक्षां नक्षत्राधिष्ठितमूर्तगोलमध्यक
क्षां चाह॥ पंचबाणाक्षिनागर्तुरसाध्यर्काः शनेस्ततः॥ भानां रविखशून्यांकवसुरंध्रशराश्विन इति॥ ततः बृहस्पतेः राहोर्वोर्ध्वं शनेः कक्षा पं
चपंचत्र्यष्टषट्सप्तार्काः १२७६८३५५ नक्षत्राणां गोलमध्ये कक्षा शनेरूर्ध्वं द्वादशांशेन वज्राष्टनवतत्वेति २५९८९००१२ यद्यप्यभवे
द्रुकक्षातीक्ष्णांशोर्भ्रमणं षष्टिताडितमित्यनेन भकक्षायां द्वादशांशोतरिता द्युक्तत्वं॥ तथापि सैव यत्कल्पभगणेरित्यनेन सूर्यकक्षा
या उक्ता या द्वादशांशोवयवस्य निबंधने योगे विभकक्षार्थं भगवता गृहीतत्वाद्दोषः॥ एतेनावयवस्यार्धन्यूनत्वेन त्यागो ह्यभ्यधिकत्वेनो
र्ध्वमेकाधिकग्रहणं कक्षानिबंधने कृतमिति सूचितं॥८८॥ ननु चंद्रकक्षाया आगमप्रामाण्येनांगीकारे सर्वकक्षाणामागमप्रामाण्यापत्यासै
व यत्कल्पभगणैर्भक्ता तद्भ्रमणं भवेदितिकक्षानयनं व्यर्थं॥ अन्यथाकाशकक्षाज्ञानासंभवापत्तेरिति॥ खव्योमखत्रयखसागरषट्कनाग
व्योमाष्टशून्ययमरूपनगाष्टचंद्राः॥ ब्रह्मांडसंपुटपरिभ्रमणं समंतादभ्यंतरे दिनकरस्य करप्रसार इति॥ वेदांगाष्टाशीतिनखभसंख्यधु
तयः प्रयुतमिताः योजनानि पूर्वोक्तानि ब्रह्मांडसंपुटपरिभ्रमणं ब्रह्मांडगोलस्य परिधिः कल्पभगणकक्षाहतिलब्ध आकाशकक्षायाः पूर्व
स्वरूपोक्तेरिति नपौनरुक्त्यं॥ अभ्यंतरे ब्रह्मगोलांतः सूर्यस्य अभितः किरणानां प्रचारः॥ सूर्यकिरणप्रचारदेशस्य परिधिस्तत्व्यः एनेन ब्रह्मां
डगोलांतः परिधिर्नवा इत्यपि सूचितं॥८९॥ अथाग्रिमग्रंथस्यासंगतित्वपरिहारार्थमध्यायसमाप्तिं फक्किकयाह॥ इति सूर्यसिद्धांते भूगोला
ध्याय इति भिन्नं छंदसा॥ इति॥ प्रारब्धप्रसंगः समाप्त इत्यर्थः॥ पूर्वखंडे ग्रंथैकदेशस्याधिकारसंज्ञा तु उत्तरखंडे ग्रंथैकदेशस्याध्यायसं
ज्ञाभिन्नप्रसंगवशात्कृतेति ध्येयं॥ रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे॥ उत्तरार्द्धे समाप्तोयं भूगोलाध्यायसंज्ञकः॥१॥ ॥इति श्री
सकलगणकसार्वभौमबल्लालदैवज्ञात्मज रंगनाथविरचिते गूढार्थप्रकाशके उत्तरखंडे भूगोलाध्यायः संपूर्णः॥ श्रीः॥ अथ मुनिर्मु
नीन् श्लोकत्रयप्रतिश्लोकाभ्यामाह॥ अथ गुप्ते शुचौ देशे स्नातः शुचिरलंकृतः॥ संपूज्य भास्करं भक्त्या ग्रहान् भान्यथ गुह्यकान्॥ पारंपर्योप
देशेन यथा ज्ञानं गुरोर्मुखात्॥ आचार्यः शिष्यबोधार्थं सर्वं प्रत्यक्षदर्शिवानिति॥ ॥अथ शब्दो मंगलार्थः॥ द्वितीयोथ शब्दः पूर्वोक्ता
नंतर्यार्थकः॥ गुप्ते रहसि शुचौ देशे पवित्रे देशे स्थाने आचार्यः सूर्यांशपुरुषो मयासुराध्यापकः स्नातः कृतस्नातः शुचिः शुद्धमनाः अलं
कृतः हस्तकर्णकंठादिभूषणभूषितः निश्चिंतत्वद्योतकमिदं विशेषणं॥ अन्यथा गृहादिव्यवहारादिव्याकुलतया मनःस्थैर्यानुपपत्तेः॥ भास्करं

349
1918

श्रीमत्सर्वस्योपजीव्यं भगवन्तमाराध्यत्वेन ज्ञानरूपेण संपूज्य नमस्कारस्तु तिविषयं कृत्वा ग्रहान् चंद्रादिग्रहान् सूर्यस्य पृथगुद्देशः प्राधान्यार्थः भा
ति नक्षत्राणि राशींश्च गुरुं व्याख्यानपक्षादीन् कृष्णदेवनामकं संपूज्य समुद्धया कृ भोत्रानुसंधेयः गुरोः सूर्यस्य गुरुत्वात् वदनारविंदात् पारंपर्योपदेशेन स
र्वेण मुनीन् प्रस्तुत्य ॥ मुनिभिः सूर्यांशपुरुषं प्रत्युक्तमिति परंपरया कथनेन ॥ वस्तुतस्तु शिष्यस्याग्रहोत्पादनार्थं ज्ञानेति गोप्यं सत्सत्त्वं न मे तदुक्त्या
कृतं ॥ कथमन्यथा सूर्यांशपुरुषो मया सुरो प्रत्यवदद्दूरस्थमुनीन् प्रतिरूपेणेतद्यतोर्कः स्वांशपुरुषं प्रति कथने तु घतः कुतः कारणाभावाच्च ॥
यथास्वज्ञात्मयादज्ञातं पूर्वोक्तं मदगतं शिष्यबोधार्थं मया स्फुटस्य ॥ भ्रमतानोत्पादनार्थं सर्वं प्राग्व्याख्यातं प्रत्यक्षं दर्शितवान् प्रत्यक्षं दर्शि
तवानित्यर्थः ॥ २ ॥ कथं दर्शितवानित्तिमयास्फुटं प्रत्युक्तं सूर्यांशपुरुषवचनस्यानुवादे सूर्यांशपुरुषो मया स्फुटं प्रति गोलबंधादेर्गोलडुपक्रमं च
श्लोकाभ्यामाह ॥ ॥ भूमिगोलस्य चरनाकुर्यादाश्चर्यकारणं ॥ अभीष्टं पृथिवीगोलं कारयित्वा तु दारवं ॥ दंडं तन्मध्यगं मेरोरुभयत्र विनिर्गतं ॥
आधारकक्षाद्वितयं कक्षा वैषुवती तथा ॥ भभगोलस्य भगोलादभितः संस्थितस्य नक्षत्राधिष्ठितगोलस्य प्राग्व्याख्यातार्थस्य रचनां स्थितिज्ञानार्थं
दृष्टांतात्मकं गोलस्य निर्मितं सम्यग्गणको गोलशिल्पज्ञः कुर्यात् ॥ ननु त्वदुक्तेन सर्वज्ञानं भवतीति दृष्टांतगोलनिबंधनं व्यर्थमेवेत्यत आह ॥ आश्च
र्यकारिणिमिति इदं प्रतीत्यद्भुताद्भुतबुद्धिजनयित्री ॥ तथा चोक्तेन स्वाधस्तिर्यग्भागयोर्भकावस्थानस्य तद्भागस्थभगोलप्रदेशस्य च भूमेर्निराधा
रत्वे श्रुतज्ञानं मनसि सप्रतीतिरं नभवत्यतो दृष्टांतगोलं निश्चयसंभवात्तन्निबंधनमत्यावश्यकमिति भावः ॥ कथं रचनां कुर्यादित्यत आह ॥ अभीष्टमिति
भूगोलं भगोलं अभीष्टं स्वेच्छाकल्पितपरिधिप्रमाणकं दारवं काष्ठघटितं सच्छिद्रं कारयित्वा काष्ठशिल्पज्ञद्वारा कृत्वेत्यर्थः ॥ मेरोरनुकूलरूपं
दंडं काष्ठं तन्मध्यगं तस्य काष्ठघटितभूगोलस्य मध्यच्छिद्रमध्ये शिथिलं नयास्थितं उभयत्र भूगोलस्य व्यासप्रमाणच्छिद्रस्याग्राभ्यां बहिरित्यर्थः १२
विनिर्गतं एकाग्रादन्यतराग्रावधिदंडप्रदेशात् तुल्यं निस्सृतं उभयाग्राभ्यां तुल्यौ दंडप्रदेशौ यथा स्यातां तथा कुर्यादित्यर्थः ॥ भगोलनिबंधना
र्थं आधारवृत्तद्वयमाह ॥ आधारकक्षाद्वितयमिति भूगोलनिबंधनार्थमादावाधारार्थवृत्तयोर्वृत्तयोर्द्वितयं ऊर्ध्वाधस्तिर्यक्स्थानक्रमेणैकमे
कमेवं द्वयमित्यर्थः ॥ भूगोलादुभयतस्तुल्यांतरेण दंडप्रदेशयोः प्रोतमेकं वृत्तं कुर्यात् तुल्यं वृत्तमपरं तदूर्ध्वच्छेदेन दंडप्रोतं कुर्यादिति सिद्धोर्थः ॥ ए
तद्वृत्तद्वयव्यतिरेकेण भगोलादभितो गोलनिबंधनानुपपत्तेः ॥ भगोलनिबंधनारंभमाह ॥ कक्षे पुवैषुवती विषुवत्संबंधिनी वृत्तपरिधिः विषुव
द्वृत्तमित्यर्थः ॥ तथा आधारवृत्तद्वयस्यार्द्धछेदे न भगोलमध्ये तत्तानुकूल्येन गणकेन निबंधमित्यर्थः ॥ ४ ॥ अथ मेषादिद्वादशराशीनामहोरात्र
वृत्तनिबंधनमन्यदपि श्लोकपंचकेनाह ॥ भगणांशांगुलैः कार्या दलितैस्तिस्र एव ताः ॥ स्वाहोरात्रार्द्धकर्णैश्च तत्प्रमाणानुमानतः ॥ ५ ॥ क्रांतिविक्षेप
भागैश्च दलितैर्दक्षिणोत्तरैः ॥ स्वैः स्वैरपक्रमैस्तिस्रो मेषादीनामपक्रमात् ॥ ६ ॥ कक्ष्याः प्रकल्पयेत्ताश्च कर्कादीनां विपर्ययात् ॥ तद्वृत्तिस्त्रस्तु ला

351
1918

दीनां मृगादीनां विलोमतः ॥ याम्यगोलाश्रिताः कार्याः कक्ष्याधारद्वयोरपि ॥ याम्योदग्गोलसंस्थानां भानामभिजितस्तथा ॥ ८ ॥ सप्तर्षीणामगस्त्यस्य ब्र
ह्मादीनां प्रकल्पयेत् ॥ मध्ये वैषुवती कक्षा सर्वासामेव संस्थितेति ॥ भगणांशांगुलैः द्वादशराशिभागैः षष्ट्यधिकशतत्रयैः परिमितांगुलैः दलितैः
समविभागेन खंडितैरर्द्धितैरित्यर्थः ॥ ताः कक्षाः वंशशलाकावृत्तात्मकाः तिस्रः त्रिसंख्याकाः एवकारादंकनेवृत्ते न्यूनाधिकव्यवच्छेदः ॥ शिल्प
ज्ञेन गोलगणितज्ञेन कार्याः एताः पूर्ववृत्तप्रमाणेन न कार्याः इत्यभिप्रायेणाह ॥ स्वाहोरात्रार्धकर्णैरिति ॥ स्वशब्देन मेषादित्रिकं तत्स्वसंबंधिराशेरहोरा
त्रवृत्तस्यार्द्धकर्णः व्यासार्द्धं द्युज्यातामिरित्यर्थः ॥ चकारात् कार्यास्वस्वद्युज्यामितेन व्यासार्धेन मेषादित्रयाणां वृत्तत्रयं कुर्यादित्यर्थः ॥ ननु स्पष्टा
धिकारोक्ताहोरात्रार्धकर्णानयने युक्त्यभावात् तैर्वृत्तनिर्माणं कुतः कार्यमित्यत आह ॥ तत्प्रमाणानुमानत इति ॥ विषुवती कक्षा प्रमाणानुमानाद्वृत्तत्र
यं कार्यं यतः विषुववृत्तं पूर्ववृत्तसमं तथा तदनुरोधेन मेषांतवृत्तं ॥ मध्यांतरनुरोधेन वृषांतवृत्तमल्पं तदनुरोधेन मिथुनांतवृत्तमध्यमित्युत्तरो
त्तरमल्पव्यासार्धवृत्तं तत्तदहोरात्रवृत्तमिति ॥ द्युज्याव्यासार्धेन वृत्तनिर्माणयुक्तियुक्तं ॥ क्रांतिज्यावर्गोनात् त्रिज्यावर्गान्मूलस्याहोरात्रवृत्तव्यासा
र्द्धत्वादिति भावः ॥ वृत्तत्रयं मितं दृष्टांतगोलनिबध्नाति ॥ क्रांतिविक्षेपभागैरिति ॥ क्रांतिवृत्तस्य विषुववृत्तप्रदेशो दक्षि[illegible]त्तप्रदेशाः येरं
शैः चकारात् आधारवृत्तस्थैः दलितैः समविभागेन खंडितैरंकितैः दक्षिणोत्तरैर्विषुववृत्तप्रदेशयोर्दक्षिणोत्तरकैः उक्तलक्षणैः स्वकीयैः स्वकीयैः
स्वस्वराशिसंबंधैः अपक्रमैः स्पष्टाधिकारानीतक्रांत्यंशैः मेषादीनां मेषादिराशित्रयाणां मेषांत-वृषांत-मिथुनांतानामित्यर्थः ॥ ति
स्रः त्रिसंख्याकाः प्राग्विनिर्मिता वृत्तरूपाः कक्षाः अपक्रमात् अपशब्दस्योपसर्गत्वात् क्रमादित्यर्थः ॥ प्रकल्पयेत् शिल्पिज्ञगणको विषुववृत्तानुरो
धेनाधारवृत्तद्वये उत्तरतो निबध्नीयादित्यर्थः ॥ कर्कादीनामाह ॥ तास्ति मेषादिकक्षाः निबद्धाः कर्कादीनां कर्कसिंहकन्यानामादिप्रदेशानां विपर्य
यात् ॥ व्यत्यासात् च कारः समुच्चयो तेन प्रकल्पयेदित्यर्थः ॥ मिथुनांतवृत्तं कर्कादेः वृषांतवृत्तं सिंहादेः मेषांतवृत्तं कन्यादेरिति फलितं तुलादीनामा
ह ॥ तद्वदिति तुलादीनां तुलावृश्चिकधनुषां तिस्रः अन्याः त्रिसंख्याकाः कक्षाः तद्वत्तदुक्तरीत्या त्रिराशिक्रांत्यंशैः तुलांतवृश्चिकांतधनुरंतानां याम्यगोला
श्रिताः विषुववृत्ताद्दक्षिणभागे आधारवृत्तद्वये निबद्धाः कार्याः गणकेनेति शेषः ॥ मकरादीनामाह ॥ मृगादीनामिति विलोमतः उत्क्रमात् तुलादि
संबद्धाः कक्षाः मकरादीनां भवंति धनुरंतवृत्तं मकरादेः वृश्चिकांतवृत्तं कुंभादेः तुलांतवृत्तं मीनादेरिति फलितं ॥ ताराणां कक्षानिबंधनमाह ॥ कक्षा
धारद्वयोरपि ॥ भानामश्विन्यादीनां सप्तविंशतिनक्षत्रबिंबानां याम्योदग्गोलसंस्थानां विषुववृत्ताद्दक्षिणोत्तरभागयोर्यथायोग्यमवस्थितानां यन्नक्ष
त्रध्रुवस्य स्पष्टक्रांतिरुत्तरा तन्नक्षत्राणामुत्तरभागावस्थितानां ॥ येषां स्पष्टक्रांतिर्दक्षिणा तेषां दक्षिणभागावस्थितानामित्यर्थः ॥ द्वयोर्दक्षिणो
त्तरभागयोः अपिशब्दो याम्योत्तरनक्षत्रक्रमेण व्यवस्थार्थकः ॥ कक्षाधारात् कक्षाणां आधारवृत्तद्वयात् तयोरित्यर्थः सप्तम्यर्थे पंचमी कक्षाः
स्पष्टक्रांतिज्योत्पन्नद्युज्याव्यासार्धप्रमाणेन वृत्ताकाराः प्रकल्पयेत् ॥ शिल्पज्ञो निबध्नीयात् ॥ अन्येषामप्याह ॥ अभिजित इति अभिजिन्नक्षत्र

स्य बिंबस्य सममध्यं बिंबानां भगस्य नक्षत्रबिंबस्य भ्रमसंस्थकतारामुक्तलुब्धकापवत्सादिनक्षत्रबिंबानां चकारोनुसंधेयः तथा कक्षा॥ यथा योग्यं प्र
गृ०प्र० कल्पयेदित्यर्थः॥ निबंधनप्रकारमुपसंहरति॥ मध्य इति॥ सर्वासां मुक्तकक्षाणां मध्ये तुल्यभागे नाधारवृत्तमध्यप्रदेशे॥ एवकारादन्ययोगव्यवच्छेदः
१३. विषुवती कक्षा विषुवसंबंधिनी वृत्तसंज्ञा आधवस्थिता भवति तथा॥ शिल्पिकः कक्षां निबंधयेदित्यर्थः॥ विषुवद्वृत्तात् स्पष्टक्रांत्यंतरेण स्वद्युज्याव्यासा
र्धप्रमाणेनाहोरात्रवृत्तमाधारवृत्तयोः निबंधयेदिति निष्कृष्टोर्थः॥ ९॥ अथ गोले मेषादिराशिसन्निवेशो सार्धश्लोकेनाह॥ तदाधारयुतेरूर्ध्वमय
ने विषुवद्द्वयं॥ विषुवत्स्थानतो भागैः स्फुटैर्भगणसंचिरात॥ १०॥ क्षेत्राण्येवमजादीनां तिर्यग्ज्याभिः प्रकल्पयेत्॥ तदाधारयुतेः तत्र विषुवद्वृत्तं
आधारं आधारवृत्तं तथा युते संपातात् ऊर्ध्वमुपरि अंतिमाधारवृत्तयोः संपाते अयने दक्षिणोत्तरायनसंधिस्थाने उत्तरदक्षिणायनसंधिस्थाने
भवतः॥ अयोर्ध्वपदसंचारादाधारवृत्तमध्याधरं यास्यं तिर्यग्गुणमंडलाकारं तेनैतत्फलितं विषुवद्वृत्तस्योर्ध्वाधराधारवृत्तेऊर्ध्वमधश्च संपातः तत्रो
र्ध्वसंपातात्मकराश्यहोरात्रवृत्तं चतुर्विंशत्यंशोस्तदाधारवृत्ते दक्षिणतो यत्र लग्नं तत्र दक्षिणोत्तरायणसंधिस्थाने एवमधःसंपातात्कर्क्यहोरात्रवृ
त्तं चतुर्विंशत्यंशैस्तदाधारवृत्ते उत्तरतो यत्र लग्नं तत्रोत्तरलग्नं दक्षिणायनसंधिस्थानमिति॥ अयनाद्विषुवस्य विपरीतस्थितित्वादूर्ध्वशब्दयोगि
तविपरीताधःशब्दसंबंधाद्विषुवद्द्वयं भवति॥ तात्पर्यार्थस्तु तिर्यग्गुणमंडलाकाराधारवृत्तविषुवद्वृत्तसंपातौ पूर्वापरौ क्रमेण मेषादितुलादिरूपे
विषुवत्स्थाने भवत इति॥ अथ राशीनां संनिवेशमाह॥ विषुवत्स्थानत इति॥ विषुवत्प्रदेशात् स्फुटैः राशिसंबंधिभिः स्वैः नाम्नितैरंशैः भगणसंचरात्
त्रिंशत्कल्प्य संनिवेशान् तिर्यक्ज्याभिः उक्तवृत्तानुकारा तिरश्चानुकारः सूक्ष्मवृत्तप्रदेशः अजादीनां मेषादीनां एवं अयनविषुवत्कल्पनरीत्या तद
न्तरालक्षेत्राणि स्थानानि सुधीर्गणकः प्रकल्पयेदंकयेत्॥ तद्यथा॥ पूर्वदिक्स्थविषुवत्स्थानात् गोलवृत्तद्वादशांशखंडप्रदेशेन मेषांताहोरात्रवृ
त्ते पूर्वभागे यत्र स्थानं तत्र मेषावस्थानं॥ तस्मात्तदंतरेण वृषांताहोरात्रवृत्ते यत्स्थानं वृषांतस्थानं अस्मादायनसंधिस्थाने तत्प्रदेशांतरेण मि
थुनांतस्थानं अस्मात्पश्चिमभागे कर्क्यहोरात्रवृत्ते तदंतरेण कर्कांतस्थानं अस्मादपि सिंहांताहोरात्रवृत्ते तदंतरेण सिंहांतस्थानं अस्मादपि तद १३.
तरेण पश्चिमविषुवत्स्थाने कन्यांतस्थाने अस्मादपि पूर्वभागे तुलांताहोरात्रवृत्ते तदंतरेण तुलांतस्थानं अस्मादपि वृश्चिकांताहोरात्रवृत्ते तदं
तरेण वृश्चिकांतस्थाने अस्मादपि तदंतरेणायनसंधिस्थाने धनुरंतस्थाने अस्मात् कुंभाद्यहोरात्रवृत्ते तदंतरेण मकरांतस्थाने अस्मादपि मीना
द्यहोरात्रवृत्ते तदंतरेण कुंभांतस्थाने मीनादिस्थाने च अस्मादपि पूर्वविषुवे मीनांतस्थाने मेषादिस्थाने च तदंतरेणेति व्यक्तं॥ ननु गोले वृत्ते
द्वादशराशीनां सत्त्वदर्शनाच्च कक्षानुपपत्तेरित्यत्रैकवृत्ताभावात् कथं राश्यंकनं॥ राशिविभागानुपपत्तिश्च अंतरालभागस्याकाशात्मकत्वादि
त्यतो वृत्तकथनं तेन पूर्वोक्तं स्वरूपं न स्यात् सूर्यस्तद्वृत्ते भगणभोगं करोतीत्यत आह॥ अयनाद्यनं चैवं कक्षा तिर्यक् तथापरा॥ क्रांतिसंज्ञा तया
र्यः समदा पर्येति भासयन्निति॥ ११॥ अयनस्थानमारभ्य परिवर्तेन तदेतदयनस्थानपर्यंतं चक्राकारं आरंभसमाप्त्योः भिन्नायनस्थानं निरा

353
1912

सार्थकः अपरगोले आधारवृत्तरूपा कक्षा तथा परा स्वक्रमार्गेण एवकारोन्यमार्गव्यवच्छेदकार्थकः॥ तिर्यग्वृत्तानुकारे विलक्षणानुकारा क्रांतिसंज्ञा
क्रमेण क्रांतिः ग्रहगमनभोगज्ञानार्थं वृत्तं तत्संज्ञमुपकल्पितं अयनविषुवद्द्वयसंसक्तं क्रांतिवृत्तं द्वादशराश्यंकितगोले निबंधयेदिति तात्पर्यार्थः
भासयन् भुवनानि प्रकाशयन् सन् समर्थः एतेन चंद्रादीनां निरासः सदा निरंतरं तया क्रांतिसंज्ञया कक्षया पर्येति स्वचारं त्यागच्छन् भगणपरि
पूर्तिभोगं करोति॥ सूर्यगत्यनुरोधेन नियतं क्रांतिवृत्तं कल्पितमिति भावः॥ ॥ ननु चंद्राद्याः क्रांतिवृत्ते कुतो न गच्छंति कुत्र च गच्छंतीत्यत आ
ह॥ चंद्राद्याश्च खकैः पातैरपमंडलमाश्रितैः॥ ततोपकृष्टा दृश्यंते विक्षेपांते तथापक्रमादिति॥ चंद्रादयोर्कव्यतिरिक्ताः ग्रहाः स्वकैः स्वीयैः पातैः
पातास्पदैर्वृत्तैः अपमंडलं क्रांतिवृत्तमाश्रितैः स्वस्वभोगस्थानधिष्ठितैस्ततः क्रांतिवृत्तांतर्गतग्रहभोगस्थानादित्यर्थः॥ दक्षिणतउत्तरतो वा
विक्षेपांते युगणितागतविक्षेपकलाग्रस्थाने पुष्टस्थजनैर्दृश्यंते॥ तथा च क्रांतिवृत्तं यथा विषुवन्मंडले वस्थितं तथा क्रांतिवृत्तेपमस्था
नेतस्ताङ्गतस्थाने चलग्नमुक्तंपरमविक्षेपकलामितत्रिभांतरस्थानादूर्ध्वाधःक्रमेण दक्षिणोत्तरतो लग्नं च वृत्तं विक्षेपवृत्तं चंद्रादिग
त्यनुरोधेन स्वं स्वं भिन्नं कल्पितं तत्र गच्छंतीति भावः॥ १२॥ अथ त्रिप्रश्नाधिकारोक्तलग्नमध्यलग्नयोः स्वरूपमाह॥ उदयक्षितिजे लग्नम
स्तगं चास्तलग्नकं॥ लंकोदयैर्यथासिद्धं खमध्योपरि मध्यममिति॥ उदयक्षितिजे क्षितिजवृत्तस्य पूर्वदिक्प्रदेशे इत्यर्थः॥ लग्नं क्रां
तिवृत्तं यस्मिन् प्रदेशे न प्रवहवायुना संसक्तं तत्प्रदेशो मेषाद्यवधिभोगात्तेनोदयलग्नमुच्यत इत्यर्थः॥ प्रसंगादस्तलग्नस्वरूपमाह॥ अस्त
मिति तद्वत् उदयलग्नानुरोधादस्तं अस्तक्षितिजं क्षितिजवृत्तस्य पश्चिमदिक्प्रदेशे इत्यर्थः॥ क्रांतिवृत्तं गच्छन् यस्मिन् प्रदेशे न प्रवहवायु
ना संलग्नं तत्प्रदेशो मेषाद्यवधिभोगेनास्तलग्नमुच्यत इत्यर्थः॥ तथा च क्षितिजोर्ध्वसराक्रांतिवृत्तस्य द्वावुदयास्तलग्नयोः षड्राश्यंतर
त्वं सिद्धं॥ लंकोदयैः निरक्षदेशीयराश्युदयासुभिः यथा त्रिप्रश्नाधिकारोक्तप्रकारेण यत्तत्स्वाभिमतं सिद्धं निष्पन्नं मध्यमं मध्यलग्नं तत्ख
मध्योपरि खस्य दृश्याकाशविभागस्य मध्यं मध्यगतदक्षिणोत्तरसूत्रवृत्ताकारप्रदेशारूपं तदुपरि मध्यं भास्कराचार्यक्रमितं॥ स्वस्वस्तिकतल्लं
ग्नस्य दृष्टाचित्कले न सदानुस्यन्दः तस्योपरिस्थितं क्रांतिवृत्तं याम्योत्तरवृत्ते यस्मिन् प्रदेशे न लग्नं तत्प्रदेशो मेषाद्यवधिभोगेन मध्यलग्नमुच्य
त इति॥ तात्पर्यार्थः॥ १३॥ अथ त्रिप्रश्नाधिकारोक्तयोः स्वरूपं स्पष्टाधिकारोक्तचरज्यायाः स्वरूपं चाह॥ मध्यक्षितिजयोर्मध्ये या ज्या
सान्त्याभिधीयते॥ ज्ञेया चरदलज्या च विषुवत्क्षितिजांतरमिति॥ ॥ याउत्तरगोले त्रिज्याचरज्यायुतिरूपा दक्षिणगोले चरज्योनत्रि
ज्यारूपा त्रिप्रश्नाधिकारोक्ता अंत्या सा मध्यं याम्योत्तरं तज्जं स्वाभिमतदेशक्षितिजवृत्तं तयोर्मध्ये अंतराले अहोरात्रवृत्तस्यैकदेशप्रदे
शो या ज्या उदयास्तसूत्रयाम्योत्तरसूत्रसंपातादहोरात्रयाम्योत्तरवृत्तसंपातावधिस्तत्ररूपा ज्या सूत्रानुकारा नतु ज्या अहोरात्रक्षितिजवृ
त्तसंपातद्वयबद्धोदयास्तसूत्रस्याहोरात्रवृत्तव्यासस्य सूत्रत्वाभावात्॥ अत एवोत्तरगोले त्रिज्याधिकं संगच्छते॥ अभिधीयते गोल

तैः कथ्यते॥ ननु सोपपत्तीन्यचरज्येवर्द्धिं स्वरूपाय यातसिद्धिरित्यत आह॥ तेषेति॥ विषुवमुन्मंडलं परिधी स्यैतदिति चित्रभाधिकारोक्तेनद्वयोः
नाडयोरेकार्थवाचकत्वानिर्यगाधारवृत्तानुकारं निरिक्षक्षितिजवृत्तं मुन्मंडलं क्षितिजं स्वाभिमतदेशाक्षिजवृत्ते अनयोरंतरं चकारो विशेषार्थ
कः॥ तु कारपरत्वेनांतरं तरालस्थिताहोरात्रवृत्तैकदेशस्याई ज्यारूपं कुसुत्रमंतरविशेषात्मकं तथाच स्वनिरक्षदेशे स्वदेशयोरुदयारतसूत्र
योरंतरमूर्ध्वाधरमिति फलितार्थः॥ चरदलज्यादंतरालस्थिताहोरात्रवृत्तैकदेशरूपचरास्यखंडकस्यनतुदलमर्धज्याचरज्येत्यर्थः॥ गो
लस्तीतवा॥२४॥ ननु पूर्वश्लोकद्वयोक्तं क्षितिजस्याज्ञानादुर्बोधमित्यतः श्लोकार्धेन क्षितिजस्वरूपमाह॥ कृत्वोपरिस्वकं स्थानं मध्ये
क्षितिजमंडलमिति भूगोले स्वकं स्वीयं स्थानं भूप्रदेशैकदेशरूपं उपरि सर्वप्रदेशेभ्य ऊर्ध्वं कृत्वा प्रकल्प्य मध्ये तादृग्भूगोले ऊर्ध्वाधः खं
डसंधौ यद्वृत्तं तत्क्षितिजवृत्तं तदनुरोधेन दृष्टांतगोले क्षितिवृत्तं स्थिरं ससक्तं कार्यमिति भावः॥२५॥ अथैनं दृष्टांतगोलं सिद्धं कृत्वास्य
स्वत एव पश्चिमभ्रमो यथा भवति। तथाप्रकारमाह॥ वस्त्रच्छन्नं बहिश्चापि लोकालोकेन वेष्टितं॥ अमृतस्राव योगेन कालभ्रमणसाधनमि
ति॥ बहिः गोलोपरीत्यर्थः॥ गोलाकारेण वस्त्रेण छन्नं छादितं दृष्टांतगोलं चकाराद्वस्त्रोपरि तत्तद्वृत्तानामंकनकार्यं॥ लोकालोकेन वेष्टितं द्व
भयारत्नपसंधिस्थवृत्तेन क्षितिजाख्येन संसक्तमपि समुच्चये॥ एतेन क्षितिजवस्त्रच्छन्नेन कार्यं किंतु वस्त्रोपरि क्षितिजं गोलसंस
क्तं केनापि प्रकारेण स्थिरं यथा भवति तथा कार्यमिति तात्पर्यार्थः॥ अमृतस्रावयोगेन एतादृशं गोलं कृत्वा जलप्रवाहाधोघातेन काल
भ्रमणसाधनं पष्टिनाक्षत्रघटीभिर्दृष्टांतगोलस्य भ्रमणं यथा भवति तथा साधनं कारणं कार्यं स्वयंवहगोलयंत्रं कार्यमित्यर्थः॥ एतदुक्तं
भवति॥ दृष्टांतगोलं वस्त्राच्छन्नं कृत्वा तदाधारयष्ट्यग्रे दक्षिणोत्तराभिनिक्षिप्तनलिकयोः क्षेप्य यथा यष्ट्यग्रं ध्रुवाभिमुखं स्यात् तथा यष्ट्यग्र
मनुमार्गेण जलप्रवाहेण पूर्वाभिमुखेन तस्याधः पश्चाद्भागे वातापि यथा स्यात्तथा भस्यादर्शनार्थमेव वस्त्रच्छन्नमुक्तं॥ अन्यथा गोलवृत्तांतरव
र्त्मार्गेण जलपातदर्शनभ्रमेण चमत्कारानुत्पत्तेः॥ आकाशाकारता संपादनार्थमेव वस्त्रच्छन्नमुक्तं॥ इदं वस्त्रमार्द्रं यथा न भवति त १४
थिक्कणवस्तुना मदनादिना लिप्तं कार्यं क्षितिजवृत्ताकारेणाधो गोलार्धं यथा स्यात्तथा परिरूपाभित्तिः कार्या परंतु दक्षिणयष्टिभाग
स्तत्र शिथिलो यथा भवति अन्यथा भ्रमणानुपपत्तेः॥ पूर्वं दिक्स्थपरिपार्श्वविभागाद्बहिर्गोलप्रवाहोदृश्यः कार्य इत्यादि स्वबुध्या यत्ने
यमिति॥ २६॥ अथ यदि जलप्रवाहस्तत्र न संभवति तदा कथं स्वयंवहो दृष्टांतगोलो भवतीत्यत तत्स्वयंवहार्थमुक्तं च गोप्यकार्य
मित्याह॥ तुंगबीजसमायुक्तं गोलयंत्रं प्रसाधयेत्॥ गोप्यमेतत्प्रकाशोक्तं सर्वगम्यं भवेदिह॥ ॥ दृष्टांतगोलरूपयंत्रं तुंगबीजस
मायुक्तं तुंगो महादेवस्तस्य बीजं वीर्यं पारद इत्यर्थः॥ तेन योजितं सत्तत्प्रसाधयेत् गणकः। शिल्पज्ञः प्रकर्षेण यथा नक्षत्रषष्टिघटि
भिर्गोलभ्रमस्तथा पारदप्रयोगेण सिद्धं कुर्यादित्यर्थः॥ एतदुक्तं भवति निरुद्धगोलबहिर्भ्रतर्येष्टिभागयोर्यथेच्छया स्थानद्वये स्थानत्रये

355
1918

वा नेमिं परिधिरूपां उत्कीर्य तांताल पत्रादिना चिक्कणवस्तुलेपनाच्छाद्य तत्र छिद्रं कृत्वा तेन मार्गेण पारदोर्धं परिधौ पूर्णो देयस्तदार्ध
परिधौ जलं च देयं ततो मुद्रितछिद्रं कृत्वा यस्याग्रे भित्तिस्थनलिकयोः क्षेप्यं यथा गोलो तत्रिक्षो भवति ततः पारदः जलाकर्षितयष्टिः
स्वयं भ्रमति तदाश्रितो गोलश्च एतत्प्रक्षेप्य वस्त्रच्छन्नमाकाशाकारता संपादनार्थमेव चेत्याक्षिप्यत इति॥ नन्वियं स्वयंवहक्रियातिव्य
क्ता नोक्तेत्यत आह॥ गोप्यमिति॥ एतत्स्वयंवहकारणं गोप्यमप्रकाश्यं कुत इत्यत आह प्रकाशोक्तमिति॥ अतिव्यक्ततयोक्तं स्वयंवहक
रणं रहस्यं लोके सर्वगम्यं सर्वजनगम्यं भवेत्॥ तथाच सर्वज्ञेयं वस्तु निचमत्कारानुत्पत्तेश्च मतऋत्यर्थे सर्वत्र न प्रकाश्यमित्याशय्ये
न तत्करणं व्यक्तं नोक्तमिति भावः॥ २७॥ ननु तेयागोप्यत्वेनोक्तं मया कथमवगंतव्यमाह शौनकश्च कथमवगंतव्यमित्यतः सार्धश्लो
केनाह॥ तस्माद्गुरूपदेशेन रचयेद्गोलमुत्तमं॥ युगे युगे समुच्छिन्नारचनेयं विवस्वतः॥ २८॥ प्रसादात्कस्यचिद्भूयः प्रादुर्भवति काम
तः इति॥ तस्मात्स्वयंवहकरणस्य गोप्यत्वात् गुरूपदेशेन परंपराप्राप्तगुरोर्निर्व्याजकथनेन गोलं दृष्टांतगोलं उत्तमं स्वयंवहात्मकं गणकः कुर्यात्
तथाच मयानुभ्यमुक्तग्रंथे गोप्यत्वेनातिव्यक्तानोक्तेति भावः॥ अतः कथं ज्ञेयमिदं मित्यत आह॥ युगे इत्यादि विवस्वतः सूर्यमंडलाधिष्ठातुः
जीवविशेषस्य इयं स्वयंरूपरचनाक्रिया युगे युगे बहुकाले इत्यर्थः॥ समुच्छिन्ना लोके तु स्वाकस्यचिद्धार्मिकस्य प्रसादनुग्रहात्भूयः वारंवा
रं इच्छया प्रादुर्भवति व्यक्ता भवतीत्यर्थः॥ तथाच यथामत तत्त्वयावगतं तथान्यस्मात् गमादृशा रन्यैरवगंतव्यं॥ कालस्य निरवधित्वात्॥ स्व
च्छंदत्वाच्चेति भावः॥ अथोक्तस्वयंवहक्रिया शीला स्वयंवहगोलातिरिक्तान्यपि स्वयंवहयंत्राणि कालज्ञानार्थं साध्यानि तत्साधनं रहसि
कार्यमिति चाह॥ कालस्य साधनार्थाय तत्तद्यंत्राणि साधयेत्॥ एकाकी योजयेद्बीजं यंत्रे विस्मयकारिणीति॥ ॥ तथा यथा स्वयंवहगोल
यंत्रं साधितं तद्वदित्यर्थः॥ कालस्य साधनार्थाय कालस्य दिनक्षादेः सूक्ष्मज्ञाननिमित्तं यंत्राणि स्वयंगोलातिरिक्तानि स्वयंवहयंत्राणि
साधयेत् गणकः॥ शिल्पादिस्वकौशल्येन कारयेत्॥ यंत्रे कालसाधके विस्मयकारिणि स्वयंवहरूपतया लोकानामुत्पन्नाश्चर्यस्य का
रिणि भवते बीजं स्वयंवहता संपादकं कारणं एकाकी एकव्यक्तिको द्वितीयः सन योजयेत्॥ शिल्पज्ञतया स्वयमेव निष्पादयेदित्यर्थः॥
अन्यथा हि द्वितीयस्य तज्ज्ञानेन तन्मुख्यत्वच्छन्नहार्दस्य लोकचपणं गोचरतापांकदाचित्संभाविता यां विस्मयानुपपत्तेः॥ २९॥ अथ यो
स्वयंवहयंत्राणां दुर्घटत्वात् नांकादियंत्रैः कालज्ञानं ज्ञेयमित्यत आह॥ ॥ शंकुयष्टिधनुश्चक्रैश्छायायंत्रैरनेकधा॥ गुरूपदेशाद्वि
ज्ञेयं कालज्ञानमतंद्रितैः॥ ॥ छायासाधकयंत्रैः अनेकधा नानाविधगणितप्रकारैः स्वगुरूपदेशात् स्वाध्यापकस्य निर्व्याजक
थनात्॥ अतंद्रितैः अश्रमैः पुरुषैः कालज्ञानं॥ दिनगतादिज्ञानं विज्ञेयं सूक्ष्मत्वेनावगम्यं॥ एतत्सर्वं सिद्धांतशिरोमणौ भास्कराचार्यैः

स्पष्टीकृतं॥ तथा शंकुस्वरूपं समतलमस्तकपरिधिर्भ्रमसिद्धो दंतिदंतजः शंकुः॥ तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानामिति यष्टियंत्रं च॥ त्रिज्या-
विष्कंभार्धवृत्तं कृत्वा दिग्चिह्नितं तत्र॥ दत्वाग्रां प्राक्पश्चात् दृग्ज्यांतरं तत्र मध्ये॥ मेते दिग्भौमरूपां दंपष्टिर्नेष्टघुतिस्तलः केंद्रे॥ त्रिज्यांगुलानि धेया
यष्ट्यग्रात् ग्रांतरं यावत्॥ तावत्यामौर्व्यां यत् द्वितीयवृत्ते धनुर्भवेत्तत्र॥ दिनगतशेषा नाड्यः प्राक्पश्चात्स्युः क्रमेण वमिति॥ चक्रयंत्रं तु चक्रं चक्रांशांकि-
तंपरिधौ भ्रमद्यष्टिकं तत्र धारं धात्री त्रिभभाधारा कृत्वा भार्धं पर वा र्धं च॥ तन्मध्ये सूक्ष्माक्षस्थिरं कृत्वा अभिमुखवने मिकं धार्यं॥ भूमेरुन्नतभागा-
ल्लवास्तच्छाययाभुक्ताः॥ तत्र वा र्धं तथ्यनतांशमनतलवसंगुणं धुरलं॥ धुरलोन्नतांशभक्तं नाड्यः स्फुटाः परैः प्रोक्ता इति॥ धनुर्यंत्रं तु दलीकृतं
चक्रमुक्तं तच्चापमिति॥ अत्र ग्रंथविस्तरभयात्तेषां निरूपणं विस्तारेण गणितादि विचारश्चोपेक्षित इति मंतव्यं॥ २०॥ अथ घटीयंत्रादि भिन्नमतं
कालिदियंत्रैर्वा सर्वोपजीव्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति॥ तोययंत्रं कपालाख्यं जलयंत्रं वक्ष्यमाणं तदाद्यं प्रथमं येषां तैर्यंत्रैर्वा-
लुकायंत्रप्रभृतिभिः सापेक्षघटीयंत्रैः मयूरनरवाहनैः मयूराख्यं स्वयंवहयंत्रं निरपेक्षं नरयंत्रं शंक्वाख्यं छायायंत्रं पूर्वोदितं वानरयंत्रं स्वयंव-
हं निरपेक्षं एतैः ससूत्ररेणुगर्भैः सूत्रसहितो रेणुर्वा धूलयो गर्भे मध्ये येषां तैः सूत्रप्रोताः पारदसंख्याकाः मृद्विरचिता मयूरोदरस्था मुखात् घटिकां-
तरेण स्रवंत एव निःसरंतीति लोके प्रसिद्धा नरो॥ यंत्रैरित्यर्थः॥ तोययंत्रैः कपालाद्यैर्मयूरनरवानरैः ससूत्ररेणुगर्भैश्च सम्यक्कालं प्रसाधयेत्
यद्वा सत्रकारेण रेणवः सिकताः गर्भे उदरे यस्यैतादृशं यंत्रं वालुकायंत्रं प्रसिद्धं तेन सहितैर्मयूरादियंत्रैर्मयूरघुत्त यंत्रैर्वालुकायंत्रेण वेति
सिद्धोर्थः॥ चकारस्तोययंत्रकपालादेरिस्वनेन समुच्चयार्थः ज्ञानीपादिस्वर्थः॥ २१॥ ननु मयूरादि स्वयंवहयंत्राणि कथं साध्यानीत्यतस्तत्साध-
नप्रकारा बहवो दुर्गमाश्च संतीत्याह॥ पारदाराम्बुसूत्राणि शुल्वतैलजलानि च॥ बीजानि पांसवस्तेषां प्रयोगास्तेपि दुर्लभा इति॥ तेषु मयूरा-
दिस्वयंवहार्थं एतत्प्रयोगाः प्रकर्षेण योज्याः प्रकर्षत्तया बदभिमतसिद्धिः॥ एतेके दृश्यत आह पारदाराम्बुसूत्राणीति। पारदयुक्ताः आराः यथा-
चक्रसिद्धं ततशिरोमणौ लघुकाष्ठजं समचक्रं समभागाः सूत्राणि सूत्रसाधनप्रयोगः शुल्वं ताम्रं तेन पुष्पं तैलजलानीति तैलयुक्तजलस्य प्रयोगः चक्रा- १५
कृपिशः समानरानेम्यां॥ किंचिदक्रा योज्याः सुषिरस्याईपृथक्कृतासां रसपूर्णेन चक्रं धृताधारास्तत्स्थितं स्वयं भ्रमतीति॥ अंबुजः जलस्य प्रयोगः प्र-
रातनयोपत्रकप्रयोगो पितथा यस्य सिद्धांतशिरोमणौ॥ उक्तोपि यं नेमिमथवा परितो मदनेन संलग्नं॥ तदुपरि तालदलाद्यं कृत्वा सुषिरं रसंक्षीरेण तावत्
तया वहसेक पार्श्वं क्षिप्त जलं नान्यतो यानि पिहितं तच्छिद्रं तदुत्तप्त चक्रं भ्रमति स्वयं जलाकृष्टं ताम्रमयस्याकुटिलरूपनलस्य अंबुपूर्णस्यैकं कुंड-
मनंतद्वितीयमग्रं तदोमुखं च बहिः युगपन्मुक्तं चेतक नलेन कुंडात् बहिः पतति नेम्यां बध्वा घटिका चक्रं जलयंत्रवत्तथा धार्यं। जलकृत्स्नयु-
तत्कलं पतति यथा नल घटीमध्ये भ्रमति तत्तत्तिलं पूर्ण घटीभिः समाकृष्टं॥ चक्रच्युतं स्वयमुदकं कुंडं याति प्रणालिकयेति॥ बीजानि केपलं
तुंगबीजप्रयोगः पांसवः धूलिप्रयोगाः तेउक्ताः प्रयोगाः अपिशब्दात् प्रयोगेषु सुगमतरा इत्यर्थः॥ दुर्लभाः साधारणत्वेन मनुष्यैः कर्तुमश-

359
1918

क्या इत्यर्थः॥ अन्यथा प्रतिक्षणं स्वयंवहानां प्राचुर्यापत्तेः॥ इयं स्वयंवहविद्या समुद्रांतर्निवासिजनैः फिरंग्याख्यैः सम्यगभ्यस्तेति॥ कुहकविद्या-
त्वात् विस्तरानुपयोग इति संक्षेपः॥ २२॥ अथ कपालाख्यं जलयंत्रमाह॥ ताम्रपात्रमधश्छिद्रं न्यस्तं कुंभेमलांभसि॥ षष्टिमज्जत्यहोरात्रे स्फु-
टं यंत्रं कपालकमिति॥ यत्ताम्रघटितं पात्रमधश्छिद्रं अधोभागे छिद्रं यस्य न तु अमलांभसि निर्मलं जलं विद्यते यस्मिन्तादृशे कुंडे [illegible]
न्यस्तं धारितं सत् अहोरात्रे नाक्षत्राहोरात्रे षष्टिः षष्टिवारमेव न न्यूनाधिकं मज्जति अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं
भवति तत्कपालकं कपालमेव कपालकं घटखंडानां कपालपदवाच्यत्वात् घटाधस्तनार्धाकारं यंत्रं घटीयंत्रं स्फुटं सूक्ष्मं तत् घटनं तु शुल्व-
स्यादिभिः पलैः विहितं षडंगुलोच्चं द्विगुणायतास्यं तदंभसा षष्टिपलैः प्रपूर्यं पात्रं घटार्धं प्रतिमं घटी स्यात्॥ सत्र्यंशमाषत्रयनिर्मिता या हेम्नः श-
लाका चतुरंगुला स्यात्॥ विद्धं तया प्राकृतनत्र पात्रं प्रपूर्यते नाडिकया बुधैस्तद्धि इति व्यक्तं भगवता तु सूक्ष्ममुक्तं॥ २३॥ अथ शंकुयंत्रं दिवैव का-
लज्ञानार्थं नान्यदित्याह॥ नरयंत्रं तथा साधु दिवा वा विमले रवौ॥ छायासंसाधनैः प्रोक्तं कालसाधनमुत्तममिति॥ विमले मेघादिव्यवधानरूपमले-
न रहिते सूर्ये एतद्रूपे दिने च कार एवकारार्थस्तेन सा अदिनव्यवच्छेदः नरयंत्रं द्वादशांगुलशंकुयंत्रं॥ तथा घटीयंत्रवत् कालसाधकं साधु सू-
क्ष्मं अभ्योनेत्यर्थसिद्धं॥ ननु शंकोः छायासाधकं च कालसाधकत्वं तेन तस्य कथं यंत्रत्वं कालसाधकत्वं तो यंत्रत्वप्रतिपादनादित्यत आह॥ छा-
यासंसाधनैरिति इदं शंकुरूपनरयंत्रं छायायाः सम्यक् सूक्ष्मत्वेन साधनैः अपगमैः कृत्वा कालसाधनं धिनगतादिकालस्य कारणं उत्तमं॥ अ-
न्ययंत्रेभ्यः स्तानिरंतरस्तयाविश्लेष्यांत तथा च छायासाधकत्वेनैव छायाद्वारा शंकोः कालसाधकत्वमिति॥ न यंत्रत्वाघातः अत एव साभ्रदि-
ने रात्रौ च उपयुक्तः नरस्य छायायंत्रोपलक्षणत्वात् यष्टिधनुश्चक्राण्यपि तथेति ध्येयं॥ अथादित एतदंतग्रंथतात्पर्यं फलकथनेन विभक्ताम-
पि स्वं उद्धत्य कौडयति। ग्रहनक्षत्रचरितं ज्ञात्वा गोलं च तत्त्वतः॥ ग्रहलोकमवाप्नोति पर्यायेणात्मवान्नर इति॥ ग्रहनक्षत्राणां चरितं गणितवि-
षयकं ज्ञात्वा ग्रंथपूर्वखंडरूपं गोलं भगोलखगोलस्वरूपप्रतिपादकं ग्रंथं ग्रहोत्तरार्धांतर्गतं च कारः समुच्चये तत्त्वतः यस्मात्स्थितिसद्भावेन सार्व-
विभक्तिकस्तसिल् स्ते ज्ञात्वा अवगम्य नरः पुरुषः ग्रहलोकं चंद्रादिग्रहाणां लोकं तत्तल्लोकाधिष्ठितस्थानमपिध्येयं प्राप्नोति॥ ननु ग्रहलोकप्रा-
प्त्या कः पुरुषार्थः इत्यर्थं तो मोक्षरूपपुरुषार्थफलमाह॥ पर्यायेणेति॥ जन्मांतरेण पुरुषः आत्मवान् आत्मज्ञानी भवति॥ तथा चात्मज्ञानान्मो-
क्षप्राप्तिरेवेति भावः॥ २५॥ अथास्मिन्ग्रंथस्य संगतिपरिहाराय स्वाध्यायसमाप्तिं फक्किकयाह॥ इति ज्योतिषोपनिषदध्याय इति॥
यथा वेदे आत्मस्वरूपादिनिरूपणं नारायणोपनिषदुच्यते॥ तथा ज्योतिःशास्त्रप्रतिपादितानां ग्रहनक्षत्राणामेतदंतग्रंथैकदेशो स्वरूपादिनि-
रूपणं ज्योतिःशास्त्रसारं ज्योतिषोपनिषदुच्यते॥ तत्संज्ञोध्यायो ग्रंथैकदेशः संपूर्ण इत्यर्थः॥ ॥रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे॥

ज्योतिषोपनिषत्संज्ञोध्यायः पूर्णो पदार्थके ॥२८॥ ॥इति सकलगणकसार्वभौमबल्लाळदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रका
शके उत्तरखंडे ज्योतिषोपनिषदध्यायः पूर्णः ॥ ३ ॥ ॥अथ मानानि कति किं च तैरेव विशिष्टप्रश्नस्योत्तरभूत आरब्धमानाध्यायो व्याख्यायते॥
तत्र प्रथमं मानानि कतीति प्रथमप्रश्नस्योत्तरमाह ॥ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा॥ सौरं च सावनं चांद्रमार्क्षं मानानि वै नवेति॥ वैनि
श्चयेन नव संख्याकानि कालमानानि॥ तत्र प्रथमं ब्राह्ममानं॥ कल्पो ब्राह्ममहः॥ प्रोक्तमित्यादि परमायुः कालं तस्य तयाहोरात्रसंख्यये त्यंतम
ध्यमाधिकारे प्रतिपादितं हि द्वितीयं दिव्यं देवमानं दिव्यं तदहरुच्यते इत्यादि तत्षष्टिः षड्गुणा दिव्यं वर्षमित्यं तं तत्रैव प्रतिपादितं तथा तृतीयमाने
पित्र्यं पितॄणां मानं वक्ष्यमाणं प्राजापत्यं मानं च वक्ष्यमाणं चतुर्थं॥ बृहस्पतेस्तथा मानं वक्ष्यमाणं पंचमं सौरं च कारात्षष्ठं मानं सावनं सप्तमं मा
नं चांद्रं मानमष्टमं नाक्षत्रं मानं नवमं एतान्यपि तत्रैवोक्तानि॥ अथ किं च तैरिति द्वितीयप्रश्नस्योत्तरं विवक्षुः प्रथमं व्यवहारोपयुक्तमानानि द
र्शयति॥ ॥चतुर्भिर्व्यवहारोऽत्र सौरचांद्रर्क्षसावनैः॥ बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यश इति॥ अत्र मनुष्यलोके सौरचांद्रनाक्ष
त्रसावनैश्चतुर्भिर्मानैर्व्यवहारः कर्मघटना॥ षष्ट्यब्दं प्रभवादिषष्टिवर्षात्मकमभिप्रायेणैकवचनं॥ बार्हस्पत्येन बृहस्पतिमानेन बृहस्पति
मध्यमराशिभोगात्मककालेन प्रत्येकं ज्ञेयं॥ अन्यैरवशिष्टैः ब्राह्मदिव्यपित्र्यप्राजापत्यैः नित्यशः सदेत्यर्थः व्यवहारो नास्ति तु कारात्
कदाचित्त्वेनैते व्यवहारः॥ २॥ अथ सौरेण व्यवहारं प्रदर्शयति॥ सौरेण द्युनिशोर्मानं षडशीतिमुखानि च अयनं विषुवं चैव संक्रांतेः पुण्य
कालतेति॥ अहोरात्रयोर्मानं सौरेण ज्ञेयं॥ प्रात्यहिकसूर्यगतिभोगादहोरात्रं भवतीत्यर्थः॥ षडशीतिमुखानि वक्ष्यमाणानि॥ समुच्चये॥ तेन
सौरमानानि ज्ञेयानि॥ अयनं विषुवत्॥ च समुच्चये॥ संक्रांतेः पुण्यकालताः सूर्यबिंबकलासंबद्धा सौरमानेन॥ ३॥ अथ षडशीतिमुखमा
ह॥ तुलादिषडशीत्यंशाः षडशीतिमुखं क्रमात्। तच्चतुष्टयमेव स्यात् द्विस्वभावेषु राशिषु तुलारंभात् षडशीतिदिवसानां सौराणां षडशीतिमु
खं भवति॥ तच्चतुष्टयं षडशीतिमुखस्य चतुःसंख्याद्विस्वभावेषु राशिषु चतुर्षु क्रमात् एवं वक्ष्यमाणं भवति॥ ४॥ तदेवाह॥ षड्विं
शे धनुषो भागे द्वाविंशे निमिषस्य च॥ मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे इति॥ धनूराशेः षड्विंशतिमेंऽशे षडशीतिमुखं मीनरा
शेर्द्वाविंशतिमेंऽशे षडशीतिमुखं चकारः समुच्चयार्थकः प्रत्येकमन्वेति भिन्नेति मिथुनराशेरष्टादशेंऽशे षडशीतिमुखं कन्यायाश्चतुर्द
शे भागे षडशीतिमुखं अत एव तुलादितः षडशीत्यंशगणनया येराशिषु भवति ते राशयो द्विस्वभावाः षडशीतिमुखसंज्ञाः संक्रांतिप्रकरणे सं
हितिकेरुक्ताः॥५॥ अथ षडशीत्येषगणनया चत्वारि षडशीतिमुखानि उक्ता भगणांशा द्वस्त्यर्थं अवशिष्टांशाः षोडशादि पुण्या इत्याह॥ त
तः शेषाणि कन्याया न्यहानि तु षोडश॥ क्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षयमिति॥ ततः कन्यादिचतुर्दशभागानंतरं शेषाणि

भगणभागे वशिष्टानि कन्यायाः उयानि अहानि सौरभागसमानि षोडशानानि तु कारात्पूर्वदिनसमानि क्रतुभिर्यज्ञैः समानि अति पुण्यानीत्य
र्थः॥ तत्र पितॄणां दत्तं श्राद्धादिकृतं अक्षय्यमनंतफलदं भवति॥ ६॥ अथ राश्यधिष्ठितसंक्रांतिवृत्ते चत्वारि स्थानानि पदसंधिस्थाने विषुवा
यनाभ्यां प्रसिद्धानीत्याह॥ भचक्रनाभौ विषुवद्वितयं समसूत्रगं॥ अयनद्वितयं चैव चतस्रः प्रथितास्तु ता इति॥ भचक्रनाभौ भगोलस्य ध्रुव
द्वयाभ्यां तुल्यांतरेण मध्यभागे विषुवद्वितयं विषुवद्द्वयं समसूत्रगं परस्परं व्याससूत्रांतरितं॥ ध्रुवमध्ये विषुवद्द्वस्थानात् तद्वृत्ते क्रांति
वृत्तभागे यौ लग्नौ तौ क्रमेण पूर्वापरौ विषुवसंज्ञौ मेषतुलाख्यौ चेत्यर्थः॥ अथ तद्वितयं अयनद्वयं कर्कमकरादिरूपं च समुच्चये तेन समसूत्र
गताः विषुवायनस्थाः क्रांतिवृत्तप्रदेशरूपाः भ्रमयः चतस्रः चतुःसंख्याकाः प्रथिताः गणितादौ पदादित्वेन प्रसिद्धाः॥ एवकारादन्यराशीनां
निरासः॥ तु कारात्तासां समसूत्रस्थत्वेपि विषुवायनत्वाभावात्पदादित्वेना प्रसिद्धिरित्यर्थः॥ ७॥ अथावशिष्टराशीनामादिस्वरूपमन्य
दप्याह॥ तदंतरेषु संक्रांतिद्वितयं द्वितयं पुनः॥ नैरंतर्यात्तु संक्रांतेर्ज्ञेयं विष्णुपदद्वयमिति॥ तदंतरेषु विषुवायनांतरालेषु अंत्रांत
रालानां चतुःस्थानसद्भावात् बहुवचनं संक्रांतिद्वितयं द्वितयं पुनः राश्यादिभागे ग्रहाणामाक्रमणं वा रद्वयं भवति॥ तदंतराले राश्यादिभागौ
द्वौ भवत इत्यर्थः॥ यथा हि मेषाख्यविषुवत्कर्काख्यायनयोरंतराले वृषमिथुनयो राशी॥ कर्कतुलयोरंतराले सिंहकन्ययो राशी॥ तुलामक
रयोरंतराले वृश्चिकधनुषो राशी मकरमेषयोरंतराले कुंभमीनयो राशी इति॥ एवं विषुवानंतरं संक्रमणद्वयमनंतरं मयनमयतेरं संक्रांतिद्वयं
तदनंतरं विषुवमनंतरं संक्रांतिद्वयमनंतरमयनं इत्यादि पौनः पुन्येन ज्ञेयमित्यर्थः॥ संक्रांतिद्वयमध्ये प्रथमसंक्रांतौ विशेषमाह॥ नैरंतर्या
दिति निरंतरतया संभूतायाः संक्रांतेः सकाशात् विष्णुपदीद्वयं तदंतराले इति त्वर्थः॥ अवगम्यं प्रथमसंक्रांति विष्णुपदसंज्ञानयोर्द्वयंतरभे
तरं प्रत्येकं भवतीति तात्पर्यार्थः॥ षडशीतिसंज्ञं द्वितीयसंक्रमणं पूर्वं सूचितं तयोरपि द्वयं तदंतराले भवतीति ध्येयं॥ ८॥ ॥अथा
यनद्वयमाह॥ भानोर्मकरसंक्रांतेः षण्मासा उत्तरायणं॥ कर्कादेस्तु तथैव स्यात्षण्मासा दक्षिणायनमिति॥ सूर्यस्य मकरसंक्रांतेः सकाशा
त् षट् सौरमासा उत्तरायणं भवति॥ कर्कादेः कर्कसंक्रांतेः सकाशात् तथा सूर्यभोगात् एवकारादन्यग्रहानरासः षण्मासाः तु कारात्सौराः
दक्षिणायनं भवति॥ ९॥ अथर्तुमासवर्षाण्याह॥ द्विराशिनाथा ऋतवस्ततोपि शिशिरादयः॥ मेषादयो द्वादशैते मासास्तैरेव वत्सर इ
ति॥ ततो मकरसंक्रांतेः सकाशात् पित्राब्दः उत्तरायणावधिना समुच्चयार्थकः॥ द्विराशिनाथाः राशिद्वयनामिकाः राशिद्वयार्कभोगात्म
का इत्यर्थः॥ शिशिरादयः शिशिरवसंतग्रीष्मवर्षाशरद्धेमंताः ऋतवः कालविभागविशेषाः भवंति॥ एते सूर्यभोगविषयकाः मेषादयो
राशयो द्वादश मासाः तैर्द्वादशभिर्मासैः एवकारान्न्यूनाधिकव्यवच्छेदः वत्सरः सौरं वर्षं भवति॥ १०॥ अथ संक्रांतौ पुण्यकालानयनमाह॥

35
1418

मु० प्र०
२८

अर्द्धमानकलाः षष्ट्यागुणिताः षष्टिभाजिताः॥ तदर्धं नाड्यः संक्रांतेरर्वाक् पुण्यं तथापरमिति॥ सूर्यस्य बिंबप्रमाणकलाः षष्ट्यागुणिताः सूर्यगत्याभक्ताः तस्य फलस्याऽर्धं तत्संख्याकाः घटिकाः इत्यर्थः॥ संक्रांतेः सूर्यराशिप्रवेशकालादित्यर्थः॥ अर्वाक् पूर्वं पुण्यं स्नानादिधर्मकृत्ये पूर्वघटिकाः पुण्यर्द्धिकारकाः॥ अपरे क्रांत्युत्तरकाले तथा स्नानादिधर्मकृत्ये पूर्वं छ्युपपत्तिः॥ सूर्यबिंबकेंद्रस्य राश्यादौ संचरणकालः संक्रमणकाले तस्य सूक्ष्मत्वेन दुर्ज्ञेयत्वात्॥ स्थूलं कालः कोप्यभ्युपेयः॥ स तु राश्यादौ बिंबसंचरणरूपांगीकृत्ता बिंबसंबद्धात्॥ अतः सूर्यगत्या षष्टिसावनघटिकास्तदा सूर्यबिंबकलाभिः काइत्यनुपाताद्नीताः बिंबघटिकाः संक्रांतिकालः स्थूलः प्रोक्तो मिसंधरणकालात्पश्चिमनेमिसंचरणकालपर्यंतं तदर्धघटिकाः प्यासार्धघटिका इति संक्रांतिकाला ताभिः पूर्वमपरत्र काले प्रागपरनेम्योः क्रमेण संचरणात् पूर्वोत्तरकाले स्युरिति॥ ११॥ अथ सौरकालमुक्त्वा क्रमप्राप्तं चांद्रमानमाह॥ अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी॥ तच्चांद्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिरिति॥ ॥ सूर्यात्समागमं स्पृष्ट्वा विनिर्गतः पृथग्भूतः सन् चंद्रः अहरहः प्रतिदिनं यत्सत्संख्यामितं प्राचीं पूर्वदिशं गच्छति तत्तस्माद् दिने चांद्रमानं तत्तु गत्यंतरांशमितं॥ १२॥ ननु सौरदिनं सूर्यांशेन यथा भवति तथाप्येतद् पैर्भागैः कियद्भिः पूर्णं चांद्रदिनं भवतीत्यत आह॥ अंशैरिति॥ भागैः तु कारात् सूर्यचंद्रांतरोत्पन्नैः तस्य तद्रूपत्वात्॥ द्वादशसंख्याकैस्तिथिर्ज्ञेया एकं चांद्रदिनं भवति एतदुक्तं भवति॥ सूर्यचंद्रयोगात् चांद्रदिनप्रवृत्तेः पुनर्योगे मासस्समाप्तिर्भगणांतरेण चांद्रो मासस्त्रिंशच्चांद्रदिनात्मकः॥ अतस्त्रिंशद्विभैर्भगणांशात् तरं तदेकेन किमिति द्वादशभागैरेकं चांद्रदिनं॥ दर्शः सूर्येंदुसंगम इत्यभिधानात् दर्शावधिकमासस्य त्रिंशत्तिथ्यात्मकत्वात्तिथिचांद्रदिनरूपेति॥ १२॥ अथ चांद्रव्यवहारमाह॥ तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा॥ व्रतोपवासयात्राणां क्रिया चांद्रेण गृह्यत इति॥ तिथिः प्रतिपदाद्या करणं बवादिकं॥ उद्वाहो विवाहः क्षौरं चौलकर्म एतदाद्याः सर्वक्रियाः व्रतबंधाद्युत्सवरूपाः व्रतोपवासयंत्राणां नियमोपवासगमनानां क्रियाकरणं तथा समुच्चयार्थकः॥ चांद्रमानेन गृह्यते अंगीक्रियते॥ १३॥ अथ चांद्रमासे प्रसंगात् पित्र्यमानं चाह॥ त्रिंशता तिथिभिर्मासश्चांद्रः पित्र्यमहस्मृतं॥ निशा च मासपक्षांतौ तत्र योर्मध्ये विभागत इति॥ त्रिंशता तिथिभिः त्रिंशन्मितैस्तिथिभिश्चांद्रो मासः पित्र्यं पितृसंबंधि अहो दिनं निशा रात्रिः पितृसंबद्धश्चकारः व्यवस्थार्थकः॥ तेनोभयं नैकग्रस्थं किंतु मिलितं स्मृतमिति॥ लिंगानुरोधेनोभयत्रान्वेति॥ तथा च चांद्रो मासः पित्र्याहोरात्रमित्यर्थः॥ फलितं तु मासपक्षांतौ मासांतो दर्शांतः पक्षांतः पूर्णिमांतः एताविति अर्थः विभागतः क्रमेणेत्यर्थः अर्थात् कृष्णाष्टम्यर्धे दिनप्रारंभः शुक्लाष्टम्यर्धे दिनांत इति सिद्धं॥ १४॥ २८
अथ क्रमप्राप्तं नाक्षत्रमाने प्रसंगान्मासंसंज्ञां चाह॥ भचक्रभ्रमणं नित्यं नाक्षत्रदिनमुच्यते॥ नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वांतयोगत

इति॥ नित्यं प्रत्यहं भचक्रभ्रमणं नक्षत्रसमूहवायुकृतं पश्चिमभ्रमः नाक्षत्रं नक्षत्रसंबंधि दिनं मानज्ञैः कथ्यते॥ नित्यमित्यनेन चंद्रभोगनक्षत्रभोगो नाक्षत्रं दिनमित्यस्य निरासः भचक्रभ्रमणानुपपत्तेः मासस्संज्ञामाह॥ नक्षत्रनाम्नेति पर्वांतयोगतः पर्वांतः पूर्णिमांतः तस्य योगो तत्संबंधात् नक्षत्रसंज्ञया मासाः तु कारात् चांद्राः अवगम्याः पूर्णिमांतस्थितचंद्रनक्षत्रसंज्ञो मासो ज्ञेय इति तात्पर्यार्थः॥ यथा हि यद् दर्शांतावधिकश्चांद्रो मासस्तदग्रं तदवस्थितपूर्णिमांतस्थितचंद्रनक्षत्रसंज्ञः चित्रासंबंधाच्चैत्रः विशाखासंबंधाद्वैशाखः ज्येष्ठासंबंधाज्ज्येष्ठः॥ आषाढसंबंधादाषाढः॥ श्रवणात् श्रावणः भाद्रपदासंबंधाद्भाद्रपदः अश्विनीसंबंधादाश्विनः कृत्तिकासंबंधात् कार्तिकः मृगशीर्षसंबंधान्मार्गशीर्षः पुष्यसंबंधात्पौषः मघासंबंधान्माघः फाल्गुनीसंबंधात् फाल्गुन इति॥ १५॥ ननु पूर्णिमांते तन्नक्षत्राभावे कथं तत्संज्ञा मासानामुचितेत्यत आह॥ कार्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयं॥ अंत्योपांत्योपंचमश्च त्रिभमासत्रयं स्मृतमिति॥ नक्षत्रसंयोगार्थमिति॥ निमित्तसप्तमी॥ कार्तिक्याः कार्तिकमासादीनां पूर्णमासीषु इत्यर्थः॥ कृत्तिकादि द्वयं द्वयं नक्षत्रं कथितं कृत्तिकारोहिणीभ्यां कार्तिकः॥ मृगार्द्राभ्यां मार्गशीर्षः॥ पुनर्वसुपुष्याभ्यां पौषः॥ आश्लेषामघाभ्यां माघः॥ चित्रास्वातीभ्यां चैत्रः॥ विशाखानुराधाभ्यां वैशाखः॥ ज्येष्ठामूलाभ्यां ज्येष्ठः॥ पूर्वोत्तराषाढाभ्यां आषाढः॥ श्रवणधनिष्ठाभ्यां श्रावण इति फलितं॥ अवशिष्टमासानामाह॥ अंत्योपांत्यावितिः॥ अत्र कार्तिकस्यादित्वेन ग्रहाद् अंत्यः आश्विनः उपांत्यो भाद्रपदः एतौ मरसौ पंचमः फाल्गुनः चकारात् समुच्चय इति मासत्रयं त्रिधा स्थानत्रये उक्ते रेवत्यश्विनी भरणीति नक्षत्रत्रयसंबंधादाश्विनः॥ शततारका पूर्वोत्तराभाद्रपदेति नक्षत्रत्रयसंबंधाद्भाद्रपदः॥ पूर्वोत्तराफाल्गुनी हस्तेति नक्षत्रत्रयसंबंधात् फाल्गुन इति सिद्धं॥ १६॥ अथ प्रसंगात् कार्तिकादिषु बृहस्पतिवर्षाण्याह॥ वैशाखादिषु कृष्णे च योगः पंचदशे तिथौ॥ कार्तिकादीनि वर्षाणि गुरोरस्तोदयात्तथेति॥ ॥ यथा पौर्णमास्यां नक्षत्रसंबंधेन तत्संज्ञो मासो भवति॥ तथेति समुच्चयार्थकं॥ बृहस्पतेः सूर्यसान्निध्यद् अस्ताभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशमासेषु कृष्णपक्षे पंचदशे तिथौ अमायामित्यर्थः॥ चकारः पौर्णमासीसंबंधात्समुच्चयार्थकः॥ योगः दिननक्षत्रसंबंधः कार्तिकादीनि द्वादश वर्षाणि भवंति॥ वैशाखकृष्णपक्षपंचदश्यामाश्रुपायां बृहस्पतेरस्तउदयवा तानेस्ततित्तदादि बृहस्पतिवर्षं कृत्तिकादिननक्षत्रसंबंधात् कार्तिकसंज्ञं॥ एवं ज्येष्ठाषाढश्रावणभाद्रपदाश्विनकार्तिकमार्गशीर्षपौषमाघफाल्गुनचैत्रामासः मृगपुष्यमघापूर्वाफा० चित्राविशाखाज्येष्ठापूषाश्रवणपूभाश्विनीदिननक्षत्रसंबंधान्मार्गशीर्षादीनि भवंति॥ अत्रापि प्रोक्तनक्षत्रद्वयत्रसंविधः प्रागुक्तो बोध्यः॥ अनेनत्युपलक्षणं॥ तेन यद्दिने बृहस्पतेरुदयोस्तो वा तद्दिने यच्चंद्राधिष्ठितनक्षत्रं तत्संज्ञं बार्हस्पत्यं वर्षं भवतीति तात्पर्यं॥ संहिताग्रंथे स्तोदयवशाद्वर्षोक्तिः॥ परमिदानीमुदयवर्षव्यवहारो

361
1918

ग्र· प्र· मणके गण्यते ये नोदितेऽज्ञास्यन्युक्तेरिति॥१७॥अथ क्रमप्राप्तं सावनमाह॥उदयादुदयं भानोः सावनं तत्प्रकीर्तितं॥सावनानि स्युरेतेन यज्ञकालवि
धिस्तैरितिः॥सूर्यस्योदयात् उदयकालमारभ्याव्यवहितोदयकालपर्यंतं यः कालः तन्मिते न तु सावनं मानं तैरुक्तं एतेनोदयद्वयांतरात्मकं कालं
१८ स्यगणनया सावनानि वसस्त्र्याद्यादिरूपेत्यादौ निमध्यमाधिकारोक्तानि भवंति॥तद्व्यवहारमाह॥यज्ञकालविधिरिति॥यज्ञस्थयः॥कालस्त
स्यगणनातैः सावनैः तुकारोऽन्यमानानिरासार्थ एवकारपरः॥१८॥ ॥अथ व्यवहारांतरमाह॥सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा॥मध्यमाग्र
हभुक्तिश्च सावनेनैव गृह्यत इति॥सूतकं जन्ममरणसंबंधि॥आदिपदग्राह्यं चिकित्सितचांद्रायणादि तस्य परिच्छेदः निर्णयः॥दिनाधिपमासेश्व
रवर्षेश्वराः॥तथा समुच्चये ग्रहाणां गतिर्मध्यमा॥तुकारात्स्पष्टगतेर्निरासः तस्याः प्रतिक्षणं वैलक्ष्यादिन संबंधस्याभावात्॥एतेन स्पष्टगत्या
स्पष्टग्रहस्य चालनेन निरस्तं॥स्फुटत्वादिति सूचितं सावनमानेन एवकारादन्यमाननिरासः गृह्यते सुधीभिरंगीक्रियते॥अत्र बहुवचनानुरोधेन
गृह्यते इत्यत्र बहुवचनं ज्ञेयं॥१९॥अथ दिव्यमानमाह॥सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्॥यत्प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणादि
ति॥ ॥पूर्वार्द्धं पूर्वं व्याख्यातं॥यदहोरात्रं पूर्वं प्रोक्तं सूर्यस्य भगणभोगपूर्ते प्रोक्तं पूर्वमनेकधा निर्णीतं तदहोरात्रं दिव्यमानं स्यात्॥२०॥अ
थावशिष्टं प्राजापत्यब्राह्ममाने आह॥मन्वंतरव्यवस्थानं प्राजापत्यमुदाहृतं॥न तत्र द्युनिशोर्भेदो ब्राह्मं कल्पः प्रकीर्तितमिति॥मन्वंतरव्यव
स्था मन्वंतरावस्थितिः युगानां सप्ततिः सैकेत्यादिनमध्याधिकारोक्तेत्यर्थः॥प्राजापत्यं मानं मानज्ञैरुदाहृतमुक्तं॥मनूनां प्रजापतिपुत्र
त्वात्॥ननु देवपितृमानयोः दिनरात्रिभेदो यथोक्तस्तथास्मिन्माने दिनरात्रिभेदप्रतिपादनं कथं नोक्तमित्यत आह॥नेति॥तत्र प्राजापत्य
माने द्युनिशोः दिनरात्र्योर्भेदः॥विवेकः गुरुसौरचांद्रमानवन्नास्ति॥ब्राह्ममानमाह॥ब्राह्ममिति॥कल्पः युगसहस्रात्मकः प्रागुक्तः ब्राह्ममानं
मानज्ञैरुक्तं॥यद्यपि पूर्वं पित्र्यवार्हस्पत्यमानयोरनुक्तेरत्र तयोरेव निरूपणं युक्तमन्येषां निरूपणं तु पूर्वोक्तत्वात् पुनरुक्तं॥तथापि पूर्वं गणि
तानुपजीव्यपरिभाषा कथनावश्यकतया गणितप्रसक्त्यर्थं तेषां मानेन निरूपणादत्र तु विशेषकथनार्थमानत्वं॥न पुनस्तेषां निरूपणं १८
प्रश्नोत्तरत्वेनाक्षतिरन्यथा प्रश्नानुपपत्तेरिति दिक्॥२१॥अस्योक्तमुपसंहरति॥एतत्ते परमाख्यातं रहस्यं परमद्भुतं॥ब्रह्मैतत्परमं पुण्यं
सर्वपापप्रणाशनमिति॥हे परम हे सर्वश्रेष्ठ सर्वभक्तत्वात्ते तेन तुभ्यं एतत् ध्रुवोक्तं परं हितोपकथनं आख्यातं निराकांक्षतया संपूर्णं कथितं॥पूर्वं साव
शेषमुक्तं स्थितमिति॥त्वया प्रश्नाः कृतास्तदुत्तररूपं हितोपकथनमिदानीं संदिग्धमस्तीति॥तव संशयानोऽद्य वर्तीति भावः॥ननु मत्प्रश्नं विना पूर्वमिदं
कथं नोक्तमित्यत आह॥रहस्यमिति॥कुत इत्यत आह॥अद्भुतमिति॥आकाशस्थग्रहनक्षत्रादिस्थितिज्ञानसंपादकत्वादाश्चर्यकरमित्यर्थः॥त
थाच मया पूर्वोक्तं येन साक्षाज्ज्ञानयाऽकृतं तेन वक्तुं शक्यं प्रश्नाः कृताः शास्त्रस्तु नरत्वेन हितोपं मद्भुक्तमिति त्वां परीक्ष्य त्वां प्रत्युक्तं रहस्यमिति भावः
नन्वन्यशास्त्राणां ज्ञानात् ब्रह्मानंदावाप्तिस्यात्तेनत आह॥ब्रह्मेति॥एतन्मदुक्तं ब्रह्मसमं॥तथाचान्यशास्त्राणां ब्रह्मसमत्वाभावेपि तज्ज्ञानात्

ब्रह्मानंदावाप्तिस्यात् ब्रह्मस्वरूपात् ब्रह्मानंदावाप्तौ किं चित्रमिति भावः॥कुत इदं ब्रह्मसममित्यत आह॥परममिति उत्कृष्टं अत्र हेतुभूतं द्वय
माह॥पुण्यं सर्वपापप्रणाशनमिति॥पुण्यजनकं सर्वपापप्रणाशकं॥२२॥नन्वस्माद्ब्रह्मानंदावाप्तिरुक्ता पूर्वं ग्रहलोकप्राप्तिश्चोक्ता तज्ज्ञानयोः किं फलं
भवतीत्यत आह॥दिव्यं चार्क्षं ग्रहाणां च दर्शितं ज्ञानमुत्तमं॥विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतमिति॥आर्क्षं नक्षत्रसंबंधि ज्ञानं ग्रहाणां ज्ञानं च
समुच्चये॥उत्तमं सर्वशास्त्रेभ्य उत्कृष्टं॥अत्रेदं तु भूतं विशेषणं दिव्यं स्वर्गलोकात्यंतं दर्शितं मया तुभ्यमुपदिष्टं विज्ञाय ज्ञात्वार्कादिलोकेषु सूर्यादिग्र
हलोकेषु स्थानं अधिष्ठानं प्राप्नोति शाश्वतं नित्यं ब्रह्मसायुज्यरूपं स्थानं पूर्वार्द्धस्थद्वितीयचकारः समुच्चयार्थः कार्क्षज्ञानेति तथा चोभयफलं क्रमे
ण भवतीति भावः॥यत्वेतत्ते परममाख्यातमित्यादिश्लोकः क्वचित्पुस्तके अस्मोक्तेः कास्त्रुर्वंनास्ति॥किं तु मानं निरूपणं तस्य दिव्यं चार्क्षमित्यादिश्लो
कांतं मानाध्याय समाप्तिं कृत्वाग्रे॥यथाशिखा मयूराणां नागानां मणयो यथा॥तद्वद्वेदांगशास्त्राणां गणितं मूर्धनि स्थितं॥१॥नदेयं तत्कृतघ्ना
यवेदविप्लवकाय च॥अर्थलुब्धाय मूर्खाय खाहंकारायपापिने॥२॥तवं विधाय पुत्राय वाप्यदेयं सहजाय च॥दत्तेन वेदमार्गस्य समुच्छेदः कृतो
भवेत्॥३॥प्रजेत्तामं धनामित्रगुरुनिष्ठा तु दारुणा॥ततः शांताय शुचये ब्राह्मणायैव दापयेत्॥४॥चक्रानुपातजोमध्यो मध्यवृत्तोशजस्फु
टः॥कालेनाहं कृसमानस्यात्तनो वीजाकि यो च्यते॥५॥रावपादिशिंदुरं कप्राभकोनक्षत्रकक्ष्या॥शेषं नक्षत्रकक्षायास्त्यजेच्छेपकयोस्तयोः॥६॥यद्दत्तं
तद्भवेत्स्थानं कक्षयातिथिनिघ्नया॥वीजं भागादिकं तत्स्यात्कारयेत्तद्धनं रवौ॥७॥त्रिगुणं शोधयेदिंदौ जिनघ्नं भूमिजे क्षिपेत्॥दृग्यमघ्नमृणं जीवे
खरामघ्नं गुरारृणं॥८॥ऋणं व्योमनवघ्नं स्यादानवेड्यवलोच्चने॥धनं ससागरं मंदे परिधीनामथोच्यते॥९॥युग्मातौ त्वपरिधयः एतेनित्यं
परिस्फुटाः॥ओजांतौ त्वास्तत्तेयाः परिवीजेन संस्कृताः॥१०॥वन्हिघ्नं निवीजकानां जपदांते वृत्तभागकान्॥सूर्येंद्रोर्मनवोदंताधृतितत
कृतोन्निताः॥११॥बाणतर्कामहीजस्य सौम्यस्याचलवाहवः॥वाक्पतेरस्तत्राणि ग्योमशीतांशावोभृगोः॥१२॥मन्यतेवार्कपुत्रस्य वीजमे
तेषु कारयेत्॥वीजं खाग्नयुधृतं शोध्यं परिध्यंशाशुभास्वतः॥१३॥रनाप्तं योजयेदिंदोः कुजस्याभ्रहतं क्षिपेत्॥वेदघ्नं इच्छहतं योज्यं सूरे
इतंधनं॥१४॥धनभृगोर्भुवोनिघ्नं रविघ्नं शोधयेच्छनैः॥एवं मांदाः परिध्यंशाः स्फुटास्तु वन्हिशीघ्रकान्॥१५॥भौमस्याभ्रगुणाक्षीणि बुधस्या
द्रियुणेरवः॥बाणाक्षादेवपूज्यस्य भार्गवस्यें दुपड्यमाः॥१६॥नागाश्वंद्राध्ययः शीघ्राश्चोजांते वीजवर्जिताः॥द्विघ्नं स्वं कुजभागेषु वीजं द्विघ्नम्
धो विदः॥१७॥जत्याष्टिघ्नं धनं स्वरेरिंदुघ्नं शोधयेत्कवेः॥चंद्रघ्नमृणमर्कस्य स्युरेभिर्ह कृसमा ज्याः॥१८॥एतद्वीजं मयाख्यातं प्रीत्या परम्या
तव॥गोपनीयमिदं नित्यं नोपदेश्यं यतस्ततः॥१९॥पारीक्षिताय शिष्याय गुरुभक्ताय साधवे॥देयं विप्राय नान्यस्मै प्रतिकंचुककारिणे॥
२०॥वीजं नित्यं शेषसिद्धांत रहस्यं परमं स्फुटं॥याज्ञापाणिग्रहादीनां कार्याणां शुभसिद्धये॥२१॥इत्यस्य कस्मिंश्चित्पुस्तके लिखितस्य वाजोपन
यनाध्याय स्यांते लिखितो दृश्यते॥तत्तु न समंजसं॥उत्तरखंडे ग्रहगणितनिरूपणाभावात्तन्निरूपणप्रसंगनिरूपणीयस्याध्यायस्य लिख

सू० प्र० नागौ चित्स्यात्॥स्पष्टाधिकारे यदंतेवास्यालिखनस्य युक्तत्वाच्च॥किंचमानानि फलानि किंचतौशिति प्रश्नाग्रे प्रश्नानामभावात् प्रश्नोत्तरभूतोत्तर
खंडेऽस्यालिखनमसंगतं॥अपिचउपदेशकाले बीजाभावाद्ग्रंतरदर्शनमनियतं कथमुपदिष्टमन्यथोत्तरार्द्धं तत्तेनैवोक्तं स्यादित्यादिविचारेण
११ केनचिद्बुद्धेन बीजस्यार्थफलकत्वज्ञापनार्थं तेन बीजोपनयनाध्यायः॥प्रक्षिप्त इत्यवगम्यते व्याख्यानं इति मंतव्यं॥२३॥अथ मुनिर्मुनीन्प्र
ति कथितसंवादस्योपसंहारमाह॥इत्युक्त्वा मयमामंत्र्य सम्यक् तेनाभिपूजितः॥दिवमाचक्रमे कोंशाः प्रविवेश स्वमंडलमिति॥सूर्यांशपुरुषो
मयासुरमामंत्र्य सम्यक् कृतत्वात् ग्रहादिचरितमुपदिश्य पश्चात् तेन ... इत्युक्त्वा कथमिति॥समुच्चयार्थकश्चानुसंधेयः॥दिवं
स्वर्गमाचक्रमे आक्रमणविषयी चक्रे॥ननु सूर्यांशपुरुषस्य तस्योर्ध्वं गतो वा पुरुषार्थं इत्यत आह॥तेनेति॥मयासुरेणाभिपूजितः गंधपु
ष्पधूपदीपनैवेद्यवस्त्रालंकरणादिभिः पूजाविषयीकृतमय हारामपि लोके प्रसिद्धं सूर्यतुल्यतेन प्राप्त इति भावः॥ ॥ननु स्वर्गे विकिंस्थानं
गत इत्यत आह॥प्रविवेशेति स्वमंडलं सूर्यमंडलं प्रविवेशेति॥स्म अधिष्ठितवान्॥अत्रापि समुच्चयार्थोनुसंधेयश्चकारः॥२४॥अथ
मयासुर एव स्वोत्कालिकीमाह॥मयोथ दिव्यं तत् ज्ञानं ज्ञात्वा साक्षाद्विवस्वतः॥कृतकृत्यमिवात्मानं मेने निर्धूतकल्मषमिति॥अथ सूर्यां
शपुरुषं तर्धानानंतरं मयासुरः तत् ज्ञानं ग्रहर्क्षस्थित्यादिज्ञानं पूर्वोक्तं दिव्यं स्वर्गस्थं सूर्यात् साक्षात् अनन्यद्वारेत्यर्थः॥उत्तरार्द्धस्थे वपद
मात्रान्वितस्तेन सूर्यांशपुरुषस्य सूर्याभिन्नत्वं तदुत्पन्नत्वात् तत एव भेदेपि साक्षादुक्तं युक्तं ज्ञात्वा आत्मानं स्वं निर्धूतकल्मषं निवारितपापं
कृतकृत्यं संपादितकार्यं मेने मन्यते स्म॥२५॥अथ त्वमिदं ज्ञानं कथं प्राप्तवानिति श्रोतृमुनिभिः पृष्टो मुनस्तान्प्रति तत्प्रत्याः अस्मत्प्रभ
नयूक्तव योमयं प्रतिपत्त ज्ञानं ... इत्याह॥ज्ञात्वा तमृषयः श्चाथ सूर्यलब्धवरं॥परिवव्रुरुपेत्याथो ज्ञानं पप्रच्छुरादरादिति॥॥अ
था मयासुरस्य ज्ञानप्राप्त्यनंतरं ऋषयः सूर्यांशपुरुषमयासंवादाश्रितभूमिप्रदेशासन्नभूमिप्रदेशस्थाः अस्मत्प्रभृतयो मुनयः तं कृतकृ
त्यं मयासुरं सूर्यलब्धवरं सूर्यात् प्राप्तः चरः ... न प्रसादो येनैतादृशं ज्ञात्वा उपसमीपे एत्य आगत्य चः समुच्चये परिववुः वेष्टितवंतः अथो अनं ११
तरं आदरात् स्वं तं साभिलाषत्वात् ज्ञानं ग्रहादिचरितं पप्रच्छुः पृष्टवंतः॥२६॥अथ मयासुरः स ज्ञानं तत्प्रकारज्ञानसमन्वितीन्मुनीन्प्रति
कथयामासेत्याह॥ ॥स तेभ्यः प्रददौ प्रीतो ग्रहाणां चरितं महत्॥अत्यद्भुततमं लोके रहस्यं ब्रह्मसंमितमिति॥सः मयासुरः प्रीतः संतुष्टः
सन् तेभ्यः अस्मत्प्रभृतिभ्यः ऋषिभ्यः ग्रहाणां स्थित्यादिज्ञानं महत् परिमेयं अत एव ब्रह्मसंमितं ब्रह्मतुल्यं लोके भूलोके अत्यद्भुततमं
अत्यंतमाश्चर्यकारकं श्रेष्ठं अत एव प्रददौ प्रकर्षेण निर्व्याजतया दत्तवान् कथयामासेत्यर्थः॥२७॥अथ मानाध्यायसमाप्त्या सूर्यसि
द्धांतसमाप्तिं कस्यचित् लक्षितमाध्यायस्य निवारिकां पद्धिकयाह॥इति सूर्यसिद्धांते मानाध्यायः॥समाप्तस्य सूर्यसिद्धांत इति स्पष्टं॥२

रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे॥मानाध्यायोत्तरदले पूर्णं गूढप्रकाशके॥१॥भागीरथीतीरसंस्थे शंभोर्वाराणसीपुरे॥ब
ल्लालगणको रुइंजपासको भवद्बुधः॥तस्यात्मजाः पंचगुणाभिरामा ज्येष्ठः सरामः सकलागमज्ञः॥तनोपपत्तिः स्वधिया नितांतं प्रका
शितानंतसुधारसस्य॥२॥ततः स कृष्णो जहगीरसार्वभौमस्य सेवाधिगतप्रतिष्ठः॥श्रीभास्करीये विवृत्तं तु येन बीजं तथा श्रीपति
पद्धतिः सा॥३॥गोविंदसंज्ञस्तु ततस्तृतीयस्तस्यानुजोहं गुरुलब्धविद्यः॥विश्वेशपादन्यस्तनिविष्टचित्तः काशीनिवासी सकला
भिमान्यः॥४॥श्रीरंगनाथोर्कमुखोत्थशास्त्रे गूढप्रकाशाभिधटिप्पणं सः॥कृत्वा महादेवबुधाग्रजोथ विश्वेश्वरायार्पितवान्सु
बुद्ध्या॥५॥शकेतत्वतिथ्यु १५२५ न्मिते चैत्रमासे सिते शंभुतिथ्यां बुधे कोदयान्मे॥दयाद्यप्रहुनाराच ५२।३० नाडीयुजाते मुनीशा
र्कसिद्धांतगूढप्रकाशो॥६॥गूढप्रकाशकं दृष्ट्वा रंगनाथमवंति भुः॥मुनीश्वरस्य सहजं लभंतां गणकाः सुखं॥७॥ ॥इति श्रीसक
लगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचितः सूर्यसिद्धांतगूढार्थप्रकाशकः संपूर्णः॥अत्र ग्रंथसंख्या
३०० आस्मिन्सर्वोत्तरार्धयोर्मिलित्वा ग्रंथसंख्या ८८०० ॥ ॥ ॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिगूढार्थप्रकाशिकाउत्तरखंडःसमाप्तः॥